

# कालिदास-भारती



रेवाप्रसाद द्विवेदी

# कालिदास-भारती



रेवाप्रसाद द्विवेदी

# कालिदासभारती

कालिदाससाहित्ये निबन्धाः

•

रचयिता

महामहोपाध्याय

आचार्य-रेवाप्रसाद-द्विवेदी 'सनातनः'

सम्मानित-(संस्कृत)-आचार्यः

काशीहिन्दूविश्वविद्यालये

•

प्रकाशकम्

कालिदाससंस्थानम्

वाराणसी-५

२००५

# कालिदासभारती
कालिदाससाहित्यस्याध्ययनम्

रचयिता :

महामहोपाध्याय

**आचार्य-रेवाप्रसाद-द्विवेदी**

पूर्वसाहित्यविभागाध्यक्षः संस्कृतसङ्कायाध्यक्षश्च,
काशीहिन्दूविश्वविद्यालयः, वाराणसी

प्रकाशनवर्षम् २००५

© सर्वेऽधिकाराः लेखकाधीनाः

मूल्यम् : रु० ४००.००

प्रकाशकः —

**डॉ० सदाशिवकुमारो द्विवेदी**
मानदसचिवः,
कालिदाससंस्थान,
२८ महामनापुरी, वाराणसी—५
दूरभाष (०५४२) २५७०६८२

मुद्रकः

**श्रीजी प्रिन्टर्स,**
नाटी इमली, वाराणसी-१

# KĀLIDĀSA-BHĀRATĪ

(The Language and Literature of Kālidāsa)

Mahāmahopādhyāya
Ācārya Rewāprasāda Dwivedī
Sanātana

Kālidāsa Saṁsthāna
Varanasi
2005

# KĀLIDĀSA-BHĀRATĪ

The Language and Literature of Kālidāsa


Author :

Mahāmahopādhyāya
**REWAPRASAD DWIVEDI**
Retd. Prof. and Head, Dept. of Sahitya,
Dean, Faculty of Sanskrit Learning &
Emeritus Professor (Sanskrit)
Banaras Hindu University
Varanasi-5



Published in 2005



© Writer : Rewāprasāda Dwivedī



Price : Rs. 400.00


Publisher :

**Dr. Sadashiv Kumar Dwivedi**
Hon. Secretary,
Kālidāsa Saṁsthāna,
28, Mahamanapuri, Varanasi-5
e-mail : sadashivdwi@yahoo.co.in
Tel. : (0542) 2570682

Printer :

**Shreejee Printers**
Nati Imali, Varanasi-1

# समर्पणम्



**श्री महावीरप्रसाद मोरारका**

(१५.७.१९१९-१९.१०.१९८७ ई.)

मोरारकामहावीरप्रसादयशसो लिपौ।
सनातनीया स्यादेषा भारती हेमपट्टिका।।

श्रीचन्द्रशेखर इति प्रथितः प्रधानमन्त्री समाश्रयद् यं निपुणं युवानम्।
श्रीमान् स एष कमलः सदृशस्तनूजस्तस्याद्य पोषयति चेत् स्वगिरं क्षमं तत्।।

**रेवाप्रसादस्य द्विवेदिनः**

# प्रावेशिकी

अथेयं प्रस्तूयते 'कालिदासभारती'–ति पितृचरणानां म.म. पण्डितरेवाप्रसादद्विवेदिनां कालिदासभारतीमधिकृत्य सागरिकादिषु प्रकाशितचराणां संस्कृतनिबन्धानां सञ्चिका। अत्र यत् स्वत्वं यच्च सत्त्वं तन्न शपथप्रत्ययेम्। सहृदयाः साहित्यविद्यानदीष्णाश्चानुभविष्यन्त्येव तदुभयं स्वत एव।

'अलं ब्रह्मे'–ति नाम्ना प्रकाशिताया काव्यशास्त्रनिबन्धसञ्चिकाया इयमनुजा। अत्राधिकां प्रीतिं दर्शयेयुरध्येतारः। २०७५ वर्षाणि जातानि कालिदासस्य। विविधासु लिपिषु लिखितमुत्कीर्णं वा तस्य साहित्यं बहुविधां ग्लानिमापेदे। तस्या अनुभव एतैर्निबन्धैः कर्त्तुं शक्यते।

तदिदमपि प्रकाशनं मुम्बईस्थस्य श्रीमन्महावीरप्रसादमोराराकाशिक्षा–न्यासस्यार्थिकेन साहाय्येन सम्पद्यत इति तदध्यक्षेभ्यः पूर्वकेन्द्रराज्यमन्त्रिभ्यः श्रीकमलकुमारमोरारकामहोदयेभ्यः साधुवादशतान्यर्पयति संस्थानमिदम्।

अस्माकमग्रजा डॉ० सर्वज्ञकुमारद्विवेदिमहोदया अपि सादरमत्र स्मर्यन्ते येषामाशिषा संस्थानमिदं प्राणिति प्रगल्भते च गभीरतरं शास्त्रनिषेवणे।

मन्ये सहृदयाः प्रसत्स्यन्त्येतेनोपक्रमेण।

३१ मार्च २००५

**सदाशिवकुमारो द्विवेदी**
मानदः सचिवः, कालिदाससंस्थानम्
वाराणसी–५

# आह्वानम्

काव्यं वाक् संस्कृता सा भजति किल शुभां पाणिनेर्यां निदेशा—
न्नित्यां कैशोरलक्ष्मीं फलति खलु ततः कालिदासः कवीशः ।
अब्दानां सा सहस्रद्वयमधिशतकं यापयित्वाऽन्वभूद् यं
संवर्त्तं तस्य गाथां कलयितुमिह समाहूयसे कालिदास! ॥

भारतीं तावकीं कालिदास! त्वं हि विशोधयेः ।
सृतिर्या त्वत्पदाब्जानां तां श्रयामः सनातनाः ॥

एषा त्वद्भारती तुभ्यमेव संशोधिताऽर्प्यते ।
कालिदास! त्वमेवैहि भव चाऽत्र परीक्षकः ॥

—रेवाप्रसादस्य द्विवेदिनः

# विषयानुक्रमः


| | लेखाः | पृष्ठसंख्या |
|---|---|---|
| १. | महाकविः कालिदासः | १ |
| २. | कालिदाससाहित्ये मूलानुसन्धानम् | १३ |
| ३. | कालिदासभारती (१) सौभाग्यम् | ५० |
| ४. | कालिदासभारती (२) उपहारः | ७१ |
| ५. | कालिदासभारती (३) बालातपः | ८३ |
| ६. | कालिदासभारती (४) प्रणयः | ९६ |
| ७. | कालिदासभारती (५) प्रथम—शब्दः | १२६ |
| ८. | कालिदासभारती (६) देववृक्षाः | १३५ |
| ९. | कालिदासभारती (७) कालिदाससाहित्ये योगविद्या | १६२ |
| १०. | कालिदासभारती (८) उत्तमं सौकुमार्यम् | १८६ |
| ११. | कालिदासभारती (९) कालिदाससाहित्ये चित्रकला | २०० |
| १२. | कालिदाससाहित्ये गङ्गा | २१३ |
| १३. | मेघदूते तिथिनिश्चयः | २२८ |
| १४. | मेघदूतेऽभिव्यक्तिदोषाः | २४४ |
| १५. | मेघदूतस्यैकं पद्यम् | २६२ |
| १६. | कुमारसंभवे कालिदासोद्भटाचार्ययोः संवादः | २७३ |
| १७. | रघुवंशसञ्जीविन्यां पाठभेदाः | २८९ |
| १८. | महाकवेरश्वघोषस्य काव्यकला | २९६ |
| १९. | भट्टहेमाद्रे रघुवंशदर्पणः | ३०८ |
| २०. | संपादनसप्ततिः | ३७२ |

# महाकविः कालिदासः

कुसुममित्युदीरिते परिमलस्येव, मधुमास इत्यभिहिते कुसुमस्येव, ऋतुचक्रमित्युक्ते च मधुमासस्येव भारतमित्युक्ते संस्कृतस्य, संस्कृत–मित्युदीरिते कालिदासस्य, कालिदास इत्यभिहिते च महाकवित्वस्य स्वयमेवोपपद्यते स्मृतिः। पर्यायतामिवापन्ने हि ध्वनिकारसमयादेव कालिदास इति महाकविरिति च सुगृहीताक्षरे पदे। कालिदासात् परं लब्ध्वाप्यनितर–साधारणं प्रतिभागुणं रूपकमेव कैश्चिन्निरमायि न महाकाव्यम्, महाकाव्यमेव वा कैश्चिन्निरमायि न रूपकम्, तदुभयस्य स्वरूपमात्रं चैकेन निरवर्त्ति न त्वात्मा। ततश्चैतस्मिन्नतिविचित्रकविपरम्परावाहिनी सुमहति महाकालप्रवाहे संपूर्णेऽपि वसुमतीतले सर्वास्वपि च भाषासु सिद्धसरस्वतीकैरपि महात्मभिर्न तथा निर्व्यूढो महाकवीनां मार्गो यथा कुमारसंभवादिवेधसा कालिदासेन। एवं निस्सपत्न एव महाकविविरुदः कालिदासस्य साम्प्रतमपि। इदानीं यावत् तासु तासु भाषासु, तेषु तेषु च देशेषु समुत्पन्ना ये कवयस्तेषां परम्परायां साम्प्रतमपि कालिदास एव दीपशिखायते, अधितिष्ठति च कनिष्ठिकाम्। नास्त्येषाऽऽस्माकीना श्रद्धा, अनुभवपरीक्षे अपि तथैवेति सुदृढं प्रतीमः। अयमत्रास्माकं श्लोकः–

**एके सत्कवयः प्रबन्धरचनाशौण्डीर्यधुर्याः परे**
**नानारूपकसन्धिबन्धकलनाटोपैकबद्धादराः ।**
**वाचामेव विचित्रगुम्फनविधावन्येऽद्भुता किन्तु यः**
**सामग्र्येण समग्रतां कवयतेऽसौ कालिदासः परम् ॥**

सोऽयं महाकविर्भगवतीं सरस्वतीमात्मनैरपेक्ष्येणैव समाराधयति नैष्कर्म्ययोगेनेवात्मकलां योगी। नासौ निर्दिशति स्वकीयं गोत्रम्, न परामृशति

स्वकीयौ पितरौ, न स्मरति स्वकीयां जन्मभूमिं, न वोद्दिशति स्वकीयं स्थितिसमयम्। महार्णवप्रतिस्पर्धिषु, कुलाचलसगोत्रेषु च सप्तस्वप्यस्य काव्येषु स्वपरिचये तथाऽसौ मौनमाश्रयते यथा न शक्यते निर्णेतुं किंगोत्रः, किंक्षेत्रः, किंकालश्चैष महाकविरिति। अस्ति चेयं महात्मनां परम्परा। न वयं जानीमो मन्त्रकृतो महर्षीन् कुत्र, कदा वैते कथं नु जीवनं निरूहुरिति, न वादिकाव्यस्य विधातारं वाल्मीकिं, नापि च महाभारतमहापुराणोपपुराणानुपुराणादिविधायकं व्यासम्, अन्याँश्च व्याकरणाष्टाध्ययीमहाभाष्यादि—परमाद्‌भुतमहा—प्रबन्ध—सहस्रसमुद्‌भासित—भारतवसुन्धरान् पतञ्जलिप्रभृतीन् महर्षीन्। सेयं परतमा काष्ठा सारस्वत—साधनामहासवनस्य यदात्मविस्मरणं नाम। अस्ति चेयं सुप्ररूढा कालिदासेऽपि।

अथापि 'तत्सृष्ट्वा तदेवानुप्राविशदि'ति न्यायाद् याः किलास्य स्वप्रतिबिम्बभूताः कृतयस्ताभ्य उत्प्रेक्ष्यत एव देशकालादिकमस्या स्मर्यते खलु कालिदासो हर्षवर्धनसंमानितसरस्वतीकेन तत्रभवता हर्षचरितविधात्रा बाणभट्टेन, स्मरति च स्वयं पुष्यमित्रस्येति केवलमिदमेव शक्यते वक्तुं यन्महाकविः कालिदासो हर्षवर्धनात् पूर्वं पुष्यमित्राच्च परं भारतीयामिमां वसुमतीं देहबन्धेन सममण्डयदिति। हर्षवर्धनो हि संप्रत्यपि प्रवर्त्तमान—चङ्क्रमणस्य विक्रमसंवत्सरचक्रस्य सप्तमे शतकपर्याये समभूत्। पुष्यमित्रश्च संवत्सरादस्मात् पूर्वं व्यतीते सार्धे वर्षशतके। एवं चैतस्मिन् वर्षशतकाष्टके क्वापि निर्धारणीयो मनुष्यदेहः कालिदासः। शतं वर्षाणि हि मनुष्यशरीरस्य पूर्णं वयः। ततश्च नासावष्टावपि शतकानि जीवितुं क्षमः। इयमत्र विचारवीथी—

विक्रमसंवत्सरात् पूर्ववर्ति प्रथमं वर्षशतकमादाय हर्षवर्धनस्य समयं यावद् व्यतीते सुमहत्यपि समयान्तराले द्वावेव राजवंशौ भारतीय—मितिहासमलङ्कुर्वाते गुप्तवंशः शुङ्गवंशश्चेति तौ। अनयोर्गुप्तवंशो विक्रमसंवत्सरस्य चतुर्थाच्छतकात् षष्ठं शतकं यावद् राज्यधुरमुवाह। अत्रापि द्वावेवाप्रतिरथौ समुद्रगुप्तस्तत्पुत्रश्चन्द्रगुप्तश्चेति। अनयोरपि चन्द्रगुप्तो

विक्रमादित्य–इत्युपाधिमापेदे शकान् पराजित्य। श्रूयते हि कालिदासो विक्रमादित्यसभाया अन्यतमं कविरत्नमभूदिति। तथा च पद्यम् (२२.१०)–

**ध्न्वन्तरि–क्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः।**
**ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य।।** इति।

किन्तु संपूर्णेऽपि कालिदाससंसाहित्ये न ह्येव दृश्यते विक्रमादित्य–शब्दः, विक्रमसंवत्सरसमुल्लेखो वा। नापि दृश्यन्ते समुद्रगुप्त–चन्द्रगुप्त–कुमारगुप्त–स्कन्दगुप्त–प्रभृतयोऽभिधानशब्दाः। इदमपरमत्र प्रतिकूलं यत् कालिदासे स्थलविशेषस्य गुप्तावदानपरिहारेण समुल्लेखः। चन्द्रगुप्त–विक्रमादित्यस्य सेनापतिना नीचपर्वतस्य गुहासु देवानां प्रतिमाः समस्थापिषत। अस्ति च तासु गणेशस्याप्येका प्रतिमा दुर्गायाश्च। कालिदासः पुनर्नीचगिरिमुल्लिखति, समुल्लिखति च तद्गता गुहाः, न च स्मरति तद्गता अमूः प्रतिमाः। दुर्गागणेशौ पुनः संपूर्णेऽपि कालिदासवाङ्मये नामतोऽपि न लभ्येते। नियतमेव कालिदासो गुप्तवंशं न जानाति। यद्यपि कालिदाससाहित्ये 'चन्द्रः, विक्रमः, कुमारः, स्कन्दः, गुप्तः, गोप्ता' इत्येवंप्रभृतयः प्रकीर्णा एव तत्र तत्र शब्दाः, किन्तु गुप्तवंशीयैरेव कालिदाससाहित्यादेते गृहीताः, न तु गुप्तवंशीयानां नामानि महाकविनाऽनुकृतानि, अद्यापि साहित्यप्रसिद्धानामेव शब्दानामभिधान–शब्दत्वेन ग्रहणस्य जागर्त्तेः। इदानीमपि केचिद् आनन्दवर्धन इति नाम्ना पुत्रानुल्लापयन्ति, केचित् क्षेमेन्द्रनाम्ना, केचिद् राजशेखर–कालिदास–चारुदत्त–प्रभृतिभिर्नामभिः, केचिच्च स्कन्द–कुमारमहेन्द्रादिभिः शब्दैरपि। ज्योतिर्विदाभरणे यदयमुल्लेखो यदस्य निर्माता कालिदासः, स एव चासौ येन रघुवंशादिकाव्यत्रयं निर्मितमिति तच्च भ्रामकमेव ज्योतिर्विदाभरणस्यास्य कालिदासकविकर्मणो दूरं विसंवादात्। सन्ति ह्येतस्य पद्यानि नितान्तमप्रौढानि। एवं च ज्योतिर्विदाभरणे समुल्लिख्यमान–नाम–सेनासमुदयरूम–

देशाधिपपराभवावदानोऽपि विक्रमादित्यः कालिदासेन न संसृज्यते। भवतु वा कालिदासनामा कश्चिदन्यः कविः। आसन्नेव त्रयः कवयः कालिदासाभिधाना राजशेखरं यावत्। भोजप्रबन्धकल्पमेव हि ज्योतिर्विदाभरणम्। अस्यैव हि पद्यं 'धन्वन्तरिक्षपणके' त्यादिकमिति पूर्वं यदुद्धृतम्। एवं च गगनगतस्यारविन्दस्य सौरभमिव दूरमपहस्तितं ज्योतिर्विदाभरणप्रामाण्येन कालिदासस्य विक्रमादित्यसम्बन्धित्वम्।

भिन्ना च स्थितिः शुङ्गवंशस्य। तमिमं कालिदासो न केवलं स्मरति, यावन्नाटकनायकत्वेनापि सभाजयति। शुङ्गानां प्रथमो राजपुरुषः पुष्यमित्रः, द्वितीयस्तत्पुत्रोऽग्निमित्रस्तृतीयश्चाग्निमित्रपुत्रो वसुमित्रः। एतेषु पुष्यमित्रस्य विरुदः सेनापतिरिति। आयोजि पुष्यमित्रेणाश्वमेधो यत्र चार्यतामभजत व्याकरणमहाभाष्यस्य कर्त्ता भगवान् पतञ्जलिः। विदिशां राजधानीकृत्य एतेन नियोजितः पश्चिमाञ्जनपदान् नियमयितुमग्निमित्रः, अश्वमेधाश्वं संरक्षितुं च वसुमित्रः। वसुमित्रेणानेनास्मिन्नेव प्रस्तावे जितः खलु सिन्धुतीरचारी तुरगानीको यवनः। पुष्यमित्रेणैव भूयोऽपि प्रत्यस्थापि साकेतं यद्धि निश्शेषमभ्रंशयत बृहद्रथशासने यवनः। यदिदं महदेवावदानं वैदिकस्य धर्मस्य पुनःप्रतिष्ठापयितुः सेनापतेः पुष्यमित्रस्य। कालिदासः शुङ्गवंशस्य तानिमानखिलानेव विशेषान् कात्स्न्येनोल्लिखति। अग्निमित्रं नायकीकृत्य रचिते मालविकाग्निमित्रनामनि नाटके 'सेनापतेः पुष्यमित्रस्याश्वमेधदीक्षा, अग्निमित्रस्य विदिशास्थितिः वसुमित्रस्याश्वमेधरक्षाप्रस्तावौपयिको यवनपराजय'—एते सर्वेऽपि विशेषा यथातथमेव निरदिश्यन्त, विदिशाया राजधानीत्वं मेघदूतेऽप्यस्मारि, अयोध्याया उपरोधः पुनर्निर्माणं च रघुवंशस्य षोडशे सर्गे प्रत्यक्षतामिवापाद्येताम्, आलिख्यत च यज्ञदीक्षाविधिः, विशेषेण चाश्वमेधवितानसन्तानः संपूर्णेऽपि साहित्ये महाकविना कालिदासेन। अयमत्रापरो गुणो यत् कालिदासः पाण्ड्यानपि स्मरति शुङ्गशासनसमय एव दाक्षिणात्येषु उरगपुरं राजधानीकृत्य प्रतिष्ठितशासनचक्रान्। अयमेव

स समयो यत्र 'हूएनो'—पदाभिधा हूणा अपि भारतीयैः पराजिताः। रघुदिग्विजये तानेतान् हूणानपि कालिदासो न विस्मरति।

संप्रति प्रवर्त्तमानं विक्रमसंवत्सरं विक्रमादित्यनामा कश्चन महाप्रभावो राजा शुङ्गशासनस्यान्तिमे चरणे प्रवर्त्तयामास, वर्धयामास चोज्जयिनीं राजधानीत्वेनेति सुमहती प्रसिद्धिः। तस्या अस्याः सर्वथैवानभिज्ञः कालिदासः। स हि नितान्तमेवानुरज्यति श्रीविशालायामुज्जयिन्याम्. न च स्मरति तत्रत्यं विक्रमादित्यं तस्य संवत्सरं वाऽनवधानेनापि। इत्थं महाकविः कालिदासो गुप्तवंश इव विक्रमादित्येऽपि यावान् वाचयमस्तावानेव प्रगल्भवाक् पुष्यमित्रादिषु शुङ्गेषु तदवदानेषु च।

विशाखदत्तस्य मौर्यचन्द्रगुप्तेन, भवभूतेः रामेण, नारायणभट्टस्य च श्रीकृष्णेन समानकालतां परिजिहीर्षद्भिः कवेः स्वकाव्यनायकसमानकालता नियतमेव परिहरणीया, तथापि नेदं न वक्तुं शक्यं 'कालिदासो मालविकाग्निमित्रनायकेनाग्निमित्रेण सम्बद्ध' इति। शुङ्गवंश—श्रद्धया त्ववरिष्टासौ पुष्यमित्रमेव नायकत्वेन। 'मौर्याणामुच्छेत्ता, शुङ्गराज्यप्रतिष्ठापकः सेनापतिः, द्विरश्वमेधयाजी, वेदधर्मोद्धारकः, साकेतादितीर्थसंरक्षक' इति महान्त्येवावदानानि पुष्यमित्रस्य। क्वासौ महाभागवतः पुष्यमित्रः क्व च विलासबद्धादरोऽग्निमित्रः। सुमहानेवानयोस्तरतमभावः। अथापि पुष्यमित्रं परित्यज्याग्निमित्रमेव नायकत्वेन वृणीते कालिदासः। भवितव्यमेवात्र विशिष्टेन हेतुना। न चासौ लक्ष्यते कश्चिद् विहाय प्रत्यक्षसंपर्कम्। ततश्च साधकतर्कबाहुल्याच्छुङ्गराज्यस्य द्वितीयतृतीययोश्चरणयोः सन्धौ कालिदास आसीदित्येव केवलं विचारसहम्। गुप्तशासकैर्भृशमादृताः 'स्कन्दकुमारादयः' कार्तिकेयपर्याया अपि शुङ्गसमये भूम्नैव लोकप्रियाः। विक्रीयन्ते स्म हि विशाखकानि गृहं गृहमटित्वा विक्रेतृभिः। अत एव भगवान् पतञ्जलिः 'जीविकार्थे चापण्ये (पा०सू० ५.३.९९) अत्र 'अपण्य इत्युच्यते (इवे प्रतिकृतौ इति सूत्रात् प्राप्तः कन्प्रत्ययो भवति) तत्रेदं न सिद्ध्यति 'शिवः,

स्कन्दः विशाख' इति। किं कारणम्? मौर्यैर्हिरण्यार्थिभिरर्चाः प्रकल्पिताः, भवेत् तासु। न स्याद् यास्त्वेताः संप्रति पूजार्थास्तास्वि'—ति वदन् संगच्छते। स्पष्टमेतेन यन्मूर्त्तिकलाऽपि शुङ्गराज्ये भृशं व्यकसदिति। ततश्च कालिदाससाहित्ये नास्ति कश्चिदप्येकोऽपि गुप्तमात्रनियतो विशेषो येन कालिदासस्य शुङ्गसंबन्धोऽपनीयेत। बभूवुश्च त्रयः कालिदासा राजशेखरं यावत्। अस्ति तेष्वेकः कुन्तलेश्वरदौत्य—नामकस्य नाममात्रशेषस्य काव्यस्यापि कर्ता। न खलु तेन कुमारसंभवादिकर्त्तुरस्याभेदस्तर्कसहः। इत्थं निश्चितान् अग्निमित्रादीन् विहाय चन्द्रगुप्तादीन् संदिग्धान् न ह्येव शक्नुमो नेतुं कालिदाससमकालिकतया।

सोऽयं कालिदासो भृशं स्मरति गौरीगुरुं हिमाचलम्, भूम्नाद्रियते च गङ्गां तीर्थराजं च। अस्ति चास्योज्जयिन्यामप्यसाधारणः प्रेमा। नूनं हिमगिरेरुपत्यकैव कालिदासमसूत, उपाहरच्च प्राप्तयौवनमुज्जयिन्यै तम्। 'कर्णाटेषु समुत्पन्नः कालिदास' इति केचित्, वङ्गेष्वित्यन्ये, मिथिलास्वित्येके, माहिष्मतीजनपदेष्विति चापरे श्रद्दधते। वस्तुतस्तु 'सर्वाऽपीयं भारतीया वसुमती कालिदासस्य माता', सोऽप्येषोऽस्याः संपूर्णाया एव नितान्तमेव वात्सल्यपात्रमपत्यरत्नम्। अस्ति हि भारतीयानामुद्घोषो 'माता भूमिः पुत्रोऽहं पृथिव्या' इति।

अस्ति च सहृदयानां श्रद्धा 'कालिदासस्य मुख्यं नाम चन्द्रमौलिरि'ति। तत्र मूलं कालिदासस्यैव **'अद्यप्रभृत्यनवताङ्गि तवास्मि दासः क्रीतस्तपोभिरिति वादिनि चन्द्रमौलावि'**—(कुमार० ५.८६) ति चन्द्रमौलिपदघटितं वाक्यम्। कालिदाससंज्ञायां मूलं पुनः काल्या उपासनातिशयः। सापीयं भगवती काली वर्ण्यत एव शिववरयात्राप्रस्तावे कुमारसंभव एव कालिदासेन **'काली कपालाऽऽभरणे'**(७.३९)—ति। कालिकेयं प्रतीकः सर्व—स्व—समर्पणस्य। तच्चेदं सर्वस्वसमर्पणं कालिदासस्यात्यर्थमेवाभिमतम्। पुत्रलाभाय नन्दिनीसेवायां निरतो दिलीपः कुम्भोदराय सिंहाय स्वशरीरमपि समर्पयति

नन्दिनीनिष्क्रयरूपेण। उद्देश्यं पुत्रलाभः, उपायश्च स्वशरीर—विनाशः। कोऽयं क्रमः? मूढानामियं प्रतिपत्तिरिति व्यवहारदर्शिनः। वक्ति च सिंहोऽपि 'दिलीप, विचारमूढः प्रतिभासि मे त्वमि' (रघु. २.४७)—ति। अस्ति चेदृश एवाऽऽरुणिरीदृश एव चोद्दालकः। श्रूयते च कालिदासोऽपिच्छिन्ते स्म तामेव शाखां मूलतो यामासीदयमारुढः। अमुमेव गुणं प्रमाणीकृत्य योजित एष विद्योत्तमानाम्न्या महाविदुष्या पण्डितैः। भगवती सरस्वत्येव ह्युत्तमविद्यारूपा विद्योत्तमा। सूर्यवंशवृक्षस्य स्वशरीररूपेणावशिष्टां केवलामेकां शाखां दिलीपो गुरु—धनरूपायै नन्दिन्या इव कालिदासोऽपि तस्या अस्यै विद्योत्तमायै स्वमेव बलीकुरुते। स्वकपालबलिदानमयी उपासनाभूमिरेव हि कालिका। तामारूढस्यास्य दिलीपस्येव प्रासीददियं नन्दिनीव विद्योत्तमा। अध्यगच्छच्चाधिगन्तव्यमसावशेषेण तत एवास्य माहेश्वरस्येवाप्रतिहतः प्रसरः सर्वेष्वपि शास्त्रेषु, निरर्गलो वाक्प्रवाहः सर्वास्विपि काव्यविच्छित्तिषु, निष्प्रतिद्वन्द्वश्च महिमा सकलेष्वपि व्यवहारनयेषु। उच्यते चैष 'भगवदनु—ग्रहपवित्रवागि'ति, 'महाकविरि' ति च महामाहेश्वरैरपि।

सोऽयं सिद्धसरस्वतीको महाकविः कस्या मातुरलञ्चकार कुक्षिम्, कस्य पितुरभूषयदुत्सङ्गं, कं च वंशमकरोन्निखिलमानववंशोत्तंसमिति यथा नितान्तमविदितं तथैव कस्या नु धन्यायाः कन्याया अग्रहीत् पाणिपल्लव—मित्यपि। अथापि भावयन्ति रसिकाः **'प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषाय'** इति यक्षवचनात् 'कमला' किल कालिदासस्य प्रेयसीति। अत्रोपच्छन्दयामः श्लोकम्

**काव्यं चेदद्वितीयं प्रभवति हृदयाकाशसंपूरणाय**
**किंवृत्तस्तस्य कर्त्तेत्युपचितकुतुकं जायतां कस्य चित्तम् ।**
**लब्ध्वा माधुर्यकोषं मधु भुवनतले को नु तज्जन्मपत्रं**
**निर्मातुं बद्धभावो भवति मृगयते किञ्च भृङ्गद्रुमादीन् ।।**

इयत् पुनरत्र ब्रूमः—कालिदासः पौरोहित्यं सूक्ष्मतया वेत्तीति नूनमसौ ब्राह्मण एव। न खलु सर्वशास्त्रविदपि पौरोहित्यं यथातथं वेदितुं क्षमते यावदसौ प्रत्यहमिदं न कारयति। न चाब्राह्मणा अत्र सजन्ति, भिक्षाकल्पे। ये च शुङ्गास्तेऽपि भारद्वाजगोत्रीया ब्राह्मणा एव। पुनरप्युज्जीवितं वैदिकं कर्मकाण्डं तैः। आसीच्च कालिदासः कलाविज्ञानेष्वपि नितान्तमन्तरङ्गः। अत्यन्तं शिष्टः प्रियभाषी च महाकविरेष प्रत्याख्यानेनैव निराकरोत्यप्रियम्। नासौ तत्र शापमाश्रयत्याक्रोशं वा। अस्य हि द्रढीयसी प्रतिपत्तिर्यन्मा—धुर्यमप्यमोघमेवास्त्रं सर्वभौमस्य विजयस्य। सर्वेष्वपि संक्रान्तिक्षणेषु जागरूकहृदय एष न खलु न स्वदते सौन्दर्यम्, न खलु न चरितार्थयते यौवनम्, न च खलु न परिपूरयते स्वकीयमानन्दकोषम्, अथापि न ह्येव विस्मरति कर्त्तव्यम्, न क्षणुते युगावश्यकताम्, नावमनुते प्रस्तुतान् विषमविषमान् प्रश्नान्, न च न प्रकाशयते कवित्वमिव जननायकत्वम्, जननायकत्वमिव समाधिदर्शित्वम्, समाधिदर्शित्वमिव च युगनिर्मातृ—त्वमात्मनः। चेतयतेतरामसौ स्वकर्त्तव्यम्, परिचिनुतेतरामसौ युगावश्यकताम्, समाधत्तेतमां च प्रस्तुतान् प्रश्नान्, स्वाधीनैः, सनातनैः, अप्रकम्प्यैश्च समाधिभिः। अस्ति चास्य सर्वसहचमत्कारा भगवती भारती। निरतिशये स्वभावोल्लेखे, लोकोत्तरे सादृश्यविधाने, वचनातीते प्रतिबिम्ब—शिल्पने, सीमातिक्रान्त्युत्तरे च प्रसादमाधुर्यसौभाग्याभिजात्य—लावण्य—कान्ति—संपदतिशये विस्मापयतीव तत्त्वाभिनिवेशिनोऽपि सहृदयधुरीणान् प्रतीयमानबन्धुरं प्रतिभानमस्य। वृक्षेषु वनस्पतिषु, लतासु वल्लरीषु, पशुषु, पक्षिषु, नदीषु, पर्वतेषु, ऋतुष्वार्त्तवेषु, उदयेष्वस्तमयेषु, संपत्सु, विपत्सु रसेषु भावेषु च चित्रकर्मचतुरेव गाढं लग्ना प्रतिभाशक्तिरस्य प्रत्यक्षतामिवोपजनयति विश्वस्यास्य शब्दार्थबन्धेष्वपि। महाकवेरस्य पतिव्रतासौन्दर्यमिव नितान्तं रमणीयं वन्दनीयं च कविकर्म काष्ठाधिरूढिरिव कान्तासंमितस्योपदेशस्य।

शृङ्गारे भृशं रज्यदन्तःकरणस्यास्य दृढां जागरूकतां पश्यामः प्रजातन्तूनामव्यवच्छित्तौ। प्रजातन्तुरप्यस्योभयविधः सन्ततिरूपो जनरूपश्च। यदुच्यते 'प्रजा स्यात् सन्ततौ जन' इति। सोऽयं महामतिः सन्ततिरूपया प्रजया जनरूपायाः प्रजायाः परिपालनं केन्द्रीकरोति लोकमङ्गलाय कविकर्मणे। एवं च धर्मदर्शी ह्येष महामतिः कामेऽपि। तपसा सौन्दर्यमुपजनयति, सौन्दर्यं पौरुषेण योजयति, परिणमयति च तदुभयं कुमाराग्निरूपेण राष्ट्रदेव एव महामतिः सौराज्याय, सौमनस्याय, समुल्लासाय, प्रविकासाय च प्रत्येकं जनस्य। न खलु कालिदासस्य राष्ट्रनायका यादृच्छिकाः। संभवप्रभवा हि ते जन्मशुद्धिसंस्कारयोजनामधिष्ठितैर्मुष्टिपाकं पच्यन्त एते। इयमेवैषां जन्मशुद्धिर्यज्जनयिष्यमाणगतत्वेनाभिलषितेषु विशेषेषु जनकयोरन्तरङ्गता। दिलीपादिभिर्हि ते विशेषाः पूर्वमेवार्जिता येषां संक्रमणेन रघुप्रभृतीनां तदपत्यानां वलक्षं यशोवितानं हंसश्रेणीषु, तारासु, कुमुद्वतीष्वप्सु चाद्यापि विप्रकीर्णमिवाभासते। अत एवैते कुमारा बाल्यादेव भवन्ति जितात्मानः, प्रभवन्ति च प्रजानां भूत्यै। आसमुद्रक्षितीशता ह्येषां जन्मसिद्धोऽधिकारः। न ह्येषां शासने केन्द्रशक्तिर्ह्रसति। संघटनाय हि भवन्त्येषां विजययात्राः, न तु परपराभवमात्राय। उत्सृजन्त्येते सहस्रगुणमेकगुणमादाय। मृन्मयेन परिकरेण संतुष्टचेतसामेषां चतुर्दिगावर्जितसंभृता हिरण्यमयी विभूतिः कणशोऽणुशश्च प्रजाक्षेमायैव कल्प्यते। दृढमवदधत एते राष्ट्रस्यास्य स्थलसीमास्विव जलद्वीपेष्वपि। स्थिरयन्त्येते सर्वत्रात्र सुदृढां रक्षाव्यवस्थाम्, न त्यजन्त्येते—ऽनुपशान्तमेव बाह्यमिवाभ्यन्तरमपि प्रकृतिप्रकोपज्वालामालिनम्। यदिवाऽनुत्थितमेवावतिष्ठत एतेषां राज्ये जनापरागकालुष्यम्। व्यूढोरस्काः, वृषस्कन्धाः, सालप्रांशवः, पुर—परिघ—सुदीर्घबाहुदण्डा एते वीतभयाः कुमाराः कुतो वोपपद्येरन् नोपास्येत चेत् तपश्चरणविधृतसर्वस्वा भारतीया संस्कृतिः, शृङ्गाररतिर्वा। युद्धभूमिर्हि वीराणां स्वयंवरवधूः, न प्रसूः। वरयते खलु सा वीरभावेनालङ्कृतचेतोधातून् कुमारान्, न तु प्रसूते। या च प्रसूते सा हि

शृङ्गारभूमिरेव गृहमेधिनाम्। तामिमां धिक्कुर्वतां दार्शनिकरेफाणां नास्ति मोक्षो राष्ट्रद्रोहकुम्भीपाकात्। बलीयः किल दत्तावधानोऽत्र कालिदासः। न खल्वसावत्र स्वप्नेऽपि प्रमाद्यति। तपोवनान्यप्यस्य गृहीतव्रतानीव भाविनां राष्ट्रपतीनां जन्मशुद्धिशुचये संभवाय। शाश्वते ब्रह्मणि स्थितोऽपि तस्य कण्वमहर्षिः कृष्णशाररूपं धृत्वा स्वयमेव दूरमाकर्षति निरपत्यं ततश्च प्रजालोपभीतं दुष्यन्तम्। स एव हि स्वकीयस्याश्रमस्य साह्नेन योजयति तं शकुन्तलया। दुष्यन्तसत्त्वं बिभ्रतीं नानुमनुते शकुन्तलां दूरदर्शी महर्षिर्दुर्वासा राजान्तःपुरप्रवेशाय, रिरक्षिषति च तस्या गर्भं शापानुग्रहेण राजकुलोचितानां विलासादि–दौर्बल्यानामाक्रमणात्। अस्ति चोद्यतो भगवतो मारीचस्या–श्रमस्तमेतं भाविनं राष्ट्रपतिमभिनन्दितुं गर्भभावेऽपि। एष एवाश्रमस्तमेनं समेधयतितरामपराजितया महौषध्या, जनयति च तत्र सर्वदमनभावमिव भरणक्षमत्वप्रतीकं भरतत्वम्। आदिकवेर्वाल्मीकेरपीयमेव प्रतिपत्ती रामनिर्वासितायां ससत्त्वायां सीतायाम्। वसिष्ठाश्रमस्यैव सा कृपा यया रघुमविन्दत दिलीपः, कौत्सस्यैवासावाशीर्ययाऽजमलभत रघुः, ऋष्यशृङ्गा–दीनामेव च सेष्टिर्यया रामादीनवापद् दशरथः। एवं च 'राष्ट्रमनादृत्य न प्रवर्तते तप' इति राद्धान्तो नतमां तिरोहितः कालिदासस्य। सेयं महाविषयतास्य कविकर्मणः। सुदुर्लभ एष महिमा सुमहत्यामपि सर्गबन्ध–कथाख्यायिका–दशरूप–भावगीति–शिल्पिनां त्रैलोक्य–कविवृषाकपीनां पारम्पर्याम्। अत एव युज्यते वक्तुं 'कालिदासः कविकुलगुरुरि'–ति 'कालिदास कवीनां गणनाप्रसङ्गे कनिष्ठि–काधिष्ठित' इति, 'कालिदासः कविताकामिन्या विलास' इति 'कालिदासो नृत्यलग्नायाः सरस्वत्या उरसि विभ्राजमानं क्रीडाशैलद्वयमि'–ति च। तथा चास्माकं श्लोकः–

**बाणो वाण्याश्चरणरणितं नूपुरं दण्डपादो**
**माघो, दण्डी कटितटरटत् किङ्किणीचक्रवालम् ।**
**पिण्डीबन्धश्चलतरलयोर् हस्तयोर् हीरपुत्रः**
**क्रीडाशैलद्वयमुरसि यत् तत् तु नः कालिदासः ।।** इति।

यस्य किल महाकविरसौ परीपाकः स खलु जिजीविषानाम्नो महामन्त्रस्य जञ्जपूकभाव औपनिषदानाम्। श्रद्धीयते हि तैरेतैर्व्योमविभुनि ब्रह्मणि, आस्थीयते हि तैर्ब्रह्मणोऽप्यस्य नित्यत्वे, चिदानन्दमयत्वे, स्वात्माभिन्नत्वे च। अनुभूयते हि तैरमीभिर् 'जीवो ब्रह्मैव नापर' इति, 'अहमेव प्रत्यक्षं प्रह्मे'ति, 'अयमात्मा ब्रह्मे'ति विविधमुदीर्यमाणो महावाक्यार्थः। अत एवैते धीरा अकृपणाश्च। वस्त्रकल्पानि ह्येषां वपूंषि। तान्येतानि विमलिमपरिवीतान्येव दिदृक्षन्त एते। तावदेव हि तान्येतान्येते बिभ्रति यावदावश्यकानीमानि। ऊर्ध्वमितः स्वैरमुत्सृजन्त्येते पर्युषितानि निर्माल्यानीव योगसमाधिना तानि। न ह्येषु प्रभुत्वाय कल्पेत मृत्युः। वशंवदः किङ्कर एषां यदेष मारः। इदं च विश्वं लीलागारनिर्विशेषमेवेदमेभ्यः। यावदायुष्य–माश्रमव्यवस्थया क्रीडन्त्येते तत्र। हृष्यन्ति, विषीदन्ति, कुप्यन्ति प्रसीदन्ति, हसन्ति, प्ररुदन्ति, रज्यन्ति जुगुप्सन्ते च जगत्प्रपञ्चे यथास्थानममी नीरन्ध्रं निर्विचिकित्सं च। न निलीयन्ते व्यसनेभ्यः, न पराजयन्ते स्वधर्मेभ्यः, नापत्रपन्ते भोगेभ्यः, न जुगुप्सन्ते च करालक्रूराभ्यः कालदंष्ट्रिकाभ्य इमे। नित्योत्साहा नित्याभिनिवेशा नित्यप्रबोधाश्चामी फलान्यपि स्वायत्तीकुर्वन्त्यैकान्तिकतया। नैष्कर्म्येणापि कर्मस्वभियुञ्जाना अमी न स्पृशन्त्येवासिद्धिदोषमफलेग्रहित्वविग्रहम्। परिष्कुर्वन्त्येते शरीरधातून्। परिचिन्वन्त्येते नाडीरसान्। स्पृशन्त्येते मात्राः। निर्विशन्त्येते विषयपानकानि। प्रमाणयन्त्येते प्रवृत्तिम्। बध्नन्त्येते भावान्। श्लिष्यन्त्येते समुत्साहान्। अभिनन्दन्त्येते क्रुधम्। तन्वन्त्येते करुणाम्। शोचन्त्येते प्रणाशान्।

स्मितावदातानना बिभ्यत्येते ह्यकार्यात्। प्रशान्तचेतोधातवः पापाज्जुगुप्समानाश्चेमे धीरमाशेरते तत्त्वज्ञानप्रदुग्धे शमे। भूतार्थ एव हि मानुषभाव एषाम्। न ह्येषां न प्रचेष्टते प्रकृतिः पुरुषार्थाय, न न प्रगल्भते पुरुषार्थश्चातुर्वर्ग्याय, न च न प्रकल्पते चातुर्वर्ग्यं सोपानभावाय। हन्त फलेग्रहिरेषां लोकयात्रा, चरितार्थमेषां जनुः, स्ववशश्चैषामपुनर्भवः। एत एव हि ललितललिता, उदात्तोदात्ताः, प्रशान्तप्रशान्ताश्च धीराः प्रतिफलन्ति प्रज्ञामणिमुकुरे कालिदासस्य नायकत्वेन।।

◈

# कालिदाससाहित्ये मूलानुसन्धानम्

मातृकाणामुपशतत्रयमनुशीलितवद्भिरस्माभिः कालिदासग्रन्थावल्यां प्रकाशितचरे महाकवेः कालिदासस्य साहित्ये भूयांसि महत्त्वपूर्णानि संशोधनान्यनुभूतानि। स्थालीपुलाकतया कानिचिदुपस्थाप्यन्ते तेषु।

## १. ऋतुसंहारे

(क) ग्रीष्मवर्णनपरे प्रथम एव 'प्रचण्डसूर्य' इति पद्ये द्वितीयस्य चरणस्य मूलं 'सदावगाह—क्षतवारिसञ्चय' इत्येवंरूपतयैव विलियिमजोन्स (१७९२), बोल्हेन (१८४०), डमरूवल्लभ पन्त (१८६९), जीवानन्द (१८७२—८१), गोडवोले (१८८६), निर्णयसागर (१९०६), गजेन्द्रगडकर (१९१६), सीताराम सहगल (१९४४), सीताराम चतुर्वेदि (१९४४), शार्पे (१९५८), प्रभृतिभिः प्रकाशितमस्माभिश्च। अस्माभिरनुशीलितानां २८ मातृकाणां मध्ये २७ मातृकास्वयमेव हि लेखः। अयमेव हि लेखो मूलत्वेनादृतः 'मणिरामः, अमरकीर्त्तिः, जीवानन्दः, सेतुमाधवः, काशीनाथशास्त्री'—त्येतैष्टीकाकृद्भिः। अत्र जलक्षये स्वयं ग्रीष्मस्यैव हेतुत्वं प्रसिद्धं, न पुनरन्यस्य कस्यचिद—वगाहादेः। एतच्च स्वयं कालिदासस्यैव ग्रीष्मवर्णनान्तरेण प्रतीतचरम्। रघुवंशस्य षोडशे सर्गे ग्रीष्मवर्णनप्रस्तावे जलक्षयस्य वर्णनाय कविरेष—

**दिने दिने शैवलवन्त्यधस्तात् सोपानपर्वाणि विमुञ्चदम्भः ।**
**उद्दण्डपद्मं गृहदीर्घिकाणां नारीनितम्बद्वयसं वभूव ।।**[१]

इत्येवं स्वतन्त्रं श्लोकमेवारेभे। ऋतुसंहारगते प्रकृतेऽपि ग्रीष्मवर्णने 'मृगाः

---

१. रघु. १६.४७।

प्रचण्डातपे'ति पद्यमारभ्य 'पटुतरदवदाहे'ति पद्यं यावन्नवभि: पद्यैर्जलक्षयमेव व्यावर्णयाञ्चक्रेऽसौ। तत्रहि सरसां कर्दमैकशेषत्वं[१] निम्नगानां विपुलपुलिन–देशत्वं[२] च जलक्षयस्यैव साटोपमाटीकनम्। शाकुन्तलस्य द्वितीयाङ्कारम्भे विदूषकस्यैकोक्तौ गिरिणदीनां या पत्रसाङ्कर्यकषायवारिता साऽपि ग्रीष्मजनित–जल–क्षति–प्रसूतैव।

एवं हि जलक्षये जलराशिकार्श्ये वा सदावगाहस्य हेतुत्वेनोप–निबन्धोऽकिञ्चित्कर एवात्र।

दोषमिममनुशीलयन्त: पाठमत्र पर्यवर्त्तयन्त। तै: खलु द्वितीयचरणस्थं क्षतेति पदं 'क्षमे'ति पर्यणामि, कृतश्च 'सदावगाह–क्षमवारिसञ्चय' इति पाठभेद:। पाठ एष लखनऊनगरस्य अखिलभारतीयसंस्कृतपरिषद: ऋतुसंहारमातृकायां स्पष्टमवेक्ष्यते।[३] निर्णयसागरसंस्करणस्य पाठभेद–टिप्पण्यामप्यसौ भेदोऽसूच्यत। वेङ्कटनाम्ना विदुषा[४] कालेनाम्ना तन्मित्रेण चायमेव पाठो मूलत्वेनामानि। शब्दकल्पद्रुमे राधाकान्तदेवोऽप्यमुमेव पाठं मूलत्वेनाङ्गीचकार।[५] कालिदासग्रन्थसमुच्चयस्य[६] विनायकजोशिनामा सम्पादकोऽपि तमिमं 'क्षम'–पदघटितमेव पाठमाद्रियाञ्चक्रे। रत्नोपपदा श्रीमती कमला कालिदासं गढवालक्षेत्रोत्पन्नमभिमत्य तत्समर्थनेऽमुमेव मूलत्वेन समर्थयति पाठम्। तदेतत् समनन्तरोद्धृतेन कालिदासस्यैव 'दिने दिने' इति पद्येन ऋतुसंहारस्यैव ग्रीष्मवर्णनेन च निराकृतसर्वस्वम्। ग्रीष्मे पिपासाशान्तय एव जलं सञ्चीयते, न तु स्नानाय। उभयेषामप्येषां कृते

---

१. ऋतु. १.१७, १९।

२. ऋतु. १.२७।

३. मातृकाया: क्रमाङ्क:, २८५।

४. १९१६ खीष्टाब्दे प्रकाशितायां बालबोधिन्याम्।

५. 'अवगाह'–शब्दप्रस्तावे।

६. Complete Works of Kalidasa, Bombay, 1976.

क्रियमाणोऽपि जलसञ्चयः कविप्रतिभासंरम्भगोचरो न भवति, ग्रीष्मकृतायाः कृच्छ्रतायाः प्रामुख्यस्य व्याघातात्। अथ 'सदावदाह—क्षत—वारिसञ्चयः' इति यदि 'गाहस्य' स्थाने दाहपदमानीय पठ्यते, तर्हि दोषान्तरमुदेति। न दृश्यत एष पाठो मातृकास्विति प्रमाणाभाव एको दोषः। प्रियां प्रति निवेद्यमाने ग्रीष्मवर्णने दावदाह—साहित्योक्तिर्नात्यन्तं सङ्गतेति द्वितीयः, 'सदावदाहः क्षतवारिसञ्चय' इति वक्तव्ये समासोऽवाच्यवचनजनक इति च तृतीयः। किञ्च नास्ति ब्राह्मीलिपावपि 'द—ग'—वर्णयोर्लिपिसाम्यं येनात्र वाचकः प्रमाद्येत्।

अत्र राजस्थानप्राच्यविद्याप्रतिष्ठानस्य जोधपुरस्थिते केन्द्रे २३६६६ इति क्रमाङ्कीयो यः पाण्डुग्रन्थस्तस्मिन् 'सदावगाहः क्षुतवारिसञ्चय' इति पाठः। नास्ति तत्र सदावगाहपदं समासपतितम्। उचितं चैतत्। 'सुभगसलिलावगाहः' इति शाकुन्तले १.३ पद्ये 'विहर्तु मिच्छा वनितासखस्य तस्याम्भसि ग्रीष्मसुखे बभूवे'—ति रघुवंशस्य १६.५४ पद्ये च ग्रीष्मकाले जलावगाहस्य स्वातन्त्र्येण वर्णनात्। अत्रापि ऋतुसंहार एव प्रथमसर्गस्यान्तिमे पद्ये ग्रीष्मकालः 'सुखसलिलनिषेक' इति स्मृतः। ततोऽपि सिद्धं यत् कालिदासे सलिलावगाहो ग्रीष्मस्याव्यभिचारी विशेषः इति। ततश्च नास्ति तस्य वारिसञ्चयक्षयेण संबन्धः, न चापि तत्प्रतिपादकस्य सदावगाहपदस्य क्षतवारिसञ्चयपदेन।

अथ ब्राह्मीलिपौ दकार—खकार—योरकारोकारमात्रयोश्च नातिभिन्नत्वं वीक्ष्य निश्चिनुमो यत् 'सदा' इत्यनेनापि 'सुखे'—तिरूपेण भवितव्यम्। एवं च 'सुखावगाहः क्षतवारिसञ्चय' इति रचनामेवात्र मूलपाठरचनात्वेन स्वीकुर्मः। सोऽयं गजेन्द्रमोक्षो मूलस्य। ततश्च—

**प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः सुखावगाहः क्षतवारिसञ्चयः ।**
**दिनान्तरम्योऽभ्युपशान्तमन्मथो निदाघकालोऽयमुपागतः प्रिये ॥**

इत्येवात्र कालिदास—प्रतिभोचितो मूलपाठः।

अत्रापि 'प्रचण्डसूर्य' इत्यस्य स्थाने 'विशेषसूर्य' इति, विशेष—कान्तस्पृहणीयेति च पाठौ, चतुर्थे च चरणे 'कालोऽयमुपागत' इत्यस्य स्थाने 'कालः समुपागत' इति पाठः। तदत्र सर्वमपि फल्गु। प्रचण्डस्य विशेषीकरणे मूलम् 'अस्ति कश्चिद् वाग्विशेष' इति विद्योत्तमायाः कालिदासं प्रति प्रचारितं वाक्यमेव। विशेषपदेनापि कस्यापि काव्यस्यारम्भ एषितव्य इति कृत्वा तदिदं संशोधनं गुर्जरेषु बङ्गेषु च प्रसिद्धम्।

(ख) 'निशाः शशाङ्कक्षतनीलराजय' इति १.२ पद्यमपि संशोध्यमूलमेव। अत्र नीलपदेन तमो ग्रहीतुं बाध्यामहे। शशाङ्केन तमस एव क्षयस्य संभवात्। तदिदं गलग्रहमात्रम्। अभिधया गुणे नील—पीतादीनां प्रवृत्तेः लक्षणया गुणिपरत्वेऽपि सामान्यनिष्ठस्यास्य तमोरूपद्रव्यविशेषपरिग्रहे लक्षणान्तरमर्थापत्तिं विना वा नास्ति गतिः। सोऽयं गण्डस्योपरि स्फोटः। नीलो नीलत्वरूपो गुणः, नीलत्वावच्छिन्नः पदार्थः, तद्विशेषस्तम इति सौधारोहणप्रयास आपतति 'नीले'—ति पाठे सामाजिकेषु।

अयमपरो दोषो यदेतेन पाठेन शुक्लपक्षरजनीनामेव सेव्यत्वेन संग्रहः, न तु कृष्णपक्षरजनीनामपि। सन्ति च ग्रीष्मे तासामपि सेव्यत्वमेव, प्रत्युत तासामेव भूयसा। दिने प्रकाशातिशयेन पीडितानां भगवती कृष्णनिशा निद्रावदेव नितान्तं प्रिया। एवं च रात्रिसामान्यस्यैवात्र सेव्यत्वेनान्वयः स्वारसिकः। अपि च यदि शशाङ्कयोग एव निशासु वर्णयितुमिष्टः तर्हि निशायाश्चन्द्रिकास्नानमत्र वर्णनीयम्, न पुनः क्षतनीलराजित्वम्। एवं च 'निशाः शशाङ्कक्षततापशीतला' इति वाऽत्र वक्तुमुचितम्। माभूदत्र विनायको वानरः। अस्ति च निशासामान्यस्यैवान्यत्रापि वर्णनं ग्रीष्मसुखत्वेन। तथाहि—शिशिरे 'जनस्य सेव्या न भवन्ति रात्रयः', किं पुनः 'शशाङ्कभाभिः शिशिरीकृतास्ता' इति शिशिरे यासां त्याज्यत्वं वर्णितं तासामेव ग्रीष्मे

सेव्यत्वमुच्यते। ताश्च सर्वा एव रात्रयः, न तु शुक्लपक्षीया एव। वर्ण्येते च शशाङ्कस्यापि त्याज्यत्व–ग्राह्यत्वे तत्तेषु ऋतुषु। शिशिरे हि

**न चन्दनं चन्द्रमरीचिशीतलं न हर्म्यपृष्ठं शरदिन्दुनिर्मलम् ।**
**न वायवः सान्द्रतुषारशीतला जनस्य चित्तं रमयन्ति साम्प्रतम् ।।** ५.३

इति य एव शशाङ्कोऽकाम्यः स एव निदाघे नितरां काम्य इति दशापरिवर्त्तनमत्र शशाङ्केऽपि नितान्तमावश्यकं वर्णयितुम्। 'शशाङ्कक्षते'–ति पाठे तदिदं शशाङ्कस्य काम्यत्वमर्थापत्तिमात्रं शरण्यीकुर्यात्, न क्षमते तत् प्राधान्येन साक्षादेव प्रसेद्धुम्। ततश्चात्र दोषद्वयं विवृतवदनम् प्राधान्येन वर्णनीयस्य शशाङ्कगतस्य सेव्यत्वस्याप्राधान्येन संकेत एकः, नीलपदे निहतार्थत्वञ्चापरः। वाच्यावचनमवाच्यवचनञ्चेति यदन्यद् दोषजातं तदपि निष्कण्टकमेव।

अत्र काशीहिन्दूविश्वविद्यालयान्तर्गत–भारतकलाभवनस्याऽभिन्नपाठे मातृकाद्वये पाठः–'निशाः, शशाङ्कः, क्षतनीर–राजयः' इति। एष एव च जोधपुरस्थस्य प्राच्यविद्याप्रतिष्ठानस्य ४३३० इति क्रमाङ्कीयायां २९२३० इति क्रमाङ्कीयायां च मातृकायां पाठः। सोऽयमत्यन्तमेव साधीयान् पाठः। शशाङ्कस्यापि सेव्यतायां साक्षादेवान्वयस्य स्पष्ट एवात्र क्षेमः। नीलपदस्य स्थाने नीर–पदस्य स्वीकारे पुनः परिहृतो वृत्तित्रयस्वीकारगौरवक्षारतमो निहतार्थत्वकषायोऽपि। इदानीं वाच्यमेवोच्यते, नावाच्यमिति नास्ति वाच्यावचनावाच्यवचनयोरपि प्रसरः।

अयं पुनरत्रान्यो दोषो यन्नीराणां राजिभिरन्वयः। राजयो हि वृक्षादीनां भवन्ति, न नीराणाम्। राशयः खलु दृश्यन्ते नीराणां, न राजयः। कार्श्यरूपः क्षयश्च राशेरेव स्वाभाविको, न राजेः। अस्ति च ज–श–कारयोर्नागराक्षररचनास्वपि साम्यम्। अतः 'क्षतनीरराशय' इति पठितुं युक्तम्। एवं सति सर्वमेवावदातायते। ततश्चात्रायं मूलपाठः–

**निशाः, शशाङ्कः, क्षतनीर—राशयः**
**क्वचिद् विचित्रं जलयन्त्रमन्दिरम् ।**
**मणिप्रकाराः सरसं च चन्दनं**
**शुचौ प्रिये यान्ति जनस्य सेव्यताम् ।।** इति।

अन्येऽपि नवीनाः पाठा ऋतुसंहार—मातृकासु लभ्यन्ते। तेषां समेषां विचारः स्वतन्त्रं प्रबन्धमपेक्षते। इदं तु केवलमत्र सूच्यते यद् भारतकला—भवन—मातृकाद्वये ऋतुसंहारस्य परिच्छेदाः सर्गनाम्ना न व्यपदिष्टाः। तेषां ग्रीष्मवर्णना, प्रावृड्वर्णना, शरद्वर्णना, हेमन्तवर्णना, शिशिरवर्णना, वसन्तवर्णना' इत्येवं वर्णनासंज्ञयैव लभ्यते तत्र व्यपदेशः। सर्गत्वं हि परिच्छेदानां कथांशत्वेन सिद्ध्यति सर्गबन्धेषु प्रबन्धेषु। नास्ति च कथा ऋतुसंहारे। ततश्च परिच्छेदा इमे वर्णनामात्ररूपा एव। अथापि अन्यासु मदनुशीलितासु मातृकासु, टीकासु, प्रकाशितेषु च संस्करणेषु प्रतिपुष्पिकं सर्गशब्द एव लभ्यते।

ऋतुसंहारस्य नामान्तरमपि कतिषुचित् पाण्डुग्रन्थेषु दृश्यते। तच्च ऋतुसंघातम् इति, ऋतुवर्णनम्, इति विशेषकाव्यमिति च। क्वचिदिदं 'महाकाव्यम्' इत्यपि प्रोच्यते। द्रष्टव्यमत्रास्माभिरेव संपादितं १९९० वर्षे दिल्लीसाहित्याकादमीतः प्रकाशितमृतुसंहारसंस्करणम्।

## २. मेघदूतम्

(क) अस्त्येव सुप्रसिद्धं मेघदूतस्य 'तां चावश्यं दिवसगणनातत्परामि'—त्यादिकं पद्यम्। अस्योत्तरार्धे स्माकं ग्रन्थावल्यां मल्लिनाथसञ्जीविन्यामिवैव निम्नलिखितः पाठोऽमुद्र्यत—

**आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां**
**सद्यःपाति, प्रणयि, हृदयं विप्रयोगे रुणद्धि ।।** इति

अत्र समाधिमप्यास्थाय कृतभूरिपरिशीलना अनुभवाम एवातिरिक्तत्वं किञ्चित्। अनुभूयते यद् भवितव्यमत्र केनापि गुणवत्तरेण पाठेन। नियतमेवात्र

हृदयस्य यद् विशेषणद्वयं तस्मादेकेनैव केनापि भवितव्यम्। अवश्यमेवात्रा–तिरिक्तमेवान्यतरत्। आशाबन्धकर्तृको विप्रयोगकालिकोऽङ्गनाहृदयरोधोऽत्र मुख्यो वाक्यार्थः। रोधश्च पतयालुन एव वस्तुन उचितः ततो विप्रयुक्ताङ्गनाहृदयस्य सद्यःपतनशीलत्वलक्षणं सद्यःपातित्वमत्रानुपेक्ष्यमेव। ततस्तत्प्रतिपादकं सद्यःपातीति पदमपि। नेदं परित्यक्तुमुचितम्। अथ यत् प्रणयि–पदं तच्च निरर्थकमेव केवलम्। प्रणयो हि विप्रयोगप्रयोजकत्वेन स्वयमेवाक्षिप्यते। 'प्रणयित्वं' कुसुमपक्षेऽसङ्गतमपि। हृदयस्य हि प्रणयित्वमानुभविकं चेतनत्वात्, अचेतनस्य तु कुसुमस्य तद् बाधितमेव। अतः 'आशाबन्धो हि विप्रयोगेऽङ्गनानां कुसुमसदृशं सद्यःपाति हृदयं प्रायशो रुणद्धी'–ति केवलमुच्येत, त्यज्येत च 'प्रणयी'–ति पदम्। नास्ति ततः क्षतिः। अत एव प्रयोगः 'गुर्वपि विरहदुःखमाशाबन्धस्तु साहयति' इति (शाकुन्तले ४.१६ गाथा)। नास्त्यत्रालङ्कारः। नास्ति हृदयम्, नास्ति कुसुमम्, नास्ति च विशेषणद्वयम्। अस्ति च मीलिताभ्यामक्षिभ्यामालोचनीयं किमपि सुमानुषं तत्त्वम्। नास्ति ततः प्रकृतेऽपि कस्यापि विशेषणस्य परित्यागः क्लेशकरः।

अस्त्यत्राऽन्योऽपि पाठः 'सद्यःपातप्रणयी'–ति। उदित एष सूर्यः। अपगता च विकल्पतमिस्रा। 'कण्ठाश्लेषप्रणयिनि जन' इति मेघदूतारम्भ एव कालिदासस्यैव निष्पाठान्तरः प्रयोगः, 'अङ्काश्रयप्रणयिनस्तनयान् वहन्तः' इति शाकुन्तलनिर्वहणे प्रयोगः, 'परिष्वङ्गप्रणयी भवामी'–ति च विक्रमोर्वशीयस्य चतुर्थाङ्कगतः सः प्रमाणं यत् कालिदासोऽनुरोधापरपर्यायां प्रीतिपूर्णां याचनां प्रतिपादयतः प्रणयिपदात् पूर्वमुपपदमपि योजयतीति। ततः सद्यःपातप्रार्थनपरमिति हृदयविशेषणार्थमुपच्छन्दयत् पाठान्तरमेवात्र मूलभूतः पाठः। वल्लभः, दक्षिणावर्त्तनाथः, पूर्णसरस्वती च सद्यःपातप्रणयी–ति पाठमेव जानन्ति, नान्यम्। मल्लिनाथः पुनस्तमिमं पाठं न वेत्ति। तस्य 'पाति प्रणयी'–ति विशेषणद्वयघटित एव पाठे मूलत्वप्रतिपत्तिः। अस्ति च विरहे सुकुमारहृदयानामङ्गनानां स्वभावो यदिमाः स्वकीयं हृदयं शपन्ति

'वज्रमसि त्वम्, यत्प्रियविरहितमपि ध्रियस एव, न विदीर्यस' इति। उपस्थित—विषमा हि कामिन्यो मृत्युमेव कामयन्ते, गर्हयन्ते वात्मनो 'न विदीर्ये कठिनाः खलु स्त्रियः' इति। अस्ति चैषैव भीतिर्यक्षस्यापि यतोऽसौ दयिताजीवितमालम्बितुमचेतनेऽपि मेघे प्रणयकृपणो भवति 'सन्देशं मे हरे'—ति। अस्ति च संदेशस्तस्य—

**नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे**
**तत् कल्याणि त्वमपि नितरां मा गमः कातरत्वम्** । इति,
**शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ**
**शेषान् मासान् गमय चतुरो लोचने मीलयित्वा** ।।

इति च, बन्धयति चाशामसौ—

**पश्चादावां विरहगुणितं तं तमात्माभिलाषं**
**निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपास्विति** ।।

तदिदं सर्वं हृदयस्य सद्यःपतनभयस्मृतिमूलकमेव। एवं च 'सद्यःपातप्रणयी'—ति पाठस्यैव मूलत्वमामनामः।

केचिदत्र प्रणयीति पदं हृदयपदेन समस्य पिपठिषन्ति, 'प्रणयिहृदयम्' इति, उष्णो वह्निरितिवदपुष्टत्वमेषां शिरसि दुर्निवारपतनम्।

(ख) मेघदूतस्योपसंहारेऽस्माकं ग्रन्थावल्यां ये चत्वारः श्लोकास्तेषां द्वितीयस्योत्तरार्धं तृतीयस्य चतुरोऽपि पादान् तुरीयस्य च पूर्वार्धं प्रक्षिप्तान्येव। तत्र—

**आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते**
**शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः** ।
**इष्टान् देशान् विचर जलद! प्रावृषा संभृतश्री—**
**र्मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः** ।।

इत्येवंरूपया घटनयैव मेघदूतस्योपसंहारं सुघटनमाटीकामहे। अत्र नास्ति किमपि साधकं प्रमाणम्, प्रतिपक्षबाधकानि लिङ्गानि तु सन्ति भूयांसि। तद्यथा— प्रतिज्ञाविरोधः निहतार्थत्वम्, प्रकृतिविरोधः, अनुपसंहारित्वं चेति चत्वारोऽत्र विपर्यासाः काव्यगुणस्य। तथाहि दयिताया जीवितमालम्बितुं मेघे कृतप्रणयस्य यक्षस्य 'साभिज्ञानप्रहितवचनैस्तद्वचोभिर्ममापि प्रातःकुन्दप्रसवशिथिलं जीवितं धारयेथा' इत्येवमात्मजीवितालम्बनप्रार्थना प्रतिज्ञाविरोध एवोपक्रमोपसंहारभेदरूपः। 'कच्चित् सौम्ये'—ति पद्यस्य समर्थ्यवाक्यार्थे 'प्रत्यादेश'—पदं निहतार्थमेव, समर्थकवाक्यगतोत्तर—रूपार्थसामर्थ्यात् उत्तरार्थपरत्वेन विवक्षितस्य तस्य प्रत्याख्याने निरूढत्वात्। 'एतत् कृत्वे'ति पद्यस्य पूर्वार्धे 'प्रार्थनायामनुचितत्वोक्तिः, विधुरत्वोक्तिः, अनुक्रोशोक्तिश्चास्तङ्गमितमहिम्नोऽपि दिव्यपात्रस्य प्रकृतेर्विपरीताः। न हि बुभुक्षाभक्षितोऽपि श्वापदः श्वेव लाङ्गूलं चालयित्वा याचते भक्ष्यम्। प्रियां प्रति प्रहितसंदेशाक्षरस्य यक्षस्य संदेशपूर्त्तौ प्रियापरामर्शकं पदं विनैव वक्तव्यस्योपसंहारः पुनरनुपसंहारित्वम् तथाहि केचित् आश्वास्यैवमि'—ति पद्यं प्रक्षिप्तमिति मत्वा पाठान्तरेषु क्षिपन्ति। एतदभावे संदेशपूर्त्तिर्गर्तोदरायते, नास्ति तत्रानुपदोक्तस्य पदार्थस्य परामर्शः प्रियतमारूपस्य तदाश्वासनरूपस्य च। अस्मत्कल्पिते पाठे संक्षेपोऽप्येको गुणः, त्वरमाणस्य यक्षस्योक्तिविलम्बः पुनरनुचित एव प्रकृते। अस्ति चैतेषां चतुर्ण्णामपि पद्यानां क्रमेऽपि पौर्वापर्यविपर्ययः। तथाहि—

क्रमः—१ एतस्मान्मां॥ अश्वास्यैवं॥ कच्चित् सौम्य॥ एतत्कृत्वा॥[1]

---

१. अत्र प्रथमे क्रमे मातृकाः—भारतकलाभवनस्य ५६२, ५६७, ५७५, ५७६, ५७७, ५८९, ५९०, ४२७१ इति क्रमाङ्कीयाः। एशियाटिकसोसायटी (कलकत्ता) संस्थायाश्च ९३३८, १००७०, २३८१—इति।

द्वितीये क्रमे भारतकलाभवनस्य ५८६, ५८८ क्रमाङ्काये एशिया. कलकत्ताया ७८१० क्रमाङ्कीया काशीहिन्दूविश्वविद्यालयग्रन्थागारस्य २४६८ क्रमा०।

क्रमः—२ एतस्मान्मां॥ कच्चित् सौम्य॥ आश्वास्यैवं॥ एतत् कृत्वा॥

क्रमः—३ एतस्मान्मां॥ कचित् सौम्य॥ एतत् कृत्वा॥ आश्वास्यैवं॥

क्रमः—४ एतस्मान्मां॥ कच्चित् सौम्य॥ एतत् कृत्वा॥ x x ॥

क्रमः—५ x x x ॥ आश्वास्यैवं॥ कच्चित् सौम्य॥ एतत् कृत्वा॥

डे—वल्लभदेव—स्थिरदेव—दक्षिणावर्त्तनाथ—पूर्णसरस्वती—परमेश्वर—भरत—सनातनगोस्वामिन 'आश्वास्यैवमि'—ति पद्यं न पठन्ति, चारित्र्यवर्धनः पुनः 'भूयश्चाहे'—ति, 'एतस्मान्मामि'—ति च परित्यज्य 'आश्वास्यैवमित्येव मूलतया टीकते। तत्राभिज्ञानसंग्रहाय भूयश्चाहेति पद्यमावश्यकम्, आश्वासनाय च 'एतस्मान्मामि'—ति पद्यम्। उपसंहारसूचकम् 'एवम्' इति पदमावश्यकमिति 'आश्वास्यैवमि'—ति पद्यमपि न परित्याज्यम्। अस्ति च पार्श्वाभ्युदये नेमिदूते चेदमपि पद्यं मूलत्वेन स्वीकृतम्।

एकस्य पूर्वार्धमपरस्योत्तरार्धेन मिश्रितं मा भूदिति नास्ति नियमः। अतएव भारतकलाभवनस्य ५९६ क्रमाङ्कीया या मातृका तस्याम् 'आश्वास्यैवमि'—ति पद्यस्योत्तरार्धं नास्ति। तत्रोत्तरार्धत्वेन 'एतत् कृत्वा प्रियमनुचितप्रार्थनावर्त्तिनो मे सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या' इति यदन्तिमस्य पद्यस्य पूर्वार्धं तदेव योजितं लभ्यते १२२ इति श्लोकसंख्याङ्कस्य तदनन्तरमेव लेखात्। 'इष्टान् देशान्' इति च यदस्यो—त्तरार्धं तत् स्वातन्त्र्येणैव १२३—संख्यया परिच्छिद्यते। वस्तुतस्तु 'एतदि'ति पूर्वार्धमेवात्र त्याज्यमस्ति। स्पष्टमेतेन यत् पाण्डुग्रन्थानां परम्परायाम् उपर्युक्तेन क्रमेण श्लोकद्वयस्य पूर्वार्धोत्तरार्धयोर्योजनमप्यभीष्टमस्ति, तत्र च,

---

तृतीये क्रमे भारतकलाभवनस्य ३८२५ एशियाटिकसोसायटी कलकत्ता. ३१९३ क्रमा.।

चतुर्थे क्रमे काशीहिन्दूविश्वविद्यालयग्रन्थागारस्य ३९५९ (शारदालिपिकः) ए.सो. कलकत्ता. ११०६४।

पञ्चमे क्रमे भारतकलाभवनस्य ४४९३ चारित्र्यवर्धनटीका।

'आश्वास्यैवमि'त्यस्य पद्यस्य पूर्वार्धम्, एतत् कृत्वेति पद्यस्योत्तरार्धमिवैवा—परित्याज्यत्वेनैव स्वीक्रियत इति च। अथ च स्यादत्र 'कच्चित् सौम्ये'—ति पद्यस्यैवात्रान्तिमपद्यत्वम्।

मेघदूतस्यास्माभिरनुशीलितासु मातृकासु पूर्वोत्तरमेघत्वेन विभागो न दृश्यते। तत्रारम्भत आन्तं क्रमेण परिवर्धमाना एकैव संख्यासन्ततिरुपलभ्यते, अत एव डे—महोदयेनापि साहित्याकादमीसंस्करणे विभाग एष परित्यक्त एव।

## ३. कुमारसंभवम्

(क) कुमारसंभवस्य २.५१ पद्यस्यास्माकं ग्रन्थावल्यां (१९७६ सं०)

**तदिच्छामो विभो! स्रष्टुं सेनान्यं तस्य शान्तये ।**
**कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षव ॥** इति

पाठः। अस्ति चायमेव मल्लिनाथस्याप्यभिमतः। अस्ति चैतद् ब्रह्मलोकं यावद् धावनप्रयासे विरुद्धः। यदि सेनानीसृष्टौ देवानामेव कर्त्तृत्वं विवक्षितम् कृतं तर्हि ब्रह्मदर्शनेन। अथ ब्रह्मण आशिषो ग्रहीतुं देवानां तथा प्रवृत्तिः तर्हि वक्तव्यं

**तदत्र कार्ये भगवानाशिषो दातुमर्हति ।**
**पौरुषापेक्षया सिद्धौ गुरूणां हि वरः परः ॥**

इत्यादिकं किञ्चित्। न चोक्तमिदमेवंविधं वाऽन्यदपि वचनमत्र कविना। एवं सेनान्ये स्रष्टुमिच्छूनां देवानां तत्सृष्टौ स्वमेव यदि कर्त्तृत्वं विवक्षितं तर्हि ब्रह्मदेवदर्शनं नातिप्रयोजनकमेव।

असंगतं च प्रतिवचनं ब्रह्मणो 'न त्वस्य सिद्धौ यास्यामि सर्गव्यापारमात्मन' इति। भगवन्त एव सेनान्यं सृजन्त्वि'—ति यावन्न प्रार्थ्यते तावत् कीदृशी नाम तस्य सृष्टौ ब्रह्माणः स्वकीये कर्त्तृत्वे निषेधस्य प्रसक्तिः। अस्ति हि महतामाचार्याणां 'प्राप्तौ सत्यां निषेध' इति व्यवहारः। अथ

**इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।**
**विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम् ।।**

इतीयमुक्तिरपि निरवकाशैव।

अस्त्यत्र पाण्डुग्रन्थेषु वल्लभस्य टीकायां च पाठान्तरम्। तथाहि 'तदिच्छाम विभो सृष्टमि'–ति मूले सृष्टमिति पदस्य समर्थने वल्लभस्योक्तिः–'तस्मात् विभो सेनान्यं सृष्टम् इच्छाम वयमर्थयामहै।..। सृष्टमिच्छाम इति धातुसबन्धे प्रत्ययः। यदिवा 'सोत्साहो दर्पवान् सृष्ट उच्यते, यथा 'अस्त्रं हरादाप्तवता दुरापं येनेन्द्रलोकावजयाय सृष्ट' इति रघु. ६.६२ स्त्रष्टुमिति त्वपपाठ एव। इच्छामेति प्रार्थने लोट्।। इति[१]

अत्रापि 'विभो' इत्यस्य स्थाने 'विभोः' इति भारतकलाभवनस्य २०६४–क्रमाङ्कीये कुमारसंभवपाण्डुग्रन्थे पाठान्तरम्। तच्चेदं जर्मनी–प्रकाशिते वल्लभटीकापाठान्तरेऽपि स्पष्टमेव। एवं च मूलपाठोऽत्रैवंरूपः–'तदिच्छामो विभोः सृष्टं.....मुमुक्षव' इति।

अस्मिन् पाठे ब्रह्मणो याऽऽत्मकर्तृत्वप्रतिषेधोक्तिस्तदुचिता प्रार्थना सुस्पष्टा। 'विभोः सेनान्यं सृष्टमिच्छामः' इति प्रार्थना 'न त्वस्य सिद्धौ यास्यामि सर्गव्यापारमात्मन' इति 'इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयमि'–ति चात्रोत्तरम्। उभयमपीदं सदृशमेव। इषिक्रियायां लोडन्तत्वकल्पनं पुनः पञ्चम्यन्ताद् विभुपदात् परं विद्यमानस्य विसर्गस्यानवधानात्। अथवा लेखकानामयं धार्ष्ट्योत्तरः प्रमादः। लोडन्तत्वे पुनः स्त्रष्टुमित्यस्यापि संगतत्वमेव, ततश्च तत्रापपाठत्वोक्तिर्वृथा।

(ख) अष्टमसर्गस्य षष्टितमं पद्यमनेकधा पठ्यते। तथापि द्वावस्य प्रसिद्धौ पाठौ–

---

१. जर्मनीतः १९८० संवत्सरे प्रकाशिते शारदालिपिपाठे।

१. **रुद्धनिर्गमनमादिनक्षयात् पूर्वदृष्टतनु चन्द्रिकास्मितम् ।**
**एतदुद्गिरति चन्द्रमण्डलं दिग्रहस्यमिव रात्रिचोदितम् ।।** इति

२. **रुद्धः००० तनुचन्द्रिकास्मितम्।**

**एतदुद्गिरति रात्रिचोदिता दिग् रहस्यमिव चन्द्रमण्डलम्।** इति च। अत्र द्वितीय एव पाठे पाण्डुग्रन्थानां भूयसी संख्या। वल्लभ–मल्लिनाथावप्यत्रैव श्राद्धौ। किं वाऽत्र प्रतिपत्तव्यमिति प्रश्ने द्वितीय एव मूलत्वेन भावनीय इत्यहमपि। अत्र हेतुरीषत्करत्वमकृष्टपच्यत्वं वा वाक्यार्थस्य। प्रथमे पुनर्बंहीय एव कल्पनागौरवम्। तथाहि द्वितीये पाठे 'उद्गिरणक्रियायां रात्रिः प्रयोजककर्त्री, दिक् कर्त्री, चन्द्रमण्डलं कर्म, पूर्वार्धगतानि पदानि च कर्मण एव विशेषणानि। रहस्यमत्र संभावनौ–पयिकमुपमानम्। ततश्च 'रात्रावुपस्थितायां पूर्वा दिक् चन्द्रमण्डलमुद्गिरती'ति द्वितीये पाठ उत्तरार्धस्य तात्पर्यार्थः। रोधस्य कर्त्री पूर्वा दिगेव। रात्रिरूपया सख्या पृष्टा पूर्वदिङ्नायिका प्रातःकालादारभ्य सायंकालं यावदात्ममन्दिरे निरुद्धं चन्द्रमण्डलरूपं जारं तेन सह रहसि जातं व्यतिकरं च सहैवोद्गिरतीत्यत्र निष्कर्षः। अत्र पूर्वपदं दिग्वाचकं न मन्तव्यम्, नो चेत् स्यादेव पौनरुक्त्यम्, दिक्शब्देनैव प्रकरणबलादस्या अवगतेः। सेयं क्लेशोत्तरा प्रतिपत्तिः। अथ यदिदं चन्द्रिकारूपं स्मितं तस्याप्याधारः चन्द्रो न मन्तव्यः, वक्तुरेव सस्मितत्वस्य अवसरेष्वेतेषु दृष्टचरत्वात्। ततश्च 'स्मिता' इति पदान्ते स्त्रीत्वमापादनीयमत्र। तनुपदस्यापि च चन्द्रिकया समास एवाङ्गीकार्यः। ततश्च 'दिक् प्राची, पूर्वदृष्टतनु–चन्द्रिकास्मिता सती रहस्यमिव चन्द्रमण्डलम् उद्गिरती'–ति वाक्ययोजना फलति। यद्वा 'पूर्वेति स्मितान्तं पदं क्रियाविशेषणतया नेयम्, मन्तव्यं च तत्र नपुंसकत्वमेव। चन्द्रमण्डलेन विशेषणतया अन्वयस्त्वत्र विघ्नायते।

प्रथमे पाठे पुनः चन्द्रमण्डलं कर्तृ, रात्रिः प्रयोजिका, दिग्रहस्यं च

कर्म। कर्मणि विशेषणानि, 'रुद्धनिर्गमनमिति पूर्वतन्विति, चन्द्रमण्डलमदृश्यत। रात्रिः कुट्टनी। पूर्वा दिग् वाराङ्गना। पूर्वाया द्वारं प्राप्तश्चन्द्रो रात्रिरूपया मात्रा दिनक्षयं यावत् संपन्नस्य निरोधस्य फलानि पृच्छ्यते। सोऽपि च सचन्द्रिकास्मितं प्रतिवक्तीति योजना। स्पष्टमेवात्र गौरवमेव कल्पनायाः।

सन्ति चात्र सर्वेष्वपि सर्गेषु सूक्ष्मेक्षिकया विभावनीयाः पाठभेदाः। इदमत्र सूचनीयं यद् वल्लभो यं पाठमाश्रित्य टीकामकरोत् तस्यैव पाठस्य नागरीमातृका भारतकलाभवने सुरक्षिता लभ्यते। तत्रैवान्याप्येका नागराक्षरा मातृका यत्र प्रतिशतं नवतौ स्थलेषु वल्लभाधिकृत एव मूलपाठः।

नवमसर्गतः सप्तदशं सर्गं यावत् विरलास्वेव मातृकासु लेखः। यत्रापि सः तत्रापि अष्टमसर्गान्ते समाप्तिः सूच्यत एव काव्यस्य।

## ४. रघुवंशम्

'कालिदासस्य सर्वस्वमभिज्ञानशकुन्तलमि'—ति रसिकाः, रघुवंशमेव कालिदासस्य सर्वस्वमिति त्वभियुक्ताः। किमनयोरन्तरमिति चेद् ब्राह्मगान्धर्वयोरिवेति समुचितमुत्तरम्। अथ रघुवंशस्यापि मूलं प्रतिशतं प्रायेण उपविंशति परिवर्त्तितम्। तत्र कारणं महाकाव्यस्यास्य बृहत्तरे भारते सर्वेषामेव कृते पाठ्यग्रन्थत्वेन निर्धारणम्। मिलन्ति हि तत एव रघुवंशस्य मातृकाः प्रायेण द्विगुणाश्चतुर्गुणा दशगुणा वा तस्यैव सोदराणामन्येषां मेघदूतादीनां मातृकाणामपेक्षया। ततो लिपिकृत्प्रमादा अपि मूलभेदे निदानम्। ब्राह्मीलिपिः किल कालिदासस्य लिपिः, यदि न खरोष्ट्री। तस्या नागरीरूपेण परिणामं यावदजायन्त एवानेके पर्ययाः। सूक्ष्मतरं चैतेषामन्तरम्। एषामप्रत्यभिज्ञानमपि मूलभेदे निदानम्। वस्त्वपरिचयोऽपि तथा। भागीरथी प्रसिद्धा, न पुनर्ज्योतीरथी। कश्मीरेषु, केरलेषु च तस्थिवद्भिर्ज्योतीरथ्या अपरिचयाद् भागीरथीति शक्यत एव पाठः कल्पयितुम्। कल्पितश्च स तैरुभयैरपि तथा न च क्लेशित आत्मा मातृकान्तराणां पर्यालोचने

महामतिभिस्तत्र। यैश्च पर्यालोचितानि तानि भिन्नैव तेषां मूले प्रतिपत्तिः। ९० मातृकाः पर्यालोचितवतामस्माकं अपि रघुवंशस्य मूलपाठविषय इयमेव प्रतिपत्तिः। अत्र कानिचित् प्रमाणानि—

(क) **द्वेष्योऽपि संमतः शिष्टस्तस्यार्त्तस्य यथौषधम् ।**
**त्याज्यो दुष्टः प्रियोऽप्यासीद्—**

इति प्रथमस्य सर्गस्य यत् (२८—तमं) पद्यम्, अस्य मल्लिनाथाप्ययदीक्षिता—भ्यामादृतश्चतुर्थे चरणे 'अङ्गुलीवोरगक्षता' इति यः पाठः, अस्य सर्वास्वपि मातृकासु निर्व्यभिचार एक एव पाठः 'दष्टोऽङ्गुष्ठ इवाहिने'—ति, केवला द्वित्रा मातृका विहाय। नन्दर्गीकरः सूचयति 'वल्लभः, चारित्र्यवर्धनः, दिनकरः, सुमतिविजयो विजयगणिश्चेत्येते टीकितारोप्यमुमेवाङ्गुष्ठघटितं पाठं मूलत्वेनाद्रियन्त' इति। नन्दर्गीकरेण अनुशीलितासु प्रथमसर्गस्य १६ मातृकासु १० 'अङ्गुष्ठ'—पाठघटिताः, ६ च 'अङ्गुली'—पाठयुक्ताः। मल्लिनाथस्य सञ्जीविनी षट्स्वपि तासु लिखिता इति तासामेकत्वमेव। अवशिष्टासु दशसु षट् मल्लिनाथटीकासहिताः, अथ च मूलपाठेऽतत्परतन्त्राः। एवं नन्दर्गीकरस्य विवरणेनापि अङ्गुष्ठघटित एव पाठः सर्वेषां विदितः, अन्यत्र मल्लिनाथादि'—ति निष्कर्षाय सर्वेऽपि वयं विवशाः। किमत्र प्रतिपत्तव्यम्?

अत्र वयमेवदर्शिनः। लशुनव्याधिन्यायेन मल्लिनाथादृत एव पाठोऽकृष्टपच्यः। उपमानोपमेययोः समानलिङ्गतानिर्वाहायैव हि अङ्गुलीं विहायाङ्गुष्ठ आद्रियत 'दुष्टोऽहिदष्टोऽङ्गुष्ठ इव त्याज्य' इति। अङ्गुलीपाठे 'त्याज्य' इति विशेषणस्योपमानेन क्लेशोत्तर एवान्वयः, न तु स्वारसिकः। त्याज्येति व्यक्तिविपरिणामेनैवात्र सम्भवेदन्वयः। तथा च भक्षितेऽपि लशुने न शाम्यति व्याधिः। तथाहि चतुर्थे चरण उपमानस्योपमेयलिङ्गतायाः सिद्धावपि द्वितीये चरणे तद्व्यत्यासस्यैवानुभवः। तत्रापि औषधस्य शिष्टेन

लिङ्गसाम्यस्यानिर्वाहात् 'तस्य द्वेष्योऽपि शिष्टः संमतः, आर्त्तस्यौषधं यथा' इति यद् वाक्यं ततोऽस्य व्यत्यासस्य स्पष्टतैव। न ह्यत्र द्वेष्य इति संमत इति च ये उपमेयविशेषणे तयोर्विभक्तिविपरिणामेन विना औषधेन सह सभवत्यन्वयः। पूर्वार्धे प्रक्रान्तस्योपमानोपमेयलिङ्गभेदविच्छित्तिशिल्पस्य कृतं पश्चार्धे त्यागेन, उपक्रमोपसंहारयोरेकरूपताया एव शिष्टसम्मतत्वात्। पूर्वार्धपाठे च नास्त्येव पाठभेदः। एक एव हि स साठः। सर्वत्र तमेवैकमुपलभामहे। अथोच्यते असाध्यमेकमस्तीति नोचिता साध्यस्याप्यन्य–स्याऽचिकित्सेति। ततश्च चतुर्थचरण एव परिशोध्येत न चेदुपसर्पति द्वितीयचरणे परिशोध इति। तत्र पृच्छाम उरगः केन वा शिक्षितः पञ्चाङ्गुलेऽङ्गुष्ठमात्रं दष्टुम्, हातुं च तदतिरिक्तं चतुरङ्गुलम्। ननु कालिदासेनैव 'मालविकाग्निमित्रे– ततः प्रविशति यज्ञोपवीतबद्धाङ्गुष्ठो विदूषक' इति सर्पदंशायाङ्गुष्ठमेव पुरस्कुर्वतेत्युच्यते चेत्। साधु। नाट्यं हि तत्। बध्नातु भवान् कामप्येकामङ्गुलीं यज्ञोपवीतेन, प्रतिवक्तु च कस्य वा बन्धने सौकर्यम्, अङ्गुष्ठस्य वा, अङ्गुलीनां वा, एवमेव कस्य नु बन्धने नाट्यमुद्रासौभगम्, अङ्गुष्ठस्य वाऽन्यस्य वा। अथ नास्त्यत्र सर्पस्वभावः प्रतिपाद्यः। दष्टस्याङ्गस्य हि विद्यतेऽत्र प्रतिपिपादयिषा। नाट्यमुद्रासौकर्यसौभाग्याभ्यां नोचितोऽत्राङ्गुष्ठातिरिक्तस्याङ्गुली–चतुष्टयान्यतमस्य परिग्रहः। रघुवंशे पुनर्नास्ति तादृशं वैवश्यम्। अथ पृच्छामश्चतुरङ्गुल–पञ्चाङ्गुलशब्देषु 'दत्तपञ्चाङ्गुलाङ्को द्राघिष्ठः शूलपाणेः क्षपयतु भवतां शत्रुतेजांसि केतुः' इत्यादिषु यशोधर्मप्रशस्त्यादिषु प्रयुज्यमानेषु किमर्थकः खल्वङ्गुलीशब्दः। अस्त्यनेनाङ्गुष्ठस्यापि संग्रहो न वा। अस्ति चेत् करभूसामान्यपरत्वं स्थिरमेवाङ्गुलीशब्दस्य। सर्पो हि कराग्रं दशति, न पुनस्तद्विशेषं तर्जनी–मध्यमाऽनामिका–कनिष्ठिका–ङ्गुष्ठत्वाद्यवच्छिन्नम्। अङ्गुष्ठपदस्य प्रयोगे तर्जन्यादयो निरस्यन्ते, अङ्गुलीपदप्रयोगे पुनरङ्गुष्ठोऽपि परिगृह्यते। एवमत्राङ्गुलीपदमेव प्रयोगयोग्यम्। उपमानोपमेययोर्लिङ्गसाम्यं

पुनर्नैकान्तिकम्, अतएव 'रत्नच्छायाव्यतिकर इव प्रेक्ष्यमि'—त्यपि सह्यते सुमेधोभिर्यत्र सन्निकर्षातिशयाच्छल्यायत इव लिङ्गभेदो 'व्यतिकर इव प्रेक्ष्यम्' इति। यदि चातीव निर्बन्ध उपमानोपमेययोर्लिङ्गसाम्यस्य तर्हि पठनीयम्—

**द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्त्तस्य यथाऽगदः।**
**त्याज्यो दुष्टः प्रियोऽप्यासीद् दष्टोऽङ्गुष्ठ इवाहिना ॥**

इति। अत्रागदपदेनौषधं ग्राह्यम्—'भेषजौषधभैषज्यान्यगदो जायुरित्यपीत्य'—मरवचनात्। नास्ति चासौ पाठो मातुकासु सुलभः, न च ज्ञायतेऽसौ संपादकोत्तमैः। अस्ति चाप्ययदीक्षितोऽङ्गुलीपाठ एव सादरः। तथाहि 'सामान्याभिधायिपदस्य स्वरूपभेदापत्तावपि लिङ्गवचनभेदो महाकविप्रयोगेषु दृश्यत' इति स्वीयामनुभूतिमसौ 'द्वेष्यो'—पीति पद्येनैव प्रमाणयति। तत्रास्य मल्लिनाथादृत औषधा—ङ्गुली—घटित एव मूलपाठः (चि.मी. उपमा)। प्राप्त एवमङ्गुष्ठस्य परित्यागेऽगदस्यापि सः, उपक्रमोपसंहारयोरैक—रूप्यनिर्वाहाय। इदमपरमत्र निध्येयम्—'अङ्गुलीवोरगक्षता' इत्यस्य विन्यासस्य 'दष्टोऽङ्गुष्ठ इवाहिने'—ति यो विन्यासस्तदिदमस्य पाठान्तरं वा रूपान्तरं वा। नियतमिदं रूपान्तरमेव। अत्र पृच्छामः कस्तावदस्य कर्त्ता? कविर्वा सहृदयो वा। न कविः, द्वितीये पादे रूपान्तरस्यालाभात्। कथमसौ चतुर्थ एव चरणे विषयविषयिणोर्लिङ्गव्यत्यासं परिजिहीर्षेत्, न च समानव्यसने द्वितीये। लप्स्यते क्वचिद् द्वितीयेऽपि तदिति चेत् यदातदेति चातकव्रतम्, अद्यवर्षे चञ्चुसंकोचश्च हठमात्रम्। एवं च यदुपस्थितं तद् विचार्यमुपस्था—पयिष्यमाणमप्रतीक्ष्य। किं च निबद्धोपमानोपमेयलिङ्गभेदः कविर्न खलु सूचयितुमारभेताङ्गुष्ठातिरिक्तानामङ्गानामत्याज्यतां दंशदोषे। ततश्च सहृदयानामेवासौ विपर्यय—प्रयासः। अत्रार्थस्य प्रसिद्ध्या न प्रभवति व्याकरणं बुद्धिधारां रोद्धुम्। प्रसिद्धं हि सर्पदष्टाङ्गुलीनां कर्त्तनविधानम्। मालविकाग्निमित्रे स्वयं कालिदास एव तमिममर्थमेवमुपनिबबन्ध—

**छेदो दंशस्य दाहो वा क्षतेर्वा रक्तमोक्षणम् ।**
**एतानि दष्टमात्राणामायुष्याः प्रतिपत्तयः ।।** ४.४ इति

तमिमं लिङ्गविपर्ययो न खलु बाधितुं क्षमेत। एवं च मल्लिनाथाऽप्पय्यदीक्षितावेवात्र मान्यौ। अस्माभिरप्ययमेव पाठः कालिदासग्रन्थावल्यां स्वीकृतचरः।

(ख) **आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च ।**
**अव्याहतैः स्वैरगतैः स तस्याः सम्राट् समाराधनतत्परोऽभूत् ।।**

इति दिलीपकर्तृके नन्दिनीसमाराधने चकारेण व्यवच्छिन्नं खलु हेतोस्त्रित्वं 'तृणानां स्वादुकवलानि, कण्डूयनानि, दंशनिवारणानि' इत्येतद् व्यवच्छेद्यत्रयगतत्वेन। तदिदं परिबाध्यते तृतीयचरणगताद् 'अव्याहतैः स्वैरगतैरि'–ति हेत्वन्तरगतस्यापि हेतुत्वस्य प्रतिप्रसवात्। तत्रापि गत–गतं स्वैरत्वं समासे निवेशितं तत्किमपराद्धमव्याहतत्वरूपेण विशेषणान्तरेण यदिदं पृथगेव 'अव्याहतैरि'–ति प्रस्तूयते। किं च यदेव स्वैरत्वं तदेवात्राऽ–व्याहतत्वम्, ईषद्भेदस्याकिञ्चित्करत्वात्। वक्तव्यं तर्हि 'दंशनिवारणाभिः अव्याहतैश्च भ्रमणैरि'–ति। न चोक्तमेवम्। ततो न दोषनिर्मुक्तम्। तदत्र चकारश्चेतनां चूर्णितामिव चर्करीति। अस्थानेऽसौ स्थितः। स्थातव्यमेतेन स्वैरगतैरित्यतः परम्। वस्तुतस्तु यथास्थानमेवासौ स्थापितः सुकविना।

लभ्यतेऽत्र द्वितीये चरणे पाठान्तरद्वयम्–'अव्याहत–स्वैरगतेरि'–त्येकम्, 'अव्याहतः स्वैरगतेरि'–ति च परम्। अनयोः प्रथमेऽव्याहतत्व–स्वैरत्वयोरभिन्नप्रायत्वात् पौनरुक्त्यजनकत्वम्। स्वयं व्याहतोऽव्याहतस्वैरगतेः समाराधनं कथं वा कुर्यादिति समाराधयितर्यपि गतिगतस्याव्याहतत्वस्य प्रतिपत्तिरत्यन्तमेवाभ्यर्हितेति तदनुक्तेरत्र वाच्यावचनरूपापरदोषजनकत्वमपरो दोषः। अतः परमेव पाठान्तरं परम्। स एव च मूलपाठः। नन्दिन्याः गतं व्याहतं चेत् कीदृशं तस्याः समाराधनम्। व्याहतये लगुडादिप्रयोगाभावेऽपि

चित्तक्लेशनस्य प्रत्युत कोपजनकत्वेनैव परिणामात्। ततश्च षष्ठ्यन्तमेवेदं 'स्वैरगतेरि'ति पदम्! प्रथमान्त एव चाऽव्याहत इति। एवं स्वयमव्याहतो दिलीपः स्वैरगतेर्नन्दिन्याः पूर्वार्धोक्तैस्त्रिभिः प्रकारैः समाराधने तत्परोऽभूदित्यत्र समञ्जसः समुज्जिहीते वाक्यार्थः। ततश्च–तृतीये चरणेऽत्र 'अव्याहतः स्वैरगतेः' इत्ययमेव पाठो मूलपाठत्वेन स्वीकार्यः। अस्ति चायमेव बहुषु मातृकासु समादृतः पाठः। योऽयम् अव्याहत–स्वैरे–ति समासाभासः, तत्र प्राचीनेषु लेखेषु विसर्गचिह्नानामस्फुटत्वमेव हेतुः। एवं च 'अव्याहतः स्वैरगते'–रित्यसावेव निर्विकल्पो मूलपाठः।

अयमत्रापरो गुणो यदुत दिलीपनन्दिनी–विशेषणानां व्यामिश्र–त्वेनोपस्थापनम् 'अव्याहतः स्वैरगतेः स तस्याः सम्राट्' इति। अस्ति च विच्छित्तिरेषा कालिदासस्याभ्यस्ता–'ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्य' इत्यत्र 'विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्रा' इत्यादिषु च तथैवास्य प्रवृत्तेः। एवं च–

**आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च ।**
**अव्याहतः स्वैरगतेः स तस्याः सम्राट् समाराधनतत्परोऽभूत् ।।**

इत्येवात्र पठनीयम्।

अथोच्यते 'आस्वादभाजामि'–त्यत्र वक्तव्यं, स्वादस्य तृणगतत्वेनोपलम्भात्। 'आस्वादभाजां तृणानां कवलै'–रित्येव हि साधीयानन्वयः पदार्थानाम्। न खलु तृणानामास्वादराहित्ये कवलानामा–स्वादवत्त्वं प्रसिद्ध्येत्। अत्रोच्यते स्वादो हि प्रमातृसापेक्षः। प्रमाता चात्र जीवात्मा, अन्तःकरणं वा नन्दिन्या। तस्य च कवलैरेव सन्निकर्षः, न तु वनान्तेषु तत्र तत्र स्तम्बकरिभिस्तृणगुल्मैः। आत्माधिष्ठितमनो–ऽधिष्ठितेन्द्रियसन्निकृष्टानामेव हि रूपरसादीनां भोगो दर्शनेषु मतो न तटस्थानाम्। ततः कवलानामेवात्र स्वादुत्वं वक्तव्यम्। अथ च

स्वादुत्वायाऽपदार्थनिवारणमप्यावश्यकम्। केवलपदेन तृणपूलिकाऽत्र विवक्षिता। तद्गतेन स्वादेन च कटुक्षार–विरसोलपनिवारणपूर्वकं मधुर–सौम्यातिक्त–शस्पमात्रमत्र विवक्षितं भवति। अस्ति चापदार्थनिस्सारण–मप्याराधनस्याङ्गम्।

(ग) **पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकम्पितपुष्पगन्धी ।**
**तमातपक्लान्तमनातपत्रमाचारपूतं पवनः सिषेवे ॥**

इति गोचारणप्रसङ्गागते दिलीपवर्णने मदनुशीलितेषु पाण्डुग्रन्थेषु केवलमेकं विहाय सर्वेष्वपि 'पुष्पगन्धिः' इत्येव लेखः। नन्दर्गीकरानुशीलितेष्वपि द्वितीयस्य सर्गस्य १४ पाण्डुग्रन्थेषु चतुर्ण्णां 'पुष्पगन्धिरि'–त्येव पाठः। एषां त्रिषु मल्लिनाथस्य संजीवन्यपि लिखितेति पुनर्विशेषः। नन्दर्गीकर–सूचनानुसारेण वल्लभ–चारित्र्यवर्धन–दिनकर–सुमतिविजयानामपि 'पुष्पगन्धिरि'–त्येवाभिमतः पाठः। नन्दर्गीकरानुशीलिते रतलामनगरतः प्राप्ते पाण्डुग्रन्थे पुनः 'पुष्पगन्ध' इति पाठः। मल्लिनाथस्य तु 'पुष्पगन्धी'–ति प्रसिद्धः पाठः। अत्र वादः। 'गन्धस्येदुत्पूतिसुसुरभिभ्य' इति पाणिनिसूत्रेण चतुर्ष्वेव प्रयोगेषु इद् अनुमन्यते उद्गन्धिः, पूतिगन्धिः, सुगन्धिः, सुरभिगन्धिरित्येतेषु। व्यतिरिक्त एष प्रयोगस्तेभ्यः। न च पुष्पवद् गन्धो यस्येति पुष्पशब्द उपमानवाचित्वमुन्नीय 'उपमानाच्चे'–त्यनेनात्र इदः समर्थनं कार्यम्, पुष्पगन्धवत्त्वस्यैवात्र विवक्षणात्। न च गन्धयतीति गन्धिः, हरतीति हरिर्यथा, ततश्च समास इति मार्ग आश्रयणीयः, एवं हि गन्धकर्त्तृत्वं वायौ प्रसज्येत, अस्ति च तत् पुष्पेषु, नास्ति च वायौ स्वाभाविको गन्धः। पुष्पकृत एव हि तत्र सः। ततश्च गन्धकर्त्तृत्वेन पुष्पाणामेवात्रोपादानम्, कृतं तदर्थं वायुपर्यन्तमनुधावनेन। किं च यदि वायुर्गन्धयिता तर्हि गन्धनीयं किम्? वाय्वतिरिक्तं विश्वमत्र गन्धनीयमिति चेत् काण एव मनुष्य इति लक्षयित्वाऽकाणानामप्येकाक्षित्वसंसाधनाय क्रियमाणः साटोपः संरम्भ इवैष

मृषा प्रयासातिरेकः। अथ यदि 'गन्धी' इतीनन्तत्वमत्राद्रियते मल्लिनाथेनेव, तत्रापि पौनरुक्त्यान्नास्ति रक्षा, कर्मधारयान्मत्वर्थीयस्य प्रतिषेधात्, बहुव्रीहिणैव तत्कार्यस्य संपादितत्वात्। अतएव 'गन्ध' इत्यपि लभ्यत एव पाठः। तर्हि 'गन्ध' इत्येव मूलतया नेयम्, अलं विप्रतिपत्तिपदयोः प्रागुक्तयोः पाठयोः परिग्रहेणे'—ति चेन्न, पाठस्यास्य प्रविरलत्वात्। तत् किमत्र प्रतिपत्तव्यमिति चेत् 'राजमार्ग आश्रयणीयः'। योगविभागश्च सः। 'गन्धस्येद्' इत्येव हि योगविभागात् सूत्रस्य रूपम्। एतेन शक्यसमर्थनः सर्वत्रैवेदादेशः। नास्त्यसौ भाष्यानुमोदितः, तत्रास्यानुल्लेखादितिचेत् पाणिनौ कात्यायने च योगविभागस्याप्राप्तेर्महाभाष्येणापि न स आश्रयणीयस्तर्हि। अथ मल्लिनाथ एवादरणीयः, न तु वल्लभादयस्तत्प्राचीनास्तर्हि 'गन्धी' इत्येव पठनीयम्, स्वल्पदोषत्वात्। ननु 'गन्ध' इत्येव कथं नाद्रियते सर्वथैव निर्दोषत्वात्, प्रविरलविषयत्वेऽप्यन्यत्र भूयसां पाठानामादृतचरत्वादिति चेत् किं ब्रूमः कालिदास एवात्र 'इन्नन्तत्वं' समर्थयति। तथा 'चतुरस्रशोभि वपुः (कुमार १.३२) इत्यत्र 'चतुरस्रशोभ'—मित्येव केवले वक्तव्ये इन्नत्वमेवादृतं तेन। सन्ति चेदृशास्तत्र दशाधिका प्रयोगाः। अथोच्यते शुभिरिव नास्ति गन्धिः क्रियात्वेन प्रसिद्धः, तत्र हि गुणत्वस्यैव पुरःस्फूर्त्तिकत्वाद्' इति, तर्हि 'पार्वतीवदन—गन्धवाहिने' (कुमार ८.१९) 'तुल्यगन्धिषु (रघु. ४.४७) 'ददौ सरःपङ्कजरेणुगन्धि गजाय गण्डूषजलं करेणुः' (कुमार ३.३७) इति, 'हविःशमीपल्लव—लाजगन्धी पुण्यः कृशानोरुदियाय धूम' (रघु. ७.२६), इति किञ्चित्समा— वर्जितनेत्र—शोभी (६.१५) इत्यादींश्च प्रयोगान् पश्यतामत्र स्थितस्य गतिश्चिन्तनीयेति निर्जीवमुत्तरम्। ननु सजीवं किम्? यत्र यस्य तोषः। योगविभागात् 'गन्धिरि'—ति वा स्वीकार्यम्, मत्वर्थीयमिन्प्रत्ययं विहाय 'गन्धः' इति वा। प्रयोगान्तराणि च दृष्ट्वा कर्मधारयादपीन्नन्तत्वमत्र स्वीकर्त्तुं न न शक्यम्। अस्ति साम्प्रतं मल्लिनाथस्य यशः समुच्छ्रितमिति वल्लभादीननादृत्य स एवात्रादर्त्तव्यः, तदभिमत एव च पाठो मूलत्वेन

स्वीकर्त्तव्यः—'पुष्पगन्धी' इति। व्याक्रियाक्लिष्टानां मा भूमाऽधिकं क्लेशावहा इति साम्प्रतमियमस्माकं प्रत्यङ्मुखता, कालिदासग्रन्थावल्याः प्रथमे संस्करणे 'पुष्पगन्धिरि'—त्येव स्वीकृतवतामपि।

(घ) द्वादशे सर्गे सीतां प्रति सूर्पणखायास्तर्जना मल्लिनाथपाठे

**फलमस्योपहासस्य सद्यः प्राप्स्यसि पश्य माम् ।**
**मृग्याः परिभवो व्याघ्र्यामित्यवेहि त्वया कृतम् ॥** १२.३७

एवंरूपा। अत्र मातृकाबाहुल्ये समादृतः पाठः 'मृगीपरिभवो व्याघ्र्यां मृत्यवे हि त्वया कृत' इति। अत्र मल्लिनाथपाठे मृगीपदेन तृतीयान्तेन भवितव्यम्, त्वयेति त्वत्पदवाच्येन सामानाधिकरण्यस्याऽन्यथाऽलाभात्। तत्रार्थः 'त्वया (यत्) कृतं (तत्) व्याघ्र्यां मृग्या परिभव इत्यवेहि' इति। गर्भितत्वमत्र दोषः, व्यवच्छेद्येन परिभवेन व्यवच्छेदकस्य इतिकारस्य निर्व्यवधानमयोगात्। अस्ति हि तयोर्मध्ये व्याघ्र्यामिति पदम्। विधेयाविमर्शोऽत्र द्वितीयो दोषः। 'त्वया कृत'—मित्युद्देश्यम्। तथाविधः परिभवश्चात्र विधेयम्। अस्ति चानयोः पौर्वापर्यवैपरीत्येन पाठः। व्याहतं तेन विधेयस्योद्देश्याऽऽनन्तर्यम्, संदिग्धं तेन विधेयस्य विधेयत्वमुद्देश्यस्योद्देश्यत्वमिव। प्रसूयते चानेन विरुद्धा मतिः। प्रतीयते ह्यात्रोद्देश्यस्य विधेयत्वं विधेयस्य चोद्देश्यत्वम्। अथोच्यते क्रियापदेनेह व्यवच्छेद इति नास्ति संशय उद्देश्यविधेययोरभिज्ञान इति। मा भूत् संशयः, क्लेशस्त्वनर्गलप्रसर एवेति प्रतीतिमान्थर्यान्नास्त्येवात्र परिहारः। पाठान्तरे पुनरल्पः क्लेशः। 'मृगीपरिभव' इति समासे तृतीयातत्पुरुषं प्रति बुद्धेः सहसाऽधावनात्। 'मृग्याः परिभवः, मृग्यां परिभव' इति वा तत्पुरुषान्तर एव तस्याः स्वरसतः प्रवृत्तेः। 'मित्यवेहि' इति 'मृत्यवे हि' इति च ये पदे तयोर्लिपिसाम्येन संभवत्येव भ्रमः। मल्लिनाथपाठे मृत्युर्व्यङ्ग्यः, पाठान्तरे पुनर्वाच्यः। हि—कारयोगात् तत्रोच्छूनताऽपि संपादिता। इदमेव हि वल्लभ—चारित्र्यवर्धन—सुमतिविजय—विजयगणीनामप्यभिमतम्।

हेमाद्रिरमुमेवं पठति—'मृगीपरिभवो व्याघ्र्यामवेहीति कृतं त्वये'—ति। अरुणगिरिनाथनारायणौ पुनरत्रान्यथा प्रतिष्ठेते। 'मृगीपरिभवो व्याघ्र्यामित्यवेहि त्वया कृत' इति हि तेषां पाठक्लृप्तिः। अर्थश्चास्य ताभ्यामेवं विव्रियते—

**'मृगीबुद्ध्या कृतः परिभवो मृगीपरिभवः। स च न मृग्याम् अपि तु व्याघ्र्यां त्वया कृत 'इत्यवेही'—ति। निगीर्याध्यवसानातिशयोक्तिरत्र तयोरभिमता। अरुणगिरिनाथो 'मृगीकर्तृकः परिभव इत्यन्ये। केचित्तु मृग्येति पठन्ति। तदुभयमपि नातिचतुरस्रम्। यतो व्याघ्र्यामिति निगीर्या—ध्यवसानादतिशयोक्तिः, तदौचित्यानुसारेण मृगीपरिभवशब्देऽपि सैवाङ्गीकरणीया। मृग्येति पाठे मृग्या त्वयेति रूपकमस्तीति चेन्नैवम्। रूपकेऽपि रूप्यस्यैवं दूरस्थता न सहृदयैरङ्गीक्रियते। त्वं मृगीसदृशी, अहं व्याघ्रीसदृशीति च न विवक्षितम्, अपितु व्याघ्रीसदृश्यां मयि मृगीसदृशप्राकृतयोषिद्विषयामवज्ञां न कर्तुमर्हति सीतेति।'**

इत्येवं मल्लिनाथविवक्षां प्रत्याख्याति, स्मरति च वल्लभदेवं 'मृत्यवे हि त्वया कृत इति वल्लभपाठः' इति। न चामुं प्रत्याख्याति। किमत्र प्रतिपत्तव्यम्? मृत्योर्वाच्यता वाऽत्रोचिता व्यङ्ग्यता वा? ब्रूमः 'व्यङ्ग्यतैवात्र मितंपचा, न वाच्यते'—ति। कथमिति चेदेवम्—'परिभूता त्वया व्याघ्री, न मृगीत्यवधारये'—त्यरुणगिरिनाथ—नारायणयोर्योजना, 'मृग्या त्वया परिभवो व्याघ्र्यां मयि चिकीर्षित' इति मल्लिनाथहेमाद्रिभट्टयोः। अनयोररुणगिरिकृतैव योजना संदर्भसमर्थिता। अत्र 'पूर्वं क्षणसैम्ये'ति पश्चाच्च 'रूपं सूर्पणखा नाम्नः सदृशं प्रत्यपद्यते'—ति सूर्पणखाया रूपविपर्ययो वर्ण्यते पूतनाया इव।

भूयश्च **लक्ष्मणः प्रथमं बुद्ध्वा कोकिलामञ्जुवादिनीम् ।**
**शिवाघोरस्वरां पश्चाद् बुबुधे विकृतेति ताम् ॥**

**पर्णशालामथ क्षिप्रं विकृष्टासिः प्रविश्य सः ।**
**वैरूप्यपौनरुक्त्येन भीषणां तामयोजयत् ॥**

**सा वक्रनखधारिण्या वेणुकर्कशपर्वया ।**
**अङ्कुशाकारयाऽङ्गुल्या तावतर्जयदम्बरे ।।**

इत्येवमियं प्राप्तरूपविपर्ययैव चित्रिता महामतिना कालिदासेन। एवं च प्रकृतेऽपि 'त्वयाऽहं मृगीति बुद्धा, अस्मि त्वहं व्याघ्री'—ति रूपविपर्यय एव ग्रहीतुमुचितः। 'मृगीपरिभवः केलिः, व्याघ्रीपरिभवो मृतिः' इति हि व्यङ्ग्यतायां मृत्युनापि व्यङ्ग्येनैव भाव्यम्। ततश्च—'आहूतो मृत्युरेवाद्य कुर्वत्या क्रीडनं त्वया।' इति वाऽत्र वक्तुमुचितम् 'नाहं मृगी भवाम्येतां मां व्याघ्रीमवधारये'—ति वा। नोचितमनयोर्मिश्रणम् 'मृगीपरिभवो व्याघ्र्यां मृत्यवे' इति। एवं च—

**मृगीपरिभवो व्याघ्र्यामित्यवेहि त्वया कृत'** इति,
**मृगीपरिभवो व्याघ्र्यामित्यवेहि कृतस्त्वया**—इति

वा पाठोऽत्र गतक्लेशः, संदर्भौचितश्च।

(ङ) **स सेतुं बन्धयामास प्लवगैर्लवणाम्भसि ।**
**रसातलादिवोन्मग्नं शेषं स्वप्नाय शार्ङ्गिणः** ।। १२.७०

अत्र मल्लिनाथादृते सेतुबन्धपद्यपाठे महदनौचित्यम्, बन्धनक्रियायां शेषस्यानन्वयात्। इवपदप्रयोग उपमानोपमेयवाक्ययोरेकवाक्यत्वेनैवो—पलब्धेः, अपरिहार्य एव च मुख्यायां क्रियायां शेषस्यापि कर्मत्वेनान्वयः किञ्च लवणोदधादिति वक्तव्ये बहुव्रीहिघटितं यल्लवणाम्भसीत्युक्तं तदत्राऽवाचकत्वदुष्टम्। अतएव हेमाद्रेर्लवणोदधावित्येव पाठः। अन्येषामपि च तत्सगोत्राणां वल्लभदिनकरचारित्र्यवर्धनानाम्। मल्लिनाथारुणगिरिनाथ—नारायणानां पुनर्बहुव्रीहिरेवात्राभिमतः। तच्च तातकूपन्यायेन यदुपस्थितं तत्रैव बहुमाननम्, आलस्यं च पाठान्तरगवेषणक्लेशे। अत्र पाठान्तरम्—

**स सेतुं बन्धयामास यो बभौ लवणोदधौ ।**
**रसातलादिवोन्मग्नः शेषः स्वापाय शार्ङ्गिण ।।** इति।

अत्रापि लवणोदधावित्यस्य स्थाने लवणाम्बुधाविति, उन्मग्न इत्यस्य च स्थाने 'उत्तीर्ण' इति 'उदीर्ण' इति च पाठान्तरम्। प्लवगैरित्यस्य प्लवङ्गैरिति तद्रूपान्तरस्येव व्यामोक्षः, तदर्थस्य प्रयोजककर्तृत्वेन रामायणप्रसिद्धत्वेन च स्वयमाक्षेपात्। भल्लूकानामपि सेतुनिर्माणे संग्रहस्यावकाशोऽत्रापरो हेतुः। प्लवगैरित्युक्ते तेषां संग्रहस्यासंभवात्। अस्मदनुशीलितासु रघुवंशमातृकासु वर्त्तते च बहूनामयमेव संमतः पाठः। नन्दर्गीकरोऽपि द्वादशस्य सर्गस्य तदनुशीलितासु १३ मातृकासु तिसृणां 'यो बभा'—विति यत्पाठान्तरं तद्घटितत्वमेव सूचयति। अयं च विशेषो यदेतासु द्वे संजीविनीसहिते।

अत्र पुनरपरः क्लेशः। रक्षितमत्र व्याकरणम्, परिहृताऽन्वय—स्यानुपपत्तिः, आनीतं तु हृदयशूलम्। हृदयशूलमेवेदं यदत्र सेतुबन्धनरूपस्य मुख्यवाक्यार्थस्य खिलीकारः। यथा चेदं तत्—

१. स सेतुं बन्धयामास प्लवङ्गैर्लवणाम्बुधौ।। इति

२. स सेतुं बन्धयामास यो बभौ लवणोदधौ।। इति

च यत् पाठद्वयं तदनुशीलनया स्पष्टम्। द्वितीये बन्धनक्रियाऽधिकरणरूपाय स्वातिबिन्दवे विवृतवदना तिष्ठति। यावदसौ निपिपतिषति तावदस्य मार्गं 'यो बभौ' इति क्रियान्तरं निरुणद्धि। जायते चाधिकरणेस्याभातिनैवान्वयः। स सेतुं बन्धयामास इत्येकम्, यो लवणाम्बुधौ बभौ इति च द्वितीयमिति सूत्रे किलामू भवतः, न काव्यवचसी। एवं हि मुख्यः सेतुबन्धवाक्यार्थोऽत्र नितान्तं कदर्थितः। तदिदं वाच्यावचनम्। अमुख्यः शेषसादृश्यार्थश्चात्र प्रामुख्येणोक्त इति अवाच्यवचनत्वमत्र। किञ्च संभावनमत्र प्रधानं, न सादृश्यम्। अत एव तत्र रसातलोन्मज्जनं तत्र च शार्ङ्गिस्वापो हेतुतयोपनिबध्येते। एवं हेतूत्प्रेक्षैवोत्तरार्धे प्रधानम्। यो बभाविति क्रियापदे प्रयुक्ते तु सादृश्यमेव प्रगुणायेत। तामिमां सर्वामपि काव्यविडम्बनां परिहर्त्तुं 'शार्ङ्गिण' इति पदस्य स्थाने 'यो बभौ' इति परिवर्त्तनमिच्छामः। अत्रापि प्राधान्यं सादृश्यस्यैव,

तथापि परिहृतान्यक्लेशानां न दूयेत ततः सहृदयानां हृदयमधिकम्। अस्ति चात्र लाभान्तरम्। तच्च रामे प्रसिद्धस्यापि शार्ङ्गित्वस्य शार्ङ्गिपदेन यत् पौनरुक्त्यं, वाच्यत्वं च तत्परिहारः। न चेदं परिवर्त्तनं साम्प्रतं यावत् प्राप्तं कुत्रापि मातृकायाम्। यैस्तपस्विभिः सेतुर्बद्धस्तेषां प्लवगानां सर्वथाऽनुल्लेखः, येन तु बन्धितस्तस्य पुनः 'स' इति 'शार्ङ्गिण' इति च द्विरुल्लेख इति यद् वैशसं तदप्यत्र परिहृयेत। तस्मादत्र—

**स सेतुं बन्धयामास प्लवङ्गैर्लवणाम्बुधौ ।**
**रसातलादिवोन्मग्नः शेषः स्वापाय यो बभौ ॥**

एवमिव पाठः कल्पनीयः। वाक्यार्थस्यानवद्यत्वमत्रापि न त्वनुभवामः।

(च) द्वादश एव सर्गेऽस्माकं कालिदासग्रन्थावल्ल्यां—

**गरुडापातविश्लिष्टमेघनादास्त्रबन्धनः ।**
**दाशरथ्योः क्षणक्लेशः स्वप्नवृत्त इवाभवत् ॥**

इति प्रसिद्धः श्लोकः। तत्र पाठो मल्लिनाथस्यायमेवाभिमतः। नित्यनपुंसकस्य बन्धनस्य पुंस्त्वमत्र बहुव्रीहित्वं वृत्तेरासूचयति। ततश्च पूर्वार्धपरिसमाप्तिः विश्रममदत्वाऽऽकाङ्क्षाक्लेशमेव ददाति—'कोऽसौ पदार्थो यत्रासौ गुणीभूतः पूर्वार्धवाक्यार्थ' इति। उत्तरार्धं प्रविशन्ति तद्गवेषणामेव पुरस्कृत्य सचेतसः सूर्पणखामिव तद्भ्रातरः। न खल्वल्पाय कल्पतेऽसौ क्लेशाय। अतोऽत्रारुणगिरिनाथः—

**गरुडापातविश्लिष्टमेघनादास्त्रबन्धयोः ।**
**दाशरथ्योः क्षणक्लेशः स्वप्नदृष्ट इवाभवत् ॥**

इति पाठं कल्पयति। न क्वापि लब्धोऽस्माभिरेष स्वल्पक्लेशोऽपि पाठः। दर्शनक्रियायां क्लेशस्य कर्मत्वं पाठेऽत्रास्वाभाविकम्। बन्धनस्य नु स्वाभाविकम्। अतएव 'स्वप्नवृत्त' इति मल्लिनाथस्वीकृतं पाठान्तरं तत्र।

नाथद्वयपाठसांकर्येण—'गरुणा००बन्धयोः दाशरथ्योः०० स्वप्नवृत्त इवाभवत्' इत्येवं पाठकल्पनं चारुतरमपि न तोषाय। मुख्यत्वेन वर्णनीययो—र्बन्धनतद्विश्लेषपदार्थयोर्गुणीभावस्यात्राप्यपरिहारात्। अत एव हेमाद्र्यादीनां भूयसीनां मातृकाणां च पाठः—

**गरुडापातविश्लेषि मेघनादास्त्रन्बधनम् ।**
**दाशरथ्योः क्षणक्लेशि स्वप्नवृत्तमिवाभवत् ।।** इति।

अस्ति चेदमेवाभिमतं वल्लभ—हेमाद्रि—चारित्र्यवर्धन—दिनकर—सुमति—विजयानाम्। अत्रापि ०विश्लिष्टे० त्यपि पाठान्तरं सुलभम्। किं च विश्लेषस्य वृत्तत्वमत्र विवक्षितम् न त्वारम्भमात्रम्। ततो ०विश्लिष्टमिति पाठ एवात्र पारमार्थिकः। एवं चात्रेदं निगमनम्—

**गरुडापातविश्लिष्टं मेघनादास्त्रबन्धनम् ।**
**दाशरथ्योः क्षणक्लेशि स्वप्नवृत्तमिवाभवत् ।।** इति।

अत्र ब्रूमः—

**मल्लिनाथ! भवते नमस्त्वया मूलशोधशिथिलादरेण यत् ।**
**पायिता अपपदार्थमप्यमी शासनेन नु वसारसं वयम् ।।**

(च) **भुजमूर्धोरुबाहुल्यादेकोऽपि धनदानुजः ।**
**ददृशे ह्ययथापूर्वो मातृवंश इव स्थितः ।।**

इति द्वादश एव सर्गे रावणस्य वर्णने मल्लिनाथारुणगिरिनाथादृतः पाठः। यादवप्रकाशस्य 'दशास्यो विंशतिभुजश्चतुष्पान्मातृमन्दिर' इति वचनमेतयोः शरणं, रावणस्य चतुष्पात्त्वं प्रमाणयितुम्। अत्र वल्लभ—हेमाद्रि—सुमतिविजया नन्दर्गीकरानुशीलितासु १३ मातृकासु १० मातृकाश्च 'भुजोत्तमाङ्गबाहुल्यादि'—ति पठन्ति। अस्माभिरप्यनुशीलितासु २४ मातृकासु २०—मातृकाणां भुजोत्तमाङ्गेत्येव पाठः। एकस्याम् 'अन्योन्याङ्गबाहुल्यादि'—ति। काशीहिन्दू—

विश्वविद्यालये विद्यमाना या शारदालिपिलिखिता रघुवंशमातृका तस्यां पुनर्भुजमूर्धोरुबाहुल्यादित्येव पाठः। अरुणगिरिनाथेन सेतुबन्धादुद्धृतो—

**निस्सेसणिहअबन्धुओ सो एकोपि बहुभुयादुप्पेच्छो ।**
**भीसणमुहसंघादो रख्खअलोअपणिग्गदीव्व दहवअणो ।।**

इत्यस्मिन् प्राकृतपद्येऽपि नास्ति बाहुल्यमूरूणाम्।

'हि अयथापूर्व' इत्यस्यापि 'स यथापूर्वमि'—ति भूम्ना समादृतः पाठः। जानात्यमुमरुणगिरिनाथोऽपि। तदेव च मूलम्। अयमत्रार्थः— मृतसर्वराक्षसकुलोऽपि रावणो युद्धभूमौ राक्षसकुलपरिवृत एव लक्ष्यते स्म भुजानां मूर्ध्नां च बाहुल्यात्'। 'ददृशे स यथापूर्वमि'—त्येव ह्येतदनुरूपः पाठः। 'पूर्वं यथा दृश्यते स्म तथैवाधुनाऽपि ददृश' इति विवक्षा नान्यथा प्रशाम्यति। मातृवंशपदेनात्र राक्षसचक्रमेव विवक्षितम्, रावणमातू राक्षसवंशोत्पन्नत्वात्। एवं च सर्वमिदं चतुरस्रम्। एवमत्रायमेव पाठो मूलम्—

**भुजोत्तमाङ्गबाहुल्यादेकोऽपि धनदानुजः ।**
**ददृशे स यथापूर्वं मातृवंश इव स्थितः ।।** इति।

अथ यादवप्रकाशवचनस्य कानु सङ्गतिरित्यनुरुद्ध्यते, तच्छ्रूयताम् अग्निपुराणादिषु हि धनदस्य त्रिपात्त्वम्, तदनुजस्य रावणस्य च चतुष्पात्त्वं प्रसिद्धम्। वाल्मीकीये रामायणे पुना रावणस्य द्विपात्त्वमेव। किं च 'राक्षसकुलं नष्टम्, रावण एकाकी, तथापि राक्षसकुलरिवृत इवालक्ष्यते'—ति वक्तव्यमेवात्र प्रधानम्। तत्र हेतुत्वमङ्गगतस्य बाहुल्यस्यैव। तच्च भुजोत्तमाङ्गमात्रगतत्वेनापि प्रसिद्ध्यत्येव। तदलमप्रसिद्धस्याबहुमतस्य चोरुघटितस्य पाठस्य मूलत्वपरिकल्पनया। अथ नेदं पाठान्तरम्। रूपान्तरमिदम्। अभ्यस्तरामायणो हि लोको नार्हति ग्रन्थिलेन बन्धेन पीडाम्।

(छ) त्रयोदशे सर्गे–

**इमां तटाशोकलतां च तन्वीं स्तनाभिरामस्तबकावनम्राम् ।**
**त्वत्प्राप्तिबुद्ध्या परिरब्धुकामः सौमित्रिणा साश्रुरहं निषिद्धः ॥**

इति रामस्य विरहे परिरिप्समान इति परिरब्धुकाम इत्यस्य स्थाने, सास्रम् इति च साश्रुरित्यस्य स्थाने पाठः। अत्र द्वितीये विचारः। साश्रुरिति पाठे रामस्याश्रुयुक्तत्वमायाति, सास्रमिति पाठे पुनः सौमित्रेः। रामोऽशोकलतां सीतेत्यमन्यत। 'प्राप्ता सीते'–ति हर्षात् साश्रुरसौ तां परिरब्धुमचेष्टतेति तत्र प्रथमे वाक्यार्थः। 'रामभद्रोऽशोकलतामपि सीतामनुबुध्यते, परिरिप्सते च तद्बुद्ध्याऽतद्भूतामिमां तामित्यहो दशापर्ययोऽस्ये–ति विमृश्य तत्समदुःखतया लक्ष्मणः साश्रुरजायत न्यवारयच्च तं तस्मात् प्रमत्तव्यापारादि'ति च द्वितीये। अनयोः कुत्र वा विप्रयोगौचित्यमिति विचार्यम्। अनुभावो हि वियोगकातरत्वादेश्चित्तवृत्तिजातस्य व्यञ्जको भवति। स चाऽत्र रामनिष्ठस्य विप्रयोगकातर्यस्य व्यञ्जनाय द्विरुपात्तः परिरम्भचेष्टारूपेण साश्रुत्वेन च 'साश्रुरि'ति पाठे। लक्ष्मणनिष्ठायाः करुणायास्तु व्यञ्जकमत्र गवेष्यम्। निषिद्ध इति निषेधव्यापारोऽत्र न क्षमः, करुणां विनाऽपि तस्य संभवात्। सास्रमिति पाठे पुनर्लक्ष्मणगतत्वेनाप्यनुभावस्य लाभः, सुव्यञ्जना च करुणा। रामगतत्वेनाश्रूणां प्रतिपादनमधिकप्रायमपि, तद्विनाऽपि रामचित्तवृत्तिविशेषस्य परिरम्भमात्रचेष्टयेव प्रसिद्धेः।

अत्र सञ्जीविन्या निर्णयसागरीये संस्करणे साश्रुरिति मुद्रा, नन्दर्गीकरीये च सास्रमिति। वल्लभहेमाद्रिप्रभृतीनामपि 'सास्रमि'–त्येव पाठः। मातृकासु या नन्दर्गीकरेणानुशीलिता याश्च मया तासां 'साश्रुरि'–त्येव पाठो भूयोविषयः। नन्दर्गीकरेणाऽनुशीलितानां तासां त्रयोदशानां सप्तसु साश्रुरित्येव पाठः। सुमतिविजयो विजयगणिश्चामुमेव मूलत्वेन पठतः। एवं स्थितेऽत्र स्वमनीषिकयैव प्रवर्तितव्यं बलाबलं विचार्य।

(ज) शत्रुघ्नस्य लवणवधावदाने—

**सौमित्रेर्निशितैर्बाणैरन्तरा शकलीकृतः ।**
**गात्रं पुष्परजः प्राप न शाखी नैर्ऋतेरितः ।। २० ।।**

**विनाशात् तस्य वृक्षस्य रक्षस्तस्मै महोपलम् ।**
**प्रजिघाय कृतान्तस्य मुष्टिं पृथगिव स्थितम् ।। २१ ।।**

इतीमे ये पद्ये अनयोर्द्वितीयस्य प्रथमचरणे 'निशानं स्वस्य शूलस्ये'ति भूयसीषु मातुकासु टीकासु च समादृतः पाठः, मल्लिनाथं हेमाद्रिं च विहाय। अत्र वृक्षस्य शकलीकरणरूपो विनाशः प्रथम एव पद्ये प्रतिपन्नः। महोपलपरिग्रहाय हेतुत्वेन द्वितीये पद्ये तस्य भूयः परिग्रहः पुनरुक्त इति 'निशाने'त्यादिपाठमेव मूलमिति निश्चिनुमहे। अरुणगिरि—नारायणौ निशानमित्यादिकमेव वित्तः। स्वस्येत्यस्य स्थाने तस्येतिपाठोऽपि क्वचिल्लभ्यते, निशानमित्यस्य च स्थाने विशानमिति। सोऽयं लिपिदोष एव। एवमत्र द्वितीयं यत् पद्यं तस्य—

**निशानं स्वस्य शूलस्य रक्षस्तस्मै महोपलम् ।**
**प्रजिघाय कृतान्तस्य मुष्टिं पृथगिव स्थितम् ।।**

इति या पाठः स एव वस्तुतो मूलम्। लिपिसाम्यमप्यत्र साहाय्यकृत्।

(झ) षोडशे सर्गे ग्रीष्ममल्लिकावर्णनपरं यत् पद्यं तस्य मल्लिनाथपाठे 'वनेष्वि'—ति पदेनारम्भः। मदनुशीलितासु सर्वास्वपि मातृकासु, हेमाद्रिः, अरुणगिरिनाथः, नारायणः, वल्लभः, चारित्र्यवर्धनः, दिनकरः, सुमतिविजयश्चेति टीकाकृत्सु च 'नवेष्वि'—ति तस्य स्थाने पाठः। उद्गन्धित्वसिद्धये कुड्मलगतं नवत्वमेवात्राधिकमुचितम्। वनं पुनरनुषङ्गलभ्यमिति वनेष्विति पाठोऽपुष्टप्रायः। एवं च पद्यमिदं—

**नवेषु सायन्तनमल्लिकानां विजृम्भणोद्गन्धिषु कुड्मलेषु ।**
**प्रत्येकनिक्षिप्तपदः सशब्दं संख्यामिवैषां भ्रमरश्चकार ।।**

इत्येवमेव स्वीकार्यम्।

(ञ) 'कुशस्याङ्गदरत्नं सरयूह्रदेऽज्ञातपातं पपात, न च लब्धं कृतबहुश्रमैरपि जालिकैः। बन्ध्यश्रमास्त एते निवेदयन्ते'– इति वाक्यार्थे श्लोकः

**ततः समाज्ञापयदाशु सर्वानानायिनस्तद्विचये नदीष्णान्।**
**बन्ध्यश्रमास्ते सरयूं विगाह्य तमूचुः।।'** इति।

अत्र 'ऊचुरि'–त्यस्यानन्तरं शब्दः 'अम्लानमुखप्रसादाः' इति, 'आम्लानमुखप्रसादा' इति, अम्लानमुखप्रसादम्' इति, 'आम्लानमुखप्रसादम्' इति, 'आम्लानमुखारविन्दा' इति चेति चत्वारस्तस्य पाठाः। कोन्वत्र मूलत्वेन ग्राह्यः। एकत्र म्लानिः प्रतिपाद्येतापरत्र च तदभावः, एकत्र प्रसादस्य कुशमुखवृत्तित्वं विज्ञायेताऽपरत्र पुनरानायिमुखवृत्तित्वम्। किमत्र कवेर्विवक्षितम्! अनिर्णायिका अत्र पाण्डुग्रन्थाः। तेषामुभयत्रापि तुल्यबलत्वात्। टीकाकृत्सु वल्लभ–मल्लिनाथारुणगिरिनाथनारायणहेमाद्रयः 'अम्लानमुखप्रसादा' इति म्लानेरभावं, प्रसादस्य चानायिमुखवृत्तित्वमाददते। अरुणगिरिनाथो म्लानेरभावे भविष्यदभ्युदयसूचनत्वमीक्षते। अत्रानायिनां मुखप्रसादस्य म्लानौ भयम्, तदभावे च 'कुमुदाख्येन सरयूह्रदवासिना नागेनाभूषणं तद् गृहीत'–मिति निश्चयः कारणम्। कुशविशेषणत्वे मुखप्रसादस्य म्लानौ क्षोभः, तदभावे पुनर्धीरत्वं हेतुः। एवं हि चतुर्ष्वेषु कस्य वाऽत्रोपयुक्ततमत्वमिति पूर्वं विज्ञेयम्। कुश आनायिनां वचनश्रावमेव सौपर्णमस्त्रं नागविनाशाय संदधे इति खलूत्तरपद्य उक्तिः। तत्रैवमध्यवसाये धीवरवचनानां प्रत्येयत्वमावश्यकम्, तदर्थं च धीवराणामाप्तत्वम्। तदिदमाप्तत्वं प्रत्येयवचनत्वञ्चानुभावद्वारैव सूचयितुं शक्यम्। मुखप्रसादस्याम्लानिरेवात्रानुभावतामञ्चितुमर्हति, न तु भय–विषादानुभावो म्लानिः। एवमत्रानायिनां निश्चयोचिता मुद्राऽधिकमुपयोगिनी, तद्भयात्, कुशक्षोभधीरत्वाभ्यां च। आनायिगतं भयम्, कुशगतत्वेन प्रतिपिपादयिषिते च क्षोभ–धैर्ये नातिप्रयोजनकानि। अतोऽत्र 'अम्लानमुख–

प्रसादा' इत्यस्यैव मूलत्वमुत्प्रेक्षामहे। यश्चारविन्दपदघटित: पाठ: तत्र कुशविशेषणत्वमेवोन्नेयम्, आनायिमुखानामरविन्दसादृश्यसंभावनाया अव्यावहारिकत्वात्। तत्रापि क्षोभ एव प्रतिपादयितुमुचितस्तादृशा–भरणभ्रंशासह्यताया एव प्रतिपादितचरत्वात् 'जयश्रिय: संवननमि'–त्यादिनाऽनुपदोक्तेन पद्येन, कोपविलोहिताक्षतायाश्च वक्ष्यमाणत्वात् 'तत: स कृत्वे'–ति समनन्तरोक्तेन तेन। एवमत्र धीवराणां 'भय–धैर्ये', कुशस्य च 'धैर्यक्षोभौ' इत्येवं ये चत्वारो विशेषा एषु धीवराणां धैर्यमधिकमुपयोगीति तदर्थमावश्यक: 'अम्लानमुखप्रसादा' इति पाठ एवात्र मुख्यत्वेन मूलत्वेन च ग्राह्य:।

(ट) अतिथिवर्णने सप्तदशे सर्गे प्रसिद्धमेव 'कातर्यमि'–त्यादि पद्यम्। अस्य सर्वटीकासम्मत: काव्यप्रकाशाद्युद्धृतश्च स एव पाठो य: खलु मुद्रित:। तथा हि

**कातर्यं केवला नीति: शौर्यं श्वापदचेष्टितम् ।**
**अत: सिद्धिं समेताभ्यामुभाभ्यामन्वियेष स: ।।** इति

नन्दर्गीकरस्येव निर्णयसागरस्यापि संस्करणे नास्त्येव किमपि पाठान्तरम्। अस्माभिरनुशीलितासु मातृकासु द्वयो: 'श्वापद'स्य स्थाने 'चापले'–ति स्पष्टो लेख:। दृष्टमात्र एवैष मतिमस्माकमारूढ:। शौर्यविहीनाया अतएव केवलाया नीते: निरुपमानेन कातरभावेन प्रतिपादने प्रक्रान्ते, नीतिविहीने शौर्ये सोपमानस्य चेष्टितस्योपनिबन्ध: प्रक्रमभङ्ग एव। अस्ति च 'शौर्यञ्चापले'–त्यस्य 'शौर्यं श्वापदे'त्यनेन लिपिसाम्यमपि। ततश्चापल–चेष्टितमिति युक्ततर: पाठ:। युक्ततमस्तर्हि क इति चेच'चापद'–चेष्टितम्' इति। शौर्ये चेष्टितत्वमात्रेण नास्ति त्याज्यत्वस्य संभव:, येन च स: तदिदमस्थानचेष्टितत्वमेव। अस्थानार्थ एवात्रापद–शब्देन गृहीत:। चेष्टितस्य कृते किंवा स्थानं युक्तं किं चायुक्तमिति विवेकश्च नीत्याश्रित:। नीतियुक्तं

शौर्यमेव स्थाने चेष्टितम्। तदयुक्तं पुनरस्थान—चेष्टितम् अपदचेष्टित—रूपम्। 'द'—स्य 'ल'—रूपेण ग्रहोऽपि दुश्शक एव। एवमत्र—

**कातर्यं केवला नीतिः शौर्यञ्चाऽपदचेष्टितम् ।**
**अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः ॥**

इति पाठ एव मूलत्वेन मान्यः। पाठेऽस्मिन् समुच्चायकस्य निपातस्य लाभोऽपरो गुणः। श्वांपदे सिंहादिजन्तौ बलमाक्रमणं च दृश्यते, न तु मानसं बलं शौर्यम्। अतएवापि 'श्वापद'—पक्षो दुर्बलः। 'अपदे'—ति पाठस्तु साम्प्रतं यावन्न कुत्रापि मातृकायां दृष्टः।

(ठ) एकोनविंशस्य सर्गस्य यदुपान्त्यं 'तस्यास्तथाविधे'—ति पद्यम् अस्य चतुर्थे चरणे 'विधिना' इत्यस्य स्थाने 'पयसे'—ति पाठः सुप्रचारः। स एव च साधिष्ठः। हेमाद्रिमल्लिनाथाऽरुणगिरिनाथनारायणा 'विधिने'—त्यत्रैव संतुष्टाः वल्लभचारित्रयवर्धनसुमतीनां पुनः पयसेत्येव पाठः।

## ५. मालविकाग्निमित्रम्

(क) मालविका धारिण्या अशोकदोहदे नियुक्ता। गृहीतकिसलया साऽऽर्द्राऽलक्तकं पादमशोकाय समर्पयति। तस्यास्यार्थस्य वर्णनं समपरिवृत्तिविच्छित्त्या येन पद्येन कृतं तस्य शङ्करपाण्डुरङ्गपण्डित—क०अ० सुब्रह्मण्याय्यराभ्यां संपाद्य प्रकाशितयोः मालविकाग्निमित्र—संस्करणयोर्निर्णयसागरसंस्करणे चैवंविधः पाठः—

**आदाय कर्णकिसलयमस्मादियमत्र चरणमर्पयति ।**
**उभयोः सदृशविनिमयादात्मानं वञ्चितं मन्ये ॥** इति।

तारानाथ—श्रीनिवास—काटवेमानामप्ययमेव पाठो विदितः, विदितश्चायमेव मुम्बय्याः कर्णाटकपब्लिशिंगहाउसतः प्रकाशितस्य संस्करणरत्नस्य। ए—शार्पेऽपि तमिममेव पाठं वेत्ति। जयपुरस्थ—मानसिंह—संग्रहालयस्य २३५ क्रमाङ्कितायां मातृकायामिव, अलवरस्थप्राच्यविद्याप्रतिष्ठानसंग्रहालयस्य

२२६४ क्रमाङ्कीयायां, बड़ौदाप्राच्यविद्याप्रतिष्ठानस्थितासु १३७५८, ७२७९, ७००४—इति क्रमाङ्कितासु, वाराणसीसरस्वतीभवनस्थितयोश्चैष एव मूलपाठः। जयपुरस्थ—मानसिंह—संग्रहालये या ६४९ क्रमाङ्किता नितान्तं प्राचीना मातृका १५८३ संवत्सरे लिखितायां तस्यां पुनर्निम्नलिखितो लभ्यते पाठः—

**आदाय कर्णकिसलयमियमस्मै चरणमरुणमर्पयति ।**
**उभयोः सदृशविनिमयादन्योन्यमवञ्चितं मन्ये** ।। इति।

उपर्युक्तेषु संपाद्य प्रकाशितेषु संस्करणेषु पाठ एष पाठान्तरटिप्पणीष्वपि न दृश्यते। अय्यर—पण्डिताभ्यामिव निर्णयसागरीयैः तैरिव चापरैरपि तारानाथवाचस्पतिप्रभृतिभिः पाठमिमं बिभ्रती मातृका नूनं न लब्धा। बड़ौदाया ७००४—प्रतौ नीलकण्ठीटीकापि विद्यते। तस्यामपि नास्त्यसौ पाठः पाठान्तरत्वेनाप्यनुशीलितः। साहित्याकादमीसंस्कर्त्रा सुब्रह्मण्याय्यरमहोदयेन 'जम्मू—तञ्जौर—पुण्यपत्तनकालिकाता'—भ्यो मातृका एकत्रीकृत्य संपादितमिदं नाटकम्। प्रतिनिधत्ते संस्करणमिदं चतसृरपि दिशः। नवीन एष जयपुरीयायां ६४९ मातृकायामुपलब्धः पाठो भारतस्य चतसृणामपि दिशां न विदित इत्यतः सुखेनेवोन्नेतुं शक्यम्।

उपर्युक्तयोः पाठयोश्चतुर्थश्चरणो नितान्तं भिन्नः। प्रच्छन्नतया शकुन्तलां पश्यतो दुष्यन्तस्येवात्र मालविकां पश्यतोऽग्निमित्रस्येर्ष्योदयो ध्वन्यते प्रथमे, द्वितीये पुनस्ताटस्थ्येन निर्वर्णयतस्तस्य विनिमये समत्वदर्शनम्। शाकुन्तलस्य 'चलापाङ्गा'मिति वक्तव्ये विनिमयो न दर्शितः, प्रकृते तु स एव वाक्यार्थः। न केवलं स एव तद्गतं समत्वमपि प्राधान्येन निरूपितमत्र 'उभयोः सदृशविनिमयादि—ति विनिमये सदृशत्वमभिदधता। अग्निमित्रस्य वाक्यार्थेऽस्मिन् नास्ति प्रसक्तिः। नास्त्यनेन कश्चिदपि विनिमयो नायिकायाः। एवं च कीदृशमग्निमित्रस्यात्र वञ्चितत्वम्। यदि पुनरीर्ष्यैवात्र विवक्षिता तर्हि—

**लम्भितपादस्पर्शः कृती त्वमेवाद्य वर्त्तसेऽशोक!।**
**आत्मानं पुनरेतं प्रतीक्षमाणं प्रवञ्चितं मन्ये ॥**

एवमिव किञ्चित् प्रवर्तितव्यं रचनायाम्। नोचितोऽत्र भिन्नयोर्विवक्षितार्थ–योर्व्यामिश्रणेन विनायकस्य वानरीभावः। किञ्च पश्यन्तु प्रथमे पाठे 'कर्णपल्लव'–मित्यनुक्त्वा यस्य रक्तिम्नः प्रद्योताय 'कर्णकिसलय'–मित्युक्तं प्रतिबिम्बभूतस्य तस्य बिम्बतयोपमेये किं तावदुपात्तमि'–ति। न किमपीति चेत् सोऽयं गुणविपर्यय एव दोषनामा। चरमे तु तदर्थमरुणपदं सुलभम्। 'अस्मादि'ति पदस्याभावाज्जायमाना विनिमयाऽपादानस्य या व्यज्यमानता सा तथा न क्लेशयति यथाऽऽह्लादयत्यारुण्यस्य बिम्बप्रतिबिम्बात्मना स्फुटा प्रतिपत्तिः। विनिमयगतस्य समत्वस्य च यत् सदृशपदेन प्रतिपादनं तस्यावञ्चितत्वप्रतिपादकेन तुरीयेण पादेनोपोद्वलनमिति पाठेऽस्मिन् सुप्रसन्ना स्वच्छार्था च भगवती कालिदासस्य भारती। अतः पर एव पाठोऽत्र परः। छन्दोयोजना चोभयत्रापि समैव। अस्ति चेयमेव योजना 'धृतिपुष्पे'–त्यादिषु परत्रापि निर्व्यूढा कविना। अयं चात्र प्रबलिष्ठो हेतुर्यद् वामनस्य काव्यालङ्कारसूत्रवृत्तौ परिवृत्त्यलङ्कारस्य प्रथमभेदाय समपरिवृत्ति–संज्ञायास्यैव पद्यस्य द्वितीयेनैव पाठेन सह निदर्शनम्। अस्ति च तत्र पाठान्तरमपि, किन्तु तत्रापि नास्ति गन्धः प्रथमस्य पाठस्य। इमे हि तत्र टिप्पणीदत्ते पाठान्तरे–

१. अस्मादनुचरणमर्थयति केला' इति

२. अस्मादिह चरणमर्पयति बाला' इति च।

स्पष्टमेतेन यद् विक्रमसंवत्सरस्य नवम्यां शताब्द्यां जयपुरीय ६४९–मातृकापाठ एव मूलपाठतयाऽऽसीत् प्रसिद्धः। तस्यास्य पाठस्य प्रविरल एव प्रचारः साम्प्रतं, मालविकाग्निमित्र–मातृकाणां प्रविरलत्वात्। (ख) नाटकानां मातृकासु प्रारम्भे किमपि शीर्षकं न लभ्यते प्रस्तावनायै,

विष्कम्भकाय, प्रवेशकायाऽङ्काय वा। सर्वेषामन्त एव हि दीयन्ते प्रकरणनामानि यथा 'प्रथमोऽङ्कः, विष्कम्भक इत्यादि।

(ग) विक्रमोर्वशीयस्य भारतकलाभवने यास्तिस्रो मातृकाः ताः सर्वा अपि नितान्तं महत्त्वपूर्णाः प्राचीनाः शोभननागराक्षराश्च। तासु चतुर्थाङ्कगता अपभ्रंशगीतिका एकस्यामेव। द्वयोः पुनः काटयवेमाविदितो महाराष्ट्रप्रसिद्धश्च शुद्ध एव पाठः। एतासां मूलभूतानि संवादवाक्यानि तथैव भिन्नपदानि यथा कोणेश्वरीसहितस्य मूलस्य संस्करणान्तराणां च। एतान् पाठान् आश्रित्य त्रीणि पृथग् रूपान्तराणि विक्रमोर्वशीयस्य संपादयितुं शक्यन्ते।

(घ) अभिज्ञानशकुन्तल'—नाम्ना १९८३—संवत्सरे डाक्टरगौरीनाथशास्त्रि—संपादितं संस्करणं साहित्याकादम्या प्रकाशितम्। तत्र तैर्नागरः प्रबन्धो वङ्गीयादिभिः पाठैर्व्यामिश्रय्य मूलत्वेन पठितः दत्ताश्चान्ये पाठाः परिशेषे। तत्र प्रबन्ध एष आदरणीयः व्यामिश्रणं पुनर—वधानेनालोचनीयम्। मातृकासु शाकुन्तलस्य मूलपाठः प्रायेण निर्णयसागरसंस्करणपाठसदृक्षः। विष्कम्भ—प्रवेशकाङ्कानां विभाजनं मातृकास्वासु प्रायेण समानम्। तासु द्वितीयाङ्कारम्भे विदूषकोक्तिरङ्क—पात्रोक्तित्वेनैव गणिता, न तु प्रवेशकपात्रोक्तित्वेन। चतुर्थेऽङ्के शापावधिक एक एव प्रवेशकः। शिष्यप्रवेशमादायाङ्कान्तं यावत् पुनरङ्क एव। अहमदावादस्य ल०द०भारतीयशोधसंस्थानस्य मातृकायामेकस्यां पुनः शिष्यप्रवेशात् पूर्वं 'द्वितीयविष्कम्भक' इति वाक्यम्। षष्ठस्याङ्कस्यारम्भेऽपि धीवरवृत्तान्तान्त एव प्रवेशक इति लेखः, चेटी—सानुमती—कञ्चुकिनां संवादमारभ्य चाङ्कस्यैवारम्भः। सप्तमस्याप्यारम्भे न लभ्यते कश्मीरपाठाभिमतः प्रवेशकः। एवं हि शाकुन्तलस्यास्मदनुशीलितासु मातृकासु दृश्यसूच्यविभागो नितान्तमेव

स्थूल:। प्रवेशक—विष्कम्भकत्वनिर्धारणमपि तासु न नियतम्, क्वचित् प्रवेशकस्यापि विष्कम्भकत्वेन लेखो विष्कम्भकस्येव प्रवेशकत्वेन।

प्राकृतं प्राकृतमात्ररूपमेव मातृकासु लभ्यते। प्राकृतवाक्यानां संस्कृतच्छाया: पुन: पृथगेव पुस्तकाकारेण निबध्यन्ते। एवं बह्व्यो मातृका: प्राकृतच्छायामात्ररूपा एव लभ्यन्ते। सन्त्येवंविधाश्चतस्रो मातृका भारतकलाभवनसंग्रहे। आसु संस्कृतोक्तिवाक्यानि न भवन्ति।[१]

हार्वर्डविश्वविद्यालयस्य हाउटनग्रन्थागारे शाकुन्तलस्य पञ्च मालविकाग्निमित्रस्य चैका हस्तलिखिता मातृका सुरक्षिता:। तासु सर्वास्वपि प्राकृतस्य संस्कृतच्छाया नास्ति।।

◈

१. निबन्ध एष उज्जयिन्यां १९८३ संवत्सरीयेऽखिलभारतीये कालिदाससमारोहे प्रस्तुतो विचारितश्च।

# (१) सौभाग्यम्

शरदां सप्तत्युत्तरं साहस्त्रीयुगं व्यतीतम्, अथापि महाकवेः कालिदासस्य भारती तथैव पुराणभावं नाञ्चति यथा चन्द्रमसः सुधा। सचेतोभिरियमिदानीमपि मुकुलितलोचनै रस्यते। यथा यथा चेयमास्वाद्यते सुमनःसायकस्य चापयष्टितामुपगता इक्षुलतेवोत्तरोत्तरं मधुरायते। शब्दशक्तित्वग्विमोकस्तु यदिपरमस्यामपेक्ष्यते। तदर्थमेवात्र ''कालिदास[१]–शब्दानुक्रम''–नामानं स्वनिर्मितं कालिदाससाहित्यस्य शब्दानुक्रमकोषमुपजीव्य काव्यान्तराणि च यथासंभवमनुशील्य ''कालिदासभारती''–नाम्ना संदर्भ–मिममुपस्था–पयामः। तत्र 'सुभग'–शब्दमिदानीमुपाददमहे।

सुभगशब्दः संस्कृतकोषेष्वनेकार्थतया प्रसिद्धोस्ति--

**सुन्दरेऽधिकभाग्ये च दुर्दिनेतरवासरे...।**
**तुरीयांशे श्रीमति च सुभगः ।।**

मेघदूतसंजीविनी १.४० इति।।

शब्दकल्पद्रुमोक्तदिशा ''टङ्कणः, चम्पकः, रक्ताम्लानः, अशोकः'' इत्येते पदार्थाः सुभगशब्दस्य 'कैवर्ती', 'शालपर्णी, हरिद्रा, नीलदूर्वा, तुलसी, पियङ्गुः, कस्तूरी, सुवर्णकदली, वनमल्ली'–त्येते पदार्थाश्च सुभगाशब्दस्य वाच्याः सन्ति। सुभग–सुभगा[२]–सौभाग्य–शब्दानामभावेपि भगशब्दस्य–

---

१. कालिदासशब्दानुक्रम उत्तरप्रदेशशासनेन प्रकाशनार्थं १९५८–ख्रीष्टाब्दे गृहीतोऽभूत्। डॉ० वासुदेवशरणाग्रवालस्य निर्देशे काश्यामधीयानैरस्माभिः कोषेस्मिन् कालिदाससाहित्यस्य नामाख्यात–निपातपदानां ससंदर्भमकारादिवर्णानुक्रमेण १२५०–पूर्णपृष्ठात्मकः संग्रहः कृतः।

२. अमरकोषे 'सुभगासुतः सौभागिनेय' इत्येवं सुभगाशब्दस्तु विद्यते किन्तु कन्यका–नग्नका–रामा–रमणी–त्यादिस्त्रीविशेषपरशब्दान्तरवत् पृथक्तयोपात्तो नास्ति।

**भगं श्रीकाम्यमाहात्म्यवीर्ययत्नार्ककीर्तिषु ।।**

इत्येवममरे

**भगं श्रीयोनि–वीर्येच्छा–ज्ञान–वैराग्य–कीर्तिषु ।**
**महात्म्यैश्वर्य–यत्नेषु धर्मे मोक्षेऽथ ना रवौ ।।**

इत्येवं मेदिन्याम्।

**भगोर्कज्ञानमाहात्म्ययशोवैराग्ययुक्तिषु ।**
**रूपवीर्यप्रयत्नेच्छाश्रीधर्मैश्वर्ययोनिषु ।।**

इत्येवं च हेमचन्द्रस्यानेकार्थसंग्रहे नानार्थतया शोभनताऽऽतिशय्यमात्रा–धिकप्रतिपादकस्य सुभगशब्दस्यापि नानार्थताभिमतैव। उभयपदवृद्ध्या सुभगशब्दादेव व्युत्पन्नस्य सौभाग्यपदस्यापि नानार्थता "सौभाग्यं सुभगत्वे स्याद् योगभेदे नपुंसकम्"– इत्यनया मेदिन्युक्त्या स्पष्टैव। शब्दकल्पद्रुमे पुनः "टङ्कण–सिन्दूरयो"–रपि वाचकत्वमस्य दृश्यते। टङ्कणो हि हिन्दीभाषायां "सुहागा" कथ्यते। शब्दोयं नूनमेव सौभाग्य–पदस्यैवापभ्रंशः। आयुर्वेदे "सौभाग्यामृत–जीर–पञ्चलवण–व्योषाऽभयाक्षानले"–त्यादिदिशा टङ्कणमिश्रित औषधयोगः सौभाग्यचिन्तामणिनाम्ना व्यपदिश्यते। ज्यौतिषेऽपि–

**सौभाग्यजन्मा सुभगो मनुष्यः श्लाघ्यो जनानां धनवान् गुणज्ञः ।**
**उदारचित्तो बलवान् विवेकी महाभिमानी प्रियभाषणश्च ।।**

इति योगविशेषः सौभाग्यनामा[१] विद्यते। पुराणसाहित्ये सौभाग्यव्रतं प्रसिद्धमस्ति। वराहपुराणे[२] व्रतायास्मै एकः स्वतन्त्रोऽध्याय एवास्ति। तत्र द्वादशमासव्यापी नियम उपदिश्यते। फाल्गुनशुक्लतृतीयातो व्रतमिदमारभ्यते माघशुक्लतृतीयातिथौ च पूर्यते। तत्र फाल्गुने गोधूमस्य, आषाढे यवस्य,

---

१. योगभेदपदेन मेदिनीकारः कदाचिद् वैद्यज्योतिषप्रतिपादितौ द्वावपि योगौ निर्दिशति।

२. पुराणानां ज्योतिषस्य वैद्यकस्य च प्रमाणानि पदायास्मै शब्दकल्पद्रुम उद्धृतानि सन्ति।

कार्तिके श्यामाकस्य भक्षणम्, माघशुक्लतृतीयायां सुवर्णगौर्या दानेनैव सह मधु–घृत–गुड–गोदुग्ध–तिलतैलेतिपञ्च–द्रव्यपूर्णानां पात्राणां दानं क्रियते। हरिहरान्यतरपूजाविधिना सह तादृशपात्रदानं व्रतस्य पूर्तिः। ततः–

**एतानि दत्त्वा पात्राणि सप्त जन्मान्तरं भवेत् ।**
**सुभगा दर्शनीया वा नारी वा पुरुषोऽपि वा ।।**

इति फलश्रुत्यनुसारेण सप्त जन्मानि यावत् स्त्रीपुंसयोः सौभाग्यं लभ्यते। लिङ्गपुराणेपि सौभाग्यतृतीयाव्रतं भाद्रशुक्लतृतीयातिथौ विहितमस्ति। तदेव च व्रतं हरितालिकाव्रतनाम्ना हिन्दूसमाजे साम्प्रतमपि भूम्ना प्रचलितमस्ति। तस्यामेव तिथौ भगवता शङ्करेण तपस्यन्ती भगवती पार्वती परिगृहीतेति तस्याः सौभाग्यतृतीयात्वं यथार्थमेव। स्कन्दपुराणोक्तं सत्यदेवव्रतमपि "सौभाग्य–सन्ततिकरम्"–उदीर्यते। कुन्तकेनापि ध्वनिकृतः–"प्रतीयमानं पुनरन्यदेवे"–त्यादिपद्यस्य "लावण्य"–पदे सौन्दर्यमात्रार्थकं "सौभाग्यपद"–मभिषिच्यते। पुनश्च तेन "यस्मात् किमपि सौभाग्यं तद्विदामेव गोचरम् सरस्वती समभ्येति"–इत्येवं तदर्थकमेव सौभाग्यपदं प्रयोज्यते। तदर्थक एव च सौभाग्यनामा गुणोपि काव्यगतस्तेन प्रतिपाद्यते। तदित्थं "सुभग–सौभाग्य"–पदयोः संस्कृतसाहित्ये बहुविधाः प्रयोगा लभ्यन्ते।

कालिदासेनापि द्वितयमप्येतत् पदं भृशं प्रयुक्तमस्ति। सर्वेषामेव प्रयोगाणामनुशीलनेन प्रतीयते यत् कालिदासः केवलमर्थद्वय एव शब्दाविमौ प्रयुयोज एकः सौन्दर्यरूपः अर्थः, परश्च स्त्रीपुंसयोरन्योन्यप्रीतिरूपः। तत्राद्यः सामान्योर्थः परश्च विशेषः। अनयोः सामान्येर्थे सुभगशब्दप्रयोगाः कालिदाससाहित्ये पञ्चदशसु निम्नाङ्कितेषु स्थलेषु दृश्यन्ते–

१. अमुनैव कषायितस्तनी सुभगेन प्रियगात्रभस्मना ।
नवपल्लवसंस्तरे यथा रचयिष्यामि तनुं विभावसौ ॥
कुमार ४.३४॥

२. पूर्वजन्मधनुषा समागतः सोऽतिमात्रलघुदर्शनोऽभवत् ।
केवलोऽपि सुभगो नवाम्बुदः किं पुनस्त्रिदशचापलाञ्छितः ॥
रघु ११.७९॥

३. वायुर्विवाति हृदयानि हरन्नराणां
नीहारपातविषगमात् सुभगो वसन्ते ॥
ऋतुसंहारे ६.२२॥

४. सेविष्यन्ते नयनसुभगं खे भवन्तं वलाकाः ॥
मेघदूते ९॥

५. तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः ॥
मेघे ११॥

६. तीरोपान्तस्तनितसुभगं पास्यसि स्वादु, वेत्रवत्याः पयः ॥
मेघे २४॥

७. संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेर्
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य ॥
मेघे २८॥

८. छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ॥
मेघे ४०॥

९. स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः ॥
मेघे ४२॥

१०. तालैः शिञ्जद्वलयसुभगं कान्तया नर्तितो मे ।
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद् वः ॥
मेघे ७७॥

११. सुभगसलिलावगाहाः पाटलसंसर्गिसुरभिवनवाताः ।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः ॥

शाकुन्तले १.३॥

१२. न च ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु ॥

शाकुन्तले ३.७॥

१३. रक्ताशोकमुपोढरागसुभगं भेदोन्मुखं तिष्ठति ॥

मालविकाग्निमित्रे २.७॥

१४. उन्मत्तानां श्रवणसुभगैः कूजितैः कोकिलानाम् ॥

मालविकाग्निमित्रे ३.४॥

१५. सुभगं तथैव खलु सापि लक्ष्यते ॥

विक्रमोर्वशीये—४.८०॥

एषु प्रथमे संजीविनीकारो मल्लिनाथः 'सुभगेन शोभनेन' इति सुभगशब्दं व्याकरोति, द्वितीये मल्लिनाथो मौनी, हेमाद्रिस्तु[1] 'सुभगः शोभावान्' इति, चतुर्थे मल्लिनाथः 'नयनसुभगं दृष्टिप्रियम्' इति, सुबोधाकारो भरतसेनश्च 'लोचनाह्लादकम्' इति, पञ्चमे मल्लिनाथः 'श्रवणसुभगं श्रोत्रसुखम्' इति, भरतश्च 'कर्णसुखदायी'ति, षष्ठे मल्लिनाथो मौनी भरतस्तु 'सुभगम्' 'सुन्दरम् आह्लादकम् मनोरमम्' इति, सप्तमे मल्लिनाथो मौनी भरतः 'सुभगं मनोहरम्'—इति, अष्टमे मल्लिनाथः 'प्रकृत्या स्वभावेनैव सुभगः सुन्दरः' इति भरतश्च 'प्रकृतिसुभगः स्वभावमनोहरः' इति, एकादशे राघवभट्टः 'सु अतिशयेन भगो यत्नो येष्वेतादृशाः सलिलावगाहा यत्रेति बहुव्रीहिगर्भो बहुव्रीहिः, भगशब्दो यशोगानवीर्ययत्नार्ककीर्तिषु इति धरणिः'—इति सुभगशब्दं विवृणोति। शेषेषु स्थलेषु टीकाकृतः शब्दमिमं व्याख्यातुं नोपाददते। अन्तिमे पञ्चदशे स्थले

---

१. हेमाद्रिभट्टस्य रघुवंशदर्पणनाम्नी रघुटीका २—१९ सर्गपर्यन्तमस्माभिः संपादिता, प्रकाशिता च १९७३—७४ वर्षे पटनास्थेन KPJRI संस्थानेन।

'सुभगम्' इत्यस्य स्थाने 'सुभगा' इत्यपि पाठोस्ति। किन्तु डॉ० वेलणकर: शास्त्री सुरेन्द्रनाथश्चेति द्वावपि तत्र मौनमवलम्बेते।

उपर्युक्तेन संदर्भेणेदं विस्पष्टं यत् सुभगशब्दस्यात्र ११ पर्याया दत्ता: सन्ति—
१. शोभन, २. शोभावत्, ३. प्रिय:, ४. आह्लादक:, ५. सुखम्, ६. सुखदायि, ७. सुन्दर:, ८. मनोरम:, ९. मनोहर:, १०. रम्य:, ११. यत्न'इति।

एषु शोभन—शोभावत्—सुन्दर—मनोरम—मनोहर—रम्येति षट् तत्त्वत एकार्थका एव। प्रियाह्लादकसुखसुखदायीत्येतेपि च सुन्दरस्यैव विशेषमात्र—बोधका:। 'सुभगसलिलावगाहा' इति शाकुन्तलस्थलेपि 'सुभगा: प्रिया: सलिलावगाहा येषु' इत्येवं विग्रहेण सुभगशब्दस्य सुन्दरत्वपरत्वमुन्नेतुं शक्यम्। भगशब्दस्य यत्नार्थकत्वेपि रम्यत्वं विना सलिलावगाहे तस्यासंगतेरपि सोऽयं विग्रह: करणीय एव। किंच केवलस्यापि भगशब्दस्य संस्कृतसाहित्ये प्रयत्नवाचित्वेन प्रयोगा अस्माभि: कोषमात्रे लब्धा:, नान्यत्र, सुभगशब्दस्य तु तदर्थवाचित्वं दूरेऽपास्तम्, तस्य तु वस्तुत: मुख्यार्थ: सौन्दर्यमेवास्ति, तत्रैव तस्य प्रसिद्धत्वात्। अस्मिन् 'सुभग—सलिलावगाह'—इत्यादिनि शाकुन्तलपद्येपि च वनवातेषु 'सुरभिर्मनोज्ञ' इत्येवं सौन्दर्यपरेण सुरभिशब्देन रम्यत्वमेवोपस्थाप्यते, तत्र च हेतुतया पाटलसंसर्ग:, दिवसपरिणामस्य रम्यत्वं तु ''रमणीयपदं'' प्रयोज्यैव प्रतिपाद्यते। यत्नार्थं तत्र ''प्रच्छाये निद्रायां सुलभत्वम्'' अवश्यं गृहीतमस्ति। अत: पञ्चदशस्वपि कालिदासकृतेष्वमीषु प्रयोगेषु वस्तुत: 'सुभगशब्दस्य' सुन्दरत्वमात्रं प्रतिपाद्यमस्तीति मन्तुं न दुश्शकम्। अग्रे ये विशेषा अर्था: सुभगशब्दस्य दास्यमाना: तेष्वपि सामान्यात्मायमर्थ: स्वीकर्तुं शक्यते। केवलं तत्र सामान्यघटकस्यैकस्यार्थस्योल्वणतया प्रतीते: पृथक्त्वं ब्राह्मणवसिष्ठन्यायेन क्रियते। य इमे टङ्कणादय: पदार्था वैद्यादिशास्त्रेषु प्रतिपादिता लभ्यन्ते

तेष्वपि 'सुन्दरत्व'—मेव मूलत: प्रवृत्तिनिमित्तम्। टङ्कणस्य कान्ति: प्रसिद्धैवास्ति। हरिद्रा च कुङ्कुम—द्वितीया 'हरिद्रा—कुङ्कुमो'—त्सवे सौभाग्यवतीभि: साम्प्रतमपि ललाटिकीक्रियते विवाहमाङ्गल्येपि वरवध्वो: काम—रति—रूपतानिष्पादनाय हरिद्रयैव पीतिकाकार्यं निष्पाद्यते। अन्येपि च दूर्वादय: पदार्था माङ्गल्या: सुभगाश्च भवन्त्येव। अशोकस्य पुष्पश्री:,

**कुसुममेव न केवलमार्तवं नवमशोकतरो: स्मरदीपनम् ।**
**किसलयप्रसवोपि विलासिनां मदयिता दयिताश्रवणार्पित: ।।**

रघु ९.२८

इत्येवं पल्लवश्रीश्च तस्य सुभग—पदवाच्यतां यत्सत्यं सत्यापयत:। या कापि कुटुम्बिनी वर्षपर्यन्तं नियताहारा देवताविशेषानन्यचित्ता निर्जितेन्द्रियग्रामा च तिष्ठेत् तस्या: शरीरम् अवश्यमेव काञ्चनयष्टिनिभं भवेत्। अत: नियमविशेषस्यास्य वास्तवं नाम 'सुभङ्गकरणम्' इति भवति। दामोदरगुप्तस्य कुट्टनीमते—

**सफलं तस्या जन्म स्पृहणीया सैव सकलललनानाम् ।**
**गौरी तयैव महिता सुभङ्गकरणं तपस्तया चरितम् ।।**

१६५ आर्या

इत्येवं गौरीपूजनस्य सुभङ्गकरणतपसश्च यौगपद्येन प्रयोगाद् हरतालिकात: पार्थक्येन प्रतिपादितस्य फाल्गुनतो माघपर्यन्तं व्यापिनो व्रतस्यात्र तात्पर्यविषयता भवति। अतएव च तत्र व्रतपदमदत्वा दीयमानस्य तप:पदस्य सार्थकतापि जायते। वर्षपर्यन्तं स्थितं व्रतं वस्तुतस्तप एव। भगवत्या पर्वतराजपुत्र्यापि—

**द्रुमेषु सख्या कृतजन्मसु स्वयं फलं तप:साक्षिषु दृष्टमेष्वपि।**
**न च प्ररोहाभिमुखोपि दृश्यते मनोरथोऽस्या: शशिमौलिसंश्रय:।।**

कुमारसम्भवे ५.६।।

इत्येवं बहुवार्षिको नियमः कृतो येन भाद्रशुक्लतृतीयायां सा भगवताभ्युपपन्ना। अतएव सा 'तपसे कृतोद्यमा'—(कुमार ५.३) प्रोच्यते। तस्या नियमोपि च 'तपः'—शब्देन

**'इयेष सा कर्तुमवन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः'—** (कुमार ५.२) इति।

**तपः क्व वत्से क्व च तावकं वपुः ॥** कुमारे ५.४॥ इति

**यदा फलं पूर्वतपःसमाधिना**

**न तावता तभ्यममंस्त काङ्क्षितम् ॥** कुमारे ५.१८ इति

**महातपःसाक्ष्य इव स्थिताः क्षपाः ॥** कुमारे ५.२५॥

**स्वयंविशीर्णद्रुमपर्णवृत्तिता परा हि काष्ठा तपसः॥**

कुमारे ५.२८ इति

**तपः शरीरैः कठिनैरुपार्जितं तपस्विनां दूरमधश्चकार सा॥**

कुमारे ५.२९ इति

**अपि स्वशक्त्या तपसि प्रवर्त्तसे ॥** कुमार ५.३३॥ इति

**तपःफलं स्यात् किमतः परं वद ॥** कुमार ५.४१॥ इति

**अम्भोजमिवोष्णवारणं कृतं तपःसाधनमेतया वपुः॥**

कुमारे॥ ५.५२॥

**इयं प्रपन्ना तपसे तपोवनम् ॥** कुमारे ५.५९॥

**न वेद्मि स प्रार्थितदुर्लभः कदा**

**तपःकृशामभ्युपपत्स्यते सखीम् ॥** कुमारे ५.६१॥

**तपः किलेदं तदवाप्तिसाधनम् ॥** कुमारे ५.६४॥ इति

**अद्यप्रभृत्यवनताङ्गि! तवास्मि दासः क्रीतस्तपोभिः॥**

कुमारे ५.६८॥

इति च स्वयं कविनैवासकृत् प्रत्यपादि। 'सुभगङ्करण'—शब्देन सुभगताया अभावेपि तपसा तत्संपादनमुद्भावितम्। तेन हि शारीरमपि सौन्दर्यमायाति कामं तत्राननाकृतिः पूर्णचन्द्राकारा माभूत्। एतेन पुराणसाहित्ये प्रतिपादितस्य

सौभाग्यव्रतस्यापि वाचके सौभाग्यमिति पदं मूलतः सौन्दर्यवाचकमेव।

सौन्दर्यवाचकं सौभाग्यपदं कालिदाससाहित्ये निम्नलिखितेषु षट्सु स्थलेषु लभ्यते–

१. **अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।।**

कुमार १.३।।

२. **वचस्यवसिते तस्मिन् ससर्ज गिरमात्मभूः ।**
**गर्जितानन्तरां वृष्टिं सौभाग्येन जिगाय सा ।।**

कुमारे २.५३।।

३. **तं रागबन्धिष्ववितृप्तमेव भोगेषु सौभाग्यविशेषभोग्यम् ।**
**विलासिनीनामरतिक्षमापि जरा वृथा मत्सरिणी जहार ।।**

रघुवंशे १८.१९।।

४. **वापीजलानां मणिमेखलानां शशाङ्कभासां प्रमदाजनानाम् ।**
**चूतद्रुमाणां कुसुमानतानां ददाति सौभाग्यमयं वसन्तः ।।**

ऋतुसंहारे ६.३।।

५. **इतः पश्य नाकपृष्ठप्रतिष्ठितस्य सौभाग्यमात्मयशसः।**

शाकुन्तले ७.५.१।।

६. **देवी विज्ञापयति तपनीयाशोकस्य कुसुम–सौभाग्य–दर्शनेन ममारम्भः सफलः क्रियताम् ।।** मालविकाग्निमित्रे ५.५.४।।

एषु प्रथमे स्थले सौभाग्यपदं मल्लिनाथः 'सुभगस्य भावः सौभाग्यम्, तद् विलुम्पतीति सौन्दर्यविघातकम्' इत्येवम्, द्वितीये स्थले च 'सौभाग्येन मनोहरत्वेन' इत्येवं सौन्दर्यमात्रपरं प्रतिपादयति। तृतीये रघुपद्येपि स 'सौभाग्यविशेषेण सौन्दर्यातिशयेने'–ति सौन्दर्यपरमेव सौभाग्यपदं मनुते, हेमाद्रिस्तु तत्र मौनमात्रावलम्बी। शाकुन्तल–मालविकाग्निमित्रयोः स्थलयोः स्पष्टीकरणं राघवभट्ट–काटयवेमौ न कुरुतः। कर्नाटकप्रकाशनगृहबम्बई–

संस्करणे दत्तायामाङ्ग्लभाषाटिप्पन्यामपि मालविकाग्निमित्रस्थं सौभाग्य-पदमविश्लेषितमेव। ऋतुसंहारस्य काशिकीये मास्टरखेलाडीलालसंस्करणे अभिन्नचन्द्रदासः उमाकान्तमिश्रश्चेति द्वावपि क्रमेण आङ्ग्ल-हिन्दी-भाषानुवादकौ प्रागुद्धृते पद्ये सौभाग्यपदस्य 'सौन्दर्यपरत्वमेव प्रतिपादयतः। मान्यं च तत्। कविरेव स्वयं वसन्ते वापीप्रभृतीनां मनोहारित्वं वर्णयति। स हि मानवीकरणद्वारा वापीनां—

**शुशुभिरे स्मितचारुतराननाः स्त्रिय इव श्लथशिञ्जितमेखलाः ।**
**विकचतामरसा गृहदीर्घिका मदकलोदकलोलविहङ्गमाः ॥**

रघुवंशे ९.३७॥

एवं सौभाग्यं चित्रयति। मणिमेखलाः शिशिरे शीततया सुन्दरीभिः परित्यज्यन्ते। तथ्यमिदं कविरेवं वर्णयति—

**व्रणगुरुप्रमदाधरदुःसहं जघन-निर्विषयीकृतमेखलम् ।**
**न खलु तावदशेषमपोहितुं रविरलं विरलं कृतवान् हिमम् ॥**

रघुवंशे ९.३२॥

शिशिरात्यये पुनः स एव तासां मेखलानामुपादानमेवं ग्रीष्मवर्णन-प्रस्तावे चित्रयति—

**संदष्टवस्त्रेष्वबलानितम्बेष्विन्दुप्रकाशान्तरितोडुतुल्याः ।**
**आसां जलापूरितसूत्रमार्गा मौनं भजन्ते रसनाकलापाः ॥**

रघुवंशे १६.६५॥

शशाङ्कभासां मधुकृतं सौभाग्यमसावेवमुल्लिखति—

**अपतुषारतया विशदप्रभैः सुरतसङ्गपरिश्रमनोदिभिः ।**
**कुसमचापमतेजयदंशुभिर्हिमकरो मकरोर्जितकेतनम् ॥**

रघुवंशे ९.३९॥

'प्रमदाजनानाम्'—इत्यस्य स्थाने 'प्रमदास्तनानाम्'—इति पाठः संभवति। वसन्ते प्रमदाः स्त्रियः पुष्पाभरणैरलंकृताङ्गयष्टयः कालिदाससाहित्ये क्व न दृश्यन्ते? कुमारसंभवे 'वसन्तपुष्पाभरणं वहन्ती स्थावरराजकन्या' निर्वाणभूयिष्ठमपि स्मरवीर्यं संधुक्षयति। रघुवंशेऽपि विलासिनः पुष्पाकरारम्भे प्रमदैकरसा वर्ण्यन्ते—

**अरुणरागनिषेधिभिरंशुकैः श्रवणलब्धपदैश्च यवाङ्कुरैः ।**
**परभृताविरुतैश्च विलासिनः स्मरबलैरबलैकरसाः कृताः ।।**

रघुवंशे ९.४३

रघुवंश इव ऋतुसंहारेपि, मालविकाग्निमित्रवद् विक्रमोर्वशीयेपि च कामिनीनां मण्डनचित्राणि कालिदासेन समनोयोगं सशिल्पं कविकर्मणो—ऽतिभूमिमीयुषाङ्कितानि।

**आताम्र—हरित—पाण्डुर! जीवितसर्वस्वं वसन्तमासस्य ।**
**दृष्टोसि चूतकोरक! ऋतुमङ्गल! त्वां प्रसादयामि ।।**

शाकुन्तले ६.२।।

**अभिनयान् परिचेतुमिवोद्यता मलयमारुतकम्पितपल्लवा ।**
**अमदयत् सहकारलता मनः सकलिका कलिकामजितामपि ।।**

रघुवंशे ९.३९।।

**ताम्रप्रवाल—स्तबकावनम्राश्चूतद्रुमाः पुष्पितचारुशाखाः ।**
**कुर्वन्ति कामं पवनावधूताः पर्युत्सुकं मानसमङ्गनानाम् ।।**

ऋतुसंहारे ६.१५।।

इतिप्रभृतिभिरनल्पैः कल्पैः रसालश्रियमपि कविर्वसन्ते वर्णयन् न तृप्यति। तदित्थं 'वापीजलानाम्'—इत्यादिपद्योद्धृतानां सर्वेषामेव वस्तूनां रम्यत्वं वसन्ते कवेरेव स्वयमभिमतं सिद्ध्यति।

शाकुन्तले देवजनता मानवश्रेष्ठस्य चरितं सुरसुन्दरीणां विच्छित्तिशेषै

रङ्गैः कल्पलताया अंशुकपट्टेषु गीतिक्षममर्थबन्धं विचिन्त्य लिखन्ती दर्शितास्ति। तत्र चरितलेखस्य रागपरभागतामेव कविः 'आत्मयशसः सौभाग्यं पश्य' इति मातलिमुखेनोल्लापयन् दुष्यन्तं दर्शयति। तदिदं निस्संशयं लेखसौन्दर्यमेव च। एवमेव विक्रमोर्वशीयस्य स्थलेपि रक्ताशोकस्य रक्तैः पीतैश्च कुसुमस्तबकैर्या काचन हृदयनीराजनैकदृश्या सुषमा मधुसमये समुल्लसति सैव सुकविशब्दे 'सौभाग्यम्' अस्ति। नैतत् सौन्दर्याद् भिद्यते। सौन्दर्यमेव कोषेष्वपि सुभगसौभाग्ययोः प्रथमं प्रतिपाद्यम्। तदित्थमुपर्युक्तेषु स्थलेषु कालिदासः सौभाग्यशब्दं सौन्दर्यार्थमेव योजयतीति मान्यं भवति। राजनिर्घण्टादिप्रयुक्ता अर्थास्तत्र न सन्ति। नूनमेते कोषाः कालिदास–साहित्यतोऽर्वाचीनाः।

स्त्रीपुंसयोरन्योन्यं प्रेम्णः कृते सुभगशब्दस्य प्रयोगाः केवलं त्रिषु स्थलेषु लभ्यते–

**सौभाग्यं ते सुभग! विरहावस्थया व्यञ्जयन्ती**
**कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥**

मेघदूते २९॥

**वाचालं मां न खलु सुभगम्मन्यभावः करोति**
**प्रत्यक्षं ते निखिलमचिराद् भ्रातरुक्तं मया यत् ॥**

मेघदूते ९२॥

**तच्छीघ्रं नय मां तस्य सुभगस्य वसतिम् ॥**

विक्रमोर्वशीये॥ ३.१०.६॥

एतेषु प्रथमे स्थले मल्लिनाथो व्याख्याति–'स खलु सुभगो भवति यम् अङ्गनाः कामयन्ते'–इति। भरतश्च सुबोधायां 'सुभगेत्यनेन त्वं तस्याः सुभगः सापि च तव सुभगा' इति व्याख्याति। शब्दकल्पद्रुमे राधाकान्तः सौभाग्यपदं व्याकुर्वन् लिखति–'सुभगायाः सुभगस्य वा भावः सुभगत्वम्' इति, कुमारसंभवस्य पङ्क्तिमिमां चोद्धरति–'प्रियेषु सौभाग्यफला हि

चारुता'—इति। एतेनेदमायाति यत् शब्दकल्पद्रुमकारः कुमारसंभवस्य तदुद्धृतायां 'प्रियेष्वि'—त्यादिपङ्क्तौ 'पुमान् स्त्रिया'—इति शासनानुसारेणैकशेषमङ्गीकुरुते। मल्लिनाथः कुमारसंभवसंजीविन्यां 'प्रियेषु पतिषु'—इति मात्रं लिखति येन तस्यैकशेषोभिमतो न प्रतीयते। प्रस्तावोपि तत्र शिवोपेक्षितायाः पार्वत्या रूपनिन्दाया अस्ति। अथापि 'प्रियेषु'—इत्येवं बहुवचनमेकशेषे नातिप्रयोजनकं सदकुतोमुखीनं तिष्ठति। 'नारीणाम्'—इति पदार्थान्तराक्षेपेण बहुत्वसिद्ध्यै कृतेपि प्रयासे पुरुषाणां चारुतायाः सौभाग्यफलत्वं किं न भवतीति प्रश्नेनावरुद्ध्यते मार्गः। न चात्र स्त्रिया एव प्रसंगोस्तीति नास्ति पुरुषचारुतायाः सौभाग्यफलत्वस्य विचारावसरः, इति वाच्यं, 'निनिन्द रूपं हृदयेन पार्वती'—ति रूपसामान्यनिन्दायाः कवितात्पर्यविषयताया अत्र स्थितेः पुरुषस्यापि अप्रास्ताविकत्वं नास्ति। यथा चैतत् तत् पञ्चमसर्गसंवादतः स्पष्टम्। तत्र हि श्मशानवासिनि भगवति विरूपाक्षे स्वमनोभावैकरसं विहितवत्याः, 'मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः'—इत्येवं मात्रा तपसो निरुध्य, दत्तदेवान्तरसौन्दर्यप्रलोभनया अपि अमङ्गलाभ्यासरतित्वेन प्रसिद्धे दिगम्बरे भुजङ्गमोन्नद्धजटाकलापे कपालिनि च भर्तरि निश्चलचित्तायाः, शरीरमार्दवमनपेक्ष्यापर्णात्वभूमिकापर्यन्तं तीव्रतमवर्षातपपञ्चाग्नितपनादिभिः क्लेशैस्तपःसमाधिं साधितवत्याः पार्वत्याः 'परिणयविधौ स्त्री पुरुषश्चेत्युभयस्यापि स्थूलं शारीरं सौन्दर्यं सर्वथा नाश्रयणीयमि'—ति दृढतमस्य बोधस्य तपःसमाधिभूमिकात्वेन 'निनिन्द रूपम्' इति प्रतिपादितत्वात्। एतेन 'प्रियेष्वि'—पद एकशेषो हृदयङ्गम एव सर्वथा।

मेघदूते यक्षः स्वपत्नीं स्वविरहे प्राचीमूले सुधांशोः कलामात्रशेषां तनुमिव तनीयसीम्, मलिनवसन उत्सङ्गे वीणां निधाय पतिनामाङ्कितं स्वयमपि कृतं पद्यं तारं गातुकामामपि विस्मरन्तीम्, नयनजलैरङ्कगतां वीणां च स्नापयन्तीं प्रतिपादयति। तेन च तस्य स्वस्मिन् स्वपत्न्याः प्रेम

प्रकटितं भवति ततश्च तस्य सुभगता प्रतीयते। स्वमुखेनैव स्वविषयायाः सुभगतायाः प्रतिपादनं मृषोद्यमिव संभाव्येतेति शङ्कां निरस्यन् स ब्रूते 'वाचालं मां न खलु सुभगम्मन्यभावः करोती'–ति। अत्र सुभगशब्दस्य स्त्रियाः पुंसि प्रेमैवार्थः।

'सुभगम्मन्यभावो' हि वस्तुतः पृथगेव शब्दः ये हि मृषैवात्मान–मभिरूपिणीभिरभिलष्यमाणं मन्यन्ते ते खलु 'असुभगा अपि सुभगतया–त्मानमनुभवन्तः सुभङ्गमन्याः'। अमुमेव भावं 'सुभगमानिता'–पदेन कुट्टनीमतकार एवमुल्लिखति–

**पादस्तेन सलीलं विन्यस्तः सुभगमानिनां मूर्ध्नि।।** १०२६ इति।

अत्र हि समरभटं प्रति गणिकाया अनुरागं विज्ञातुं तस्या दूती समहत्त्वमेवमुदीरयति। अतः सुभगमानित्वमत्र तदेव यन्मेघदूतपद्ये सुभम्मन्यत्वम्।

विक्रमोर्वशीयस्थलेपि सुभगशब्दस्य सुन्दरीजनवल्लभत्वमेव तात्पर्यभूमिः। प्रथमेऽङ्के सुरलोकोत्पतनावसरे लताप्रताने वैजयन्तीलगन–व्याजेनार्धमुखं परिवर्त्य पुरूरवसं मुहुर्मुहुरवेक्ष्य दर्शिततदनुरागा उर्वशी तृतीयेऽङ्केऽभिसारिकावेषेण यदा पुनरपि चित्रलेखाद्वितीया पुरूरवसं यियासति तदा सुकविस्तन्मुखेनैव 'नय मां तस्य सुभगस्य वसतिम्' इति 'सुभग'–पदमुल्लापयति। अत्र 'सुभग'–शब्दस्य सौन्दर्यपरत्वमेव वस्तुतः प्रतीयते तथापि पुरूरवसः सुन्दरीजनप्रियत्वं प्रसिद्धमस्ति, 'विशाखासहितश्चन्द्र इव महाराज उर्वशीसहितो लक्ष्यते' इत्यादयोऽभिप्रायाः हेमकूटगतानां सुरसुन्दरीणां प्रथमेऽङ्के एव कविना दर्शिताः। द्वितीयेऽप्यङ्के 'भवानपि तत्रभवत्या उर्वश्या दर्शनपथं गतः' इति विदूषकस्य प्रश्नोक्तेरपि पुरूरवसः सुन्दरीप्रियत्वं स्पष्टम्, येनासौ सुराङ्गनाप्रेम्णो दुर्लभप्रार्थनत्वं निरूपयतो पुरूरवसः शङ्कां निरस्यन् सुलभतां प्रतिपादयति। तस्यायमेवाभिप्रायो यद् यदि पुरूरवा

अपि सुराङ्गनया दृष्टस्तर्हि सापि तस्मिन् अजातानुरागा न तिष्ठेत्। ततश्च सा स्वयमपि तमुपेतुं यतेतैव। उद्धृतया घटनयाऽनया सत्यमेव च तत्। एतेनेह सुभगशब्दस्य सुन्दरीजनवल्लभत्वं मन्तुं नानुचितम्।

तदित्थं 'स्त्रीपुंसोरन्योन्यं प्रेम्णः' कृते कालिदासप्रयुक्तानां सुभगशब्दानामनुशीलनं विहितम्। शब्दस्यास्य प्रयोगानेताननुशील्य मतमेतन्निर्मातुं शक्यते यत् कालिदाससाहित्ये पुरुषे स्त्रियाः यत् प्रेम तस्यैव कृते शब्दोऽयं प्रयुक्तोस्ति। स्त्रियां पुरुषस्य प्रेम्णः कृते यदि शब्दोयं प्रयुज्येत तर्हि 'सुभगा' इत्येवं स्त्रीप्रत्ययान्त एतस्य प्रयोगः स्यात्। न च स लभ्यते कालिदाससाहित्येस्माभिः। आर्यासप्तशतीकृता तु प्रयोगोयं कृतः—

**स्वाधीनैरधरव्रण—नखाङ्क—पत्रावलोप—दिनशयनैः ।**
**सुभगा सुभगेत्यनया सखि निखिला मुखरिता पल्ली ।।**

६१३ आर्या।।

अत्र या हि प्रियभोगचिह्नानि धारयति सा सुभगाख्यातिं बिभर्त्तीति भावः सुखेनैवावगम्यते। मालतीमाधवे माधवानुरागं दृष्टवती कामन्दकी मालतीं 'सुभगे' इति संबोधयति—'शृणु चित्रं सुभगे'—इति। ३.९। कुट्टनीमतेपि—

**विन्यस्य शिरसि चरणं सुभगा गणिकाजनस्य सकलस्य ।**
**सौभाग्यवैजयन्तीं संप्रति वत्सा समुत्क्षिपतु ।।**

१४४ आर्या।।

इत्येवं मात्रा सुन्दराभिलषिता सुता सुभगा—पदवाच्या मन्यते कुट्टनीमतकृता सुभगशब्दस्यापि प्रयोगो बहुशस्तस्मिन्नेवार्थे कृतो यस्मिन् पूर्वोद्धृतेषु स्थलेषु सुन्दरीजनप्रियत्वाय कालिदासेन। तथाहि—

**महिषीव पङ्कदिग्धा हंसीव मृणालवलयपरिवारा ।**
**सुभग! मयूरीवासौ भुजङ्गविद्वेषिणी जाता ।।**

१०० आर्या।।

**त्वयि मार्गनिकटवर्त्तिन्यविचेतितखेदया तया सुभग! ।**
**प्रत्यासन्नगृहेष्वपि कृतः प्रसह्य स्मरातुरो लोकः ।।**

८७२ पद्यम्।।

**नर-वञ्चन-पटुबुद्धिः सम्पादित-कपट-चाटु-संघटना ।**
**त्वमपि विलासिनि नीता गतिमियतीं येन सुभगेन ।।**

१०२७ पद्यम्।।

'सुभगस्य सुभगायाश्च भावं' प्रवृत्तिनिमित्तीकृत्य व्युत्पन्नः सौभाग्यशब्दोपि कालिदाससाहित्ये पञ्चसु स्थलेषु लभ्यते। तद् यथा–

**प्रियेषु सौभाग्यफला हि चारुता ।।** कुमारे ५.१।।
**अवैमि सौभाग्य–मदेन वञ्चितं तव प्रियम् ।।** कुमारे ५.४९।।
**सौभाग्यं ते सुभग! विरहावस्थया व्यञ्जयन्ती ।।** मेघे २९।।
**शकुन्तलायाः सौभाग्यदेवतार्चनीया ।।** शाकुन्तले ४.१.१०।।
**युज्यत आत्मनः सौभाग्यं प्रच्छादितुम् ।।**

विक्रमोर्वशीये २.२०.११।।

एषु सर्वेषु स्थलेषु स्त्रीपुंसयोरन्योन्यस्नेहस्यैव कृते सौभाग्यशब्दः प्रयुक्तोस्ति। तत्रापि प्रथमे चतुर्थे च स्त्रियां पुरुषस्य प्रेम्णो वाचकतयास्य प्रयोगो मन्तुं शक्यते, शेषेषु तु केवलस्य पुरुषे स्त्रियाः प्रेम्णः कृत एव। तत्र प्रथम–तृतीययोरर्थः स्पष्टः कृत एव। तत्र प्रसङ्गाभ्यां तादृशप्रेम्ण एव सौभाग्यशब्दवाच्यत्वं सिद्ध्यति। शेषेषु विक्रमोर्वशीयस्थले सौभाग्यशब्दस्य पुरुषे स्त्रिया अनुराग एवार्थतया ग्रहीतुं शक्यते। तत्र हि पुरूरवसं प्रति उर्वश्याः प्रेमपत्रेण प्रकटस्यानुरागस्य वायुना देवीहस्तं प्रापितस्य च तस्यैव पत्रस्यान्वेषणायां क्रियमाणायां यदा देव्या तत् पत्रं सहसोपेत्य राज्ञे 'एतत् तद् भूर्जपत्रम्' इति प्रदीयते तदा 'नेदं मया मृग्यते, तत् खलु मन्त्रपत्रं यदन्वेषणाय ममायमारम्भः' इति राज्ञा कृतं स्वानुरागापह्नवं वीक्ष्य देव्योदीर्यमाणे

'युज्यत आत्मनः सौभाग्यं प्रच्छादितुम्' इति वाक्ये सौभाग्यशब्दस्यार्थान्तरं कर्तुमेव न शक्यम्। यश्च कुमारे 'सौभाग्यमद'—शब्दः शाकुन्तले च 'सौभाग्यदेवता'— शब्दः तौ द्वावपि यौगिकौ शब्दौ। तयोर्घटकतया प्रयुज्यमानस्य सौभाग्यशब्दस्य प्रेमविशेष एव प्रतिपाद्यः। ब्रह्मचारिवेषेण तपोवनमुपेत्य भगवता शङ्करेणैव स्वयं परित्यक्तपूर्वां भगवतीं तपःकारणमन्विष्यता वाक्यमिदमुदीर्यते 'तव प्रियं सौभाग्यमदे निमग्नम् अत एव वञ्चितं मन्ये यतो हि स तवास्य कुटिलपक्ष्मणश्चक्षुषः पात्रतां निजाननस्य परिहरति'—

**अवैमि सौभाग्यमदेन वञ्चितं तव प्रियं यश्चतुरावलोकिनः ।**
**करोति लक्ष्यं रविमस्य चक्षुषो न वक्त्रमात्मीयमरालपक्ष्मणः ।।**

५.४९

अत्र प्रयुक्तस्य सौभाग्यमदशब्दस्यार्थः कुट्टनीमतस्य पद्येनानेन स्पष्टः क्रियते—

**किं सौभाग्यमदोऽयं यौवनलीलाऽभिरूपतादर्पः ।**
**सहजप्रेमोपनतां मालतिकां न बहु मन्यसे येन ।।**

१२८ आर्या।।

कुट्टनीमतनायिकाया मालतीनाम्न्या गणिकायाः सखी भट्टसुतं प्रति सख्यनुरागं महता प्रपञ्चेन प्रतिपाद्य पश्चादिदं वक्ति। अत्रानुरक्ताया नायकेन क्रियमाणायां तिरस्कृतौ कारणतया त्रिधा विकल्पाः क्रियन्ते १. सौभाग्यमदेन, २. यौवनलीलया,[१] ३. अभिरूपतादर्पेण वा भट्टसुतो वराकीं मालतीमुपेक्षते इति। एतेनानुरक्तनायिकातिरस्काराभिव्यञ्जितो नायकनिष्ठश्चित्तवृत्तिविशेषो हि सौभाग्यमद इति तात्पर्यमायाति। असावेव चार्थः सुकविना यौवनलीलापदेन अभिरूपतादर्पपदेन चात्राम्रेडितः। यौवनलीलायामपि कदाचित् केशवेषताम्बूलवीटीगन्धतैलाङ्गाञ्चितैश्चेष्टा—

---

१. टीकितारो हि ''यौवनलीलाभिरूपतादर्प'' इति पदमेकार्थकमेकमेव पदं मन्यन्ते।

विशेषैश्च प्रौढयौवना असकृदनुभूतकामरसाश्च युवानः प्रतिनवकामां मुग्धामादावुपेक्षमाणा मित्रेषु च दर्शितबहुमाना भवन्ति।

'अभिरूपभूयिष्ठा परिषद्' इति शाकुन्तलसूत्रधारवचने राघवभट्टः 'अभिरूपो बुधे रम्य इति शाश्वत' इत्येवम् अभिरूपपदं पाण्डित्याय सुरूपत्वाय च प्रसिद्धं दर्शयति। मेदिनीकोषेपि राघवभट्टोद्धृतं शाश्वतवचनमेवमेव लभ्यते। हेमचन्द्रस्यानेकार्थसंग्रहे च तदर्थकमेव वाक्यान्तरमेवमुपलभ्यते—'सुरूपस्तु बुधे रम्ये प्राप्तरूपाभिरूपवत्'। अनयोरपि निश्चयेनैव पदस्यास्य स एवार्थोऽस्ति यः पूर्वोद्धृते शाश्वते। तत्र पाण्डित्यरूपो योऽर्थस्तस्य नास्ति कामिनीतिरस्कारेणार्थः। पाण्डित्यदर्पकण्डूं बुधा बुधेषु विनयन्ते न कामिनीषु। पाण्डित्यमण्डितो हि यो नयनाभिरामो न भवति स कामिनीजनवल्लभतां नासादयति। अतश्च सुन्दरत्वमात्रमत्राभिरूपपदप्रतिपाद्यं तिष्ठति। ततश्च य एवाभिरूपतादर्पः स एव सौभाग्यमदः। नास्त्यनयोर्भेदः। एतदेव तत्त्वं 'सौभाग्यगर्व'—पदेनापि दामोदरभट्टः कुट्टनीमत एवं प्रतिपादयति—

**इति चतुरदूतिकोदित—वर्धित—सौभाग्यगर्व—पूर्णस्य ।**
**ऊर्मिसहस्रोल्लसितं भवति मनो ग्राम्यषिड्गस्य ॥**

८७३ आर्या॥

'सौभाग्यदेवता' च प्रायेण गौरी भवति। 'गौरी तयैव महिता सुभङ्गकरणं व्रतं तया चरितम्' इति प्रागुद्धृतकुट्टनीमतपद्यार्थे गौरीपूजन—स्योल्लेखेन तथ्यमिदं प्रायेण सन्देहातीतमेव क्रियते। हरतालिकाव्रतेन च सौभाग्यलाभो भवतीति—

**एवं या कुरुते देवि सर्वपापैः प्रमुच्यते ।**
**सप्त जन्म भवेद् राज्यं सौभाग्यफलदायकम् ॥** इति

फलश्रुत्या ज्ञायते। शाकुन्तले च दुर्वाससः शापेन शकुन्तलायाः सौभाग्यं

सन्दिग्धमजायत। ततः तदर्थं तस्य देवतायाः पूजनमावश्यकमेवासीत्।

'सौभाग्यमद—सौभाग्यदेवता'—वदेव सौभाग्यकोष—सौभाग्य—वैजयन्ती—सौभाग्ययशःकुसुमप्रभृतयः शब्दा अपि प्रेमप्रसङ्गेषु सुकविभिः प्रयुज्यन्ते। तथाहि कुट्टनीमत एव—

विन्यस्य शिरसि चरणं सुभगा गणिकाजनस्य सकलस्य ।
सौभाग्यवैजयन्तीं संप्रति वत्सा समुत्क्षिपतु ॥

१४४ आर्या॥

इदमपरमद्भुततमं युवतिसहस्रैर्विलुप्यमानस्य ।
वृद्धिर्भवति न हानिर्यत् तव सौभाग्यकोषस्य ॥

७६९ आर्या॥

अद्य जननी प्रसूता सौभाग्यगुणोदयोऽद्य निष्णातः ।
त्वयि वितरति स्नेहं निरामयप्रश्नभारती तस्याः ॥

१०४८ आर्या॥

पादस्तेन सलीलं विन्यस्तः सुभगमानिनां मूर्ध्नि ।
सौभाग्ययशःकुसुमं धनपतिसूनोः कदर्थितं तेन ॥

१०२६ आर्या॥

ग्रामोत्पत्तिरशेषा प्रविशन्ती सिंहराजविनियोगात् ।
मन्मथसेनावासे! लघयति ते रूपसौभाग्यम् ॥

५३६ आर्या॥

अत्र च रूपसौभाग्यम् इति कवेरस्योर्वरतमा प्रतिभा एकस्य सौभाग्यस्यैव वितानतयोद्भावयति। क्षेमेन्द्रस्य समयमातृकायामेकं सौभाग्याभरणपदमपि लभ्यते—

अस्ति स्वस्तिमतां विलासवसतेः संभोगभङ्गीभुवः
केलिप्राङ्गणमङ्गनाकुलगुरोर्देवस्य शृङ्गारिणः ।

**कश्मीरेषु पुरं परं प्रवरतालब्धाभिधाविश्रुतं**
**सौभाग्याभरणं महीवरतनोः संकेतसद्म श्रियः ॥**

१.४॥ इति

सौभाग्यविभवपदमपि समयमातृकायामुपलभ्यते—

**अयं तव स्तनाभोग—सौभाग्यविभवोचितः ।**
**द्रविणोपार्जनस्यैव कालः कुवलयेक्षणे! ॥** १.४६॥

एषु सर्वेष्वपि स्थलेषु सौभाग्यपदस्य प्रेमविशेषपरत्वमेव। दण्डिनापि राजहंसो 'धरणीरमणीसौभाग्यभाग्यवान्' उच्यते। कुन्तकप्रयोगेष्वपि कामिनीनां विषये सौभाग्यपदस्य सौन्दर्यमात्रे य उपयोगो दृश्यते स तत्प्रयोक्तुः शब्दशक्तिसौभाग्यावैचक्षण्यमात्रनिबन्धन एव। तत्रैव प्रेमपरत्वे सौभाग्यशब्दस्य स्वीक्रियमाणे सौभाग्यातिशयस्यानुभविकत्वात्। टङ्कणाख्यस्यौषधविशेषस्य कृते सौभाग्यशब्दस्य 'सुहागा'—रूपो योऽपभ्रंशः पूर्वमस्माभिरत्रोपस्थापितः स एवापभ्रंशः स्त्रियां पतिप्रेम्णः कृतेपि 'सुहाग'—रूपेण हिन्दीभाषायां प्रचलति। बिहारीदासस्य सप्तशत्यां—

**पार्‌यौ सौर सुहाग को उन बिन ही पियनेह ।**
**उनदौही अँखियां ककै कै अलसौही देह** ॥ दोहा॥

इत्येवमसौ सुस्पष्टं लभ्यते। देवकविरपि 'काजर दे नहिं ए रि सुहागिनि आँगुरि तेरी कटेगि कटाछनि'—इत्येवं सौभगिनी—पदापभ्रंशं 'सुहागिनी'—पदं सौभाग्यवतीपरतया प्रयुङ्क्ते। तत्रापि सौभाग्यपदस्यार्थः पतिप्रेमरूप एव।

**गृह्णामि ते सौभगत्वाय हस्तम्॥** ऋक् १०.८५.३६॥
**सुमङ्गलीरियं वधूरिमां समेत पश्यत।**
**सौभाग्यमस्यै दत्वा याथास्तां विपरेतन॥**

ऋक् १०—सूर्याविवाहः॥

इत्यादौ श्रुतिवचनेष्वपि पदमिदं प्रेमविशेषविषये लभ्यते। एतदर्थमेव च 'अभिरूपपति' 'प्रियानुप्रसादनम्' इत्यादीनि व्रतानि मृच्छकटिकविक्रमो–र्वशीयादिषु कुटुम्बिनीजनायोज्यमानानि दृश्यन्ते। वस्तुत:

**ऐश्वर्यस्य समग्रस्य धर्मस्य यशस: श्रिया: ।**
**ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ।।** इति

भगपदस्य येऽर्था: प्रतिपाद्यन्ते तेषां समेषामेव समष्टि: सौभाग्यमिति भारतीये गार्हस्थ्यशास्त्रे संमतं भवेत्। अत्र हि धर्मस्यैव तादृशं स्वरूपं निर्णीतमस्ति महद्भिर्यत्राभ्युदयनिश्रेयसौ कृतानुबन्धाविव तिष्ठत:। सर्वा हि सौभाग्यवती पार्वतीरूपेण मृत्युञ्जयभूमिकामधिरोपयति स्वकीयं प्रेमास्पदं ततश्च सौन्दर्यपीयूषमपि सदा स्यन्दमानं तिष्ठति, प्रगाढतमस्य प्रेम्णश्चाखण्डितत्वं शान्तिज्योस्त्नां प्रविकिरति।

सर्वथा कालिदाससाहित्ये सुभगसौभाग्यशब्दयो: सौन्दर्य–प्रेमविशेषोभयपरत्वमुपलभ्यते। तत्रापि सुभगशब्दस्य सुन्दरत्वपरा: प्रयोगास्तत्राधिका: सन्ति सौभाग्यशब्दस्य च प्रेमविशेषपरा:। सौभग–शब्दस्तु कालिदाससाहित्ये न लभ्यते।।

## (२) उपहार:

साम्प्रतम् 'उपहार'—शब्दमुपाददमहे।

संस्कृतकोषेषु 'उपहारशब्दस्य' एक एवार्थ: प्रसिद्धोऽस्ति प्राभृतोपायनादिशब्दप्रतिपाद्यरूप:। प्राभृतमपि तत्र द्विविधं प्रसिद्धमस्ति समर्पणसामान्यरूपं पूजारूपं च। यथा चैतत् तत् अधस्ताद् उद्धृतेभ्यो वचनेभ्य: स्पष्टम्।

१. 'प्राभृतं तु देशनम्, उपायनमुपग्राह्यमुपहारस्तथोपदा'—अमरकोष:।

२. 'करोपहारयो: पुंसि बलि:'—अमरकोष:।

३. 'बलिर् दैत्यप्रभेदे च करचामरदण्डयो:, उपहारे पुमान्'—मेदिनी।

४. 'बलिर् दैत्योपहारयो:, करे चामरदण्डे च'—अनेकार्थसंग्रह:।

समर्पणसामान्यरूपे अर्थे उपहारशब्द: कालिदाससाहित्ये अनेकत्र प्रयुक्तोस्ति। तथाहि—

१. दिग्विजयप्रसङ्गे कामरूपेश्वरो रघो: पादयोश् छायां रत्नपुष्पोपहारेणार्चति—

**कामरूपेश्वरस्तस्य पादपीठाधिदेवताम् ।**
**रत्नपुष्पोपहारेणच्छायामानर्च पादयो:** ।। ४.८४ रघुवंशे

२. पट्टाभिषेकानन्तरं भगवती सीता रक्ष:कपीन्द्रेभ्य: स्वहस्तनैवोत्कृष्टोत्कृष्ट—पूजामुपहरति—

**सीता—स्वहस्तोपहृताग्र्यपूजान्**
**रक्ष: कपीन्द्रान् विससर्ज राम:**।। १४.१९ रघुवंशे।।

३. कुश: पुनर्वासितामयोध्यां पशूपहारैरर्चति—

**ततः सपर्यां सपशूपहारां पुरः परार्ध्यप्रतिमागृहायाः ।**
**उपोषितैर् वास्तुविधानविद्भिर् निर्वर्तयामास रघुप्रवीरः ।।**

१६.३९ रघुवंशे।।

४. शङ्खणनामानं रघुवंशनृपं वसुधा रत्नोपहारैः पूजयति—

**तस्मिन् गते द्यां सुकृतोपलब्धां तत्संभवं शंखणमर्णवान्ता ।**
**उत्खातशत्रुं वसुधोपतस्थे रत्नोपहारैरुदितैः खनिभ्यः ।।**

१८.२२ रघुवंशे

५. अग्निवर्णो विलासिनीभिरुपहृतं मुखासवं बकुलवृक्ष इव सस्पृहं पिबति—

**ताभिरप्युपहृतं मुखासवं सोऽपिबद् बकुलतुल्यदोहदः।।**

१९.१२ रघुवंशे

६. मेघदूते विशालानगर्यां गृहमयूरा मेघाय नृत्तोपहारान् ददति—

**जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपैर्**
**वन्धुप्रीत्या भवनशिखिभिर् दत्तनृत्तोपहारः ।**
**हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथा**
**लक्ष्मीं पश्यँल् ललितवनितापादरागाङ्कितेषु** ।। ३२।।

७. कण्वशिष्य ऋत्विग्भ्यो दर्भान् उपहरति—

**यावदिमान् वेदिसंस्तरणार्थं दर्भान् ऋत्विग्भ्य उपहरामि।**

शाकुन्तले ३.२.१

८. मालविकाग्निमित्रे मालविका बकुलावलिकायै नूपुरालक्तकयोजनायै स्वचरणमुपहरति—

बकुलावलिका—एकं मे चरणमुपनय/ हर।

मालविका—हला मर्षत तावदेनम् (पादमुपहरति) ३:११.७,१२—प्राकृतांशः

९. मालविकाग्निमित्रस्यैव पञ्चमे अङ्के नायको मालविकाया राजदारिकात्वं निशम्य ब्रूते—

**अहो परिभवोपहारिणो विनिपाता:।।** ५.१२.११

एतेषु सर्वेषु स्थलेषु उपाहरशब्दो प्राभृतसामान्यार्थ एव विद्यते। तथाहि रघुवंशस्य आद्येषु चतुर्षु स्थलेषु पूजार्थकस्य 'आनर्च', 'पूजा', 'सपर्या', 'उपतस्थे' इति पदान्तरस्य विद्यमानत्वाद् उपहारशब्दस्य प्राभृतार्थपरत्वमात्रमवशिष्यते। ततश्च प्रथम–तृतीययो: स्थलयो: भट्टहेमाद्रे:–

**००उपहारेण ००००बलिना**–इति

**सपशूपहारां पशुबलिसहिताम्**–इति च

यद् व्याख्यानं तदर्थपौनरुक्त्यदोषं परिहर्तुं न क्षमत इति अहृदयङ्गममेव सर्वथा। मल्लिनाथस्तु–

**उपहारेण समर्पणेन** (४.८४–पद्ये) इति

**उपहृता दत्ता** (१४.१९–पद्ये) इति

**उपहारै: समर्पणै:** (१८.२२–पद्ये) इति

व्यावृण्वानो युक्तवादी। शेषेषु मल्लिनाथहेमाऽद्री मौनिनौ।

मेघदूतपद्येपि मल्लिनाथ:–

**गृहमयूरैर् दत्तो नृत्तमेव उपहार उपायनं यस्मै स तथोक्त:।**

**उपायनमुपग्राह्यमुपहारस्तथोपदा–**

–इत्येवमुपहारपदमुपायनार्थकमेव मनुते। भरतमल्लिकोपि च तथैव–

**दत्तो नृत्तमेव नर्त्तनमेव उपहार उपढौकनं यस्मै तादृश:।**

इत्येवमुपायनार्थकतामेवास्य दर्शयति। मयूरा हि मेघस्य सुहृद:। तेषां स्वागतोपहार उपायनरूप एवं संभवति, न पूजारूपम्। अन्येषु च मालविकाग्निमित्रादिस्थलेषु शब्दस्यास्य समर्पणपरत्वं स्पष्टमेव। अयमत्र भेदो यत् क्वचिदसौ उपायनक्रियापरोनुभूयते क्वचिच्च उपायनद्रव्यपर:। शब्दस्यास्यास्मिन्नेवार्थे–

**गच्छ मातृभ्यो बलिमुपहर** (मृच्छकटिके)

**उरोभुवा कुम्भयुगेन जृम्भितं नवोपहारेण वयस्कृतेन किम् ।**
**त्रपासरिद्दुर्गमपि प्रतीर्य यन् नलस्य तन्वी हृदयं विवेश सा ।।**

नैषधे—१.४८

—इत्येवंविधा अन्येपि प्रयोगा यत्र तत्र विकीर्णा दृश्यन्ते।

पूजार्थका उपहारशब्दा निम्नाङ्किते संदर्भे दृश्यन्ते—

(ततः प्रविशति औपहारिकहस्तपरिजना देवी)

देवी—दारिकाः उपनयथ औपहारिकम्।

परिजन—एष गन्धकुसुमाद्युपहारः।

देवी—(नाट्येन गन्धकुसुमादिभिश्चन्द्रपादानभ्यर्च्य) हंजे एतान् औपहारिकमोदकान् आर्यमाणवकं लम्भय।

(विक्रमोर्वशीये—३.१४ प्राकृतांशे)

निम्नाङ्कितयोस्तु स्थलयोः शब्दस्यास्यार्थो विचार्यः—

१. **यत्र स्फटिकहर्म्येषु नक्तमापानभूमिषु ।**
**ज्योतिषां प्रतिबिम्बानि प्राप्नुवन्त्युपहारताम् ।।** कुमारसंभवे ६.४२

२. **भवति विरलभक्तिर्ग्लानपुष्पोपहारः**
**स्वकिरणपरिवेषोद्भेदशून्याः प्रदीपाः ।**
**अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्ता—**
**मनुवदति शुकस्ते मञ्जुवाक् पञ्जरस्थः ।।** रघुवंशे—५.७४

प्रथमे पद्ये यत्पदेन हिमवतो राजधान्या ओषधिप्रस्थस्य परामर्शः। तत्र हर्म्याणि स्फटिकनिर्मितानि सन्ति। तेषु रात्रौ यदा पानगोष्ठ्य आयोज्यन्ते तदा नक्षत्राणां प्रतिबिम्बानि 'उपहार'—भावमञ्चन्ति। अत्र मल्लिनाथः शब्दस्यास्यार्थमेवङ्करोति—

**उपहारताम् पुष्पोपहारत्वं मौक्तिकोपहारत्वं वा प्राप्नुवन्ति।।** इति

नूनमसौ हारपदमत्र मालापरमेव मनुते। उपसर्गस्य तु स्वारस्यमसौ न दर्शयति। नक्षत्रप्रतिबिम्बानि प्रायेण श्वेतवर्णान्येव भवन्तीति विद्वानेष

उपमानोपमेययोर्वर्णसाम्यघटनाय मौक्तिकोपहारत्वं च तत्र कल्पयति। शब्दकल्पद्रुमकारो राधाकान्तोपि उपहारशब्दप्रसङ्गे कुमारसंभवस्य पद्यमिदम् उद्धृत्य—

**उपगतो हारम् उपहारः, हारनिकटस्थद्रव्यम्**

इत्येवं व्याख्याति। अत्र हारनिकटस्थं द्रव्यं किमिति जागर्त्येव प्रश्नकुतूहलम्। यद्यपि प्रस्तावविशेषेषु शब्दस्यास्यैवंविधोप्यर्थः क्रियते। तथाहि रत्नाकरकृतेर् हरविजयस्य

**कण्ठश्रियं कुवलयस्तबकाभिराम—**
**दामानुकारि—विकटच्छवि—कालकूटाम् ।**
**बिभ्रत् सुखानि दिशतादुपहार—पीत—**
**धूपोत्थ—धूम—मलिनामिव धूर्जटिर्वः ॥**

इति मङ्गलपद्यं व्याचक्षाणो राजानकोऽलकभट्ट उपहारशब्दस्य पक्षद्वये अर्थं सङ्गमयन् 'उपहारेषु पूजासमयेषु' इति, 'उपहारं हारसमीपे'—इति च राधाकान्तदेवसदृशमेवार्थं ददाति तथापि नास्ति कुमारसंभवस्यास्मिन् पद्ये भङ्गश्लेषस्य काचनच्छायेति अनवसरदुःस्थ एवात्र सोऽर्थः।

उद्धृते रघुवंशस्य च पद्ये मल्लिनाथो हेमाद्रिश्चेति द्वावपि टीकितारौ शब्दस्यास्य पूजामात्रपरत्वं प्रतिपादयतः। तथा हि—

१. म्लानः पुष्पोपहारः पुष्पपूजा, म्लानत्वादेव विरलभक्तिर्विरलरचनो भवति इति मल्लिनाथः।
२. शयने म्लानपुष्पाणाम् उपहारः पूजा विरलभक्तिर्भवति इति हेमाद्रिः। पं० श्रीसीतारामचतुर्वेदी अत्रान्यथा व्यावृणुते। स हि अनयोरुभयोरपि पद्ययोः उपहारशब्दं विकीर्णपुष्पपरं पुष्परचनापरं च मनुते—
१. स्फटिक के भवनों में सजे हुए मदिरालयों पर रात को जब तारों की परछाईं पड़ती थी तो ऐसा जान पड़ता था मानो किसी ने फूल

बिखेर दिए हों।

(कुमारसंभव ६.४२ कालिदासग्रन्थावली)

२. रात की सजावट के फूल मुरझा कर टूक–टूक हो गए हैं।

(रघुवंश ५.७४–कालिदासग्रन्थावली)

डा० वासुदेवशरणा अपि–

१. उपहार शब्द का अर्थ है पुष्पप्रकर या पुष्पों का ढेर जो रघुवंश ५.७४ और कुमारसंभव ६.४२ में भी आया है।

(कादम्बरी : एक सांस्कृतिक अध्ययन, पृ० ३७०, पाद–टिप्पणी)

२. उपहार पुष्प ००० यों ही न बिखेर कर छोटी–छोटी ढेरियों (पुष्प प्रकर) के रूप में सजाए जाते थे।

(शृङ्गारहाट, चतुर्भाणी, पृ० २३२, पाद–टिप्पणी)

इत्येवं संदर्भयोरनयोः उपहारशब्दे पूजार्थकत्वं न मन्यते। द्वाभ्यामप्याभ्यां विद्वद्भ्यां पुष्पविकीर्णनं विकीर्णानि पुष्पाणि वा उपहारशब्दार्थतया स्वीक्रियते। तत्र विकीर्णनं ज्योतिषामौपम्येन कुमारसंभवपद्य–समापतितेन सिध्यति। विकीर्णनं हि क्रियारूपम्। द्रव्यरूपाणां ज्योतिषां क्रियात्मकेन तेनौपम्यं को नु स्वीकुर्यात्! न च मुक्तानि पुष्पाणि हारशब्देन वक्तुं शक्यते। हारशब्दस्य मुक्तपुष्पवैपरीत्येनैव अन्वर्थतालाभात्। सूत्रसंदृब्धा न्येव हि पुष्पाणि हारपदाभिधेयानि भवन्ति, न मुक्तानि। विदुषोरनयोर् व्याख्यानयोः उपोपसर्गस्यापि दुर्गतिर्जायते। नासौ तत्र सार्थकतालेशमपि स्प्रष्टुं क्षमते। विकीर्णनमात्रपरत्वे हि हारशब्दस्य केवलस्यैव प्रयोगः क्रियेत न तूपसर्गसहितस्य। अत एव 'अङ्गहारा'–दिशब्देषु केवल एवासौ प्रयुक्तो लभ्यते। तथा च 'पुष्पहार' इतिमात्रं वक्तव्यतामञ्चति, न तु 'पुष्पोपहार' इति। यद्यप्यत्रापि न क्षेमः। पुष्पशब्दसमभिव्याहारे हि हारशब्दो मालापर एव तिष्ठेत्, विकीर्णनपरत्वं कथमपि न स्पृशेत्। केवलस्य हारशब्दस्य च मौक्तिकहारपरत्वेन प्रसिद्धेः पुष्पशब्दोऽत्र मौक्तिकव्यावर्त्तनमात्रपरं प्रतिपद्येत।

शब्दस्यास्यार्थविचारे वस्तुतो ललितविस्तरो निर्णयं दिशति। तत्र हाराणामनेके प्रकारा लभ्यन्ते। एषु 'अर्ध—हार'—नामाप्येको भेदो विद्यते। यदा हि बोधिसत्त्वो निर्गच्छति तदा मार्गेषु अर्धहाराः प्रलम्ब्यन्ते—

'येन मार्गेण बोधिसत्त्वोऽभिनिर्गच्छति स्म स मार्गः सिक्तः संमृष्टः गन्धोदकपरिषिक्तो मुक्तकुसुमावकीर्णो नानागन्धघटिकानिर्धूपितः पूर्णकुम्भोपशोभितकदलीवृक्षोच्छ्रितो नानाविचित्रपटवितानविततो रत्नकिङ्किणीजाल—हारार्धहाराभिप्रलम्बितोऽभूत्। (ललितविस्तरे—१३६, पृ० स्वप्नपरिवर्तः)

अत्र अर्धहारो लता(लड़ी)—रूपो हारः संभवति। 'मलयज—रसविलिप्ततनवो नवहारलताविभूषिताः००'—इत्यादिषु संदर्भेषु स एव हारलतापदेनापि व्यपदिश्यते। लता (लड़ी) रूपा इमे हाराः कालिदासादियुगे स्वस्तिकादिरूपाभिः भक्तिभङ्गीत्यादिपर्यायपदवाच्याभी रचनाभिः कुट्टिमद्वारादिषु निवेश्येरन्। यत्र च कुट्टिमादिषु तथाविधा रचना उत्कीर्णा भवेत् तत्र समयविशेषे मुक्तानि पुष्पाण्यपि विकीर्येरन्। उपहारशब्दश्च तदानीमेतदुभयसाधारणतया प्रयुज्येत। रङ्गवल्लीवदेव कुसुमोपहाररचनेयं कुट्टिमादिसौभाग्याय कल्पेतापि। कालिदास उपहारशब्देन कुमारसंभवस्योद्धृते पद्ये निश्चितमेवार्धहाररूपममुमेवाभिप्रायं बिभर्त्ति। तथ्यमिदं तत्र दत्तेनौपम्येन भृशमुपोद्बल्यते। तत्र हि उपमानरूपेण नक्षत्राणां प्रतिबिम्बानि कविना दत्तानि। न केवलमत्र, मेघदूतस्य—

**यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि**
**ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः ।**
**आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं**
**त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ।।**

६६ मे०

अस्मिन् अलकावर्णनपद्येपि कालिदासो नक्षत्राणां प्रतिबिम्बानि कुसुमरचनाप्रतिनिधित्वेन दर्शयति। अत्र काममुपहारशब्दो नास्ति तथापि कुसुमरचनाशब्दः कविना न विस्मृतः। अर्थश्च सर्वोपि कुमारसंभव–प्रस्तुतपद्यप्रतिबिम्बकल्प एव। अवश्यमेव कुसुमरचना कुसुमप्रकराद् भिद्यते। रचनायां शिल्पयोजना भवति न तु याथातथ्यम्। नक्षत्राण्यपि केवलं विकीर्णपुष्पसदृशानि न भवन्ति, गुच्छ–हारार्धरूपताया अपि तेषु दृश्यमानत्वात्। सप्तर्षिमण्डल–कृत्तिका–मृगशिरा–प्रभृतीनां नक्षत्राणां वर्गः पुष्पहारानुहारी केन वा नोपगम्येत? एतेषु हि मण्डलविशेषच्छाया स्पष्टमालोक्यते। ईदृशां ज्योतिषां छायाः स्वस्तिकादिमण्डलाकाराणा–मर्धहार–हारलता–हारप्रलम्बादिपदव्यपदेश्यानामुपहाराणामौपम्यं न केवलमाकारमात्रतो बिभ्रति, यावद् वर्णतोपि। नक्षत्रेषु हि सूर्यमङ्गलौ रक्तौ, चन्द्रशुक्रौ श्वेतौ, बुधः पीतश्वेतहरितः, गुरुः पीतः, राहुकेतुशनैश्चराश्च कृष्णा ज्योतिर्विद्भिरुपगम्यन्ते। उपहारकुसुमान्यपि प्रायेण पञ्चवर्णा एव दर्श्यन्ते। पादताडितके भट्टजीमूतस्य भवनं पञ्चविधैः कुसुमोपहारैः प्रसाध्यमानं वर्ण्यते–

**साम्प्रतं ह्येतद् दशार्धवर्णपुष्पमुत्कीर्यते मुक्तम्**

(शृङ्गारहाट–२४१–२पृ०)

भगवतो बुद्धस्य शरीरपरिग्रहकाले भूमिः पञ्चविधैः कमलैः कृतोपहारा जायते–

**तत्रान्तरे तामरसैरुदारैरुदञ्चितैरञ्चितपञ्चवर्णैः ।**
**संछादिता तस्य विहारहेतोः कृतोपहारेव मही बभूव ।।**

(बुद्धघोषस्य पद्यचूडामणेस्तृतीये सर्गे)

मृच्छकटिके सूत्रधारस्य गृहमभिरूपपतिनाम्नो व्रतस्य संपादने तद्गेहिन्या पञ्चविधकुसुमैः प्रसाध्यते–

**इयं च पञ्च–वर्ण–कुसुमोपहारा भूः** (प्रथमाङ्कारम्भः)

इत्थं ज्योतिषां प्रतिबिम्बानि उपमानतया निधाय कालिदासेन उपहारशब्दः स्वयमेव स्पष्टार्थतां नीतः। नूनमत्र तस्यार्धहारादिरूपो रचनाविशेष–मण्डितकुसुमलक्षण एव उपहारपदार्थो विवक्षितः।

अस्ति चायमर्थः संस्कृतकविषु नितरां प्रसिद्धः। यत्रापि पानगोष्ठी वर्ण्यते, तत्र पानशालायाः कुट्टिमस्योपहारशोभित्वमव्यभिचारेण वर्ण्यते। भगवता वाल्मीकिना रावणस्य पानशालावर्णनावसरे–

**हार–नूपुर–केयूरैरपविद्धैर् महाधनैः,**
**पानभाजनविक्षिप्तैः फलैश्च विविधैरपि,**
**कृतपुष्पोपहारा भूरधिकां पुष्यति श्रियम् ।**

(सुन्दरकाण्डे ११ सर्गस्य १८, १९ पद्ये)

इत्येवमुपहारयोजना न विस्मर्यते। यद्यपि माघः शिशुपालवधस्य दशमे सर्गे रत्नाकरश्च हरविजयस्य २६ सर्गे पानगोष्ठीं स्वातन्त्र्येण वर्णयति, तत्र कुट्टिमप्रसाधनं च न स्मरति, तथापि अवन्तिसुन्दरीकथायां गद्यकविर्दण्डी **''विशदायां शरदि शारद–शशिकर–सित–चन्दन–धवल–हिमजलबिन्दु–सीकर–शीतलासु श्लथमान–शिशिर– शेफालिकोपहार–हासिनीषु हर्म्यमालासु मधुभाषिणीमधूनि ००००० मुग्धयुवतयः क्षणमीहमानाः पातुमुत्तस्थुः।।'** ३२, पृ०।

–इत्येवं मधुपानं वर्णयन् परम्परागतमुपहारसमुदाचारमिमं न विस्मरति।

न केवलं पानगोष्ठीष्वेव अन्यत्रापि यावत् कुसुमोपहाराः संस्कृतकविषु प्रसिद्धाः। अवन्तिसुन्दरीकथायामेव कविस्तन्नायकस्य स्मेरमल्लिकोपहारेषु हर्म्येषु विलासमेवं वर्णयति–

**''विजृम्भमाण–मल्लिका–मुकुल–दाम–प्रलम्बोत्तरीय–रमणीयेन सुन्दरीजनेन चन्दनरसप्रक्षालनशिशिरेषु स्मेरमल्लिकोपहारेषु सौधहर्म्येषु समगंस्त।'** पृ० ९०

मृच्छकटिके वसन्तसेनाया गृहस्य सश्रीकतायां कुसुमोपहारं कविर्न विस्मरति—

**'अहो विविध—सुगन्धि—कुसुमोपहार—चित्रलिखित—भूमि—भागस्य००० वसन्तसेनाया गृहद्वारस्य सश्रीकता।।'** ४.४८ प्राकृतम्

पादताडितकेपि वेशमहापथस्य कुसुमावकीर्णता एवं वर्ण्यते—

**'अहो नु खलु इदानीमस्य संमृष्ट—सिक्तावकीर्ण—कुसुमप्रद्वारा—जिरस्य वेशमहापथस्य परा श्रीः।।'** २३२ पृ०

तत्रैव संध्याकाले हरिणः पुष्पोपहारं परिहरति—

**'सान्ध्यं पुष्पोपहारं परिहरति मृगः स्थण्डिले स्वप्तुकामः।'** पृ० १०२ चतुर्भाणी

कादम्बर्यां भट्टबाणोपि राजकुलवर्णनावसरे कुट्टिमस्य पुष्पमालभारित्वं भृशम् उपवर्णयति—

**'अमल-मणिभूमि-संक्रान्त-मुख-निवह-प्रतिबिम्बतया विकच-कमल-पुष्प-प्रकरमिव संपादयता वारविलासिनीजनेनाकुलितम्।''**

(वैद्यसंस्करणे पृ० ८९)

कादम्बर्यामेव प्रमदानां परस्परमुपालम्भवर्णनावसरे कस्याश्चिन्मदनान्धता एवं वर्ण्यते—

**उपहार—कुसुम—स्खलित—चरणा पतसि मदनान्धे।**

(वैद्यसं० ८४ पृ०)

कुसुमैरास्तृताय लतामण्डपाय तत्रैवोच्यते—

**भ्रमर—भर—भुग्न—गर्भ—केसर—जर्जर—कुसुमोपहार—रम्योयं लतामण्डपः।**

(वैद्यसं० १३९ पृ०)

चन्द्रापीडो यं मुक्ताशिलापट्टमधिशेते स धवलैः सिन्दुवारदामभिः कृतोपहारो वर्त्तते

**अवदात—सिन्दुवार—दामोपहारं मुक्ताशिलापट्टमधिशिश्ये।**

(वैद्यसं० पृ० २०६)

भगवतो रामस्य विश्वामित्रेण सह निर्गमनकाले साकेतमार्गा: पुष्पावकीर्णा: सन्ति—

**यावदादिशति पार्थिवस्तयोर्निर्गमाय पुरमार्गसंस्क्रियाम् ।**
**तावदाशु विदधे मरुत्सखैः सा सपुष्पजलवर्षिभिर्घनैः ॥**

११.३ रघुवंशे

भगवतो महेश्वरस्य वरयात्रागमनावसरे हिमवन्नगरस्यौषधिप्रस्थस्य महान्त: पन्थान: संतानकनाम्नां देववृक्षाणां पुष्पैरवकीर्णा वर्ण्यन्ते—

**संतानकाकीर्णमहापथं तच्चीनांशुकैः कल्पितकेतुमालम् ।**
**भासोज्ज्वलत्काञ्चनतोरणानां स्थानान्तरस्वर्ग इवाबभासे ॥**

कुमारसंभवे ७.३

इन्दुमत्या सह रघुकुमारोपि यदा पुरराजमार्गमाजिहीते तदा सोपि मार्गोऽभिनवैरुपचारै: प्रकीर्णो वर्ण्यते—

**तावत् प्रकीर्णाभिनवोपचारमिन्द्रायुधद्योतिततोरणाङ्कम् ।**
**वरः स वध्वा सह राजमार्गं प्राप ध्वजच्छायनिवारितोष्णम् ॥**

रघुवंशस्य ७.४—पद्यम्

अत्रोपचारपदेन—

**मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्त्तमानम् ।**
**अवाकिरन् बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः ॥**

रघुवंशे द्वितीये सर्गे

**अवाकिरन् वयोवृद्धास्तं लाजैः पौरयोषितः ।**
**पृषतैर् मन्दरोद्धूतैः क्षीरोर्मय इवाच्युतम् ॥**

रघुवंशे चतुर्थे सर्गे

इत्यादिषु प्रतिपादितानामेव लाजादिद्रव्याणामभिप्रायविषयता समायाति। तत्र च पुष्पाणामपि संग्रहो नास्ति दुश्शक:। विवाहचतुष्केष्वपि पुष्पाणि विकीर्यन्ते। कालिदास: पार्वतीपरीक्षायां शिवमुखेन ब्रूते—

**चतुष्कपुष्पप्रकरावकीर्णयोः परोऽपि को नाम तवानुमन्यते ।**
**अलक्तकाङ्कानि पदानि पादयोर्विकीर्णकेशासु परेतभूमिषु ।।**

कुमारे ५.६८

मृगयाविहारिणो दशरथस्य शय्यापि कुसुमपल्लवकीर्णास्ति—

**स ललित-कुसुम-प्रवाल-शय्यां ज्वलितमहौषधिदीपिकासनाथाम् ।**
**नरपतिरतिवाहयाम्बभूव क्वचिदसमेतपरिच्छदस्त्रियामाम् ।।**

रघुवंशे ९.७०

ललितविस्तरेपि बोधिसत्त्वो येन मार्गेणाभिनिष्क्रामति स नानाविधकुसुमावकीर्णो वर्ण्यते—

**अहं नानापुष्पावकीर्ण००००मार्गव्यूहं करिष्यामि ।**
**येन मार्गेण बोधिसत्त्वोऽभिनिष्क्रमिष्यति ।।**

अभिनिष्क्रमणपरिवर्त्तः पृ० १४७ दरभङ्गासं०

एवमन्यत्रापि संदर्भशतेषु संस्कृतकवीनामुपहारप्रियत्वं गवेषयितुं शक्यते। तत्र सर्वत्रापि वस्तुतः अर्धहारात्मकत्वं तेषां शिल्पविशेषेण रचनारूपत्वं चोपहारपदस्य तात्पर्यविषयः। अस्मिंश्च अर्थे मालात्मकत्वमपि उपहारशब्दस्य नोपहन्यते, हारतुल्यतापरत्वेन च उपोपसर्गस्यापि सार्थकत्वमायाति कुसुमरचनादिशब्दविशेषैः पिशुनितेषु च अभिप्रायेषु विसंगतिरपि न जायते।

इत्थं १५—स्थलेषु कालिदासेन उपहारशब्दः प्रयुक्तः। तत्र नवसु स्थलेषु प्राभृतक्रिया—प्राभृतद्रव्यार्थान्यतरपरत्वम्, चतुर्षु पूजार्थकत्वम्, द्वयोश्च पुष्पप्रकरार्धहारपरत्वं तस्यानुभूयते। अत्र पुष्पप्रकरार्धहाररूपो योऽर्थः स संस्कृतकोषेषु न दृश्यते। कालिदासादि—साहित्यादेवासाववगन्तुं शक्यते।।

◈

## ( ३ ) बालातप:

रघुवंशस्य दशमे सर्गे रावणोपप्लुता दिवौकस: कालिदासशब्देषु—

**प्रबुद्ध—पुण्डरीकाक्षं बालातप—निभांशुकम् ।**
**दिवसं शारदमिव प्रारम्भ—सुख—दर्शनम् ।।**

१०.९—इत्येवंविधं भगवन्तं लक्ष्मीपतिमक्षिलक्षीकुर्वन्ति। अत्र सुमतिविजयश्चारित्र्यवर्धनश्च बालातपपदमेवं विवृण्वाते—

**बाला कन्याराशि: तत्र आ समन्तात् तपतीति—(बालातप:)। कन्याराशिस्थस्य आदित्यस्य नितरां भासो दीप्तयस्ता एव अंशुकं वस्त्रं यस्य तं वा।**

(द्रष्टव्यं रघुवंशस्य नन्दर्गीकरसंस्करणपरिशिष्टम्)।

नन्दर्गीकरमहोदयो व्याख्यानस्यास्य रघुवंशदर्पणकृद्भट्टश्रीहेमाद्रि—स्वीकृतत्वमपि प्रतिपादयते, किन्तु व्याख्यानमिदं रघुवंशदर्पण—स्यास्मदनुशीलितानां दशमसर्गीयाणां १०—प्रतीनां मध्ये भण्डारकर—प्राच्यविद्याया: पूनास्थे प्रतिष्ठाने १६१।१८८२—८३ क्रमाङ्कितायामेकस्यामेव प्रक्षेपबहुलायां प्रतौ विद्यत इति तादृशं प्रतिपादनं वस्तुवृत्ताद् दूरस्थितमेव मन्यामहे। मल्लिनाथस्य संजीविन्यामपि व्याख्यानमिदं न दृश्यते। नन्दर्गीकरमहोदयस्य टिप्पन्यां व्याख्यानस्यास्योपर्युद्धृतनाम्नोरेव टीकाकृतोर्विद्यमानत्वप्रतिपादनादिदमपि ज्ञायते यद् वल्लभादिषु प्राचीनतरेषु व्याख्यातृषु व्याख्यानमिदं न लभ्यते। नन्दर्गीकरमहोदयैस्तेषामपि

दृष्टचरत्वात्। तदत्रैतत् प्रश्नकौतुकं जागर्त्ति यद् व्याख्यानमिदं मान्यं न वेति। अत्र विचारः।

टीकितृबहुमतं व्याख्यानस्यास्य विपक्षे विद्यत इति मान्यत्वमस्य प्रमुख एव संदेहास्पदं प्रतिभासते। संदेहश्चायं विचारभूमिमधितस्थिवत्सु प्रमाकोटिमाटीकते। तथाहि व्याख्यानेऽस्मिन् च्युतसंस्कृतित्वम्, अप्रसिद्धिहतत्वम्, अप्रतीतत्वम् इत्येवंविधं दोषजातमुत्कन्धरायमाणं दृश्यते। तथाहि समासे ''भास्'' इतिशब्दस्य सकारो लुप्येत, अनन्तरं च यदि दीर्घसन्धिः क्रियेत तर्हि लोपोऽयं 'पूर्वत्रासिद्धम्' इतिनियमेनासिद्धो जायेत। एवं च 'निभांशुकम्' इति सन्धिरेवात्र न संघटेत। कृते च व्याकृतिविरुद्धं सन्धौ च्युतसंस्कृतित्वं पदेऽस्मिन् समापतेत्। एवमेव 'बालाया आतपस्य निभा यस्य तमिति विग्रहेणैव विवक्षितार्थलाभ आतपशब्दस्य सूर्यपरत्वे प्रसिद्धिविरोधरूपमप्रसिद्धिहतत्वमपि नातिगूढम्। बालाशब्दस्य कन्याराशिपरत्वं कोषेषु न लभ्यते, ज्योतिश्शास्त्रप्रसिद्धत्वे तु अप्रतीत्वमपरिहार्यम्, तच्छास्त्रानभिज्ञं प्रति स्वार्थप्रतिपादकतायास्तत्राभावात्। कृतेऽपि चास्मिन् क्लिष्टकल्पनोपनते कन्याराशिरूपिणि अर्थे न काव्यार्थसिद्धिः, चमत्कारहानात्। भगवतो विष्णोरंशुकं पीतवर्णत्वेन हि प्रसिद्धम्। ततस्तदुपमानेनापि साधर्म्यसिद्धये तादृशेनैव भवितव्यम्। आतपश्चात्रोपमानम्। बालत्वस्य विशेषणतया निवेशेन तत्र कन्यात्वं चेत् प्रतिपाद्यते तर्हि पराहतमेव वराकं साधर्म्यम्। ततश्चौपम्यमेव ध्वंसेन निश्चेष्टीकृतम्, का नाम तदाश्रितायाश्चमत्कृतेर्वार्ता। चमत्कृतिशून्यस्य च काव्यस्य निश्चेतनस्य च निकायस्य को नु विशेषः।

कन्याराशौ हि तीक्ष्णतामात्रमातपे प्रतिपद्येत। आश्विनमासे हि सूर्यः कन्याराशिमुपैति। मृगेषु कृष्णशारतासंपादयित्रीं ललाटन्तपत्वसध्रीचीनां तीक्ष्णतामसौ तदैव बिभर्त्ति। न चायं नानुभविकः सर्गमात्रस्य विषयः। न ह्यसौ तदानीं कुसुम्भबभ्रुतामितरराशिविलक्षणां काञ्चिदाचिनोति येन

कन्याराशि—स्मरणसध्रीचोनामेतामेव तदानींतनविशेषात्मना भावकः स्मरेत्। कुसुम्भबभ्रुता पिशङ्गवर्णता वा प्रभातस्यैव सूर्यस्य प्रसिद्धा।

अस्ति च शारदे बालातपे तदितर—बालातपाद् विशेषः। शरत्कालो हि घनव्यपायतया प्रसिद्धः। तदानीं वर्षर्त्तोर्व्यपायो भवति। वर्षर्तौ च भगवतः सूर्यनारायणस्य प्राभातिकी पिशङ्गता पयोधरोपरोधात् पिधीयमाना वर्ण्यते—

**तस्मिन् काले नयनसलिलं योषितां खण्डितानां**
**शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ।**
**प्रालेयास्त्रं कमलवदनात् सोऽपि हर्तुं नलिन्याः**
**प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ।।**—मेघदूते

इत्यादावभिप्रायस्यास्य सर्वजनीनत्वेन विद्यमानत्वात्। शरदि पुन—र्मेघानामपगमात् सूर्यमरीचयो भ्राजिष्णुतासहचरीं विमलतां प्रतिपद्यन्ते। ततश्च नलिनीमुखकमलान्यपि भृशं व्याकोशीं बिभ्रति। 'शरत्प्रमृष्टाम्बुधरोपरोधः शशीव पर्याप्तकलो नलिन्याः'—(रघुवंशे—६.४४)—इत्यादौ 'मेघापगमे यथा शशी स्फुटावभासो भवति तथैव सूर्योऽपि, यथा च शशी नलिन्या रुचये न भवति तथैव सूर्योऽप्यरुचय' इति व्यतिरेकेण सूर्यमाक्षिप्याभिप्रायस्यास्य प्रसिद्धताया द्रष्टुं शक्यत्वात्। मेघापगमातिरिक्ता शरदि दिगन्ता निर्धूतधूलि—निवहाः, अतश्च सातिशयं विमला जायन्ते। द्यावा—पृथिव्योरन्तरालं तदानीं नीरजस्कं तिष्ठति। ततोऽपि तदानीं प्रभातनस्य प्रभाकरस्य पिशङ्गता प्रचुरं मूर्च्छति। ऋत्वन्तरेषु तु तादृशी स्थितिर्न भवति। हेमन्त— शिशिरयोर्नीहारपातात् प्रथमं तु मित्रमित्राणि सहस्रपत्राण्येव न भवन्ति, हिमसेकविपत्तिर्वराकी नलिनी तदानीं कथाशेषतामृच्छति, तदानीं सूर्योऽपि भगवान् नीहारमग्नः सन् निश्वासान्धं मुकुरं विडम्बयति। कीदृशी

तदानीं प्रभातच्छविः का च तदानीमुषोदेवतायाः सौभाग्यरुचिः[१]। वसन्ते जलं स्थलं चेत्युभयत्रापि पुष्पपत्रसमृद्धिः, मधुकर–कोकिल– कूजितानि, कामिजनेषु शृङ्गोदयश्च[२] प्रायेण वर्ण्यन्ते। तत्र हि बालसूर्यस्य विद्यमानापि पिशङ्गता बहुमानपात्रतां न स्पृशति। अशोक– किंशुक–कर्णिकारसहकारा–दीनामेव तदा बहुमानपात्रत्वेन कविप्रतिभासु प्रसिद्धेः। 'गजे पुच्छं न भवतीति न, शुण्डादण्डस्तु तत्र बहुमानविषय' इति यथा तथैवैतदिति नास्त्यधिकमत्र वक्तव्यम्। सूर्यस्य च उदग्गतिरेव वसन्ते वर्ण्यते। कालिदासेन तु तस्या अवश्यमव्यभिचारेण च तत्र तत्र संदर्भे संदर्भणं क्रियते। रघुवंशे–

**जिगमिषुर् धनदाध्युषितां दिशं रथयुजा परिवर्तितवाहनः ।**
**दिनमुखानि रविर् हिमनिग्रहैर् विमलयन् मलयं नगमत्यजत् ।।**

९.२५–इत्येवम्, कुमारसंभवे च–

**कुवेरगुप्तां दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलङ्घ्य ।**
**दिग् दक्षिणा गन्धवहं मुखेन व्यलीकनिश्श्वासमिवोत्ससर्ज ।।**

३.२५

इत्येवमस्य दृश्यमानत्वात्। ग्रीष्मप्रस्तावेऽप्यसौ सूर्यनारायणस्य गतिमिमां न विस्मरति। रघुवंश एवासौ तामेवं वर्णयति–

**अगस्त्यचिह्नादयनात् समीपं दिगुत्तरा भास्वति संनिवृत्ते ।**
**आनन्दशीतामिव बाष्पवृष्टिं हिमस्रुतिं हैमवतीं ससर्ज ।।**

१६.४४

ग्रीष्मकालस्य तु परिणामरमणीयतामात्रं कालिदासे प्रसिद्धम्– 'दिवसाः परिणाम–रमणीया' (शाकुन्तलारम्भे)–इति। पूर्वोक्त–गजपुच्छन्यायेन

---

१. सौभाग्यं सौन्दर्यम्, सिन्दूरं च।

२. शृङ्गं हि मन्मथोद्भेदः।

च विद्यमानाया अपि प्रारम्भरमणीयतायाः तत्र वर्णनीयत्वेऽनाग्रहात्। द्यावापृथिव्योस्तदानीं रजस्वलात्वादुचितं च तत्। तदित्थं पारिशेष्यात् केवलायां शरदि भगवतो बालसूर्यस्य सौभाग्यं स्तिमिताक्षिलक्षणीयं भवति। ये च द्वादशानपि मासान् भगवतीं सावित्रीं गायत्रीकाले समुपासते ते किलात्र विशेषमवगच्छेयुः। ततश्च शरत्समये सूर्यातपगतं बालत्वं प्रभातकालिक–पिशङ्गतामात्रप्रतिपादकत्वे चमत्कारसाधकत्वादौचितीं बिभ्रदनुभूयते, न तु कन्याप्रतिपादकत्वे।

विप्रतिपत्त्यन्तरादपि कन्याराशिपक्षो विमाननैकविषयः तिष्ठति। यतो हि विशेषणान्तरं तत्र दुर्गतायते। तद् यथा 'प्रारम्भ–सुखदर्शनम्' इत्यत्र प्रारम्भशब्दे अवाचकत्वमायाति। कन्याराशिपक्षे बालातपशब्दात् प्रभातरश्मित्वपरिहाणौ प्रारम्भशब्दादपि तदर्थकत्वस्य बलात् परिहाणेः।

> प्रकृष्ट आरम्भो योगो येषां ते प्रारम्भाः प्रकृष्टोद्योगा योगिनः तेषां सुखदर्शनम्'—इति मल्लिनाथादयः,
>
> प्रकृष्ट आरम्भ उद्यमो विष्णुसाक्षात्कारविषय एषां सनकसनन्दना–दीनां (तेभ्यः) सुखेन दर्शनं यस्य तम्, 'आरम्भस्तु त्वरायां स्यादुद्यमे वधदर्पयोः' इति विश्वः'

इत्येवं च हेमाद्रिप्रभृतयः प्रारम्भशब्दव्याख्याने बहुव्रीहिमुपगम्य प्रवर्तन्तेऽपि। यद्यपि मल्लिनाथ–हेमाद्रिभ्यां बालाशब्दस्य कन्याराशिपरत्वं न स्वीक्रियते तथापि तयोरिदं व्याख्यानं पक्षेऽस्मिन्नुपकारकृत् सिद्ध्यति। एतयोश्च विदुषोरस्यां प्रवृत्तौ 'प्रारम्भ आदौ एव सुखदर्शनः, न तु पर्यन्तेऽपी'—ति भगवद्विषयामन्यथाबुद्धिसंभावनामेव तन्त्रं पश्यामः। वल्लभस्तु 'शारददिवसोपि तापाभावात् प्रारम्भसुखदर्शनो भवति' इत्येवं प्रारम्भशब्दस्य आरम्भमात्रपरत्वं मनुते। विपरीतबुद्धिभिया असौ किमिति नाक्रान्त इति प्रश्ने पश्यामः—यथा हि शिवलिङ्गादौ पूज्यत्वबुद्धिसाम्राज्यादिन्द्रियविशेषाऽ प्रत्ययादश्लीलत्वं न प्ररोहति तथैवात्रापि भगवद्विशेषणत्वेन प्रारम्भेत्यादेरभिप्रायस्य

स्थितेस्तादृशविरुद्धबुद्धित्वमपि प्ररोढुं न क्षमते। किं च यदि भगवति विरुद्धबुद्धिरुदेति तर्हि दिवसेपि सा उदियादेव। ततश्च तत्पक्षे तादृशबुद्धिनिवारकस्य कस्यापि काव्य–वाक्ये अश्रुतत्वात् पक्षद्वयेऽपि दोषपरिहारयोः साधारण्यादेकतरपर्यनुयोगोऽनुत्थानपराहतः। अस्ति च प्रारम्भपदार्थस्य आरम्भमात्रार्थकत्वे साधकं प्रमाणम्। प्रकृतसन्दर्भश्च तत्। प्रकृते हि देवा याचकत्वेनोपस्थिताः। योहि याचको भवति स दातुः दर्शनकालमुद्रामवश्यं निर्वर्णयति। प्रसन्नश्चेद् दाता याचकः प्रहृष्यति। भगवतो दर्शनेन देवानामपि प्रहर्षस्यात्र वर्णितुमावश्यकत्वात् कविना तल्लिङ्गतया सुखदर्शनत्वं दर्शनारम्भकालिकमत्र प्रतिपादितम्। इदं चात्र संगतिविरुद्धं यद् दर्शकत्वेनोपस्थिता देवाः, सुखदर्शनत्वं च प्रकृष्टोद्योगेभ्यो योगिभ्यः। ततश्च रामो निमन्त्र्यते, कृष्णश्च भोज्यते। तस्माद् व्याकुल–देव–समाजाश्वासनार्थसिद्धये प्रारम्भशब्दस्यारम्भमात्रापरत्वमत्र मन्तव्यं, न तु तादृशबहुव्रीहिपाशानीतं योगिरूपमपकल्पनम्। कन्याराशिपक्षे तु प्रभातरूपस्य पदार्थस्य बालाशब्दादैकान्तिकत्वेन ग्रहीतुमसंभवात् प्रारम्भपदादपि तद्ग्रहणेऽनैकान्तिकत्वस्यैव प्रसङ्गः। तदित्थं प्रारम्भ–शब्दस्य 'आरम्भार्थकताया'–मपि स्वीकृतायामुपमानोपमेयोभयसाधारण्यं 'प्रारम्भसुखे'–त्यादेर्विशेषणस्य संघटते, विप्रतिपत्तिनिरासपूर्वक–मधिकार्थलाभश्च संपद्यते।

विशेषणान्तरमपि कन्याराशिपक्षं विहाय प्रभातपक्षमेव द्रढयति। तथा हि 'प्रबुद्धपुण्डरीकाक्षम्' इत्यत्र यत् प्रबुद्धेतिपदं तद्घटकीभूतः प्रबोधपदार्थो निद्रापगमरूप एव। स च प्रभातैकानुषक्तः। पुण्डरीकपक्षे तु तस्य लाक्षणिकतया विकासपरत्वमेव। किं च यथा विशेषणमिदं भगवत्पक्षे 'प्रबुद्धपुण्डरीके इवाक्षिणी यस्ये'त्युपमितसमासेन दिवसपक्षे च प्रबुद्धपुण्डरीके एवाक्षिणी यस्येत्यनेन विशेषणसमासेन संगमय्यते तथा बालातपे'–त्यादि सङ्गमयितुं न शक्यते। तत्र मध्ये सादृश्यप्रतिपादकस्य निभशब्दस्य

विद्यमानत्वात्। तेन हि विशेषणसमासस्य बाधितत्वात् तदायत्तस्य बालातपांशुकपदार्थयोरभेदस्य प्रतिपादनं न संभवति। न च मल्लिनाथेन 'निभो व्याजसदृक्षयोः' इति विश्वप्रकाशवचनमनुसृत्य निभशब्दस्य व्याजार्थपरत्वेन 'बालातपव्याजांशुकम्' इति दर्शितेऽपि किमित्येवं तर्क्यत इति वाच्यम्, लशुनभक्षणेऽपि व्याधेरशान्तेः। व्याजशब्दो हि मूलतश्छद्मार्थको भवति। निभशब्दस्य व्याज–च्छलाद्यर्थकत्वस्वीकृतौ च 'बालातप'–पदार्थे बालातपत्वस्य निषेधः, अंशुकत्वस्य च विधानं भवतः। ततश्च 'प्रकृतं यन्निषिध्यान्यत् साध्यते सा त्वपह्नुतिः' इति मम्मटोक्तलक्षणोऽत्रापह्नवः स्वीक्रियते, न त्वभेदः। अपह्नवेन च व्यञ्जनया सादृश्यमात्रस्य प्रतीतिरुचिता न त्वभेदस्यापि। अपह्नवस्य सादृश्यैकमूलकताया–मेवापह्नुतेरलङ्कारत्वोपगतेः। प्रतीयमाने च सादृश्ये तत्प्रयोजकस्य साधर्म्यस्य गवेषणायां कन्याराशिपक्षे रिक्तहस्ततैव केवला लभ्यते। न चाभेदोपि तत्र व्यज्येतेति वाच्यम्, व्यक्तेनापि तेनापह्नवानुपकारित्वात् प्रकृते न कश्चिद् गुणः। वाच्येनापह्नवेन बालातपत्वप्रतिषेधपूर्वमंशुकत्व–विधाने दिवसपदार्थेन सह 'बालातपे–' त्यादेर्विशेषणार्थस्य जायमाना–यामसङ्गतौ व्यक्तेनाप्यभेदबोधेन किं नु साध्येत! तेन हि बालातपपदार्थ–स्यांशुकपदार्थेनैक्यमात्रं प्रत्याय्येत, न च तथापि कार्यसिद्धिः, अनन्वयप्रसंगस्य तथैव स्थितत्वात्। अभेदेन हि अंशुकपदार्थस्यैव प्राधान्यं प्रतीयेत। अंशुकं च दिवसपदार्थेन संगतिं कथमपि नाश्नुवीत। परिणामदिशा तु सा कर्तुं शक्येतापि, तदानीं बालातपपदार्थस्यैव प्राधान्येन प्रतीतेः, किन्तु सति निभपदार्थे सादृश्येऽभेदसाध्यस्य परिणामस्य वार्तापि दुष्करा। इत्थं च निभशब्दस्य व्याजार्थपरत्वमत्र प्रकृतानुपयोग्येव। यच्चोपयोगि तत् केवलं सदृशार्थपरत्वम्, तेन च दिवसपदार्थे विशेषणमिदं कथमपि संगतिं न भजेत। अत एव च कन्याराशिपक्षो व्याख्यातृभिरुपात्त इति चेत् सति साधनान्तरे तादृशदोषबहुलपक्षोपादाने को नाम समादरः! किं नु तत्

साधनमिति चेद् ब्रूमः—श्लोकवाक्यार्थो हि सादृश्यप्रधानः, तत्र विशेषणानामपि सादृश्यमात्रपरतायामेव कवेरत्र संरम्भः, न तु तादृशाभेदकल्पनायाम्। एतेन चौपम्यघटितवाक्यांशयोः 'प्रबुद्धे'—त्यादि' 'बालातपे'—त्याद्ययोर्भगवदेकपरत्वम् अतथाविधस्य 'प्रारम्भे'—त्यादेश्चोभयसाधारण्यमिह निर्विकल्पं स्वीकार्यम्। एतेन बालातप—प्रारम्भ—पदयोरपि शल्यचिकित्सा परिह्रियते कविपारम्पर्यं च परिरक्ष्यते। किमत्र कविपारम्पर्यमिति चेत् तदर्थं संदर्भान्तराणि गवेष्याणि। तत्र बालातप—बालारुण—बालार्क—प्रभृतीनां पदानां प्रभातप्रभामात्रपरताया दृश्यमानत्वात्। स्वयं कालिदास एव शब्दानामेषां प्रभातरश्मिपरत्वेनैव भूयांसः प्रयोगा दृश्यन्ते। तत्र बालातपशब्द एव—

दिग्विजयाय प्रस्थितो रघुर्यवनीमुखपद्मानां मधुमदरागं तथैव न सहते यथा अकालजलदोदयः पद्मानां बालातपम्—

**यवनीमुखपद्मानां सेहे मधुमदं न सः ।**
**बालातपमिवाब्जानामकालजलदोदयः ।।** ४.६१ ।।

अत्र जलदोदयकालः प्रावृट्। तदितरकालश्च शरदादिः। तत्र च शरदि बालपदेन कन्याराशेर्ग्रहणं सम्भवदपि मधुमदोपरागवैसादृश्यान्नैव संभवति, हेमन्तादौ च सूर्यो राश्यन्तरं संक्रामति। टीकितारोपि बालातपपदस्यात्र कन्याराशिपरत्वं न स्वीकुर्वन्ति। तद्यथा हेमाद्रिः—

**अकाले शरदि जलदोदयः पद्मानां बालातपमिव.....।**
**बालातपत्वेनारुणिमाक्षिप्तः।।** इति।

अत्रातपगतं बालत्वमारुण्यमात्रप्रतिपत्तय इति सुस्पष्टम्। मल्लिनाथो बालातपपदमत्र यद्यपि न विश्लेषयति तथापि मदपदं स मदरागपरं प्रतिपादयति 'मदो मदराग' इति। ततश्च बालपदादप्यारुण्यमात्रस्य तदभिमतत्वं सुतरामेव सिद्ध्यति। तदभावे साम्यविरोधात् वल्लभादिभिरत्र बालापदं कन्यापरं स्वीकृतमिति नन्दर्गीकरसंस्करणान्न ज्ञायते। मदरागेण

बालातपसाम्यं हरविजयमहाकाव्ये रत्नाकरोप्येवमुपनिबध्नाति—

**संवादि—षट्चरण—तारक—पक्ष्मपङ्क्ति—**
**लक्ष्मीधरां धवलिमानमिवोद्गिरन्तीम् ।**
**तन्व्या दृशं मधुमदो मुकुलीचकार**
**बालातपः कुमुदिनीमिव गाढरागः** ।। २६.४३।।

अत्र तु बालातपगतं रक्तवर्णत्वं कण्ठरवेणैव सुकविरुदीरयति।

२. इन्दुमती—स्वयंवरसभायामंसार्पितलम्बहारो हरिचन्दनचर्चिताङ्गश्च विशालशरीरः पाण्ड्यः सनिर्झरोद्गारेण सबालातपेन च पर्वतराजे—नोपमीयते—

**पाण्ड्योऽयमंसार्पितलम्बहारः क्लृप्ताङ्गरागो हरिचन्दनेन ।**
**आभाति बालातप—रक्तसानुः सनिर्झरोद्गार इवाद्रिराजः ।।**

६.६० रघुवंशे

संस्कृतकाव्यशास्त्रिषु पद्यमिदं बिम्बप्रतिबिम्बभावमूलायोपमालङ्काराय नितरामेव प्रसिद्धमस्ति। सर्वैरपि बालपदेनात्रातपगतमारुण्यमेव गृह्यते, रक्तेतिवाच्यवृत्तया प्रतिपादितस्य सानुगतस्यारुण्यस्यान्यथानुपपत्तेः, हरिचन्दनपदेन रक्तचन्दनग्रहणात् तत्प्रतिबिम्बतायाश्चारुण्यं विना बालातपे असंभवात् पक्षान्तरस्य ग्रहीतुमशक्यत्वात्। एतत्पद्यरत्नार्थचित्रमेव च बाणभट्टोपि बालातपशब्दपूर्वकं कादम्बर्यामेवं प्रस्तवीति (राजकुलवर्णने)—

**'धवलोष्णीषपटाश्लिष्ट—विकटकिरीटसंकट—शिरसा सनिर्झर—शिखरावलग्न—बालातप—मण्डलेनेव कुलपर्वतचक्रवालेन मूर्धाभिषिक्तेन सामन्तचक्रवालेन अधिष्ठितम्०००'** (पृ० ८८ वैद्यसंस्करणे।)

एवमेव शूद्रकवर्णनेऽपि बालातपशब्दं रक्तिमलाभायैव प्रयुञ्जानो बाण एव ब्रवीति—

अतिसुरभिचन्दनानुलेपनधवलितोरःस्थलम् उपरिविन्यस्तकुङ्कुमस्थासकम्। अन्तरान्तरानिपतितबालातपच्छेदमिव कैलाशशिखरिणं....राजानमद्राक्षीत्।

—पृ० ९

३. विक्रमोर्वशीये नायको नायिकायाः सङ्गमनीयमणिकृतां मुखशोभामेवं वर्णयति—

**स्फुरता विच्छुरितमिदं रागेण मणेर् ललाटनिहितस्य ।**
**श्रियमुद्वहति मुखं ते बालातप—रक्त—कमलस्य ।।**

४.७४।।

बालातपेन कमलानां को नु लाभ इति पद्यरत्नेस्मिन् नितरामेव स्फुटम्। अत्र हि कन्याया बलाद् ग्रहणं को नामानुमन्येत। बालातपशब्दवदेव बालारुणशब्दोऽपि कालिदासस्य बहुमतः। तथाहि—

१. रघुवंशस्य सप्तमे सर्गे युद्धं वर्णयति—

**आवृण्वतो लोचनमार्गमाशु रजोन्धकारस्य विजृम्भितस्य ।**
**शस्त्रक्षताश्वद्विपवीरजन्मा बालारुणोऽभूद् रुधिरप्रवाहः ।।**

इति ७.४२।।

इत्येवं बालारुणशब्दं च प्रयुङ्क्ते। अत्र 'तमःसन्निभं रजो बालातपसन्निभेन रुधिरप्रवाहेण शान्तिं नीतम्' इति वाक्यार्थे अन्धकारोपशामकत्वरूपेण लिङ्गेन 'बाल'—शब्दस्य शक्तिः प्रभातनत्वरूप एवार्थे नियम्यते। ततो नास्ति पक्षान्तरस्यावसरः।

२. कुमारसंभवे मधुश्रीः बालारुणकोमलेन रागेण चूतप्रवालोष्ठम् अलङ्कुरुते—

**लग्नद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीस्तिलकं प्रकाश्य ।**
**रागेण बालारुणकोमलेन चूतप्रवालोष्ठमलञ्चकार ।।**

इति ३.३०।।

अत्राधरप्रसाधनीभूतरागपदार्थसाहचर्याद् बालारुणपदघटकीभूतं

बालपदं प्रभातनत्वपरमेव, न कन्याराशिपरम्।

३. भगवती पार्वती तपःसमाधिकाले हारं विमुच्य बालारुणबभ्रु वल्कलं पिधत्ते।

**विमुच्य सा हारमहार्यनिश्चया विलोलयष्टिप्रविलुप्तचन्दनम् ।**
**बबन्ध बालारुणबभ्रु वल्कलं पयोधरोत्सेधविशीर्णसंहति ।।**
५.८।।

अत्रापि पिशङ्गतापरत्वप्रत्यायनायारुणपदे पूर्वपदतया बालपदं सुकविः प्रयुक्तवान्। बभ्रुपदेन च सादृश्यमूलं साधर्म्यमत्र निर्दिदेश।

बालारुणवदेव बालार्कपदमपि कालिदासेन प्रयुज्यते, तरुणार्कपदं च। तत्र प्रथमं यथा–

**बालार्कप्रतिमेवाप्सु वीचिभिन्ना पतिष्यतः ।**
**रराज रक्षःकायस्य कण्ठच्छेदपरम्परा ।।** १२.१०० रघुवंशे।।

अत्र निकृत्तशिरा रावणो बालार्कप्रतिमः, निपतन्तो गलद्रक्ताश्च तन्मूर्धानो बालार्कप्रतिमातुल्याः। अत्रोभयत्राप्युपमानोपमेयभावे रक्तरञ्जितत्वमेव केवलं सामान्यम्। द्वितीयं यथा–

**आवर्जिता किञ्चिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम् ।**
**पर्याप्तपुष्पस्तबकावनम्रा सञ्चारिणी पल्लविनी लतेव ।।**
कुमारे ३.५

अत्रापि भगवत्याः पार्वत्या वाससो रक्तवर्णतायै तरुणपदमुपादीयते। रघुवंशेपि प्रबोधमङ्गलावसरे तरुणारुणरागयोगात् स्तम्बेरमाणां दन्तकोषा भिन्नाद्रिगैरिकतटा इव प्रतिपाद्यन्ते–

**शय्यां जहत्युभयपक्षविनीतनिद्राः स्तम्बेरमा मुखरशृङ्खलकर्षिणस्ते ।**
**येषां विभान्ति तरुणारुणरागयोगाद् भिन्नाद्रिगैरिकतटा इव दन्तकोशाः ।।**
रघुवंशे ५.७२

अत्र गैरिकधातो रक्तवर्णत्वं प्रसिद्धमेव। तरुणारुणपदाव्यवहितोत्तरं च रागपदमप्यत्र प्रयुज्यते।

भगवता वाल्मीकिनापि प्रहस्तपुत्रप्रक्षिप्तेन रक्तवर्णेन शरेण विद्धं भगवतो हनूमतो मुखं भास्कररश्मिना विद्धेन शरत्कालाम्बुजेनोपमीयते—

**तस्य तच्छुशुभे ताम्रं शरेणाभिहतं मुखम् ।**
**शरदीवाम्बुजं फुल्लं विद्धं भास्कररश्मिना ॥**

सुन्दरकाण्डे ४४.८

अत्रापि भास्करपदेन बालारुणस्तरुणारुणो वा ग्रहीतुं शक्यते। शरगतेन रक्तत्वेन हि तत्र सूर्यरश्मौ रक्तत्वं प्रतीयेत, तच्चानन्तरपद्ये तेनैव भगवता—

**तत् तस्य रक्तं रक्तेन रञ्जितं शुशुभे मुखम् ।**
**यथाकाशे महापद्मं सिक्तं कनकबिन्दुना ॥**

इत्येवं स्पष्टं क्रियते।

पूर्वोद्धृतेषु हि स्थलेषु सूर्यगतनवीनताप्रतिपत्तये बालशब्दप्रयोगात् कन्याराशिरूपस्य पक्षान्तरस्य कथंचित् स्यादपि संभावना, किन्तु यत्र तादृशार्थप्रतिपादनाय बालपदं नास्ति तत्र किमुच्येत! यथा—

**स तेजो वैष्णवं पत्न्योर् बिभेजे चरुसंज्ञितम् ।**
**द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपम् ॥**

—(रघु १०.५४) इत्यत्र

**तं कृतप्रणतयोऽनुजीविनः कोमलाग्रनखरागरूषितम् ।**
**भेजिरे नवदिवाकरातपस्पृष्टपङ्कजतुलाधिरोहणम् ॥**

(रघुवंशे १९.८)

इत्यत्र च। अनयोः प्रथमस्थले दशरथद्वारा पुत्रीयेष्टिसमुत्थितस्य चरुतेजसः कौसल्या—कैकेयीनाम्न्योः पत्न्योर्विभागो द्यावापृथिव्योः सूर्यकर्तृकेण

प्रत्यग्रातपविभागेनोपमीयते। तत्र प्रत्यग्रपदेनापि किं कन्याराशिर् ग्रहीतुं शक्येत? उत्तरत्र च अग्निवर्णस्य, यावकरञ्जितानां तन्नखानाम्, तत्र प्रणतानां चानुजीविनाम् उपमेयता, दिवाकरस्य, नवीनतदातपस्य, तत्स्पृष्टपङ्कजस्य चोपमानता बिम्बप्रतिबिम्बात्मनोपनिबध्यते। तत्र दिवाकरेणाग्निवर्णस्य, पङ्कजेनानुजीविवर्गस्य यथा साम्यं तथैव नवातपेन नखरागस्येति स्थितमत्रापि प्रभातस्य सूर्यस्य कृते पक्षान्तरकल्पनानैराश्यम्।

प्रभातस्य सूर्यस्य तपनीयवर्णतासौभाग्यं केवलेन अरुणपदेनापि प्रतिपाद्यते। बाणभट्टादेः प्रभातवर्णनासु तथ्यमिदं स्पष्टमेव, स्वयं कालिदासेपि नैतन्न स्पष्टम्। स हि–

**वृन्तश्लथं हरति पुष्पमनोकहानां संसृज्यते सरसिजैररुणांशुभिन्नैः ।**
**स्वाभाविकं परगुणेन विभातवायुः सौरभ्यमीप्सुरिव ते मुखमारुतस्य ।।**

रघुवंशे ५.६९

**यावत् प्रतापनिधिराक्रमते न भानुरह्नाय तावदरुणेन तमो निरस्तम्।**
**आयोधनाग्रसरतां त्वयि वीर याते किं वा रिपूंस्तव गुरुः स्वयमुच्छिनत्ति।।**

रघुवंशे ५.७१

**अरुणरागनिषेधिभिरंशुकैः श्रवणलब्धपदैश्च यवाङ्कुरैः ।**
**परभृताविरुतैश्च विलासिनः स्मरबलैरबलैकरसाः कृताः ।।**

रघुवंशे ९.४३

इत्यादिषु केवलमरुणिमानमेव विडम्बयितुं बाल–नव– प्रत्यग्रतरुणादिपदव–देवारुणपदमपि प्रयुङ्क्ते। 'अरुणरागनिषेधित्वम्' अंशुके विधाय बालातपनिभांशुकपदार्थाभिव्यक्तिः स्वयं कालिदासेनैव स्पष्टतां नीतेति किं नु भूयोप्युच्येत। सर्वथा 'बालातप'–पदं कविपारम्पर्ये प्रभातकालिक–सूर्यरश्मिमात्रार्थपरमस्ति, न कन्याराशिपरम्।।

◈

## ( ४ ) प्रणयः

कालिदाससाहित्ये प्रणय–शब्दः स्वातन्त्र्येण प्रणयि–प्रभृतिपदान्तर–घटिततया चेति साकल्येन सप्तपञ्चाशद् वारं प्रयुक्तो लभ्यते। तत्र–

प्रणयप्रश्रयौ समौ, प्रणयास्त्वमी विस्रम्भयाच्ञाप्रेमाण' इत्यमरे,

प्रणयः प्रेम्णि विस्रम्भे याच्ञाप्रसरयोरपी'–त्येवं विश्वप्रकाशे,

प्रणयः प्रश्रये प्रेम्णि याच्ञाविस्रम्भयोरपी'–त्येवं मेदिन्याम्

प्रणयः प्रेमयाच्ञयोः, विस्रम्भे प्रसरे चापी'–त्येवमनेकार्थसंग्रहे,

प्रणयः स्यात् परिचये याच्ञायां सौहृदेपि चे'–त्येवं च यादवप्रकाशे

यथा शब्दस्यास्यानेकार्थत्वं लभ्यते तथैव कालिदाससाहित्येऽपि। तत्र तत्र संदर्भेषु टीकितृभिस्ते तेऽस्यार्थाः प्रदर्श्यन्तेऽपि। तथापि प्रतिप्रयोगं विहितानुवीक्षैरस्माभिस्तत्र कानिचन संशोधनान्यनुभूयन्ते। लेखेऽस्मिन् प्रणयशब्दस्य कालिदासकृतान् सर्वानपि प्रयोगानुपस्थाप्य यथास्वं स्वविचारानप्युपस्थापयितुं प्रयतामहे।

सत्स्वप्यन्येष्वर्थेषु प्रणयशब्दस्य प्रमुखं प्रवृत्तिनिमित्तं प्रेमतत्त्वमेव। तच्च साहित्यशास्त्रे[१] रतिप्रीतिभेदेन द्विधा विभज्यते। तत्रापि रतिपदेन स्त्रीपुंसयोरन्योन्यं प्रति एको निसर्गनियतो भावबन्धः तद्रूपं प्रेम, प्रीतिपदेन च तदितरविषयकमपि तत् परिभाष्यते। कालिदाससाहित्ये द्वावप्यमू प्रेमभेदौ प्रणयपदेन क्रोडीक्रियेते। तत्र सूचीकटाहन्यायेन प्रीत्यर्थका एव प्रयोगाः पूर्वमुपस्थाप्यन्ते। तथाहि–

---

१. भोजराजः सरस्वतीकण्ठाभरणस्य पञ्चमे परिच्छेदे प्रेमद्वैविध्यमेतत् सप्रपञ्चमुप–स्थापयति।

## १. प्रीत्यर्थकाः प्रयोगाः

१. कुमारसंभवे तपोवनमृगाः पार्वतीपाणिपल्लवगतान् दर्भान्—

**अपि प्रसन्नं हरिणेषु ते मनः करस्थदर्भप्रणयापहारिषु ।**
**य उत्पलाक्षि प्रचलैर्विलोचनैस्तवाक्षिसादृश्यमिव प्रयुञ्जते ॥**

५.३५॥

इत्येवं प्रणयेनापहरन्तो वर्ण्यन्ते। मल्लिनाथोऽत्र 'अपहारि'—पदस्थाने 'अपराधि'—पदमपि पाठान्तरतया दर्शयति। तत्र प्रथमे पाठे प्रणयपदं स्नेहपरं प्रतिपद्यमानोऽप्यसौ द्वितीये पाठे 'दर्भाणां प्रणयेन प्रार्थनया'—इत्येवं प्रार्थनापरं प्रतिपद्यते। युक्तं च तत्। यतो हि प्रार्थनापदेन संस्कृतभाषायामर्थ—द्वयमभिप्रेयते १. अभिलाषः, २. अभिलषणीयार्थप्राप्त्यनुगुणो व्यापारश्च। अनयोरभिलाष आदित्सामात्रम्, व्यापारस्तु द्विविधः १. आदानप्रवृत्तिरूपः २. आदानानुरूप्यकृद्याचनरूपश्च। अनयोराद्यः पशुमात्रनिष्ठः, पशूनां हेयोपादेयताविवेकशून्यत्वात्, द्वितीयस्तु मानुषैकवृत्तिः, मानुषाणां प्रवृत्ति—निवृत्त्योर्व्यवस्थितविषयतायाः शास्त्रसिद्धत्वात्। प्रकृते च प्रणयपदार्थः पशुनिष्ठतया अपराधजनकतया च प्रतिपादितः। ततोऽस्य दर्भादानप्रवृत्ति—मात्रपरत्वं सिद्ध्यति, अभिलाषमात्रस्यापराधजनकत्वासंभवात्। नेयं प्रवृत्तिः प्रीतिमात्रम्, प्रीतेः सुखप्रदे वस्तुनि चित्तावर्जनं यावदेव सीमितत्वात्, प्रवृत्तेश्च प्रीतिमूलकादादानेच्छारूपादभिलाषाद् ऊर्ध्वं जायमानत्वात्। ततश्च तृतीयकक्षाप्रविष्टायाः प्रवृत्तेः प्रथमकक्षाप्रविष्टायाः प्रीतेः सकाशाद् भेदः स्पष्ट एव। 'अपहारि'—पदघटिते तु पाठे तादृशप्रवृत्तेरपहारिपदेनैव प्रतिपादितत्वाद् अभिलाष—प्रीत्यन्यतर—विनिगमनाविरहाच्च प्रीत्यर्थक—स्नेहपरत्वेऽपि न दोषः।

२. शाकुन्तले शकुन्तलाहस्तगत एव जले दीर्घापाङ्गो नाम मृगपोतकः प्रणयं करोति, न तु दुष्यन्तहस्तगते (५.२२)। अत्र प्रणयपदेन

जलादानप्रवृत्तिं यावत् प्रसृता प्रीतिरेव मृगस्यावसेया।

३. शाकुन्तल एव साक्षादुपागतां शकुन्तलां प्रत्यादिश्य शापनिवृत्तौ निजां बिडम्बनामेवं प्रतिपादयति–

**स्रोतोवहां पथि निकामजलामतीत्य**
**जातः सखे! प्रणयवान् मृगतृष्णिकायाम्** ।। ६.१६।।

अत्र हि प्रणयः प्रीतिमात्ररूपः। न च मृग–तृष्णिकातः समासोक्तिविधया स्त्रीत्वप्रतीतेः प्रणयपदं तद्विषयकमपि रतिरूपं प्रेम प्रत्याययेदिति वाच्यम्, पूर्वार्धवाक्यार्थेन स्त्रीत्वस्य गतार्थत्वाद्, दृष्टान्तवाक्यार्थस्य पूर्वार्धप्रतीत–समर्थनीय–वस्तु–प्रतिबिम्बभूतस्य मृगतृष्णिकारूपस्य जडमात्रस्यैव वस्तुनस्तात्पर्यविषयतया प्रत्यायनाच्च। न च प्रणयोऽत्र प्रतिपादयिष्यमाण–याचनार्थकोऽपि संभवति, याचनायाः प्रस्तावाननुमोदितत्वात्, मृगतृष्णिकायां 'जलं देही'ति संभाव्यमानाया अपि तस्याः प्रमादमात्रविषयत्वात्, प्रमादस्य च दुष्यन्तगतस्य प्रस्तावेऽस्मिन्नलभ्यमानत्वात्।

४. रघुवंशे दशरथपत्नी सुमित्रा पत्या स्वयमदत्त्वा सपत्नीभ्यामेव प्रतिपाद्यमानं चरुपायसं प्रतिपत्तुं न विचिकित्सते। तत्र समाधानं प्रस्तुवन् महाकविर्ब्रवीति–

**सा हि प्रणयवत्यासीत् सपत्न्योरुभयोरपि ।**
**भ्रमरी वारणस्येव मदनिष्यन्दलेखयोः** ।। १०.५७।।

अत्र दानप्रतिग्रहयोः प्रसङ्गपतितत्वेपि प्रणयः प्रीतिमात्ररूपः, सुमित्राकर्तृकाया याचनाया अत्रोपनिबन्धाभावाद् अर्थान्तरस्य चासंभवात्। अस्ति च हेमाद्रिमल्लिनाथयोरप्यर्थोऽयमनुमतः।

५. मालविकाग्निमित्रे इरावती चरणपतितमपि अग्निमित्रम् उपेक्ष्य गच्छति। तत्र तामनुनयता नायकेनोच्यते–**'एवं हि प्रणयवती सा शक्यमुपेक्षितुं कुपिता'** (३.२३)। इरावत्याः 'प्रणयवती कुपिते' त्येवमत्र प्रणयकोपस्यैव

विवक्षाविषयत्वात्। तेन हि पूर्वमुपनिबद्धा प्रार्थनाप्यत्र प्रणयतया नेतुं शक्येतेति वक्तुं न शक्यते।

६. कुमारसंभवे भगवत्याः पार्वत्यास्तपःसमाधिं वर्णयता कालिदासेन–

**विसृष्टरागादधरान्निवर्तितः स्तनाङ्गरागारुणिताच्च कन्दुकात् ।**
**कुशाङ्कुरादानपरिक्षताङ्गुलिः कृतोऽक्षसूत्रप्रणयी तया करः ॥**

५.११॥

इत्येवं तस्याः करस्याक्षमालाप्रणयित्वं प्रतिपाद्यते। अत्र प्रकृतिभूतस्य प्रणयपदस्य 'प्रणयी सहचर' इत्येवं साहचर्यपरत्वं मल्लिनाथः प्रतिपादयति। वयं तु कोमलवस्तुपरित्यागपूर्वकं परुषवस्तुपरिग्रहे भगवत्या हार्दस्यान्यथानुपपत्तेः प्रीतिमात्रपरत्वमस्य मन्महे। तथाविधं विषमं वस्तु तया चित्तप्रातिकूल्येन न प्रत्यग्राहि, प्रत्युत मनसः पूर्णेनाभियोगेनैवेत्यस्यार्थस्य प्रीत्यर्थकत्वमात्रे (प्रणयपदस्य) स्वीक्रियमाणे संभवात्। परिग्रहस्य मनोयोगशून्यत्वविवक्षायां हि 'तयाक्षसूत्रे स्वकरः प्रवर्तित' इत्येवमेव पदार्थयोजनां कविराद्रियेत। साहचर्ये पुनर्जपमात्रे नित्योद्यमः प्रतीयते, सोपि च केवलमङ्गुलिसञ्चालनमात्ररूपः। तपसः कृते तपःसमाधिपदं प्रयुञ्जानस्य कवेः प्रतिभासंरम्भास्पदं चित्तस्थैर्यं तत्र प्रत्येतुं न शक्यते। कविरत्र 'अक्षसूत्र–शब्देन' प्रणयिशब्दं योजयति, न तु 'प्रणय' शब्दम्। अस्ति चायं 'प्रणय'–शब्दः प्रीतिमत्त्वमात्रे रूढः। साहचर्यस्य तत्र क्वाचित्कत्वमात्रं भवति, न सार्वदिकत्वम्। ततः साहचर्यमत्र भक्तिमात्रलभ्यं संभवति। न तु स्वारसिकाद् व्यापारात्।

इत्थमेषु षट्सु स्थलेषु प्रणयशब्दः प्रीतिमात्रार्थको दृश्यते।

## २. रत्यर्थकाः प्रयोगाः

इदानीं रतिरूपप्रेमप्रतिपादकस्य प्रणपदस्य प्रयोगानुपस्थापयामहे–

१. रघुवंशस्य षोडशे सर्गे जलविहारिणं कुशमवरोधजनो वर्णोदकैः सिञ्चति।

तत्र कविः—

**वर्णोदकैः काञ्चनशृङ्गमुक्तैस्तमायताक्ष्यः प्रणयादसिञ्चन्** ।। १६.७० ।

इत्येवं प्रणयशब्दं प्रयुङ्क्ते। मल्लिनाथो हेमाद्रिश्चेति द्वावपि तं स्नेहार्थकमेव मन्वाते। युक्तं च तत्, अर्थान्तरस्य प्रसङ्गाननुमोदितत्वात्।

२. रघुवंशस्यान्तिमे सर्गे तन्नायकोऽग्निवर्णो रात्रौ नर्तकीगृहेषु तिष्ठति, प्रातश्चावरोधं प्रसादयितुं यतते। एतदेव वर्णयन् कविः श्लोकते—

**प्रातरेत्य परिभोगशोभिना दर्शनेन कृत—खण्डन—व्यथाः ।**
**प्राञ्जलिः प्रणयिनीः प्रसादयन् सोऽदुनोत् प्रणयमन्थरः पुनः ।।**

१९.२१ ।।

अत्र प्रणयपदं मल्लिनाथः स्नेहार्थकं मनुते। हेमाद्रिरत्र 'प्रणय'—शब्दस्य स्थाने 'ग्रहण'—शब्दमुपादत्ते। विश्वप्रकाशस्य 'ग्रहणं तूपलब्धौ स्यादादरे ग्रहणे कर' इति 'मन्थरः सूचके कांस्ये'—इति च वचनद्वयमुद्धृत्य 'ग्रहणमन्थर'—शब्दाय 'आदरसूचक' इति पर्यायं स्थिरयति। अस्ति चायमेव पाठो वल्लभः, चरित्रवर्धनः, दिनकरः, सुमतिविजयः, विजयानन्दशिष्यश्चेति प्राचां रघुवंशटीकितॄणां मूलत्वेनाभिमतः।

३. पुरूरवा गन्धमादने विद्याधरदारिकां सविशेषमवलोकयते। उर्वशी तेन मानग्रहिला जायते तदीयां स्थितिं सखीमुखेन कविरेवमुप—स्थापयति—'असहना सा, दूरारूढश्चास्याः प्रणयः'—(४.३)—इति। सोयं प्रणयः प्रेमातिशयरूप एव।

४. मेघदूते यक्षो यक्ष्याश्चित्रं शिलायामालिखति, संदेशपदे च कथयति—

**त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया—**
**मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।।**

२.४२—इत्यादि।

अत्रापि प्रणयो भावबन्धरूपः स्नेह एव। स्नेहाश्रितोऽयं कोपः चतुर्भाणीप्रमुखेषु

शृङ्गारप्रबन्धेषु नितान्तमेव प्रसिद्धः। भरतो मल्लिनाथश्चेति टीकितारौ पदमिदं स्नेहार्थकमेव मन्वाते।

५. दुष्यन्तो दुर्वाससः शापाच्छकुन्तलां प्रत्याख्याति। प्रत्याख्यानकषायितायास्तस्याश्चेष्टाञ्चैवं निर्वर्णयति–

**मय्येव विस्मरणदारुणचित्तवृत्तौ**
**वृत्तं रहःप्रणयमप्रतिपद्यमाने ।**
**भेदाद्भ्रुवोः कुटिलयोरतिलोहिताक्ष्या**
**भग्नं शरासनमिवातिरुषा स्मरस्य ।।** शाकु० ५.२४

अत्र प्रणयशब्देन दुष्यन्तः शकुन्तलया सह संपन्नमात्मनः प्रेमैव परामृशति। राघवभट्टो मानियरविलियम्समहोदयश्चात्रामुमेवार्थं दर्शयतः।

६. रघुवंशस्थे वसन्तावतारविवरणे किंशुके समुद्भिद्यमानं मुकुलजालं वनमालाप्रणयिन्याः प्रत्यग्रनखक्षतौपम्येन कविरेवं वर्णयति–

**उपहितं शिशिरापगमश्रिया मुकुलजालमशोभत किंशुके ।**
**प्रणयिनीव नखक्षतमण्डनं प्रमदया मदयापितलज्जया ।।**
९.३१ ।।

अत्र प्रणयिपदेन प्रेमवत्त्वमेव गृह्येत, नार्थान्तरम्।

७. विप्रयुक्तानामङ्गनानां हृदयस्थितेर्यन्निबन्धनं तद् उपस्थापयन् कालिदासो वक्ति–

**आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां**
**सद्यःपात–प्रणयि हृदयं विप्रयोगे रुणद्धि ।।** १० ।।

अत्र हृदयस्य प्रणयित्वं प्रेमयुक्तत्वमेव नान्यत्। मतं चैतद् भरतस्य मल्लिनाथस्य च। तौ हि प्रणयिपदं प्रेमार्द्रजनपरं दौर्भाग्यरहितव्यक्तिपरं च क्रमेण मन्वाते। तत्र दौर्भाग्यं नाम प्रेयसोरन्योन्यभावबन्धरूपस्य सौभाग्यस्याभावः, दौर्भाग्यराहित्यं च उभयाभावमुखेन सौभाग्यरूपमेव। तच्च रतिरूपमेव। यथा चैतत् तदस्माकमेव सागरिकायां प्रकाशिते

कालिदासभारतीप्रथमपुष्पे यथातथं विशदीकृतमेव।

८. नक्तं नीलकण्ठपरिभुक्तयौवना पार्वती दिवा परिभोगचिह्नानि मुकुरे पश्यति। तदेव वर्णयता सुकविनोच्यते—

**दर्पणे च परिभोगदर्शिनी पृष्ठतः प्रणयिनो निषेदुषः ।**
**वीक्ष्य बिम्बमनुबिम्बमात्मनः कानि कानि न चकार लज्जया ॥**

इति कुमारे ८.११॥

अत्रापि प्रस्तावेन शिवपरत्वेऽपि प्रणयिपदस्य योगलभ्यं प्रवृत्तिनिमित्तं प्रेमपूर्णत्वमेव। मल्लिनाथ—सीतारामौ च तथैव व्याकुरुतः।

९. अस्यामेवोज्जयिन्यां यक्षो मेघं कस्याञ्चिद् भवनवलभावेकरात्रं वासयते। ततश्च प्रातःकृत्यं निर्दिशन्नसौ कथयति—

**तस्मिन् काले नयनसलिलं योषितां खण्डितानां**
**शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ।**
**प्रालेयास्त्रं कमलवदनात् सोऽपि हर्तुं नलिन्याः**
**प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ॥** ४३॥

अत्र प्रणयिपदं किंवान्यत् प्रतिपादयेद् ऋते प्रेमिमात्रम्।

१०. मेघदूत एव कैलाशोत्सङ्गे विद्यमानाया अलकाया वर्णने कविरात्मनः काव्यशिल्पं—

**तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां**
**न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ॥** ६३॥

इत्येवं चित्रयति। अत्र प्रणयी प्रेयानेव। ततश्च समासोक्तिविधया प्रस्तुतेन तथापि स्वशब्दकथितत्वात् पुनरुक्तभूतेन सादृश्यशिल्पेन अलकागतस्त्री—त्वसमर्थितं कैलाशगत—पुंस्त्व—पोषितं च नायकनायिकागताया अन्योन्यविषयिण्या रतेरेवात्र प्रणयिपदघटकीभूतप्रणयपदार्थत्वं पर्यवस्यति। मल्लिनाथो भरतश्चात्रानुकूलतां धत्तः।

११. यक्षपत्नी लब्धनिद्रासुखा स्याच्चेत् तस्याः प्रबोधाय मेघेन याममात्रं प्रतीक्षितव्यम्। तत्र यक्षो हेतुमुपन्यस्यन् श्रूयते—

**मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथञ्चित्**
**सद्यः कण्ठ—च्युत—भुज—लता—ग्रन्थि गाढोपगूढम् ।।**

।। इति।

अत्रापि मल्लिनाथः प्रणयिपदार्थं प्रेयसा, भरतश्च प्रेमवता तादात्म्यापन्नं दर्शयतः। युक्तं च तत्, अर्थान्तरस्यासंभवात्।

१२. विक्रमोर्वशीयप्रयोगदर्शने सूत्रधारः—

**प्रणयिषु वा दाक्षिण्यादथवा सद्—वस्तु—पुरुष—बहुमानात् ।**
**शृणुत जना अवधानात् क्रियामिमां कालिदासस्य ।।**

१.२।।

इत्येवं प्रणयिषु दाक्षिण्यमभिसंधीकुरुते। तत्र प्रणयिपदस्यार्थः शृङ्गारकथाया रतिशबलितानि पात्राण्येव।

१३. विक्रमोर्वशीय एव नायिकासमागमोत्सुकं नायकं विदूषको वारद्वयं वक्ति—'चिन्तितो मया दुर्लभ—प्रणयिजनस्य समागमोपायः' (२.१० प्रा०) इति। अत्र प्रणयिजनपदेन नायिका विषयीकृतास्तीति प्रेमयुक्तत्वमेव प्रणयिपदार्थः।

१४. उर्वशी श्लिष्टयोक्त्या प्रणयिजनं लोचनाभ्यां पिबन्ती वर्ण्यते १.१३। तत्र प्रणयिजनपदेन वाचकत्वव्यापारात् सखीजनस्य बुद्धौ क्रियमाणायामपि व्यञ्जनव्यापारात् पुरूरवस एव तात्पर्यविषयत्वं सिद्ध्यति। तेन हि सखीजनविषयतायां प्रणयिजनपदस्य प्रीति—प्रतिपादकत्वेपि नायकविषयतायां रति—प्रतिपादकत्वं स्थिरमेव। तदेव च चमत्कारभूमिः।

१५. उर्वशी पुरूरवसो नेत्रे पृष्ठत उपेत्य निमीलयति। यदा च सा

हस्तयोरादाय पुरूरवसा निजासने उपवेश्यते तदा तयोच्यते–देव्या दत्तो महाराजः। अतोऽस्य प्रणयवतीव शरीरं संगतास्मि–(३.१४)। अत्र श्रीमन्तो वेलणकरमहोदयाः प्रणयवतीपदान्मदनातुरत्वं द्योत्यमानं मनुते। युक्तं च तत्। प्रणयो हि प्रकर्षोभिलाषस्य। तत्र धैर्य–व्रीडादि–च्युतिरपि संभाव्यते। तत एव चोर्वशी झटिति नायकमभिसृत्य स्प्रष्टुं शशाक।

१६. विक्रमोर्वशीयस्यैव चतुर्थेऽङ्के सङ्गमनीयमणिपार्श्वमभिक्रामतः पुरूरवसः स्थितिं गजान्योक्त्या प्रस्तुवन् सुकविरेष गजं प्रणयिनी–बद्धास्वादम्–(४.३२) उदीरयति। तत्रापि प्रणयिनीपदार्थः प्रियारूप एव। परस्परं प्रति प्रेमरूपश्च प्रणयपदार्थस्तद्घटकीभूतः।

१७–१८. रघुवंशस्य पूर्वोद्धृते प्रातरेत्य परिभोगेत्यादौ (१९.२१) पद्ये यथा प्रणयिनीपदं समापतितं तथैव तस्यैव सर्गस्य–

**अङ्गुलीकिसलयाग्रतर्जनं भ्रूविभङ्गकुटिलं च वीक्षितम् ।**
**मेखलाभिरसकृच्च बन्धनं वञ्चयन् प्रणयिनीरवाप सः ।।**

१९. इत्यत्र (१९.१७) पद्ये समापतति। अत्रोभयत्रापि प्रणयिनीपदं मल्लिनाथो प्रेयसीपदार्थपरं प्रतिपादयति। मान्यं च तत्।

२०. मालविकाग्निमित्रस्य तृतीयेऽङ्के मालविकायाश्चरणौ रञ्जयित्वा बकुलावलिका तां कथयति त्वं भर्तुरपि प्रियासीति, कथयति च एतानि खलु भतुरिव प्रणयमृदुलान्यक्षराणि मम वक्त्रान्तरितानिं–इति। अत्र बकुलावलिकाया नायकदूतीत्वात् प्रणयशब्दो नायकनिष्ठां मालविकाविषयिणीं रतिमेव विषयीकरोति। प्रसङ्गान्तरेषु दूतीमुखेन नायकानां समागमयाचनाया अपि दृश्यमानत्वाद् अत्रापि प्रणयशब्दस्य याचनापरत्वमप्युन्नेतुं शक्यते तथापि प्रस्तुते प्रसङ्गे समागमयोजनामात्रे दौत्यस्य सीमितत्वात् तादृशार्थस्य संभवो नास्ति।

२१. शाकुन्तले नलिनीपत्रे 'तव न जाने हृदयम्'—इत्यादिक्रमेण नखैरर्पितनिवेदनां शकुन्तलाम् उपसृत्य निजपर्युत्सुकत्वं 'तपति तनुगात्रि मदनस्त्वां मां पुनर्दहत्येवे'—त्येवं प्रतिपादयन्तं दुष्यन्तं शकुन्तला सप्रणय—कोपस्मितम् अन्तःपुरपर्युत्सुकं प्रतिपादयति। तत्र प्रणयकोपः प्रेमाश्रित एव कोपः संभवति। प्रेम च रतिस्वरूपमेव।

२२. यक्षराजस्य अलकायां विप्रयोगः प्रणयकलहाद् ऋते न भवति

**नाप्यन्यस्मात् प्रणयकलहाद् विप्रयोगोपपत्ति—**

**र्वित्तेशानां न च खलु वयो यौवनादन्यदस्ति** (६५ मे०। इति अत्रापि प्रणयकोपः समनन्तरोक्तस्वरूप एव। ततश्च प्रणयोपि परस्परं प्रति प्रेमैव प्रेयसोः। प्रेम चैतत् सर्वथा रतिरूपमेव। इमे खल्वेकविंशतिः प्रयोगाः प्रणयशद्वब्दस्य यत्रास्य रत्यर्थकत्वं संदर्भशुद्धं विचारसहं च। एवं कालिदाससाहित्ये प्रीति—रति—प्रेम—प्रतिपादकानां प्रणयशब्दप्रयोगाणा—मनुशीलनं जातम्। सङ्कलनेनेमे सप्तविंशतिर्भवन्ति। इमे हि प्रणयशब्दस्य मुख्याः प्रयोगाः।

## ३. याचनार्थकाः प्रयोगाः

गौणेषु प्रयोगेषु प्रणयशब्दः कालिदाससाहित्ये याचनार्थको भूम्नोपलभ्यते। तत्र याचना द्विविधा भवति १. अभिलाषप्रकाशाद् व्यज्यमाना २. याचनादिशब्दप्रयोगादभिधीयमाना च। प्रणयशब्द उभयविधामपीमां क्रोडीकरोति। अस्यैव लेखस्य प्रथमतमे संदर्भे याचनेयं प्रार्थनाशब्दतो—प्यभिधातुं शक्यते। अत्रायं विशेषो यदस्या याचनायाः प्रार्थनाया वा प्रागुक्तोभयविध—प्रेमपूर्वकत्वं न व्याहन्यते। एतदर्थकान् निखिलानपि प्रयोगानिह प्रस्तूय परिशीलयेमहि। तथा च—

१. गोचारणव्रती दिलीपो हिमगिरिगुहायां कुम्भोदरनाम्ना भगवत्पशुपतिसेवकेन सिंहेन व्यापाद्यमानां नन्दिनीमवेक्ष्य विहितबहुविधसंभाषणस्तमेव सिंहं वक्ति—

**संबन्धमाभाषणपूर्वमाहुर्वृत्तः स नौ सङ्गतयोर्वनान्ते ।**
**तद् भूतनाथानुग नार्हसि त्वं संबन्धिनो मे प्रणयं विहन्तुम् ।।**

(२.५८ रघु) इति।

अव चारित्रवर्धनः प्रणयपदं स्नेहपरं मनुते, मल्लिनाथो याचनापरं, हेमाद्रिभट्टश्च तदुभयपरम्। नन्दर्गीकरो मल्लिनाथमनुकुर्वाणः प्रणयपदं 'रिक्वेस्ट' पदेनाङ्ग्लवाचानुवदति। संदर्भः पुनरत्र प्रणयपदं याचनापरमेव साधयति। उक्तेरितः प्राक् दिलीपः स्वदेहार्पणनिष्क्रयेण नन्दिनीमोक्षं याचितवानेव।

**स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद ।**
**दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ।।**

(२.४५ रघुवंशस्य) इत्यतः

**सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः ।**
**न पारणा स्याद् विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ।।**

(२.५५।। रघुवंशे) इत्यतश्च

पूर्वप्रसङ्गादयमर्थः स्पष्ट एव। इत्थं च प्रणयशब्दोऽत्र याचनार्थक एव सिद्ध्यति। याचनापि चेयं प्रेमपूर्णेति चारित्रवर्धनादीनामपि पर्याययोजनात्र न विसंवदति, अथापि सा नियतमेव टीकान्तरमपेक्षते।

२. रघुवंशस्य षोडशे सर्गे कुशेन सह साकेतदेवतायाः संवादमुपसंहरता सुकविनोच्यते–

**तथेति तस्याः प्रणयं प्रतीतः प्रत्यग्रहीत् प्राग्रहरो रघूणाम् ।**
**पूरप्यभिव्यक्तमुखप्रसादा शरीरबन्धेन तिरोबभूव ।।**

(१६.२३) इति।

अत्र हेमाद्रिः, मल्लिनाथो नन्दर्गीकरश्चेति त्रितयेऽपि प्रणयपदं याचनापरमेव मन्यन्ते। मान्यं च तत्। नवमात् पद्याद् एकविंशं पद्यं यावद् आत्मनो दुर्दशां प्रतिपाद्य 'तदर्हसीमां वसतिं विसृज्य मामभ्युपेतुं कुलराज–धानीम्' (१६.२२) इत्येवं कुशावतीपरित्यागपूर्वकमात्मनः पुनःपरिग्रहस्य

याचितत्वात्। याचनेयं न न प्रीतिपूर्णा।

३. शाकुन्तलस्य सप्तमेऽङ्के सर्वदमनस्य पाणितलसौभगेन जातविस्मयो दुष्यन्तः स्वाभिप्रायं प्रकटयति—

**प्रलोभ्य—वस्तु—प्रणय—प्रसारितो विभाति जालग्रथिताङ्गुलिः करः ।**
**अलक्ष्य—पत्रान्तरमिद्धरागया नवोषसा भिन्नमिवैकपङ्कजम् ॥**

७.१६। इति।

अत्र राघवभट्टः प्रणयपदं याचनापरमिव प्रीतिपरमपि मनुते। मानियर—विलियम्समहोदयश्च प्रार्थनापरमेव। तदनुसृत्य शङ्करपण्डितोपि प्रार्थनार्थकमेव। युक्तं च तत्। सिंहपोतं मोचयितुकामया तापस्या 'बालमृगेन्द्रं मुञ्च, अन्यत् ते क्रीडनकं दास्यामी' ति दत्तप्रलोभनेन सर्वदमनेन 'देही'त्येवं ललितेन वचनोपन्यासेन प्रलोभ्यं वस्तु याचितुं प्रसारितस्य पाणितलस्य दुष्यन्तकर्तृके वर्णनेऽस्मिन् प्रणयशब्दं किं वार्थान्तरं प्रत्याययेत्। अथापि राघवभट्टस्य प्रीतिरूपोऽर्थोपि प्रार्थनया सह पूर्ववदत्रापि योजनीय एव, तापसीं प्रति दुर्ललितस्य वत्सवचनोपन्यासस्य प्रीतिं विना असंभवात्।

४. अग्निमित्रो मालविकाग्निमित्रे प्रियामिरावतीमुपेतुमशक्नुवानो विदूषकं ब्रूते—

**उचितः प्रणयो वरं विहन्तुं बहवः खण्डनहेतवो हि दृष्टाः ।**
**उपचारविधिर्मनस्विनीनां न तु पूर्वाभ्यधिकोपि भावशून्यः ॥**

३.३

अत्र काटयवेमभूपः प्रणयपदं प्रार्थनार्थकं मनुते। टानी—महोदयोऽपि प्रणयपदाय 'रिक्वेस्ट' पदं पर्यायतया प्रयुङ्क्ते। यद्यप्यसौ बोलेन्सन—तारा—नाथादिभिर्विप्रलब्धः 'उचित' पदप्रतिपादितमौचित्यं विधेयभूतमप्युद्देश्यकोटौ निवेश्य 'उचितः प्रणयः प्रापर रिक्वेस्ट' इत्येवमनुवदति। प्रस्तुते प्रणयशब्दे तु सर्वेपीमे टीकितारो युक्तवचना एव। 'अद्यैव प्रथमावतार—सुभगानि

रक्तकुरवकान्युपायनीकृत्य नव–वसन्तावतार–व्यपदेशेन इरावत्या प्रार्थितो भवान् 'इच्छाम्यार्यपुत्रेण दोलाधिरोहमनुभवितुम्' इति भवताप्यस्यै प्रतिज्ञातम्, तत् प्रमदवनमेव गच्छाम' इति विदूषकोक्तौ 'न क्षममिदम्' इति प्रतिवदतो नायकस्य हि पूर्वोक्तेयमुक्तिः। तत्र प्रणयपदम् अर्थान्तरप्रत्यायकं न संभवति। अस्ति चात्र प्रेमतत्त्वं बद्धमूलम्।

५. विक्रमोर्वशीयस्य चतुर्थेऽङ्के

**महदपि परदुःखं शीतलं सम्यगाहुः प्रणयमगणयित्वा यन्ममापद्गतस्य।**
**अधरमिव मदान्धा पातुमेषा प्रवृत्ता फलमभिनवपाकं राजजम्बूद्रुमस्य।।**

इत्यत्र चतुर्थे पद्ये प्रणयपदं काटयवेमः प्रार्थनार्थकं मनुते तथैव च कल्पलताकारो डॉ० शास्त्री। अस्ति चायमेवार्थोऽत्र प्रकरणसमर्थितः। पुरूरवसो हीयमुक्तिः। इतः पूर्वं पुरूरवा लताभावेन परिणताया उर्वश्याः प्रवृत्तिं कोकिलां 'यावदेनां पृच्छामी'ति प्रष्टुमिच्छति। कृतनिश्चयश्च वक्ति–यावदेनामभ्यर्थये–इति। अभ्यर्थयते च–

**तामानय प्रियतमां मम वा समीपं**
**मां वा नयाशु कलभाषिणि तत्समीपम्'** इति।

तत्र पतिगृहं यान्तीं शकुन्लां कण्व–वचनमनुपालयन्ती वनस्थली कोकिलामुखेनानुमन्यमानापि पुरूरवसं प्रियाप्रवृत्तिं वेदयितुं विमुखयति। तत्र प्रतिक्रियाव्यञ्जनोक्तिरियं नायकस्य–'**महदपि परदुःखमि**'त्यादिः। अत्र प्रणयपदं यत्सत्यं प्रीतिपूर्ण–प्रार्थनापरमेव।

६. असौ पुरूरवा एव प्रियाप्रवृत्तये भ्रमरमपि पृच्छति। कथयति च '**भ्रमरे प्रणयं करिष्ये'** इति। अत्रापि प्रार्थनैव प्रणयपदार्थः, 'मधुकर मदिराक्ष्याः प्रवृत्तिम्' इत्येतेनानुपदिकेन संदर्भेण तस्यैवानुमोदितत्वात्। मनुते च कल्पलताकारस्तथैव।

७. शकुन्तलासमीपमुपेतं राजानं प्रियम्वदा प्रार्थयते–'अर्हसि, अभ्युपपत्त्या

जीवितमस्या धारयितुम्' इति। तत्र राजा प्रत्युत्तरति—'भद्रे साधारणोऽयं प्रणयः' (३.१७) इति। वक्ति च समनन्तरमेव 'सर्वथानुगृहीतोस्मी' ति। अत्र प्रणयपदस्य प्रियंवदापक्षे प्रार्थनापरत्वे प्रकरणात् सिद्धे, साधारण्यान्यथानुपपत्त्या दुष्यन्तपक्षेपि तत्परत्वमेव सिद्ध्यति। अत एव राघवभट्टोपि व्याख्याति 'प्रणयो याच्ञा, यथा भवतीभिरेत-दर्थमहमभ्यर्थये एवं मयाप्येतदनुग्रहार्थं भवत्यौ प्रार्थनीये' इति। उद्धरति च विश्वप्रकाशस्य वचनम्—'प्रणयः प्रेम्णि विस्रम्भे याच्ञाप्रत्यययोरपी'—ति परस्पराभिलाषिणोर्नायकयोरन्योन्यानुग्रहार्थितेयं विक्रमोर्वशीयेऽपि कविनानेनोपस्थाप्यते। तत्र—

८. चित्रलेखामुखेनोर्वशी पुरूरवसं प्रार्थयते—**'मम तस्मिन् सुरारिसंभवे दुर्नये महाराज एव शरणमासीत् साम्प्रतं साहं तव दर्शनसमुत्थेनायासिना बलवद् बाध्यमाना मदनेन पुनरपि महाराजस्यानुकम्पनीया भवामि'** इति। उत्तरे पुरूरवाः—

**पर्युत्सुकां कथयसि प्रियदर्शनां ता—**
**मार्त्तिं न पश्यसि पुरूरवसस्तदर्थाम् ।**
**साधारणोऽयमुभयोः प्रणयः स्मरस्य**
**तप्तेन तप्तमयसा घटनाय योग्यम् ।।** ३.१५।।

इत्येवमात्मनोऽपि प्रणयं प्रकाशयति। सोऽयं प्रणयः पूर्ववदेव साधारण्यान्यथा-नुपपत्त्या प्रार्थनारूप एवावसेयः। कल्पलताकारो डॉ० शास्त्री, संस्कृता-ङ्ग्लकोषकारः श्रीमान् आप्टेमहोदयश्च प्रणयपदं प्रेममात्रपरमत्र प्रतिपादयतः। तत्र कविना कण्ठरवेणैवोदीरितं साधारण्यं तादृशोऽभ्यर्थनाप्रस्तावश्च प्रसादं न भजेते।

अस्मिन्नुर्वशीशकुन्तलाप्रणयप्रस्तावे चित्रलेखाप्रियंवदे दूतीकार्य-करणात् स्फुटमेव प्रणयदूत्यौ। ततः—

९. इन्दुमतीस्वयंवरप्रस्तावे राज्ञां शृङ्गारचेष्टानां चित्रणे—

**तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः ।**
**प्रवालचेष्टा इव पादपानां शृङ्गारचेष्टा विविधा बभूवुः ।।**

रघुवंशे ६.१२।।

इत्येवमागते प्रणयाग्रदूतीपदे घटकीभूतमपि प्रणयपदं प्रार्थनार्थकत्वमेव बिभृयात्। मनोरथपदेनाभिलाषस्य प्रतिपादितचरत्वे प्रणयपदेना–भिलाषानन्तरीय–समागम–प्रार्थनाया एव प्रतिपादनस्य स्वारसिकत्वात्। हेमाद्रिः मल्लिनाथश्चेति द्वौ व्याख्यातारौ प्रणयपदमत्रापि प्रेम–प्रार्थनोभयपरं प्रतिपादयतः, नन्दर्गीकरमहोदयश्च प्रेममात्रपरम्। शकुन्तलादिगत–संदर्भान्तर–पात्रयोजनासंवादेन तु प्रणयपदस्य केवलप्रेमपरत्वं विहातुं न न विचिकित्सते धीः। अस्ति हि दूतीकर्म कामशास्त्रादिषु प्रणयप्रसङ्गे प्रथितम्, अस्ति च कालिदासस्यापि तत्र प्रायेण सर्वत्रावधानम्, स हि मालविकाग्निमित्रेऽपि बकुलावलिकां नायकदूतीत्वेनोपस्थापयति। तत्र ईर्ष्याकषायिता इरावती बकुलावलिकामुपालभते–'बकुलावलिके त्वया साधूपक्रान्तम्' (३.१४) इति। रघुवंशेपि शृङ्गारनायकोऽग्निवर्णः प्रियजनस्य विप्रलम्भकातरं वचो दूतीमुखेन शृणोति (१९.१८)। स हि क्लृप्तपुष्पशयनान् लतागृहान् दूतिकृतमार्गदर्शनः सन् उपैति (१९.२३)। संङ्गमाय गूढचारिणमग्निवर्णं चारभूताभिर्दूतीभिरुपलभ्य प्रमदाः कर्षन्ति (१९.३३) एवमादिषु स्थलेषु संवादप्रवृत्तस्य कवेरेकत्र विसंवादः सामान्यतः कल्पयितुं न शक्यते। तेनात्र प्रणयपदं प्रेमपूर्णप्रार्थनापरं प्रेमयाचनातात्पर्यकमेव वा मन्तुं युज्यते। एवमेव–

१०. रिचर्डपिशेलसंस्कृतस्य शाकुन्तलस्य तृतीयेऽङ्के मूलत्वेन, निर्णय–सागरीयादिषु च संस्करणेषु पाठान्तरत्वेन दर्शिते–

**अयं स यस्मात् प्रणयावधीरणामशङ्कनीयां करभोरु! शङ्कसे ।**
**उपस्थितस्त्वां प्रणयोत्सुको जनो न रत्नमन्विष्यति मृग्यते हि तत् ।।**

३.१७।।

इत्यस्मिन्नपि पद्ये प्रणयपदद्वयमपि प्रार्थनापरं मन्तुं युक्तम्। तत्रापि नायकयोः परस्परानुग्रहप्रार्थनायामवधीरणभयस्य प्रासङ्गिकत्वात्। तथाहि मदनलेखं कर्तुमुपदिष्टया शकुन्तलया 'अवधीरणभीरु वेपते मे हृदयम्' इत्युक्त एव सन्निहितेन लताप्रच्छन्नेन च दुष्यन्तेन पद्यमिदमुच्यते। सन्निधानादेव च प्रार्थना, प्रच्छन्नत्वाच्च तदवधीरणा नायकपक्षेपि कल्पितुं शक्येते। रत्नान्वेषणोपन्यासेनापि प्रार्थनारूप एवार्थः पोषं लभते। प्रेमार्थकत्वे हि प्रेम्णोऽन्वेषणमस्वाभाविकं भवति। ततश्च प्रेमिपरत्वमेव तत् पर्यवस्यति। प्रेमिणश्च रत्नौपम्यं न न संजाघटीति। 'जातौ जातौ यदुत्कृष्टं तद् रत्नमभिधीयत' इत्यभियुक्तोक्त्या केवलस्योत्कृष्टत्वमात्रस्य रत्न–नायिका–सादृश्यप्रयोजकीभूतधर्मत्वमत्र संभवति। उत्कर्षश्चासौ–

**शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य ।**
**दूरीकृताः खलु तदोद्यानलता वनलताभिः** ॥ १.१६

इत्यादिभिः पूर्वोपन्यासैरसकृदेव नायकमुखेनैव प्रतिपादितः।

अभिलाषार्थकत्वेपि नास्ति गतिः। अवधीरणासंगतिप्रसङ्गात्। अभिलाषस्यावधीरणं हि प्रकृतिविरुद्धम्। यत्र चैतदविरुद्धं तद्धि अभिलाषस्य प्रकटनमेव याचनारूपम्। तदित्थं विडम्बनामात्रमेव प्रणयपदस्यात्र प्रार्थनयाचनाऽन्यतरेतराऽर्थपरत्वसाधनप्रयासः।

११. अवधीरणप्रसङ्गो मालविकाग्निमित्रेऽपि लभ्यते। तत्र पञ्चमेऽङ्के नायको जयसेनामुखेन पुत्रविजयं देव्यै धारिण्यै निवेदयति। विदित–मालविका–राजदारिकाभावा च सा मालविकापरिग्रहरूपं प्रियनिवेदनपारितोषिकं नायकाय प्रयच्छन्ती कथयति–'इदमार्यपुत्रः प्रियनिवेदनानुरूपं पारितोषिकं प्रतीच्छतु इति' (माल. ५.१८.१३) राजानं च निरुत्तरं वीक्ष्य सा पुनः कथयति–'किमवधीरयति मामार्यपुत्रः' (माल. ५.१८.१३) इति। इयं हि प्रणयावधीरणैव, उत्तरत्र प्रणयपदार्थस्य

प्रस्तुतत्वात्। तथाहि मालविकां पत्रोर्णेनावगुण्ठ्य धारिणी पुनर्निवेदयति 'इदानीमिमामार्यपुत्रः प्रतीच्छतु' इति। तत्र स्वसुखं वीक्षमाणस्य राज्ञः पक्षं प्रबलयन् विदूषको वक्ति 'अथवा देव्यैव कृत–प्रणय–विशेषां दत्तदेवीशब्दां मालविकामत्रभवान् प्रतिग्रहीतुमर्हति' (५.१८.१८) इति। अत्र 'यतोहि देवी सविशेषमनुरुणद्धि तत उचित एव मालविकायाः परिग्रह' इत्यभिप्रायकमेव विदूषकवचनं तिष्ठति। तेन चात्र प्रणयशब्दोऽनुरोधरूपप्रार्थनार्थक एव सिद्ध्यति।

१२. मेघदूते निर्विन्ध्यायाः कामविह्वलतां प्रतिपाद्य यक्षः कथयति–

**स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु** (२८) इति।

अत्र प्रणयशब्दोऽभिलाषप्रकटनपूर्वकं नायकानुग्रह–याचन–रूपमेव अर्थं तथैव प्रकटयति यथा शाकुन्तले विक्रमोर्वशीये च तन्नायिकयोर्दर्शित–चरमनुग्रह–प्रार्थनम्।

१३. मालविकाग्निमित्रे मालविका छलिकमभिनयन्ती नायके स्वमनुरागं प्रकाशयति–

**दुर्लभः प्रियो मे तस्मिन् भव हृदय निराशम्**
**अहो अपाङ्गो मे परिस्फुरति किमपि वामः ।**
**एष स चिरदृष्टः कथं पुनरुपनेतव्यो**
**नाथ मां पराधीनां त्वयि गणय सतृष्णाम् ।।**

एतस्याभिप्रायमवगच्छत् विदूषको वक्ति–

**भो वयस्य चतुष्पदवस्तुकं द्वारीकृत्य त्वय्युपस्थापित इवात्मा तत्रभवत्या।** इति।

अत्र नायकः स्वां प्रतिक्रियामेवं प्रकटयति–

**जनमिमनुरक्तं विद्धि नाथेति गेये वचनमभिनयन्त्या स्वाङ्गनिर्देशपूर्वम्।**
**प्रणयगतिमदृष्ट्वा धारिणीसन्निकर्षादहमिव सुकुमारप्रार्थनाव्याजमुक्तः।।**

(२.५ मालविकाग्निमित्रे) इति।

अत्र नायिकायाः स्नेहप्रवृत्तौ धारिण्याः सन्निकर्षो बाधक इति सा सुकुमारेण प्रार्थनाव्याजेनैवमुक्तवती इति स्वं प्रति नायके स्नेहप्रवृत्तिरूपां प्रणयगतिमदृष्ट्वा धारिणीसन्निकर्षात् स्पष्टं वक्तुमशक्नुवाना तथा व्याजेन प्रणयप्रार्थनां कृतवतीति वा वाक्यार्थः। अत्र काटयवेमो नायकनिष्ठां नायिकाविषयकस्नेहप्रवृत्तिं प्रणयगतिपदार्थतया नयति। तत्र प्रश्नः। नायकनिष्ठां स्नेहप्रवृत्तिं दृष्ट्वा नायिका नायके प्रणयप्रार्थनां कुरुते चेत् शकुन्तला कां नु स्नेहप्रवृत्तिं दृष्ट्वा दुष्यन्ते प्रणयप्रार्थनां कृतवती उर्वशी वा पुरूरवसि? सर्वथा नास्ति नायिकाप्रणयप्रसरस्य नायके प्रणयगतिदर्शनेन सह समनियतत्वम्। यद्युच्यते, कामयमानापि नायिका नायकनिष्ठां स्वविषयिणीं स्वकामनामदृष्ट्वा तत्र स्वकामनायाः प्रकाशं कथं नु कर्तुमुत्सहेत, कथं न सा वैषम्यमुत्प्रेक्ष्य विचिकित्सेतेति, तर्हीदमप्युच्येत यत् नायिकाविषयको नायककामो नायिकया कुतो नु विदित इति। न कुतोऽपीति चेत् अकामत्वज्ञानाभावं सकामत्वज्ञानमिवैव प्रार्थने हेतुमूरीकुर्याः। सकामत्वज्ञाने पुनः पौनरुक्त्यं प्रसज्यते प्रार्थनायाम्। अकामत्वज्ञानाभावे चोपपद्येतापि कामाशया प्रार्थनाव्यापारः। तदत्र प्रणयगतिपदेन नायिकाश्रिता नायकविषयिणी प्रणयगतिरेवावसेया तात्पर्यविषयतया। सा चात्र प्रार्थनावसररूपा संभवति।

किं च अग्निमित्राय प्रतिश्रुतभगिनीप्रदानेन भ्रात्रा माधवसेनेन सह विदिशां प्रस्थिता मालविका अविदिताग्निमित्रप्रणयवृत्तान्तैव भवेदिति को नु चिन्तयेत्? अग्निमित्रे विदर्भराजभगिनीत्वेन मालविकायाः परिचयस्याभावाद् धारिणीसन्निकर्षो बाधां जनयति। सति च तत्त्वेन ज्ञाने पञ्चमेऽङ्के स्वयं धारिण्येव प्रागुक्तक्रमेण मालविकापरिग्रहाय नायकं प्रार्थयते। छलिकप्रयोगसमये च धारिणी संनिकृष्टैवासीदिति मालविकया स्वनिवेदनं स्पष्टतया कर्तुं नाशक्यत, तत एव सा व्याजमाश्रितवती। व्याजोपि स वैदग्ध्यपूर्ण आसीदिति सुकुमार इत्युक्तः। इत्थमिह प्रणयगतिः मालविका–कर्तृकमात्मनिवेदनमेव।

१४. विदूषक—बकुलावलिकयोरुपायरचनया समुद्रगृहके प्राप्तसमागमो नायको मालविकां साध्वस—सङ्कुचितां वीक्ष्य कथयति—

**विसृज सुन्दरि! सङ्गमसाध्वसं मयि चिरात् प्रभृति प्रणयोन्मुखे ।**
**परिगृहाण गते सहकारतां त्वमतिमुक्तलताचरितं मयि ।।**
४.१३।।

अत्र चिरात् प्रभृति प्रणयोन्मुखत्वं किमिति प्रश्नः। तत्र संस्कृतकोषकार आप्टेमहोदयः प्रणयं विवाहरूपं मनुते। वयं तु प्रार्थनारूपमेव तन्मन्तुं विवशाः। प्रार्थनाया एव प्रसङ्गसमर्थितत्वात्। अस्ति हि नायकनिष्ठा नायिकाविषयिणी प्रार्थना कविनैव अस्मिन्नेव प्रकरण उपनिबद्धा। नायिकामनुनयता तेनोच्यते—

**अनुगृह्यतां चिरानुरक्तोयं जन** (४.१५.१) इति।

१५. अस्मिन्नेवाङ्क इरावती समं दोलाधिरोहणाय नायकमामन्त्रयति। सेयमामन्त्रणा प्रार्थनापदेनैव कविना व्याहृतेति स्पष्टमेव प्रागुक्तादुद्धरणात्। दोलागृहं प्रयान्ती सा दासीं निपुणिकां पृच्छति 'कुत इदानीमवगन्तव्यं दोलागृहं गतो भर्ता न वेति (३.१३.६) इति। तत्र निपुणिकयोच्यते—भट्टिन्या अखण्डितात् प्रणयात् (३.१३.७)—इति। अत्र प्रणयशब्दः प्रसङ्गदृष्ट्या प्रार्थनार्थक एव। भर्त्रा भट्टिन्या अस्याः काचनापि प्रार्थना कदापि न खण्डिता, ततो दोलाधिरोहणप्रार्थनामप्यसौ न ह्येव खण्डयेदिति प्रत्ययेन निपुणिकायास्तथाविधमुत्तरम्।

१६. अग्निमित्रेण च उचितः प्रणयो वरं विहन्तुमिति पूर्वविचारित—प्रणयपदकमुत्तरं दत्त्वा मालविकासमीपमेव गन्तुमुचितमिति मन्यते। ततश्च जायत एवेरावत्या दोलारोहणप्रणयः खण्डितः यदा चेयं ससुद्रगृहके मालविकासङ्गतम् अग्निमित्रं पश्यति तदा बकुलावलिकां मालविकां च सोपालम्भं वक्ति—

**बकुलावलिके। त्वया साधूपक्रान्तम्**
**मालविके। त्वं तावत् सफलाभ्यर्थनं कुरु आर्यपुत्रम्** । इति।

अत्र मालविका बकुलावलिका चेति द्वे अपि कथयतः—

**प्रसीदतु भटिट्नी के आवां भर्तुः प्रणयपरिग्रहस्ये'** ति।

(३.१९.२० माल.)

अत्र प्रणयपरिग्रहपदे काटयवेमभूपो मौनी टानी च 'अफेक्शन' इति भावबन्धपरत्वप्रत्यायकः। सीतारामतुर्वेदाश्च भावमात्रानुवादिनः प्रणयपदार्थं न स्पृशन्ति। वयं तु प्रसङ्गानुसारं प्रार्थनापरमेव प्रणयपदं प्रतिपद्यामहे। मालविकाबकुलावलिकाभ्यामत्रेत्थमिव वक्तुमिष्यते यद् भटिट्न्या प्रतीपमुच्यते भर्तुः अग्निमित्रस्यास्मासु दासजनेष्वभ्यर्थनेति, दासा एव हि भर्तृषु प्रार्थनारूपं प्रणयं कर्तुमुचिताः न तु दासेषु भर्तार इति। अत एवानौचित्यभिया ते ततो झटित्यपसृते।

अयं हि प्रणयः प्रार्थनारूपः। अस्य भङ्गः प्रियजनेषु महानपराधः। पुरूरवास्ततो विमुखोस्ति। गन्धमादने सहसा प्रणष्टां प्रियामुद्दिश्य स कथयति—

१७. **त्वयि निबद्धरतेः प्रियवादिनः प्रणयभङ्गपराङ्मुखचेतसः ।**
**कमपराधलवं मम पश्यसि त्यजसि मानिनि! दासजनं यतः ॥**

४.५५॥

अत्र 'उर्वशीप्सितं मया कदापि नाखण्डि, त्यजति च सा मा'—मिति विभावनाविधया नायकेन स्थितिवैषम्यमुन्मील्यते। अत्र प्रार्थनायाः कश्चन प्रस्तावो नास्तीति प्रणयशब्दादभिलाषोपि प्रतिपाद्यतया ग्रहीतुं शक्यते, तथापि प्रार्थनार्थोऽत्र न खण्ड्यते। प्रकटितो ह्यभिलाषः पूर्तिमर्हति, नाप्रकटितः। प्रकटिताच तस्मात् प्रार्थनैव याचनारूपा। पर्यायोक्तभङ्ग्या न स प्रतिफलति। कुट्टनीमतेऽपि समीपमुपेतं सुन्दरसेनं स्पृहयन्त्यपि हारलता स्वाभिप्रायं कण्ठपथं न निनीषति। तत्र प्रणयभङ्गभीतिरेव तन्त्रम्। तथा चोच्यते—

**पार्श्वगतेऽपि प्रेयसि कामशरासारताड्यमानापि ।**
**न शशाक साभिधातुं चित्तगतं प्रणयभङ्गतो भीता ॥**

२७४—आर्या

तत्र हि प्रणयभङ्गो नियमतः प्रार्थनाभङ्ग एव। इयं हि शिष्टानां प्रकृतिरेव। कालिदासस्य हिमाचलोऽपि अयाचितारं भगवन्तं सुतां न ग्राहयति। तत्र हेतुः अयमेवैकः प्रार्थनाभङ्गः। यथोच्यते—

**अयाचितारं नहि देवदेवमद्रिः सुतां ग्राहयितुं शशाक ।**
**अभ्यर्थनाभङ्गभयेन साधुर्माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे ।।**

१.५२—कुमार०

इति। श्रीहर्षेणाप्ययमर्थो नितान्तं रूक्षतया नैषधीयचरिते एवमिव प्रस्तूयते—

**स्मरोपतप्तोऽपि भृशं न स प्रभुर्विदर्भराजं तनयामयाचत ।**
**त्यजन्त्यसून् शर्म च मानिनो वरं त्यजन्ति न त्वेकमयाचितव्रतम् ।।**

१.६०।।

१८. कुमारसंभवे भगवान् शिवो भगवत्याः पार्वत्या मेखलायां हस्तं व्यापारयति। सोऽयं हस्तः कविना प्रणयलोल इत्युच्यते—

**सस्वजे स्तनमुरोनिपीडिता प्रार्थितं मुखमनेन नाहरत् ।**
**मेखलाप्रणयलोलतां गतं हस्तमस्य शिथिलं रुरोध सा ।।**

८.१४

अत्र मल्लिनाथः प्रणयपदं परिचयार्थकं मनुते, एतल्लेखारम्भोद्धृतेन च यादवप्रकाशवचनेनासावर्थममुं प्रमाणयत्यपि। सीतारामकविश्चात्र पदस्यास्य स्नेहपरत्वं मनुते। वयं तु याचनारूपप्रार्थनार्थकत्वमेवास्य पदस्य प्रतीमः। शिवो हि मेखलादित्सया हस्तं प्रवर्त्तयति। स च मेखलामुपसर्पति। सोऽयमस्य लोलीभावः। एतेनात्र मेखलाऽऽदानेच्छया प्रवृत्तिः, तादृशेच्छैव वात्र प्रणयपदार्थः। स च स्पष्टमेव याचनारूपः प्रार्थनारूपो वा। पूर्वार्धे चुम्बनप्रार्थनायाः प्रार्थनापदेनैव 'प्रार्थितम्' इति प्रतिपादितत्वात् कथितपदत्वपरिहारायोत्तरार्धे कविः प्रार्थनार्थकमेव पदान्तरं प्रणयरूपं प्रयुङ्क्ते। परिचये स्नेहे वा लोलता न समुचिता। अस्ति चात्र परिचयः पौनरुक्त्यावहः। तस्य

**ज्ञातमन्मथरसा शनैः शनैः सा मुमोच रतिदुःखशीलताम्—**

इत्येवम् अव्यवहितपूर्वेणैव पद्येन प्रतिपादितत्वात्। नास्ति चात्रास्य भूयोऽपि प्रतिपादने कश्चनार्थः। किं च वस्त्रापहारः, नीवीस्रंसनम्, मेखलावित्रोटनं चेति सर्वमेव सुरतप्रयोगस्य पूर्वरङ्गः। सुरतार्थी च मेखलायाः परिचयमात्रं वाकाङ्क्षति प्रार्थनां वा काञ्चिदभ्यन्तरीकृत्य तथाविधव्यतिकरे व्यापिपर्त्तीति सुमानुषैः स्वयमुन्नेतुं शक्यते। न च 'हस्तस्य मेखलायां प्रणयः प्रार्थनारूपोऽपि प्रीतिप्रकरणे विचार्यः, हस्तमेखलयोरचेतनतया वस्तुरूपत्वात् तन्निष्ठस्य प्रेम्णः प्रीत्येकरूपत्वात्। तत् कथमत्र रतेः प्रकरणे तद्विचार' इति चेत्, सत्यम्, हस्तमेखलयोः स्त्रीपुंलिङ्गतया समासोक्तिविधया नायकत्वप्रतीतेः हस्तस्यावयत्वात् तदवयविना शिवेन सह तस्य शास्त्रसिद्धादभेदाद् वा रतित्वापत्तेरेतादृशप्रणयस्यात्रापि विचारे नास्ति क्षतिः।

१९. रघुवंशे मृगयाविहारिणो दशरथस्य संमुखे मृगयूथमाविर्भवति। कविस्तदेवं वर्णयति—

**तस्य स्तनप्रणयिभिर्मुहुरेणशावै—**
**र्व्याहन्यमानहरिणीगमनं पुरस्तात् ।**
**आविर्बभूव कुशगर्भमुखं मृगाणां**
**यूथं तदग्रसरगर्वितकृष्णशारम् ।।** ९.५५।।

अत्र मृगयूथस्य सर्वथा स्थिरत्वाभाव आविर्भावक्रियापदार्थेनागूर्यते। तेनात्र शावानां स्तनप्रणयित्वं स्तनार्थित्वाभिन्नमेव तिष्ठति। किञ्चिच्चलन्तीनां मृगीणां स्तनेषु शावमुखव्यापृतिरेवात्र प्रणयपदाद् गम्यते।

२०. रघोः कुले प्राणानपि प्रार्थिनामर्थिता न व्याहन्यते यथोच्यते—

**अप्यसुप्रणयिनां रघोः कुले न व्यहन्यत कदाचिदर्थिता।** ११.२

अत्र 'अर्थिता न व्यहन्यते'—इति वचनात् प्रणयित्वं याचकत्वमेव। अस्ति चात्र कौशिको मुनिवृषा रामार्थं दशरथं प्रति याचिता। यदुक्तम्—

**कौशिकेन स किल क्षितीश्वरो राममध्वरविघातशान्तये ।**
**काकपक्षधरमेत्य याचितस्तेजसां हि न वयः समीक्ष्यते ।।** ११.१

२१. सर्वदमने स्वपुत्रत्वमविद्वान् दुष्यन्तः पुत्रिणां धन्यतामेवमुदीरयति—

**अङ्काश्रय—प्रणयिनस्तनयान् वहन्तो**
**धन्यास्तदङ्गरजसा मलिनीभवन्ति** ।। शाकु. ७.१७

अत्र प्रायेण सर्वेऽपि पुत्रिणो बालानामङ्काश्रयार्थितामनुभवन्तीति लोकप्रमाणसिद्धमेवात्र प्रणयिपदस्यार्थिपरत्वं याचनारूपप्रार्थनापरत्वं च तद्विशेषणस्य प्रणयपदार्थस्य।

२२. मालविकाग्निमित्रे नायकः प्रतिनायिकाभूतामिरावतीं प्रसीदतु भवती'—त्येवमर्थयते। सा चाकृत्वैव प्रसादं परावर्त्तते। तत्र नायकेनोच्यते—

**सुन्दरि! न शोभते प्रणयिजने निरपेक्षता**—३.२०.१५ इति।

अत्र प्रार्थनार्थस्य प्रसङ्गसिद्धत्वात् प्रणयस्य तत्परत्वमेव प्रतिपद्यामहे।

२३. विक्रमोर्वशीये पुरूरवा हंसं प्रति कथयति—

**पश्चात् सरः प्रतिगमिष्यसि मानसं त्वं**
**पाथेयमुत्सृज बिसं ग्रहणाय भूयः ।**
**मां तावदुद्धर शुचो दयितप्रवृत्त्या**
**स्वार्थात् सतां गुरुतरा प्रणयिक्रियैव** ।। ४.३१ ।।

अत्र प्रार्थनार्थस्य पूर्ववर्तिनि चरणत्रये उपनिबद्धत्वात् प्रणयिपदं प्रार्थितात्पर्यकमेव मन्तुमुचितम्।

२४. पुरूरवा लतायां परिष्वङ्गप्रणयी ४.६७ त्युच्यते। अत्रालिङ्गनस्य प्रार्थनैवालिङ्गनस्य प्रणयः। आलिङ्गन—प्रसङ्गेषु सर्वत्रैव कालिदाससाहित्ये प्रार्थनाया एवालिङ्गनविषयिण्याः प्रतिपादित्वात्।

२५. कुमारसंभवे पार्वती भगवते शङ्कराय पुष्करबीजमालामुपच्छन्दयति। शिवस्तां प्रतिग्रहीतुमुपक्रमते। तदेव द्वारीकृत्य कुसुमायुधः शरं संधत्ते। यदुच्यते—

**प्रतिग्रहीतुं प्रणयिप्रियत्वात् त्रिलोचनस्तामुपचक्रमे च ।**
**संमोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त बाणम् ।।**

३.६६

अत्र प्रणयिप्रियत्वं प्रार्थिप्रियत्वमेव। तस्यैव हि पुष्करबीजमालाप्रतिग्रह–प्रार्थनोपस्थापकादानुपदिकात्–

**अथोपनिन्ये गिरिशाय गौरी तपस्विने ताम्ररुचा करेण ।**
**विशोषितां भानुमतो मयूखैर्मन्दाकिनीपुष्करबीजमालाम् ।।**

३.६५

इत्यस्मात् पद्यात् समर्थितत्वात्। न चात्रोपायनमात्रं कृतपदम्, न त्वर्थित्वम्, उपायनस्य समर्पणरूपत्वात् इति वाच्यम्, संप्रदानकारक–पदार्थ–भूतेन जनेन ग्रहीतुमस्वीकारे क्रियमाणे संप्रदातुरुपायनस्यार्थिताया लोकप्रमाण–सिद्धत्वात्। अस्ति चात्र पार्वती शिवार्थिनी। ततोऽस्या उपचारस्यापि तदन्तःपातित्वमेव परम्परया सिद्ध्यति, न ताटस्थ्यम्। मल्लिनाथोपि प्रणयिप्रियपदम् अर्थिपरमेव प्रतिपादयति।

२६. कुमारस्यैवाष्टमे सर्गे पार्वती–वदन–रस–लम्पटः शिवो दर्शनार्थिनाम–दृश्यतां व्रजति–

**स प्रियामुखरसं दिवानिशं तर्षवृद्धिजननं सिषेविषुः ।**
**दर्शन–प्रणयिनामदृश्यतामाजगाम विजयानिवेदनात् ।।** ८.९०।।

अत्र सीतारामकविः प्रणयस्याभिलाषरूपत्वं मनुते, मल्लिनाथस्तु पर्यायं न ददाति। तत्र विजयानिवेदनपदार्थेन दर्शनार्थिनां शिवसमीपगमनस्य सिद्धेः प्रार्थनार्थः परित्यक्तुं न शक्यते। दर्शनार्थी हि पार्श्वमुपैति न केवलं दर्शनाभिलाषी। अर्थिता ह्यभिलाषपूर्विकेत्यन्यदेतत्।

२७. विक्रमोर्वशीये पुरूरवसः प्रधानमहिष्योच्यते–

**एषाहं देवतामिथुनं रोहिणीमृगलाञ्छनं साक्षीकृत्य आर्यपुत्रम् अनुप्रसादयामि अद्यप्रभृति यां स्त्रियमार्यपुत्रः प्रार्थयते, या चार्यपुत्रस्य समागमप्रणयिनी, तया मया प्रीतिबन्धेन वर्त्तितव्यम्** इति।'

३.१५

अत्र प्रार्थना—प्रणयशब्दाभ्यामेक एव प्रार्थनारूपोऽर्थः प्रतिपिपादयिषितः। अभिलाषमात्रवतीभिः सह देवीकलहस्यायोगात् कलहनिवारणार्थमेवोक्तस्यास्य शपथवाक्यार्थस्य प्रणयिनी—पदार्थे समागमयाचनार्थत्वं विनानुपपत्तेः।

२८. आषाढस्य मेघं प्रथमदिवसे सानुपरिरम्भसंरम्भिणं वीक्ष्य प्रियाविप्रयुक्तो यक्ष आहितौत्सुक्यकौतुको जायते। तत्र हेतूपन्यासं रचयता सुकविनोच्यते—

**मेघालोके भवति सुखिनोप्यन्यथावृत्ति चेतः**
**कण्ठाश्लेषणप्रयिनि जने किं पुनर्दूरसंस्थे** ।। ३ मेघे

अत्र मल्लिनाथः प्रणयिपदार्थं प्रार्थिपरमेव मनुते। सर्वदा प्रियां कण्ठाश्लेषं प्रार्थयमानस्यैव हि विरहकालिकेन मेघालोकाद्युद्दीपनव्यूहेनोन्मत्ततायाः संभवाद्, यक्षस्य चोन्मत्ततायाः प्रसङ्गोपात्तत्वाद् युक्तं च तत्।

२९. मेघदूत एव वक्तव्यमुपसंहरन् यक्षो ब्रवीति—

**कच्चित् सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे**
**प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि ।**
**निश्शब्दोपि प्रदिशसि जलं याचितश्चातकेभ्यः**
**प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ।।**

अत्रार्थान्तरन्यास—वाक्ये प्रणयिपदं प्रार्थनावदर्थकमेव, पूर्वचरणत्रये प्रार्थनाया एव स्पष्टमुपनिबद्धत्वात्। बन्धुकृत्यं हि प्रियान्तिके संदेशहरणमेव। तद्व्यवसायश्च तद्विषयकप्रार्थनास्वीकारः। जलप्रदानेन चातक—याचना—पूरणस्य च तृतीयचरणात् स्फुट एवावगमः। इत्थं याचनायाः प्रास्ताविकत्वेन

प्रणयित्वं प्रीतिपूर्णप्रार्थनाकृत्त्वमेवावसीयेत। अस्ति च यक्षो याचकः, 'गुह्यकस्तं ययाचे, याच्ञा मोघा' इत्यादिभिर्वचनैः काव्यारम्भ एव तादृशार्थस्योपनिबद्धत्वात्।

३०. मेघदूतस्य पूर्वोद्धृतस्य 'आशाबन्धः कुसुमसदृशमि'—ति पद्यस्य द्वितीये चरणे 'सद्यःपातप्रणयी'—ति यो पाठस्तत्र 'प्रणयः प्रार्थना—बन्ध एव। या हि कामिनी प्रियेण वियुक्ता भवति सा वेदनामसहमाना सद्यस्तरामेव शरीरत्यागं प्रार्थयते। 'सद्यःपाति प्रणयी—'ति च मल्लिनाथधृतः पाठः। नास्ति तस्यात्र पाठे दृष्टिः।

त इमे प्रणयशब्दस्य कालिदाससाहित्ये लब्धाः प्रार्थनारूप—याचनार्थकाः प्रयोगाः। त्रिंशता एतैः संकलनेन पूर्ववर्त्तिनः सप्तविंशतिर्भेदाः सप्तपञ्चाशद् भवन्ति।

### ४. परिचयार्थकः प्रयोगः

निम्नोद्धृते पद्ये प्रणयशब्दस्य परिचयार्थकत्वमपि दृश्यते—

**वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां**
**सौधोत्सङ्ग—प्रणय—विमुखो मास्म भूरुज्जयिन्याः ॥**

२७ मेघदूते।

अत्र मल्लिनाथः प्रणयशब्दस्य परिचयपरत्वमेव मन्यते। यादवप्रकाशस्य च पूर्वोद्धृतं वचनमत्र प्रमाणत्वेनोद्धरति। भरतमल्लिको यद्यप्यनुरागार्थकत्वमस्य प्रतिपद्यते तथापि पथो वक्रत्वप्रतिपादनेन,

**विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां**
**लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोसि'**—इत्येवमुत्तरार्धवाक्यार्थेन च वञ्चनारूप—लाभाभावस्य मेघे प्रत्यायनात् मेघस्य तत्पूर्वगमनकत्वं, तेन चापरिचितत्वं, ततश्च पूर्वाननुरागत्वमुज्जयिन्यां व्यज्यते। अपरिचितस्य च परिचयलाभो विधातुमुचितो, न त्वनुरागलाभः। अतोऽत्र प्रणयशब्दस्य परिचयमेव प्रतिपिपादयिषितं मन्यामहे। सोऽयमष्टपञ्चाशः प्रणयपदप्रयोगः। इमे हि सर्वेऽपि प्रयोगाः कालिदाससाहित्ये मूलगतत्वेन लभ्यन्ते तेषु तेषु

प्रचलितेषु, अस्माभिश्च 'कालिदासशब्दानुक्रम'–कोषे मूलत्वेनाश्रितेषु संस्करणेषु।

साम्प्रतं पाठान्तरगतेभ्योपि प्रणयशब्देभ्यो यस्य प्रयोगो महत्त्वपूर्ण–स्तमप्येकं शब्दमिह संक्षिप्य मीमांसामहे। तथा हि–

**धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः**
**संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।**
**इत्यौत्सुक्यादपरिगणयन् गुह्यकस्त ययाचे**
**कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु** ।। ५ मेघे।।

अस्मिन् मेघदूतस्य प्रसिद्धतमे पद्ये 'प्रकृति–कृपण' शब्दस्य स्थाने 'प्रणय–कृपण–'शब्दः पाठान्तरतया लभ्यते। यथा चैतत् तत् साहित्याकादमीतः डॉ० सुशीलकुमारडेमहोदयैः समीक्ष्य संपाद्य प्रकाशिते मेघदूतसंस्करणे प्रदर्शितैरुपर्युद्धृतपद्यपाठान्तरैः स्पष्टम्। वयं तु प्रणयशब्दस्योद्धृतपूर्वेषु २९–स्थलेषु याचनार्थकत्वमनुभूय 'प्रणय–' शब्दस्यैवात्र मूलत्वं प्रतिपद्यामहे। 'धूमज्योति'– रित्यादिना चरणत्रयेण, 'जातं वंशे'–इत्यादिनः समनन्तरस्य पद्यस्य–

**तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं**
**याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा–**

इत्यनेनापरार्धेन, एतत्समनन्तरस्य च–

**संतप्तानां त्वमसि शरणं तत् पयोद प्रियायाः**
**संदेशं मे हर धनपतिक्रोधविश्लेषितस्य** ।।

इत्यस्य पद्यस्य पूर्वार्द्धेन याचनार्थस्यैव कवेः केन्द्रभूतभावत्वमनुशील्य को नु सहृदयः प्रणयकृपणत्वं विहाय संदर्भासंवादिनः 'प्रकृतिकृपणत्वस्य' मूलत्वमभिमन्येत। अर्थान्तरयोजनापि पक्षमिमं सबलयति। अर्थान्तरन्यासे हि पूर्ववाक्यार्थ उत्तरवाक्यार्थेन समर्थ्यते। क्रियते च तत्र सामान्यविशेषात्मना

समर्थ्यसमर्थकयोरुपनिबन्धः। अस्ति चायमभियुक्तसंमतः पन्था यदत्र समर्थ्यत्वं प्रधानस्यैव रोचतेतरां, नाप्रधानस्य। भवति च प्रधानत्वं 'धूमे'तिपद्यार्थे 'ययाच'—इति क्रियापदप्रतिपादितस्यैवार्थस्य। ततश्चतुर्थचरणगतेन अर्थान्तरेण याचनार्थसमर्थनानुरूपपदार्थयोजनाकेनैव नियमेन भवितव्यम्। भवति च तत् 'प्रणय'—घटितत्वे सर्वतोभावेन तथाविधम्।

ननु प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधवादिनां मते तृतीयचरणगत—गुह्यक—पदवाच्यस्य यक्षस्य वात्र प्रधानत्वम्, तत्रापि च विशेषणीभूतस्य 'इति—'शब्देन व्यवच्छिन्नं पूर्वार्द्धप्रतिपादितमर्थं विषयीकृत्योपनिबध्यमानस्य परिगणनाभावस्य 'अपरिगणयन्—' इत्यनेन पदेन प्रतिपादितचरस्य। तादृशः परिगणनाभावश्च कामार्त्तस्य 'प्रकृति'— मेवाश्रयति, न 'प्रणय'— रूपं याचनम्। ततः 'प्रणय'— पाठपक्ष एव सदोषः' इति चेत्, मैवम्, कामार्तप्रकृतेः कृतेऽर्थान्तरन्यासप्रयासस्यानावश्यकत्वात्। कथमिति चेत् 'औत्सुक्य'—पदार्थद्वारैव तस्याः समर्थितत्वात्। न हि समर्थितपूर्वमपि पदार्थजातं भूयोप्यर्थान्तरन्यासद्वारा युगयुगायमानक्षणलेशो यक्षः समर्थयितुं क्रमेत, क्रमेत च तं तथाप्रवृत्तमनुमोदितुं कालिदाससदृशो वश्यवाक् सुकविः।

ननु चेतनाचेतनप्रकृतिरत्र प्रकृतिपदेनाभिप्रेयते, न यक्षप्रकृतिः, चेतनाचेतनेषु प्रकृतिकृपणा' इत्येवमुक्तौ सप्तम्यन्तपदार्थस्यासङ्गत्यापत्तिः। सा चेयं प्रकृतिरचेतनेषु यादृशी, सा अचेतनया प्रकृते मेघे 'धूम—ज्योतिःसलिलमरुतां सन्निपातः' इत्येवं प्रतिपादिता, चेतनेषु च यादृशी, सा चेतनतया प्रकृते संदेशहारके जने 'पटुकरणप्राणित्वेन'। तदयमर्थोत्र कवेरभिप्रेतो यत् कामार्तो जनः चेतनस्य प्रकृतिं न वेत्ति नापि चाचेतनस्येति। नास्ति चेयं वस्तुप्रकृतिरौत्सुक्यार्थस्य समर्थनीयेति नास्ति दोष इति चेत् साधो! अथापि नास्ति दोषमोक्षः। कथमिति चेत् 'प्रकृति'—पदार्थस्य वैयर्थ्यापत्तेः 'कामार्ता हि चेतनाचेतनेषु कृपणा' इत्यस्मादेव वाक्यार्थाद् विवक्षितार्थलाभात्। किं च **इत्यौत्सुक्यान्न परिगणयामास यक्षो वराकः**

**कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।**—इत्येवंविधयापि

पद्ययोजनया भवदभिमतसमर्थ्यसमर्थकभावलाभादापतित एव 'याचनार्थस्य' अजागलस्तनत्वप्रसङ्गः। 'प्रणयकृपण'—शब्दस्य मूलत्वे तु नास्ति नामैष उपप्लवप्रसङ्गः। अस्ति चायमेव पाठः प्राचीनानां मूलत्वेनाभिमतः। तथाहि वल्लभदेवः, स्थिरदेवः, दक्षिणावर्तनाथः, पूर्णसरस्वती, परमेश्वरश्चेति पञ्च टीकाकाराः 'प्रणय'—पदमेव मूलमभिमन्यन्ते। मेघदूतस्य सिंहलद्वीपीये आङ्ग्लैः पैराफ्रैजनाम्ना व्यपदिश्यमाने पदकृत्येऽपि प्रणयपदमेव मूलत्वेनाभिमतं लभ्यते। तदित्थं वल्लभदेवस्य कश्मीरतो दक्षिणवर्तनाथस्य दक्षिणं यावत्, ततोपि च परं सुदूरं दक्षिणोदधिपारस्थितां श्रीलङ्कां यावत् प्रसिद्धैः, प्रणयपदघटितस्यैव पाठस्य मूलत्वं तर्कशुद्धिं भजते। प्रकृतिपदस्योपयोगे तु कारणं 'जातं वंशे भुवनविदिते'—इत्यस्मिन् समनन्तरीये पद्ये सचिवार्थकस्य प्रकृतिपदस्य प्रयोगः स्यात्। लिपिकेन तत्संस्कारादेव अस्मिन्नपि पद्ये प्रणयस्थाने प्रकृतिपदस्य प्रयोगः कृतः स्यात्। अन्यच्च कारणं प्रणयपदार्थस्य ज्ञानाभावः संभाव्यते। कविना हि कथितपदत्वदोषव्यावृत्तये तृतीयचरणसमागतस्य याचनापदार्थस्यैव चतुर्थचरणे पदभेदेनोपनिबन्धं चिकीर्षता प्रणयशब्दः प्रयोजि। अथ चात्र कवेरभिप्रायो यत् यो हि कामार्त्तो भवति स चेतनमिवाचेतनमपि याचितुं यतते। भाव एष मेघदूत इव विक्रमोर्वशीयेऽपि प्रपञ्चितो दृश्यते। विक्रमोर्वशीयस्य समग्र एव चतुर्थोऽङ्को भावस्यास्य चित्रणाय फलकभूत इव। तत्र पुरूरवा भ्रमरः, हंसः, कोकिला, नदी चेति सर्वानपि चेतनाचेतनान् भावान् प्रियाप्रवृत्तिं याचते। यथा चैतत् तत् पूर्वमुपस्थापितेन संदर्भेण न न स्पष्टम्। यथा च पुरूरवा लतायां परिष्वङ्गप्रणयी जायते, तथैव रघुवंशे भगवान् रामोऽपि तटाशोकलतां प्रियाबुद्ध्या परिरिप्सते—

**इमां तटाशोकलतां च तन्वीं स्तनाभिरामस्तबकाभिनम्राम् ।**
**त्वत्प्राप्तिबुद्ध्या परिरब्धुकामः सौमित्रिणा सास्रमहं निषिद्धः ।।**

१३.३२ रघुवंशे।

तदत्र याचनार्थकः प्रणयशब्द एव प्रकृतिशब्दस्य स्थाने मूलत्वेनाभिषेच्यः सिद्ध्यति।

भवभूतेः 'प्रेमार्द्राः प्रणयस्पृशः' (मालतीमाधवे—५.७) इत्यत्र पद्ये प्रेमप्रणययोर्भेदविवक्षां त्रिपुरारिरेवं विश्लेषयति—

**परस्पराश्रयधनं निरूढं भावबन्धनम् ।**
**यदेकायत्ततोपाधि तत् प्रेमेति निगद्यते ॥**
**उपचारैर्मिथो यूनोर्यद् बाह्याऽभ्यन्तराभिधैः ।**
**प्रेम नीतं प्रकर्षं चेत् स एष प्रणयः स्मृतः ॥**

कालिदासप्रयोगाणामनुशीलनेन वयमेतदनुभवामो यत् प्रणयपदेन कालिदासोऽपि प्रकर्षमधिरूढं प्रेमैव प्रायेणाभिप्रैति। सोऽयमर्थः 'देव्या दत्तो महाराजः, अतोऽस्य प्रणयवती शरीरं संङ्गतास्मी'—ति विक्रमोर्वशीयस्य विचारितपूर्वेण संदर्भेणाधिकं स्पष्टतामञ्चति। प्रकर्षाधिरूढौ च रत्यादिभिः सह सञ्चारिणां चित्तासङ्गादिषु कामदशास्वागमापायिनां संयोगोऽपि परामर्शनीयः। तत् सर्वमपि स्वातन्त्र्येणैवानुसन्धातुं शक्यते।

सर्वथा कालिदासः प्रणयपदं प्रीतिरतियाचनापरिचयान्यतमार्थकत्वेन प्रयुङ्क्ते। तत्र प्रेमतत्त्वमेवास्य मुख्यो विषयः।।[१]

◈

---

१. निबन्धोऽयमुज्जयिन्यां कालिदासजयन्ती—विद्वद्गोष्ठ्यां (१९६६) पठितः।
मुद्रित एष 'The Vikrama-9, 1980. सागरिकायां च।

## (५) प्रथम—शब्दाः[१]

कालिदासेन स्वसाहित्ये प्रायेण ५७वारं प्रथमशब्दः प्रयुक्तः[२]। तत्र 'मेघदूतेऽभिव्यक्तिदोषा'[३] इत्यमुना निबन्धेनास्माभिः 'तस्मिन्नद्रौ'—इति पद्यस्य 'प्रथम'—पदे निहतार्थकत्वमुदभावि तस्य प्रधानत्वपरतया विवक्षितत्वात्। कालिदासो हि निम्नोद्धृतेष्वपि स्थलेषु 'प्रथम'—पदं प्रधानत्वपरतयैव नयति—

१. एकैव मूर्त्तिर्बिभिदे त्रिधा सा सामान्यमेषां प्रथमावरत्वम् ।
विष्णोर्हरस्तस्य हरिः कदाचिद् वेधास्तयोस्तावपि धातुराद्यौ[४]।।

२. प्रथमोपकृतं मरुत्वतः प्रतिपत्त्या लघु मन्यते भवान् ।
गणयत्यवदानतोषितो भवतः सोऽपि न सत्क्रियागुणान्[५]।।

३. दिष्टान्तमाप्स्यति भवानपि पुत्रशोका—
दन्त्ये वयस्यहमिवेति तमुक्तवन्तम् ।
आक्रान्तपूर्वमिव मुक्तविषं भुजङ्गं
प्रोवाच कोसलपतिः प्रथमापराद्धः ।। (रघु. ९.७९)

४. राम इत्यभिरामेण वपुषा चापि चोदितः ।
नामधेयं गुरुश्चक्रे जगत्प्रथममङ्गलम् ।। (रघु. १०.६७)

५. तमभ्यगच्छत् प्रथमो विधाता श्रीवत्सलक्ष्मा पुरुषश्च साक्षात् ।
जयेति वाचा महिमानमस्य संवर्धयन्त्या हविषेव वह्निम्[६] ।।

---

१. अस्याः १—७ लेखेभ्यो द्र. शेषाशब्दाय रघुवंशदर्पणभूमिका, अन्येभ्यः शब्देभ्यश्च सागरिकायाः ४.२, ५.१, ५.३, ५.४, ६.३, ९.१ अङ्काः।

२. अत्रैव निबन्धान्ते टि. २। ३. सागरिकाया १०.४ अङ्के।

४. कु. ७.४४। ५. शाकुन्तले ७.१। ६. कु. ७.४३।

६. **आत्मनो वधमाहर्त्ता क्वासौ विहगतस्करः ।**
**येन तत्प्रथमं चौर्यं गोप्तुरेव गृहे कृतम् ।।** (विक्रमो० ५.१)

७. **मखांशभाजां प्रथमो मनीषिभि—**
**स्त्वमेव देवेन्द्र! निगद्यसे यदा ।**
**अजस्रदीक्षाप्रयतस्य मद्गुरोः**
**क्रियाविघाताय कथं प्रवर्त्तसे ।।** (रघु. ३.४४)

८-१०. 'प्रथमः कल्पः'—([1]माल० २६७, शाकु. ५०५, ५४४)

एषु स्थलेषु प्रथमेऽवरत्वसाचिव्यादर्थान्तरमनुत्थानपराहतमेव ऋते प्राधान्यात् प्रमुखत्वश्रेष्ठत्वाद्यपरपर्यायात्। यच्चात्र चतुर्थे चरणे आद्यपदं तत्समभि—व्याहारादपि नास्त्यत्र पर्याकुलत्वम्, आद्यशब्दस्यापि 'आदौ भव' इत्यस्मिन्नर्थे दिगादित्वात् (४.३.५४) यति निष्पन्नस्य प्रमुखत्वं विना प्रथमत्वाभावात् प्राधान्यस्यैव मूलभूतप्रवृत्तिनिमित्तत्वात्। **'अमंस्त कण्ठापिंतबाहुपाशां विदर्भराजावरजां वरेण्यः'** (रघु. ६.८४) इत्यत्र **'यौ तयोरवरजौ वरौजसौ तौ कुशध्वजसुते सुमध्यमे'** (रघु. ११.५४) इत्यत्र चावरशब्दस्य पश्चात्तनत्वपरत्वेन प्रसिद्धावपि त्रिमूर्त्या अस्या अजन्मत्वेन प्रसिद्धायाः पूर्वपश्चाद्भावनियामकत्वे प्राधान्यमेव प्रमाणम्। अतश्चाद्यपदस्याप्यत्र नास्ति क्षेमः प्राधान्यं प्रवृत्तिनिमित्तमविधाय।

द्वितीये लघुशब्दसान्निध्यादलघुत्वमेव प्रथमपदेनोपकृतौ विवक्षितम्। 'दुष्यन्तेन वासवस्य प्रथम उपकारः कृतः, वासवेन पुनर्दुष्यन्ते तादृशी प्रतिपत्तिर्दर्शिता ययाऽसौ प्रथममप्युपकारं लघु मेने। प्रतिपत्तिश्च सा 'अर्धासनोपवेशनम्, जयन्तलक्षणस्वपुत्रप्रेप्सित—मन्दार—माला—रूप—शेषाप्रदानञ्चे'ति सुरेन्द्रस्य संभावनद्वयेन स्फुटमाहात्म्या। एवमत्रालघुनो—

---

१. पृष्ठसंख्येयमस्मत्कालिदासग्रन्थावलीगता।

ऽप्युपकारस्य लघूकरणमेव मरुत्वत्प्रतिपत्तावातिशय्यमादधातीति प्रथमशब्दस्य महत्त्वपरत्वमेव स्थितम्।

तृतीये शूद्रमुनेः पुत्रं शब्दपातिना बाणेन हतवतो दशरथस्या—पराधे यत् प्रथमत्वं तत्रापि महत्त्वपरतैव स्वारसिकी। न हि निरपराध—नरवधादतिरिक्तो मनुष्यसमाजे कश्चनापि गरिष्ठोऽपराधः। अतएव दशरथ आत्मानं 'वध्य' इति प्रतिशृणोति—**'इत्थङ्गते गतघृणः किमयं विधत्तां वध्यस्तवेत्यभिहितो वसुधाधिपेन, एधान् हुताशनवतः स मुनिर्ययाचे'** (रघु. ९.८१)—इति समनन्तरपद्येन। एवं च प्रथमशब्दस्य गरिष्ठत्वपरत्वे प्रकरणलभ्यतामीक्षमाणास्तूष्णीं स्थितयोर्हेमाद्रौ, नन्दर्गीकरे च तथा न क्षुभ्यामो यथा 'मुनिशाप औचित्यं दिदर्शयिषौ ततश्चादौ दशरथेनैवापराधः कृत इति नास्ति शापं दत्तवतोऽपि मुनेर्दोष' इति विवक्षौ सञ्जीविनीकथाप्रसङ्गे मल्लिनाथे।

चतुर्थे श्लोके मङ्गलान्तराणामपि सत्त्वात् तदपेक्षया रामनाम्नो वैलक्षण्यस्य प्रतिपत्तये प्रथमशब्दस्य प्राधान्यैकनिष्ठत्वमेव चमत्कृतिभूमिः। एवं च युक्तवागेव शब्दकल्पद्रुमकार इममेवार्थं प्रमाणयितुं पद्यमिदमुद्धरन्। 'पश्चाद् रावणवधादिरूपाणि मङ्गलान्तराण्यपि भविष्यन्तीति प्रथमोक्तिरि'—ति प्रथमशब्दस्यात्रादिपरत्वमुपयन्तो मल्लिनाथः, हेमाद्रिः, चारित्रवर्धनः, नन्दर्गीकरश्चेति सर्वेऽप्यहृदयङ्गमनीयवचनाः।

पञ्चमे विधातरि यत् प्राथम्यं तत्र 'विधाता वेधसामपी' (कुमार २.१४)—ति

**अमंस्त चानेन परार्ध्यजन्मना**
**स्थितेरभेत्ता स्थितिमन्तमन्वयम् ।**
**स्वमूर्त्तिभेदेन[१] गुणाग्र्यवर्त्तिना**
**पतिः प्रजानामिव सर्गमात्मनः ।।** (रघु. ३.२७)

---

१. विष्णुनेति मल्लिनाथो हेमाद्रिश्च। विष्णुश्च न प्रजापतिः। ये च ते ते कु. ६.९ पद्यतः स्फुटाः।

इति,

**सर्गशेषप्रणयनाद् विश्वयोनेरनन्तरम् ।**
**पुरातनाः पुराविद्धिर्धातार इति कीर्त्तिताः ।।** (कुमार ६.९)

इति च दक्षादिभ्यः सप्तर्षिभ्यश्च पितामहतया ख्यातस्य भगवतो ब्रह्मणः प्राधान्यमेव द्योतयति, आदित्वस्यात्र नान्तरीयकत्वात्।

षष्ठे विहगतस्करस्य चौर्यगतं यत् प्राथम्यं तत्राप्रतिमत्वम् अतश्चातीव गुरुत्वमेव विवक्षाविषयः। यथैतत् तद् 'गोप्तुरेव गृहे' इति 'सावधारण–गोप्तृसम्बन्धपरिवर्धितातिशय्यगृहाधिकरणकत्वेन, आत्मवधरूपणेन च स्पष्टम्। आहृतवस्तुमाहात्म्यमप्यत्र साधकम्। तथा च येन राजर्षिरुर्वश्या योजितस्तस्य प्राणाधिकमहिम्नो गौरीचरणरागसंभवस्य सङ्गमनीयाख्यस्य मणिरत्नस्य हरणं यत्सत्यम् असदृशमेव। एवं चात्र स्फुटमेव प्रथमपदं गुरुत्वपरम्।

सप्तमे स्थले प्रथमपदं प्रमुखार्थपरमेव। श्राद्धादिषु प्रथमा आहुतिः प्रजापतये दीयते, पराश्च वासवादिभ्य इति आदित्वपरता प्रथमशब्दस्य कल्प–पराहतैव।

अवशिष्टेषु त्रिषु 'प्रथमः कल्प' इति वाग्योगेष्वपि प्रामुख्यमेव महत्त्वापरपर्यायमत्र विवक्षास्पदम्। 'अस्मिन्नवसरे किन्नु करणीयमि'ति प्रश्ने यदा केनचिद् उचितं प्रस्तूयते तदा प्रहृष्टेन प्रष्ट्रा वाक्यमिदमुच्यते।' अत्रात्युत्तमत्वमेव हृदयम्। भासोऽपि वाक्यमिदं पञ्चशः प्रयुयुजे 'वाढम्, प्रथमः कल्प' इति[१]। कालिदासे पाठान्तरमप्यस्य लभ्यते 'उदारः कल्प'[२] इति। ततोऽपि प्रथमशब्दस्यौदार्यपरत्वं स्पष्टभूयिष्ठमेव।

एवमेव मेघदूतस्य 'प्रथमविरहोदग्रशोकां सखी'मिति 'प्रथमविरहे'

---

१. स्वप्नवासवदत्ते ४.९, अविमारके २.८, प्रतिमानाटके ६.५, मध्यमव्यायोग १.५२, बालचरिते च ४.१३ पद्यसंवादेषु 'बाढम्। प्रथमः कल्प' इति प्रयोगः सुलभः।

२. कालिदासग्रन्थावल्याः– पृ० ५०५ पं० ९

(२.३१) इति प्रयोगयोः मालविकाग्निमित्रस्य च 'आर्द्रालक्तकमस्या०' (३.१३) इति पद्ये च ये प्रथमशब्दास्तेषामादित्वपरत्वेऽपि प्रधानत्वपरत्वं सुखेनैवोत्प्रेक्षितुं शक्यम्, प्रथमविरह एव वस्तुतः प्रधानं विरहः, प्रथमसंप्रयोग एव च प्रधानं संप्रयोग इति कृत्वा।

भारवेः

**प्रणतिप्रवणान् विहाय नः**
**सहजस्नेह—निबद्ध—चेतसः ।**
**प्रणमन्ति सदा सुयोधनं**
**प्रथमे मानभृतां न वृष्णयः ।।** (किराता० २.४४)

इति पद्ये मल्लिनाथोऽपि प्रथमशब्देऽग्रेसरत्वमेव पश्यति प्रमुखत्वापरपर्यायम्।

**'प्रथमे हि विद्वांसो वैयाकरणाः'**—[१] इत्यानन्दवर्धनोक्तावपि प्रधानत्वमेव प्रथमशब्दस्याभिप्रायभूमिः। कामं तत्राभिनवस्तूष्णीं स्थितस्तथापि विदग्धा अत्र तत्त्वदृश एव। अतएव कृष्णमूर्त्तिरत्र[२] Foremost इत्यनुवदति, दर्शयति च [३]विष्णुपदभट्टाचार्योऽत्र जयन्तभट्टस्य न्यायमञ्जरीप्रमाणप्रकरणान्ते निबद्धं व्याकरणबहुमानम्, भामहस्य च काव्यालङ्कारगते षष्ठपरिच्छेदारम्भे समुपनिबद्धं तमेव। जयन्तभट्टो हि न्यायमञ्जर्यां व्याकरणस्य निरर्थत्वं प्रत्याख्यायैकविंशत्या पृष्ठैः[४] सार्थकत्वं प्रतिपादयन्नन्ते 'कामं जायेय वैयाकरणभणितिभिस्तूर्णमापूर्णकर्ण' इति मनुष्यत्वं प्रतिपत्स्यमानस्य देवयोनिविशेषस्य मुखादुदीरयते। भामहोऽति षष्ठे परिच्छेदे—

**धीरैरालोकितप्रान्तममेधोभिरसूयितम् ।**
**सदोपभुक्तं सर्वाभिरन्यविद्याकरेणुभिः ।। २।।**

---

१-२. ध्वन्यालोक १.१३ वृत्यन्ते। एवमेव विश्वेश्वरोऽपि स्वहिन्दीभाष्ये 'सबसे प्रमुख' इत्यनुवदति।

३. K.L. Mukhopadhyaya-1956.

४. पृ० ३७२—३९२।

**नापारयित्वा दुर्गाधममुं व्याकरणार्णवम् ।**
**शब्दरत्नं स्वयं गम्यमलं कर्त्तुमयं जनः ।। ३।।**

**तस्य चाधिगमे यत्नः कार्यः काव्यं विधित्सुना ।। ४।।**

इति भूम्ना व्याकरणे बहुमानं दर्शयति।

प्रथमशब्दस्य व्युत्पत्त्यापि प्रधानत्वमेव प्राथम्यं भजते। 'प्रथेरमच्' (५.६८) इत्यनेनौणादिकेन सूत्रेणामचि प्रत्यये कृते विस्तरार्थकात् प्रथधातोः 'प्रथम'—शब्दस्य शरीरसिद्धिरिति भानुजिदीक्षितप्रभृतयः। विस्तरश्च नान्तरेण प्रसिद्धिम्, प्रसिद्धिश्च नान्तरा प्राधान्येन परिणमतीति गुणादिषु प्राधान्यमेव व्युत्पत्तिलभ्यः प्रथमशब्दार्थः।

भगवता वेदे पुनः प्रतमशब्दः प्राथम्याय प्ररूढः। तत्र प्रतमस्यादित्व—परकत्वं क्लिष्टम्। प्रतमस्यैव च रूपान्तरं प्रथममिति मानियरविलियम्स—महोदयप्रभृतयः। इदमप्यत्र ध्यातव्यं यत् प्राकृते प्रयुक्तः 'पडम'—शब्दः, 'प्रतम'—शब्दस्यैव रूपान्तरमस्ति। यथा—प्रतम>प्रथम>पढम>पडम—(द्र० पाइअसद्दमहण्णओ कोश)।

इत्थं 'प्रथम'—शब्दः प्राक् प्रधानार्थपरतया प्रवृत्तः, पश्चाच्चाद्यर्थे निरूढः, प्रधानस्यैव प्रथमगणनीयत्वात्। अत एव च 'प्रथमतरविटः' (चतुर्भाणी १३१.८ पादता०) इति 'प्रथमतरवैयाकरण' इत्यादयः प्रयोगाः। अत एव हेमचन्द्राचार्योऽनेकार्थसंग्रहे 'प्रथमः स्यात् प्रधानाद्यो'—रिति प्राधान्यमेव प्रथमं गणयति। इत्थङ्गते

'आषाढस्य प्रथमदिवसे' (मे. २) इत्यत्रापि प्रथमशब्दो दिवसगतं प्राधान्यमेव मुख्यतया प्रतिपादयितुं सुकविना तादृशीं तत्प्रसिद्धिमभिवीक्ष्य, उपजीव्य वाऽऽत्मनोऽभ्यासं प्रायोजि। तत्र मल्लिनाथादीनामिवास्माकमपि योऽन्यथाभावस्तत्र शब्दस्यास्यार्थगतो विपर्यास एव निदानम्, न तु कवेरविवेकः। सहकारवाचकम् आम्रवाचकं वा चूतशब्दं कालिंदासो रारटीतीव।

साम्प्रतमस्माभिर्हिन्दीभाषिभिर्मीमांसकानां 'चोदनालक्षणोऽर्थो धर्म' इति धर्मलक्षणमिव शब्द एष सहसोदीरयितुं न शक्यते 'रुचिङ्कुरु' इत्यत्रेवाश्लीलार्थप्रत्यायकत्वमनुभवद्भिः। अनारकलीप्रभृतिषु राघवप्रभृति-भिर्दाक्षिणात्त्यैः पुनः शब्द एष निर्विचिकित्सं प्रयुज्यते, तेषां देशभाषासु शब्दस्यास्य तथा प्रसिद्धेरभावात्। पेलवादिशब्देभ्योऽप्यालङ्कारिका जुगुप्सन्ते। नात्र कालिदासस्य देवानां प्रियता। एष हीतिहासपूरुषस्य परीवर्त्तः। अत्र वैदिकेष्विव शब्देष्वाधुनिकैरिव कालिदाससाहित्यपिपठिषुभिरे-वावहितैर्भवितव्यम्। एवं च प्रथमशब्दादत्राषाढमासस्य प्रमुख एव दिवसो ग्राह्यः, न तु प्रतिपदादिरूप आरम्भिकः। विनिगमकं चात्र 'शेषान् मासान् गमय चतुरो लोचने मीलयित्वा'–इति कविना कण्ठरवेणैवोदीरितस्य मासचतुष्टयावधेरविपर्ययः। आषाढे हि प्रधानं दिनं हरिशयनपर्वयुतं दिनम्। तच्चैकादशं द्वादशं पूर्णिमासंज्ञकं पञ्चदशं वा भवेदिति भिन्ना कथा। हरिशयनपर्वणि च मेघदर्शनं हरिशयनानुष्ठानस्याङ्गमिति विक्रमे[1] 'मेघदूत में शापावधि और चातुर्मास्य' इति नाम्ना [2]सागरिकायां च 'मेघदूते तिथिनिश्चय' इति नाम्ना प्रकाशिताभ्यामस्माकं निबन्धाभ्यां प्रमाणितचरमेव–

**निद्रां भवान् भजतां लोकनाथ**
**वर्षास्विमं पश्यतु मेघवृन्दम् ॥**

इत्यनेन [3]वराहपुराणवचनेन। प्रबोधपर्वण्यपि मेघा न न स्मर्यन्ते तथा हि शब्दकल्पद्रुमे प्रबोधपर्वप्रतिपादनावसरे वचनम्–

**मेघा गता निर्मलपूर्णचन्द्रः**
**शारद्यपुष्पाण्यपि लोकनाथ ।**
**अहं ददानीति च पुण्यहेतो–**
**र्जागृष्व जागृष्व च लोकनाथ ॥** इति

---

१. ई० १९६७–कालिदासविशेषाङ्के।
२. ६.२ अङ्के। ३. कालिकातासंस्करणे।

अत्र लोकनाथपदस्यावृत्तिरपि हरिशयनमन्त्रैकवाक्यतां साधयन्ती भूम्नोपकरोति भावकानाम्।

एवम् 'आषाढस्य प्रथमदिवस' इत्यत्र प्रथमशब्दस्य प्राधान्यपरक–त्वमेव कालिदाससमये प्ररूढं पश्यद्भिराद्यार्थैकतानगतिभिराधुनिकै–र्निहतार्थत्वमनुभूयापि कविशिल्पे सौस्थ्यमेवानुशीलनीयम्[१]।

---

१. प्रथमशब्दस्य कालिदाससाहित्ये प्रयोगाः

प्रथम कु. २.२७, ४.३९, ५–प्र–२४, ३०, ४१,–प्र–६६–प्र–६.३५, ७–२४, ४३, प्र–४४, ८४,

र. ३–४, प्र–२५, ४४, ६८, ४.२४, २८, प्र–७.७१, ८.२८, ५८, ९–३४, प्र–५३, ६१, प्र–७९, १०–प्र–३८, ७६, प्र–११.२२, १२.३९, १३.६,–प्र–१५.३३, प्र–१८.५३, प्र–१९.५६,

मेघ. १–प्र–२, प्र–१७,–प्र–२१, २–प्र–१८, प्र–३१, प्र–५०,

शाकु २.१६, ४–१, ११, १४, ५–प्र–१९, ३१, ३२, ६–२, ३ X ३, ५, ७, १०, प्र–१०, ७–१०, १५, १६, १७, २१ X ४,

माल १–प्र–३, ४ X १०, १३ X २, २–१, ११, ३.११, ५–१, ५, १० X २, १२, १४,

विक्रमो १.२१, २.६, ३–१ X ७, १७, ४.६८, ५–१, प्र० १६, २१।

प्रथमकथित मेघ ७९
प्रथमगृहीत माल. १.२
प्रथमज रघु. १२.१६
प्रथमजन्मचेष्टित रघु. ११.२२
प्रथमतरः माल. ३.१३
प्रथमदर्शनवृत्तान्त शाकु. ६.१०
प्रथम–दिवसे मेघे २
प्रथमपरिगतार्थ रघु. ७.७१
प्रथमपरिगृहीत रघु. १८.५३
शाकु. ५.१९
प्रथममङ्गल रघु. १०.६७
प्रथम–मध्यमं० रघु. १०.३८
प्रथमविरह मेघे २.३१, ५०
प्रथमविरहोदग्रशोका मेघ. १११
प्रथमसुकृतापेक्षा मेघ. १७
प्रथमापराद्ध (ध) रघु. ९.७९
प्रथमाप्तजन्मन् कुमारे ५.१४
प्रथमाभ्तिप्त० रघु. १९.५६
प्रथमाभ्रवृष्टि विक्रमो. ५.१६
प्रथमावरत्व कुमार. ७.४४
प्रथमाश्रम कुमार. ५.३०
प्रथमास्थित रघु. ९.५३
प्रथमोदबिन्दु कुमार. ५.२४
प्रथमोदित रघु. ३.२५
प्रथमोद्दिष्ट कुमार ६.३५

शिष्टमग्रिमे पृष्ठे

'शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणा'—विति मेघदूतवचनादेव कार्त्तिकमासस्य शुक्लपक्षीया प्रबोधनी एव शापान्तक्षणः। तं यावत् या मासानां चतुष्टयी साऽप्यनूनानतिरिक्तत्वेन 'प्रथम'—शब्दस्य प्रमुखत्वार्थकत्व एव संजाघटीति। मासारम्भस्येव मासान्तस्यापि कृष्णशुक्लपक्षाश्रित—त्वमुभयत्रापि समानत्वेनैव ग्राह्यमिति नास्ति ततोऽपि गणनायां विसंवादापत्तिः।

'यदि मेघः कौतुकाधानहेतुस्तर्हि दयिताविप्रयुक्तेन यक्षेणानेन कथं न्वेष दृष्टिविषयीकृत' इति वितर्कमपि शमयत्येष पक्षः, देवोत्थानक्षणे मेघदर्शनस्यावश्यविधेयत्वात्। अवश्यमेव प्रबोधक्षणे मेघो द्रष्टव्य इति वराको यक्षोऽपि तं दृष्टवानेव पतितश्चोत्कण्ठावात्यायाम्। एवं 'प्रथम'—पदस्याऽत्र हरिशयनपर्वतिथिपरत्वमेवोपपत्तिशुद्धं सिद्ध्यति।

'प्रथम'—पदस्य स्थाने 'प्रमुख'—पदं प्रायोज्यत चेन्न ह्येवोदस्थास्यदयं भ्रमविवर्त्तः। 'प्रथम'—शब्दस्य प्रमुखार्थकत्वप्रसिद्धिस्तु तथोदलापयत वश्य—वाचं कवीन्द्रमिमममिति सर्वं शिवम्[१]॥

◈

सूच्यमः

यत्रैकस्मिन् सर्गे भागेऽङ्के वा एक एव प्रयोगस्तत्र मध्ये ऊर्ध्वरेखा, यत्र पुनरनेके तत्र '५—प्र—२४, ३०' इत्येवं सर्गाङ्कतः परं तिर्यग्रेखा। शब्दस्य समासगतत्वेऽपि प्रथममक्षरं तिरश्चीनया तिरश्चीनाभ्यां वा रेखाभ्यामङ्कितम्। तत्रापि रेखायाः प्राक् प्रयोगः शब्दस्य समासघटकेषु शब्देष्वन्त्यत्वम्, पश्चात् प्रयोगः पूर्व्यत्वम् उभयतः प्रयोगः पुनर्मध्यगत— त्वमुन्मीलयति॥

१. निबन्ध एषोऽखिलभारतीय—कालिदास—समारोह—शोधपरिषदि उज्जयिन्यां ३.११.७६ तिथौ पठितो विचारितश्च विद्वद्भिः।

## ( ६ ) देववृक्षाः

महाकवेः कालिदासस्य साहित्ये देववृक्षा देवा इवैव भूम्ना समादृताः। तदत्र तानेवाश्रित्य कालिदासभारतीमनुशीलयामहे। तत्र–

**पञ्चैते देवतरवो मन्दारः पारिजातकः।**
**सन्तानः कल्पवृक्षश्च पुंसि वा हरिचदनम् ॥**

इत्येवममरकोषे देववृक्षाणां पञ्च नामानि प्रस्तूयन्ते। कालिदास एतानि सर्वाण्यपि नामानि बहुशः प्रयुङ्क्ते। एतानीह सूचीकटाहन्यायेनैकैकश उपाददमहि। तत्र–

### १. हरिचन्दनम्

वृक्षस्यास्योल्लेखो देववृक्षरूपेण त्रिः पार्थिववृक्षरूपेण चैकवारं कालिदासे लभ्यते। तथाहि–

१. पर्वतराजपुत्र्या भगवत्याः पार्वत्या हरिचन्दनास्पदे स्तनद्वये कपालिना सह पाणिग्रहणाच् चिताभस्मरजः पदं करिष्यतीति ब्रह्मचारिवचसा कविर्ब्रूते–

**अयुक्तरूपं किमतः परं वद त्रिनेत्रवक्षः सुलभं तवापि यत्।**
**स्तनद्वयेऽस्मिन् हरिचन्दनास्पदे पदं चिताभस्मरजः करिष्यति ॥**

कुमारे ५.६९

२. रघुवंशे महेन्द्रस्य प्रकोष्ठं

३. शाकुन्तले च वक्षःस्थलं हरिचन्दनाङ्कितमेवं वर्ण्यते–

**ततः प्रकोष्ठे हरिचन्दनाङ्किते प्रमथ्यमानार्णवधीरनादिनीम् ।**
**रघुः शशाङ्कार्धमुखेन पत्रिणा शरासनज्यामलुनाद् विडौजसः ।।**

रघु. ३.५९

**अन्तर्गतप्रार्थनमन्तिकस्थं जयन्तमुद्वीक्ष्य कृतस्मितेन ।**
**आमृष्टवक्षोहरिचन्दनाङ्का मन्दारमाला हरिणा पिनद्धा ।।**

शाकु. ७.२

एतेषु स्थलेषु हरिचन्दनकाष्ठस्य घर्षणेन निष्पन्नाय तत्तदङ्गानुलेपनौपयिकाय रसाय हरिचन्दनपदं प्रायोजि। अत्र च प्रमाणं शाकुन्तलपद्ये प्रयुक्तमामृष्टेति पदम्। आमर्षणमिदं नान्यत् अपितु तदेव यद् विलेपनपदेनोच्यते। विलेपनस्यास्य वर्णः पीतारुणः संभाव्यते, शुक्लत्वे गौरवर्णयोर्महेन्द्र–पार्वत्योः शोभासंपोषेऽनतिप्रयोजनकत्वात्, कल्पान्तरस्य चासंभवात्। अस्ति चात्रैतत् प्रमाणं यत् स्वयं कालिदास एव स्वयंवरप्रस्तावागतं पाण्ड्यनृपं रघुवंशस्य–

**पाण्ड्योऽयमंसार्पितलम्बहारः क्लृप्ताङ्गरागो हरिचन्दनेन ।**
**आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः ।।**

रघु. ६.६०

इत्यनेन पद्यरत्नेन हरिचन्दनेन रचिताङ्गरागं ब्रवीति। अत्र रागपदं वर्णद्रव्यमात्रपरं रक्तपीतारुणान्यतमवर्णविशेषद्रव्यपरं वेति जिज्ञासायां बालातपौपम्यं साहाय्यं वितरति। अत्र पर्वतविशेषोपमानिकायाः पाण्ड्यराजोपमेयिकाया वाक्यार्थीभूतालङ्कारात्मिकाया उपमाया अन्यथानुपपत्त्या बिम्ब–प्रतिबिम्ब–भूतयोर्हरिचन्दनाङ्गराग–बालातप–पदार्थयोर्यदैकात्म्यं सिसाधयिषितं तत्साधकस्य सादृश्यस्याप्यन्यथासंभवाभावाद् बिम्ब–प्रति–बिम्बीभूतपदार्थ–निष्ठतयारुणवर्णत्वरूपं साधर्म्यमवशमाक्षिप्यते। अयमत्रापरः प्रश्नो यद् यदिदमरुणत्वं तद्धि हरिचन्दने कीदृग्विधम्, सहजमेव, आहार्यं वा। अत्र समाधानं कालिदासप्रयोगान्नोपलभ्यते। शब्दकल्पद्रुमादिषु पुनरस्यो–भयविधत्वमपि दृश्यते। वयमत्रैवं चिन्तयामो यदरुणत्वमिदं देववृक्षत्वपक्षे

सहजं पार्थिववृक्षत्वपक्षे चोभयविधमपि मन्तुं शक्यते। पार्थिवेषु हि वृक्षेषु रक्तचन्दनं लभ्यत एव, पीतत्वे च केशरादिद्रव्ययोगोपि तद्रसेषु क्रियतेतमाम्।

तदित्थं हरिचन्दनपदं कालिदासेन चतुर्वारं प्रयुज्यते। तेषु देववृक्षत्वं प्रयोगत्रयमात्रं यावदेव सीमितम्। पाण्ड्यनृपप्रसङ्गागते पुनरत्र पार्थिवत्वमेव केवलम्, न देवत्वम्।

## २. सन्तानः

अमरकोशकृता प्रयुक्तस्य सन्तानपदस्यार्थे कालिदासः संतानकपदं प्रयुङ्क्ते। तदपि च केवलं वारत्रयमेव। तथाहि—

४. (१) भगवतो रामस्य मानुषशरीरपरिग्रहावसरे सन्मङ्गलोपचाराणामादिरचना संतानक—वृष्ट्यैव संपद्यते—

**सन्तानकमयी वृष्टिर्भवने तस्य पेतुषी ।**
**सन्मङ्गलोपचाराणां सैवादिरचनाभवत् ।।** १०.७७ रघु.।।

५. (२) भगवत्याः पार्वत्या विवाहमाङ्गल्याय तत्पितुर्नगरमोषधिप्रस्थं सन्तान—काकीर्णमहापथं जायते—

**सन्तानकाकीर्ण—महापथं तच्चीनांशुकैः कल्पितकेतुमालम् ।**
**भासोज्ज्वलत्काञ्चनतोरणानां स्थानान्तरस्वर्ग इवाबभासे ।।**

कुमार ७.३

६. (३) एतदेवौषधिप्रस्थं तेन गन्धमादननाम्नोद्यानेन गन्धवदस्ति यत्र विद्याधराध्वगाः सन्तानक—तरुच्छायासु मार्गखेदं विनुदन्ति—

**सन्तानक—तरु—च्छाया—सुप्त—विद्याधराध्वगम् ।**
**यस्य चोपवनं बाह्यं गन्धवद् गन्धमादनम् ।।**

कुमार ६.४६

एतस्मिन् प्रयोगत्रये विशेषद्वयमेव सन्तानगतं सिद्ध्यति १—सुगन्धिपुष्पम् २—छाया चेति।

## ३. मन्दारः

मन्दारपदं कालिदासेन देववृक्षायैव दशवारं प्रयुज्यते। एतेषु वारमेकमस्य सामान्यतयैव प्रयोगो लभ्यते, अन्यत्र च पुष्पं छाया चेति वैशिष्ट्यप्रतिपादनपरतया। तथाहि–

१. शाकुन्तले मारीचाश्रमे रूढा मन्दारा महेन्द्रजनन्या अदित्यैव स्वहस्तेन परिवर्धिताः सन्ति–

**अदितिपरिवर्धित–मन्दारवृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः ।**

शाकु० ७.१२–गद्यम्

२. अलकायाः कन्यका मन्दाकिन्यास्तटे रूढानां मन्दाराणां छायया वारितोष्णा भवन्ति–

**मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भि–**
**र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः ।**
**अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः**
**संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ।।**

मेघ. २.६

३. न केवलं मन्दाकिन्या अपि तु व्योमगङ्गाया अपि तटे मन्दारा निरूढाः। तेषां निर्भरं पतन्ति पुष्पाणि गङ्गाया अस्याः प्रवाहं वीचिषु शृङ्गारयन्ति। कविस्तत्र सप्तर्षीन् स्नपयति–

**आप्लुतास्तीरमन्दार–कुसुमोत्करवीचिषु ।**
**व्योमगङ्गाप्रवाहेषु दिङ्नागमदनन्धिषु ।।** कुमार ६.५।।

४. अलकायामभिसारिकाणां नैशो मार्गः सवितुरुदयकाले गत्युत्कम्पादल–कपतितैर्मन्दारैरेव सूच्यते–

**गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः**
**पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च ।**
**मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारै–**
**र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ।।**

मेघ. ७०

५. विक्रमोर्वशीये विरहविह्वलः पुरूरवाः सङ्गमनीय–मणिमनादित्सन् वक्ति–

**मन्दारपुष्पैरधिवासितायां यस्याः शिखायामयमर्पणीयः ।**
**सैव प्रिया संप्रति दुर्लभा मे किमेनमस्रोपहतं करोमि ।।**

विक्रमो. ४.३५ इति

६. स्वयंवरागतं मगधराजमुद्दिश्य सुनन्दा ब्रवीति–

**क्रियाप्रबन्धादयमध्वराणा–मजस्रमाहूतसहस्रनेत्रः ।**
**शच्याश्चिरं पाण्डुकपोललम्बान् मन्दारशून्यानलकाँश्चकार ।।**

रघु. ६.२३ इति

७. मन्दारस्योपरिवर्णितानि मुक्तानि पुष्पाणि स्तबकरूपाण्यपि भवन्ति। मेघदूते यक्षगेहोपान्ते यक्षपत्न्या यो मन्दारो वर्धितः स हस्त–प्राप्य–स्तबक–नमितो वर्ण्यते–

**तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं**
**दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।**
**यस्योपान्ते कृतक–तनयः कान्तया वर्धितो मे**
**हस्तप्राप्यस्तबकनमितो बालमन्दारवृक्षः ।।**

मेघ. ७३

८. मन्दारपुष्पाणां माला अपि निर्मीयन्ते। शाकुन्तले हरिचन्दनप्रस्तावे अन्तर्गतप्रार्थनमिति यत् ७.२ पद्यमुद्धृतं, तत्र देवराजस्य वक्षो मन्दारमालया शोभितं व्यज्यते ।

९. विक्रमोर्वशीये तन्नायिकाया उर्वश्या अपि हृदयं मन्दारकुसुमदाम्ना भूषितं वर्ण्यते—

**मन्दार–कुसम–दाम्ना गुरुरस्याः सूच्यते हृदयकम्पः ।**
**मुहुरुच्छ्वसंता हृदये परिणाहवतोः पयोधरयोः ।।**

विक्रमो. १.७

१०. मन्दारपुष्पाणां रजांस्यरुणवर्णानि भवन्ति। देवराजः शिवस्य पादौ मन्दाररजोभिररुणयति—

**असंपदस्तस्य वृषेण गच्छतः प्रभिन्नदिग्वारणवाहनो वृषा ।**
**करोति पादावुपगम्य मौलिना विनिद्रमन्दाररजोऽरुगाङ्गुली ।।**

कुमारे ५.८०

तदेवं मन्दारपदं कालिदासो दशवारं प्रायुङ्क्त। यद्यपि साहित्याकादमीतः प्रकाशिते कुमारसंभवसंस्करणे ३.२१—पद्यानन्तरं—

**ततः स्फुरत्केसर–लग्न–भृङ्गं सौरभ्यसंक्रान्त–दिगन्तरालम् ।**
**ददौ हरिः सादरमीक्षमाणो मन्दारमालां मकरध्वजाय ।।**

इतिपाठान्तरपद्ये मन्दारस्य पुष्पाणां मालाया वर्णनं लभ्यते तथापि पद्यस्यास्य मूलत्वाभावादत्र संग्रहो न क्रियते।

## ४. पारिजातः

१. **पुष्पम्**। पुरूरवसो विरहिता नारायणोरुसंभवा दिव्यस्त्रीललामभूता उर्वशी पारिजातपुष्पशयनेपि सुखं न विन्दति। वेदनामिमामियमेवं पत्रार्पितां करोति—

**सामिअ संभाविआ जह अहं तुए अमुणिआ**
**तह अणुरत्तस्य जइ णाम तुज्झ उवरि होमि ।**
**किं मे लुलिअ–पारिजाअ–सअणिज्जअंमि सुहा**
**णंदणवादा अवि अच्चुण्णहा सरीरए ॥**

विक्रमो. २.१२

स्वामिन् संभाविता यथाहं त्वयाऽज्ञात्री
तथानुरक्तस्य यदि नाम तवोपरि भवामि ।
किं मे लुलितपारिजात–शयनीये
सुखाः नन्दनवनवाता अपि अत्युष्णाः शरीरके ॥

२. भगवान् शङ्करः पुलोमतनयालकोचितैः पारिजातकुसुमैर्नवपरिणीताया भगवत्याः पार्वत्या अलकान् प्रसाधयति–

**तां पुलोमतनयालकोचितैः पारिजातकुसुमैः प्रसाधयन् ।**
**नन्दने चिरमयुग्मलोचनः सस्पृहं सुरवधूभिरीक्षितः ॥**

कुमारे ८.२७

३. रघुवंशे कुशवधूः कुमुद्वती शचीसखीत्वमासाद्य पारिजातांशभागिनी भवति–

**तयोर्दिवस्पतेरासीदेकः सिंहासनार्धभाक् ।**
**अपरापि सखी शच्याः पारिजातांशभागिनी** ॥ १७.७ रघु.॥

४. वेदिका, भूषा, अलंकरणं, सातिशयं तेजः, समुद्रसंभवः।

स्वयंवरार्थमागता नृपाः स्वयंवरसभायां महार्हनेपथ्यमण्डिता मञ्चमधितिष्ठन्ति। ते सर्वे कल्पवृक्षा इव राजन्ते। रघुसूनुरजः पुनः सातिशयेन तेजसा तेषां मध्ये पारिजात इव लक्ष्यते–

**तेषां महार्हासनसंस्थितानामुदारनेपथ्यभृतां स मध्ये ।**
**रराज धाम्ना रघुसूनुरेव कल्पद्रुमाणामिव पारिजातः ॥**

रघु. ६.६

अत्रासनपदेन मञ्च एव विवक्षित:—

**स तत्र मञ्चेषु मनोज्ञवेषान् सिंहासनस्थानुपचारवत्सु ।**
**वैमानिकानां मरुतामपश्यदाकृष्टलीलान् नरलोकपालान् ।।**

रघु. ६.१

एतेन पूर्वपद्येन सिंहासनानां मञ्चस्थितत्वस्य वर्णितत्वात्। एतेनोपमानपक्षेपि तादृशं वेदिकाकल्पं चत्वरमाक्षिप्यते। भूषालङ्करणयोरपि नेपथ्यप्रतिबिम्बतया—ऽत्रावश्यक एवाक्षेप:। यच्चात्र सातिशयं तेज: तत्र कारणं दिव्यान्याभरणानि समुद्रसंभवत्वं च। एतच्चोभयं कविरनेकधा वर्णयति। तथाहि—

५. क्षीरसागरे भोगिभोगासनासीनं भगवन्तं विष्णुं देवव्यूह: पश्यति। दिव्याभरणभूषितोऽयं क्षीरसागरे सर्वथा पारिजात इवैव लक्ष्यते—

**बाहुभिर्विटपाकारैर्दिव्याभरणभूषितै: ।**
**आविर्भूतमपां मध्ये पारिजातमिवापरम् ।।** रघु. १०.११ ।।

अत्र दिव्याभरणानामुपमानभूते पारिजातेऽपि सत्त्वमौचित्यलभ्यम्। न हि तद् विना उपमेयभूते भगवति प्रतिपादितस्य दिव्याभरणत्वविशेषणस्य कथमप्यन्यथा पोष:। समुद्रसंभवत्वं पुनरविशदतरमेव। निम्नोद्धृते पद्ये पुनस्तदतीव स्पष्टम्—

**तस्मात् समुद्रादिव मथ्यमानादुद्वृत्तनक्रात् सहसोन्ममज्ज ।**
**लक्ष्म्येव सार्धं सुरराजवृक्ष: कन्यां पुरस्कृत्य भुजङ्गराज: ।।**

रघु. १६.७९

अत्र हि कुमुद्वतीमादाय सरयूप्रवाहादुद्भूतो नागराज: कुमुद: समुद्रसंभूतेन सुरराजवृक्षेणोपमीयते। सुरराजवृक्षपदेनात्र पारिजात एव लक्षितुं शक्यते, समुद्रनिष्पन्नेषु रत्नेषु वृक्षस्य सुरराजेनैव गृहीतचरत्वात्। आस्तां तावदेतत्, स्वयं पारिजातशब्द एव व्युत्पत्तावपि समुद्रसंभूतत्वमेव निमित्तीकरोति। हेमाद्रिराधाकान्ताभ्यां 'पारिणि अब्धौ जात' इति तथैवास्य रघुवंशदर्पण—

शब्दकल्पद्रुमयोर्व्याकृतत्वात्। अस्ति च समुद्रसमुद्भूतस्य वृक्षरत्नस्य 'पारिजात'—पदव्यपदेश्यता पुराणेषु प्रतीता। यथा चैतत् तदग्रे प्रतिपादयिष्यते। एवं हि कालिदाससाहित्ये पारिजातशब्दपूर्वकं पञ्चवारम्, वारमेकं च सुरराजवृक्षपदेन पारिजातस्य वर्णनं लभ्यते।

## ५. कल्पः

कालिदासः पारिजातं कल्पद्रुमेभ्यः सातिशयं प्रतिपद्यमानोपि वर्णयति सातिशयं कल्पद्रुमानेव। स हि कल्पपदेन वृक्ष—तरु—द्रुम— लता—शब्दान् योजयन् विंशतिं वारान् कल्पपादपं वर्णयति। तत्र चास्य विशेषानपि सविशेषमसावुल्लिखति। यथा चैतत् तद् अधोदत्तेन विवरणेन स्पष्टम्। तथाहि—

१. **पुष्पम्**। रघुवंशे मातङ्गमहर्षिशापान्मतङ्गयोनिमापन्नो गन्धर्वपतेः पुत्रः प्रियंवदो लोह—मुखबाणवेधद्वारा तत उद्धृतवन्तं रघुकुमारमजं कल्पद्रुमोत्थैः पुष्पैरवकिरति—

**अथ प्रभावोपनतैः कुमारः कल्पद्रुमोत्थैरवकीर्य पुष्पैः ।**
**उवाच वाग्मी दशनप्रभाभिः संवर्धितोरस्स्थलतारहारः ।।**

रघु. ५.५२

२. **गन्धः**। कल्पद्रुमकुसुमेषु, तथा तीव्रो गन्धो भवति यथा हि मधुकरा उन्माद्यन्ते। विक्रमोर्वशीये कविः कथयति—

**गन्धुम्माइअ—महुअरगीएहिं**
**वज्जंतेहिं परहुअतूरेहिं ।**
**पसरिअ—पवणुव्वेल्लिअ—पल्लव—**
**णिअअरु सुललिअ—विविह—पआरे णच्चइ कप्पअरु ।।**

गन्धोन्मादितमधुकरगीतै—
वाद्यमानः परभृततूर्यैः ।
प्रसृतपवनोद्वेल्लितपल्लवनिकरः
सुललितविविधप्रकारेण नृत्यति कल्पतरुः ।।

३. **फलम्।** सुकृतिनो दशरथस्य काङ्क्षितं सद्य एव पच्यते, तेनेदं कल्पवृक्ष—फल—धर्मीत्युच्यते—

**अन्वियेष सदृशीं स च स्नुषां प्राप चैनमनुकूलवाग् द्विजः ।**
**सद्य एव सुकृतां हि पच्यते कल्पवृक्ष—फलधर्मि काङ्क्षितम् ।।**

रघु. ११.५०

४. **भूषा:**[१]। पारिजातप्रस्तावे २०.४—संदर्भीये रघुवंशस्य ६.६ पद्ये भूषिता राजानः कल्पवृक्षोपमा उच्यन्ते। ततोऽमीषामपि भूषितत्वमर्थत एवापद्यते। एवमेव तत्रैव

**वेदिका:**। राजानो मञ्चस्थिता उच्यन्ते। ततश्च कल्पवृक्षाणामपि तले वेदिकाचत्वरमुन्नेतुमापद्येत।[२]

**द्युति:**। अत एव च कल्पवृक्षाणामसामान्या द्युतिरपि प्रतिपत्तुं शक्यते।

५. **प्ररोह:**। कल्पवृक्षेषु नभःस्थिताभ्यः शाखाभ्यो न्यक् प्ररोहन्तो भाषायां वरोहपदवाच्याः प्ररोहा अपि भवन्ति। विक्रमोर्वशीये भगवन्तं नारदं वर्णयन् कविर्ब्रूते—

**गोरोचनानिकषपिङ्ग—जटाकलापः संलक्ष्यते शशिकलामलवीतसूत्रः ।**
**मुक्तागुणातिशयसंभृतमण्डनश्रीर्हेमप्ररोह इव जङ्गमकल्पवृक्षः ।।**

विक्रमो. ५.१९

**अंशुकम्**। कल्पवृक्षवर्णने कविना अंशुकमप्यनेकश उपादीयते। तच्च तत्साहित्ये द्विधा विभज्यते। १. शाखांशुकं २. ध्वजांशुकं चेति।

---

१. कल्पवृक्षस्य छायाफलादिमत्त्वं जिनसेनोऽप्यादिपुराण एवं वर्णयति—

कल्पद्रुमाः समुत्तुङ्गाः सच्छायाः फलशालिनः ।
नानास्रग्वस्त्रभूषाढ्या राजायन्ते स्म संपदा ।। पर्व—२२.२४५

२. राज्ञामेवंभूतायां स्थितौ कल्पतरूपमत्वं बाणोऽपि स्मरति यत्रासौ तारापीडं वर्णयन् कादम्बर्यां कथयति— 'येन चानेकरत्नांशुकपल्लविते व्यालम्बिमुक्ताफलजालके दिग्गजेनेव कल्पतरावाक्रान्ते सिंहासने नेमुः सर्वदिशः। पृ० ९४ कालेसंस्करणम्।

उभयविधमपीदं वर्णापेक्षया पुनरपि त्रिधा विभज्यते १. धवलवर्णं, २. सुवर्णवर्णं ३. एतद्द्वयभिन्नवर्णं चेति। यथा चैतत् तदधोदत्तेभ्यः कविवचोभ्यः एव स्पष्टम्। तथाहि–

६. रघुवंशे कुश–कुमुद्वती–तनयोऽतिथिः हंसचिह्नं दुकूलं परिधत्ते। हिरण्यादर्शप्रतिफलितः स तदानीं सूर्योदये सुमेरौ प्रतिफलितं कल्पतरुमनुहरति–

**आमुक्ताभरणः स्रग्वी हंसचिह्न–दुकूलवान् ।**
**आसीदतिशयप्रेक्ष्यः स राज्यश्रीवधूवरः ॥**
**नेपथ्यदर्शिनश्छाया तस्यादर्शे हिरण्मये ।**
**विरराजोदिते सूर्ये मेरौ कल्पतरोरिव ॥**

रघु. १७.२५, २६

७. शाकुन्तले दानवविजयिनो दुष्यन्तस्यावदानं देवाः सुरसुन्दरीणां विच्छित्ति–शेषैर्वर्णैः कल्पलतांशुकेषु गीतिक्षममर्थबन्धं विचिन्त्य लिखन्ति–

**विच्छित्तिशेषैः सुरसुन्दरीणां वर्णैरमी कल्पलतांशुकेषु ।**
**विचिन्त्य गीतिक्षममर्थबन्धं दिवौकसस्त्वच्चरितं लिखन्ति ॥**

शाकु. ७.५

अनयोः स्थलयोः पूर्वत्र दुकूलस्य स्कन्धप्रभृतिष्वेवाङ्गेषु परिधीयमानत्वात् कल्पतरावपि तत्रैव संभवः, अपरत्र च ध्वजपट्टस्य दण्डत आच्छेदोऽनुचित इति पारिशेष्याच्छाखांशुकत्वमेवावधारयितुं शक्यम्। वर्णः पुनरत्रोभयत्रापि धवल एव संभाव्यते, प्रथमे हंसचिह्नस्य धवल एव वस्त्रे शोभावहत्वात्, अपरत्र च विचित्रवर्णलेखसामग्र्या अधवले लेखाधारे निर्गुणत्वात् परभागलाभाय कल्पलतांशुके धवलत्वेमेवौचित्यलभ्यम्। अनयोः स्थलयोरनुवीक्षयेदमप्युन्नेतुं शक्यते यत् कालिदाससमये कल्पवृक्षशाखांशुकेषु हंसादिचिह्नान्यपि वैकल्पिकान्यभूवन्।

८. कुमारसंभवे सप्तर्षिमण्डलं हेमवल्कलं बिभर्त्ति, तेन च तत् कल्पवृक्ष–सादृश्यमासादयति–

**मुक्तायज्ञोपवीतानि बिभ्रतो हेमवल्कलाः ।**
**रत्नाक्षसूत्राः प्रव्रज्यां कल्पवृक्षा इव श्रिताः ।।** कुमार ६.६ ।।

अत्रोपमेयभूतसप्तर्षिगतत्वेन वर्ण्यमानस्य वाससो हेमवर्णत्वादुपमान–भूतकल्पवृक्षगतत्वेन व्यज्यमानेपि वाससि तद्वर्णत्वमेव बलादानीयते।

९. ओषधिप्रस्थनगरस्य गृहेषु कल्पद्रुमैरेव विलोलविटपांशुकैः सद्भिः पताकाश्रीर्निर्मीयते–

**यत्र कल्पद्रुमैरेव विलोलविटपांशुकैः ।**
**गृह–यन्त्र–पताकाश्रीरपौरादरनिर्मिता ।।** कुमार ६.४१ ।।

नगरमण्डने प्रयुज्यमानानां पताकानां वर्णः शुक्ल–पीतभिन्नोऽपि भवतीत्यत्र विटपांशुक–पद–वाच्यानां शाखांशुकानां विविध–वर्णत्वमायाति।

१०. ध्वजांशुकं वर्णयता कालिदासेनोच्यते–

**स पुरं पुरुहूतश्रीः कल्पद्रुमनिभ–ध्वजाम् ।**
**क्रममाणश्चकार द्यां नागेनैरावतौजसा ।।** रघु. १७.३२।।

अतिथिरयोध्यां द्यां करोति कल्पद्रुमध्वज–सदृश–ध्वज–मण्डितायां यत्र पुरुहूतश्रीरसौ ऐरावतौजसा गजेन क्रामति। ध्वजांशुकमत्र श्वेतपीतारुणान्यतमवर्णमेव संभाव्यते। किन्तु–

११. कुमारसंभवस्य निम्नलिखिते पद्ये तस्य श्वेतवर्णत्वमेव नियतम्–

**पश्य कल्पतरुलम्बि शुद्धया ज्योत्स्नया जनितरूपसंशयम् ।**
**मारुते चलति चण्डिके! बलाद् व्यज्यते विपरिवृत्तमंशुकम् ।।**
८.७१

पार्वतीं प्रति भगवता शिवेन क्रियमाणेऽस्मिन् चन्द्रिकावर्णने जनितरूपसंशय–त्वेनोल्लिख्यमानेंऽशुके शुद्धातिरिक्त: को नु वर्ण: संभाव्येत? लम्बि–पदेनात्रांशुके शाखांशुकत्वमप्युत्प्रेक्षितुं शक्यते यद्यपि पत्रावगुण्ठितानि शाखांशुकानि दूरतस्तथा द्रष्टुं न शक्येरन् यथा ध्वजांशुकानीति ध्वजांशुकत्व एव प्रबलत्वमानीयते। मेघदूतस्य निम्नोद्धृते पद्ये पुन: शाखांशुकत्वं ध्वजांशुकत्वं चेति द्वितमपि संभाव्यते–

१२. **हेमाम्भोजप्रसवि सलिलं मानसस्याददान:**
**कुर्वन् कामं क्षणमुखपटप्रीतिमैरावतस्य ।**
**धुन्वन् कल्पद्रुमकिसलयान्यंशुकानीव वातै–**
**र्नानाचेष्टैर्जलद! ललितैर्निर्विशेस्तं नगेन्द्रम्** ।। ६२।।

कालिदास: कल्पद्रुमेष्वाभरणानामपि सत्तां प्रतिपादयति। संरम्भं चात्रावलम्बते। तत्राभरणानां द्वैविध्यमुपलभ्यते हारत्वेन हारेतरत्वेन च। तत्र प्रथमत्रापि द्वैतमाश्रीयते रत्नहारत्वं मौक्तिकहारत्वं चेति। तत्र रत्नहाराणामस्तित्वं कुमारसंभवस्योपरि उद्धृतेन मुक्तेति ६.६ सप्तर्षिवर्णनपद्येन प्रतिपद्यते यत्र सप्तर्षयो 'रत्नाक्षसूत्रा' इति विशेष्यन्ते। तेन हि तदुपमानभूतेषु कल्पवृक्षेष्वपि तदस्तित्वं बलादुन्नीयते। मौक्तिकहाराणामुल्लेख: सुकविनानेनानेकधा कृत:। तथाहि–कुमारसंभवस्यानुपदमेव चर्चिते ६.६ पद्ये सप्तर्षयो मुक्तायज्ञोपवीता उच्यन्ते। ततस्तत्सादृश्यलाभाय कल्पवृक्षेष्वपि मुक्ताहारवत्वमुत्प्रेक्ष्यते। १७.६–संदर्भत्वेनानुपदोद्धृते रघुवंशस्य अतिथिवर्णनपरे १७.२५–२६–पद्यद्वये स्रग्वीति विशेषणेनोपमेये हारवत्त्वं प्रतिपादयतु: सादृश्यशिल्प–शिरोमणे: सुकवेरस्य उपमानेऽपि तत्सद्भावोऽभीष्ट एव।

हारपदं च निर्विशेषं प्रयुज्यमानं संस्कृतवाङ्मये मौक्तिकमात्रपरमेव प्रसिद्धम्। सप्तर्षिवद् देवर्षिर्नारदोपि शशिकलामलं वीतसूत्रं धारयन् मुक्तागुणाति–शयसंभृतमण्डनश्रिया कल्पवृक्षेनोपमीयमान: प्रागुपस्थापिते विक्रमोर्वशीयस्य

५.१९—पद्ये मुक्तागुणपदेन मौक्तिकं हारमेव कल्पवृक्षे प्रसाधयति। एवमेव—

१३. कुमारसंभवे चन्द्रः कल्पवृक्षशिखरेषु स्फुरद्भिः पादैः हारयष्टिमिव रिरचियषुरुत्प्रेक्ष्यते—

**कल्पवृक्ष—शिखरेषु संप्रति प्रस्फुरद्भिरिव पश्य सुन्दरि ?**
**हारयष्टिरचनामिवांशुभिः कर्त्तुमागतकुतूहलः शशी ।।**

८.६८

अत्रायं विशेषो यद् मुक्तागुण—हारयष्टि—शब्दाभ्यां हाराणां स भेदो ग्रहीतुं सुशको यः कालिदासादिभिः उपहारपदेनोच्यते।[१]

१४. हारेतराभरणास्तित्वं कुमारसंभवस्य तारकासुरं प्रति महेन्द्रचाटुवर्णनपरे—

**तत्कृतानुग्रहापेक्षी तं मुहुर्दूतहारितैः ।**
**अनुकूलयतीन्द्रोपि कल्पद्रुमविभूषणैः** ।। २.३९ ।।

इत्यस्मिन् पद्ये लभ्यते। अत्र विभूषणानि कल्पद्रुमजनितान्यपि संभवन्ति। वस्तुतः कल्पद्रुमदारिद्र्यमत्र विवक्षितमिति तद्विभूषाभरणानामेवात्र दूतहारितत्वमौचितीसुभगम्। १७.६ संदर्भत्वेनातिथिवर्णनस्योद्धृते पद्येप्युपमेयगताभरणप्रातिनिध्यायोपमानगततयाप्याभरणान्युत्प्रेक्ष्येरन्नेव। तत्र हारस्य पृथगुपादानादाभरणपदेन हारेतराभरणमात्रमेव गृह्येत।

**मधुकर—परभृत**योरपि कल्पवृक्षेषु स्थितिः २३.२—संदर्भत्वेनात्रोद्धृते विक्रमोर्वशीयस्य ४.२—पद्ये दृश्यते।

कल्प—पदवाच्योयं वृक्षः 'कल्पयति[२] संपादयति मनोरथान्'—इति

---

१. उपहारपदस्यार्थाय द्रष्टव्या नः 'कालिदासभारती' सागरिका, वर्ष ५ अङ्क १

२. कल्पपदनिरुक्ता ७००—शकीयो जिनसेनस्वामी तत्कृतावादिपुराणे वक्ति—

मनोभिरुचितान् भोगान् यस्मात् पुण्यकृतां नृणाम् ।
कल्पयन्ति ततस्तज्ज्ञैर्निरुक्ताः कल्पपादपाः ।। पर्व—३.३८।।

महिमाचार्योऽपि व्यक्तिविवेकेऽवाच्यवचनावसरे—''क्षुण्णं यदन्तःकरणेन वृक्षाः फलन्ति कल्पोपपदास्तदेवे'—त्युद्धरति।

यं मनोरथपूरणात्मानं विशेषम् ऐकान्तिकत्वेन क्रोडीकरोति सोऽपि कालिदासेनासकृदुदीर्यते। तथाहि—

१५. अलकायां सर्वमपि प्रमदाजनरुचितं मण्डनमेकः कल्पवृक्ष एवं निष्पादयति—

**वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं**
**पुष्पोभेदं सहकिसलयान् भूषणानां विकल्पान् ।**
**लाक्षारागं चरणकमलन्यासयोग्यं च यस्या—**
**मेकः सूते सकलमबलामण्डनं कल्पवृक्षः ।।** मेघ. ७२

१६. मारीचाश्रमतपस्विनः सत्कल्पवृक्षेऽपि वने वायुभक्षणेनैव प्राणवृत्तिं रक्षन्ति—

**प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने**
**तीर्थे काञ्चन—पद्म—रेणु—कपिशे पुण्याभिषेकक्रिया ।**
**ध्यानं रत्नशिलागृहेषु विवुधस्त्रीसन्निधौ संयमो**
**यद् वाञ्छन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ।।**

शाकु. ७.१२

नूनमत्र कल्प—पदेनेच्छापूरकत्वमेवाभिप्रेतम्, तेनैव विस्मय—व्यतिरेकयोः साधयितुं शक्यत्वात्।

१७. श्रीरामो भगवत्यै जनकनन्दिन्यै कल्पवृक्ष आसीद्, यतोहि स तस्याः सर्वानपि दोहदान् अचिरेणैव पूरयति स्म। यदासौ वनदिदृक्षां तद्व्याजेन सीतां तितिक्षुः सन् पूरयति तदा लक्ष्मणेन रथमारोप्य नीयमानासौ श्रीरामं कल्पद्रुमतां विहाय तां प्रत्यसिपत्रवृक्षतां गतं न वेद—

---

अत्रेदमपि ध्येयं यद् देवीभागवतस्य कल्पवाटिका—पदेन पञ्चस्वन्यतमस्य देववृक्षस्य 'कल्प'—इत्येव पूर्णं नाम। ततश्च व्यक्तिविवेककृद्दत्तो दोषोऽत्रापहस्तितो जायते। द्र० अस्मट्टीकोपेतो व्यक्तिविवेकः, पृ० ४४१

**सा नीयमाना रुचिरान् प्रदेशान् प्रियङ्करो मे प्रिय इत्यनन्दत् ।**
**नाबुद्ध कल्पद्रुमतां विहाय जातं तमात्मन्यसिपत्रवृक्षम् ।।**

रघु. १४.४८

१८. गन्धमादने पार्वत्या सह क्रियमाणविहारं भगवन्तं पशुपतिं गन्धमादन-वनाधिदेवता लोहितार्कमणिपात्रस्थितं कल्पवृक्षप्रसूतं मधु समर्पयति-

**लोहितार्कमणिभाजनार्पितं कल्पवृक्षमधु बिभ्रती स्वयम् ।**
**त्वामियं स्थितिमतीमुपस्थिता गन्धमादनवनाधिदेवता ।।**

कुमार ८.७५

१९. अलकायां यक्षाः पानोत्सवान् कल्पवृक्षमधुभिरेव निर्वर्तयन्ति-

**यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि**
**ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः ।**
**आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं**
**त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ।।**

मेघ. ६६

अनुपदमेवोपस्थापिते वासश्चित्रेति मेघपद्येपि कल्पवृक्षजनितस्य मधुनः स्मरणं कविना क्रियत एव। विक्रमोर्वशीयस्य यत् ५.१९-पद्यमिह २६.५-संदर्भत्वेनापास्थापि तत्रापि नारदः पुरूरवसो मनोरथसंपत्तिं श्रावयितुमेव पुरूरवसः पार्श्वमुपेतः। अत एव स कल्पवृक्षेणैवीपमीयते शिल्पपटिष्ठेन कविना ततस्तत्रापि कल्पवृक्षपदं मनोरथपूरणव्यञ्जकतयैवागतं दृश्यते। स्वयंवरे राज्ञां १७-सर्गे चातिथेर्यत् कल्पपादपेनौपम्यं दृश्यते तत्रापि व्यञ्जनेयं न न क्षमा।

२०. ईदृग्विधस्य कल्पवृक्षस्य छायायां कामधेनुर्विश्राम्यति-

**पुरा शक्रमुपस्थाय तवोर्व्वीं प्रति यास्यतः ।**
**आसीत् कल्पतरुच्छायामाश्रिता सुरभिः पथि ।।** रघु. १.७५।।

रघुवंशस्य यत् सुरराजवृक्ष—पद—घटितं १६.७९ 'तस्मादि'—ति पद्यमुद्धृतं यच्च ३.३—संदर्भे तस्यैव काव्यस्य ६.६० तमं हरिचन्दनघटितं पद्यमुद्धृतं तदुभयमादाय त्रयश्चत्वारिंशति कालिदासप्रयोगेषु देववृक्षाणाममीषां यत्र ये विशेषा उल्लिखितास्तत्र तेषामवगमस्तालिकयानया कर्तुं शक्यते—

| विशेषा: | देववृक्षनामानि | | | | |
|---|---|---|---|---|---|
| | १ | २ | ३ | ४ | ५ |
| | हरिचन्दनम् | सन्तान: | मन्दार: | पारिजात: | कल्प: |
| १. अङ्गरागौपयिकोरुणो रस: | ,,, | xxx | xxx | xxx | xxx |
| २. सुरभिपुष्पम्[१] | xxx | ,,, | ,,, | ,,, | ,,, |
| ३. फलम् | xxx | xxx | xxx | xxx | xxx |
| ४. छाया | xxx | ,,, | ,,, | xxx | ,,, |
| ५. अरुण: पराग: | xxx | xxx | ,,, | xxx | xxx |
| ६. शाखासु मुक्ताहार: | xxx | xxx | xxx | ,,, | ,,, |
| ७. शाखासु स्वर्णाभरणम् | xxx | xxx | xxx | xxx | ,,, |
| ८. शाखासु रत्नाभरणम् | xxx | xxx | xxx | xxx | ,,, |
| ९. शाखास्वाभरणमात्रम् | xxx | xxx | xxx | ,,, | ,,, |
| १०. प्ररोह: | xxx | xxx | xxx | xxx | ,,, |
| ११. शाखांशुकम् | xxx | xxx | xxx | xxx | ,,, |
| १२. ध्वजांशुकम् | xxx | xxx | xxx | xxx | ,,, |
| १३. भ्रमरा: | xxx | xxx | xxx | xxx | ,,, |
| १४. कोकिला: | xxx | xxx | xxx | xxx | ,,, |
| १५. कान्त्यतिशय: | xxx | xxx | xxx | ,,, | xxx |
| १६. कान्तिसामान्यम् | xxx | xxx | xxx | xxx | ,,, |

१. सुरपुष्पाणामुल्लेख: कालिदासेन वृक्षविशेषनामानुल्लेखेनापि क्रियते, यथा अपार्थिवपुष्पम् रघु. ८.३४, अमरस्रक् रघु. सुरपुष्पम् रघु. ८.८१।

| | १ | २ | ३ | ४ | ५ |
|---|---|---|---|---|---|
| | हरिचन्दनम् | सन्तानः | मन्दारः | पारिजातः | कल्पः |
| १७. इच्छापूरकत्वम् | xxx | xxx | xxx | xxx | ,,, |
| १८. समुद्रप्रभवत्वम् | xxx | xxx | xxx | ,,, | xxx |
| १९. वेदिका | xxx | xxx | xxx | ,,, | ,,, |

अत्रायं प्रश्न उत्तिष्ठति यद् हरिचन्दन[१]—मन्दार—पारिजात—कल्पवृक्षेषु क्रमेणैकैकवृत्तितया यानि अङ्गरागारुणपरागसमुद्रप्रभवत्वमनोरथ—संपादकत्वानि कविना दर्शितानि तानि तत्तदेकनिष्ठतया तस्य स्वालक्षण्यरूपेण विवक्षितानि सामान्यधर्मरूपेण वा। अयमाशयो यद् ये हि विशेषाः तेषां सद्भावोपि तत्तद्वृक्षे कवेर्विवक्षितः, यदिवा केवलः अभाव एव तत्र प्रतिपिपादयिषितः। प्रश्नस्य तात्पर्यमिदं यदमी देववृक्षाः कवेः परस्परमभिन्नतया वा विवक्षिता भिन्नतया वा। अत्र २०.४—संदर्भत्वेनोद्धृताद् रघुवंशस्य ६.६— पद्यादिदमवगम्यते यत् सर्वेषामेतेषां भिन्नत्वमेव कवेरभिप्रेतम्। वस्तुतः भिन्नत्वमेव परम्परयाप्यनुमोद्यते। परम्परेयममरकोशस्यै—तल्लेखारम्भ उद्धृतेन 'पञ्चैते देवतरवः' इत्यनेन वचनेन स्पष्टतामासादयति। अत्र हि देवतरुषु पञ्चत्वं सिसाधयिषितं न तु देवतरुनामसु। तथा सति 'उच्यते देववृक्षश्च मन्दारः०' इत्येवमुच्येत। अस्ति च पुराणेष्वप्येतेषां भिन्नत्वमेव प्रपञ्चितम्। अत्र च मत्स्यपुराणं देवीभागवतं च प्रमाणम्। मत्स्यपुराणे कल्पपादपदानप्रस्तावे मध्ये कल्पवृक्षं निर्माय तत्पार्श्वेषु पारिजातादीनां पृथक् निर्माणं प्रतिपाद्यते। तथाहि—

**अर्धक्लृप्तसुवर्णस्य कारयेत् कल्पपादपम् ।**
**सन्तानं पूर्वतस्तद्वत् तुरीयांशेन कारयेत् ।।**

---

१. एतेषामेव वृक्षाणां सामान्यतोऽपि निर्देशः कालिदाससाहित्ये लभ्यते, यथा नन्दनद्रुमाः कुमार २.४१, देवारण्यम् (र० १०.८०) इति पदमपि प्रसङ्गेऽस्मिन् संग्राह्यम्।

मन्दारं दक्षिणे पार्श्वे श्रिया सार्धं घृतोपरि ।
पश्चिमे पारिजातं तु सावित्र्या सह जीरके ॥

सुरभीसंयुतं तद्वत् तिलेषु हरिचन्दनम् ।
तुरीयांशेन कुर्वीत सौम्येन फलसंयुतम् ॥

२७६.३–८

देवीभागवते पुनर्मणिद्वीपवर्णनावसरे तत्तत्सालेषु वृक्षाणामेषां वनानि पार्थक्येनैव वर्ण्यन्ते। तथाहि–

कांस्य–सालादुत्तरे तु ताम्रसालः प्रकीर्तितः ।
द्वयोस्तु सालयोर्मध्ये संप्रोक्ता कल्प–वाटिका ॥

ताम्रसालादुत्तरत्र सीससालः प्रकीर्तितः ।
सन्तानवाटिका मध्ये सालयोस्तु द्वयोर्नृप! ॥

सीससालादुत्तरत्राप्यारकूटमयः शुभः ।
हरिचन्दनवृक्षाणां वाटी मध्ये तयोः स्मृता ॥

आरकूटमयादग्रे सप्तयोजनदैर्घ्यवान् ।
पञ्चलोहात्मकः सालो मध्ये मन्दारवाटिका ॥

पञ्चलौहमयादग्रे वर्त्तते रौप्यसालकः ।
पारिजाताटवी मध्ये प्रसूनस्तबकान्विता ॥

१२.१०.३५–६२

भागवतेऽस्मिन् सालेष्वेतेषु ऋतुभेदोपि वर्ण्यते। तत्र कल्पवाटिका वसन्तेन, सन्तानवाटिका ग्रीष्मेण, हरिचन्दनवाटिका वर्षर्तुना, मन्दारवाटिका शरदा, पारिजातवाटिका च हेमन्तेनाधिष्ठिता वर्ण्यन्ते। यद्यपि सर्वेपि ऋतवस्तत्र सहयुध्वानः तथापि स्थाननियमदर्शनात् तेषां तदधिष्ठित–देववृक्ष–भेदकत्वमेव नियतम्। अयमत्रापरो भेदहेतुर्यद् विष्णुपुराण एतेषामुत्पत्तावयौगपद्यमुपपाद्यते।

तत्र हि पारिजातोत्पत्तेः प्रागपि संतानकनाम्नो देववृक्षस्यास्तित्वमुपदर्श्यते। पुराणस्यास्य प्रथमे अंशे यो नवमोऽध्यायस्तत्र समुद्रमन्थनात् श्री–देव्या उत्पत्तौ दुर्वासः–प्रदत्तायाः सन्तानक–स्रजो विमाननैव महेन्द्रकर्तृका मूलम्। इदमत्रापरं भेदकं प्रमाणं यत् समुद्राद् उत्पन्नं वृक्षरत्नं सर्वत्र पारिजातनाम्नैव व्यपदिश्यते। तद् यथा–

महाभारते– **पारिजातश्च तत्रैव सुरभिश्च महामुने! ।**
**जज्ञाते तौ तदा ब्रह्मन्! सर्वकामफलप्रदौ ।।**

—आदिपर्व १८.३६—क्षेपकः।।

विष्णुपुराणे– **कृतावर्त्तात् ततस्तस्मात् क्षीरोदाद् वासयञ्जगत् ।**
**गन्धेन पारिजातोऽभूद् देवस्त्रीनन्दनस्तरुः ।।**

१.९.९५

पद्मपुराणे– **मन्थने पारिजातोऽभूद् देवस्त्रीनन्दनो द्रुमः ।**
**रूपौदार्यगुणोपेतस्ततश्चाप्सरसां गणः ।।**

सृष्टिखण्डे ४.५०।।

एवमेव– **ऐरावतस्ततो जज्ञे तथैवोच्चैश्रवा हयः ।**
**धन्वन्तरिः पारिजातः सुरभिश्चाप्सरोगणः ।।**

ब्रह्मखण्डे १०.१।।

मत्स्यपुराणे– **कौस्तुभश्च मणिर्दिव्यश्चोत्पन्नोऽमृतसंभवः ।**
**पारिजातश्च विकच–कुसुम–स्तबकाञ्चितः ।।**

२४९.५

श्रीभागवतेपि– **ततोऽभवत् पारिजातः सुरलोकविभूषणम् ।**
**पूरयत्यर्थिनां योऽर्थैः शश्वद् भुवि यथा भवान् ।।**

८.८.६

शुकनासोपदेशे कादम्बरीकविना श्रीबाणेनापि श्रियो विगर्हणे 'इयं हि पारिजातपल्लवेभ्यो रागम्' इत्यादिना महाश्वेतावृत्तान्ते च 'इयं च

सुरासुरैर्मथ्यमानात् क्षीरसागराद् उद्गतः पारिजातनामा पादपः, तस्य मञ्जरी'—ति च लक्ष्मी—सहभुवो वृक्षरत्नस्योल्लेखः 'पारिजात'—पदेनैव विधीयते। ततश्च—

**एषां गिरे सकलरत्नफलस्तरुः स**
**प्राग् दुग्धभूमिसुरभेः खलु पञ्चशाखः ।**
**मुक्ताफलं फलन—सान्वय—नाम तत्व—**
**न्नाभाति बिन्दुभिरिवच्छुरितः पयोधेः ।।**

नैषधीयच—११.१० इति

कवयन्नैषधीयचरितकविः श्रीहर्षोपि नूनं पारिजातमेव लक्षीकरोति। असति भेदे समुद्रसंभूतस्तरुः कदाचित् कल्पादिभिः पदैरप्यभिधीयेत। इदमत्र प्रबलतमं भेदकं यदिदानीं लोकेऽपीमे वृक्षाः तत्तन्नामभिर्व्यपदिश्यमाना लभ्यन्ते। तत्र शेफाली पारिजातपदेन, श्वेतचन्दनं रक्तचन्दनं वा हरिचन्दनपदेन, अर्को मन्दारपदेन, कृतवेदिको ध्वजशाखांशुकवान् कश्चनापि ग्रामवृक्षः कल्पवृक्षपदेनाभिधीयते। अभिप्रायोऽयं भारतीये मूर्तिशिल्पेपि न न प्रसिद्धः। भरहुत—सांचीप्रभृतिषु शिल्पशिरोमणिभूतेषु स्थानेषु कल्पवृक्षस्यास्योत्कीर्णनं विद्वत्सु नितान्तं प्रथितमेव[१]। अस्माकं निवासग्रामे नादनेरेऽपि[२] प्रस्तरखण्डमेकमजयपालदेवनाम्ना प्लक्षपादपस्याधस्तात् प्रतिष्ठापितं यत्र कल्पतरोरस्य प्रत्यङ्गं प्रस्फुटमुत्कीर्णनमिदं तद्विदां चेतांसीदानीमपि नितान्तमेवावर्जयति। मुक्तादामभिराभूषितस्यास्य तले रतिकामौ राजदम्पती वा कौचिदत्यन्तमेव भूषितवपुषावुत्कीर्णौ, शाखाग्रे च वर्धमानस्वामी। ततश्च लोकवृक्षन्यायेन देववृक्षेष्वपि समाननामभाक्षु भेदोपपत्तिरपेतानौचित्येव। कालिदाससाहित्यादुद्धृतेष्वपि स्थलेषु देववृक्षाणां सोऽयं भेद एव यत्सत्यं

१. डॉ० वासुदेवशरणाग्रवालस्य 'हर्षचरितः एक सांस्कृतिक अध्ययन' इति ग्रन्थे दत्तात् १५ पृष्ठस्थादुल्लेखात् तथ्यमिदं प्रमाण्यते।

२. सीहोरमण्डले भोपालस्य पार्श्व एव विद्यत एष ग्रामो नर्मदातटे। वर्णितो दत्तचित्रश्चायं ग्रामोऽस्माकं रेवाभद्रपीठकाव्ये।

पृष्ठभूभूत इति पुराणपरम्परयानया सुखेनैवोन्नेतुं शक्यते ततश्च रघु. ६.३—पद्यव्याख्यायां—

(कल्पद्रुमाणामिव पारिजातः) अत्र कल्पद्रुम'—शब्दः पञ्चान्यतमविशेषवचनोपि कल्पयन्ति मनोरथानिति व्युत्पत्या सुरद्रुमात्रोपलक्षकतया प्रयुक्त इत्यनुसंधेयम्। कल्पा इति द्रुमा कल्पद्रुमा इति विग्रहः। इति

कृपू सामर्थ्ये, कल्पयति मनोरथं कल्पः स चासौ द्रुमश्च, तेषां मध्ये पारमस्यास्तीति पारी, पारिण्यब्धौ जातः पारिजात इव। पञ्चानां मध्ये एकस्य कल्पद्रुम—शब्दवाच्यत्वं यद्यपि प्रतीयते तथापि प्रवृत्तिनिमित्तस्य संकल्पार्थ—कल्प—पदार्थस्य पूरणे पञ्चानामपि साधारण्यात् कल्पद्रुमाणामिति बहुवचनम्। तथा माघः 'कल्पद्रुमैः सह विचित्रफलैर्विरेजुः'—५.१६ इति। तेषु पारिजात उत्कृष्ट इति पारिजातहरणात् सिद्धम्'—। इति च

यत् क्रमेण मल्लिनाथ—हेमाद्रिभ्यां संजीविनी—दर्पणयोः पञ्चनामपि देववृक्षाणां कल्पवृक्षपदवाच्यत्वमुपकल्पितं तत् स्वमनीषिकयैव। 'कल्पद्रुमाणामिति' 'कल्पद्रुमै'—रिति च रघुवंश—शिशुपालवध—कविभ्यां कल्पद्रुम—पदे यद् बहुत्वं योजितं तत्रान्यदेव बीजमुत्प्रेक्षामहे। वेदिका—वस्त्राभरण—मुक्तादाम—प्रभृतीनां हरिचन्दन—सन्तानक—मन्दारान् विहाय केवलं कल्पद्रुम—पारिजातयोरेव सद्भावं प्रतिपादयता कालिदासेन उदारनेपथ्यवतां मञ्चे विराजमानानां च राज्ञामुपमानतया कल्पद्रुमनाम्ना व्यपदिष्ट एव देववृक्षः स्मर्तुं शक्यः। उपमेयबहुत्वाच्च तत्र बहुत्वमपि योजयितुं शक्यम्। न हि तेन सन्तानादीनामपि कल्पत्वमुचितं कविमस्तके रोपयितुम्। माघस्थलेपि वनस्पतीनां शाखावसक्तवसनाभरणाभिरामत्व—जनक्लान्तिच्छित्त्वमेव समानो धर्मः, यो हि देववृक्षेषु कल्प—पदवाच्य एव द्रुमे प्रसिद्धः, न मन्दारादिषु। तेन हि सत्यपि बहुत्वे कल्पद्रुमपदस्य देववृक्षसामान्यपरत्वमत्र

कालिदाससाहित्ये विमान्यमेव, उपमेयबाहुल्यं हि तत्र बहुत्वस्य मूलम्। एवं हि पञ्चानामपि देवतरूणां परस्परभिन्नत्वमेवात्र कालिदाससंमतं सिद्ध्यति।

जैन–पुराणेषु कल्पवृक्षाणां दश प्रकारा मन्यन्ते। जिनसेनस्वामिकृते आदिपुराणे तेषां वर्णनमेवं क्रियते–

**मद्य–तूर्य–विभूषा–स्रग्–ज्योति–र्दीप–गृहाङ्गकाः ।**
**भोजनामत्र–वस्त्राङ्गा दशधा कल्पशाखिनः ।।**

पर्व–३ श्लो० ३९

अत्र 'अङ्ग'–शब्दः वामनप्रयुक्त–'काव्याङ्ग'–शब्दघटकीभूताङ्गशब्द इवैव जनकत्वपरः। ततश्च जैनमते कल्पवृक्षाणामिमानि दश नामानि भवन्ति– १. मद्यजनकः २. तूर्यजनकः ३. विभूषाजनकः ४. हारजनकः ५. ज्योतिर्जनकः ६. दीपजनकः ७. भोजनजनकः ८. गृहजनकः ९. भाजनजनकः १०. वस्त्रजनकश्च।

एतत्सङ्केतोऽपि कालिदाससाहित्ये तत्र तत्र लब्धुं शक्यते यत्र कालिदासेन मानवाय वनस्पतिसेवा वर्ण्यते। तत्रापि शाकुन्तलस्य शकुन्तलापतिगृहगमनावसरे

**क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं**
**निष्ठ्यूतश्चरणोपभोगसुलभो लाक्षारसः केनचित् ।**
**अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै–**
**र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः** ।। ४.४।।

इत्येवमुच्यमानायां तस्यामेतत्सङ्केतो नितान्तमेव स्फुटः। यद्यपि लोकोत्तरा–भिरेवंविधघटनाभिरनुत्तमा राज्यश्रीः सूच्यते सूचिता चैतत्पद्यसमनन्तरीये प्रियंवदायाः 'अनयाऽभ्युपपत्त्या सूचिता ते भर्तुर्गेहेऽनुभवितव्या राजलक्ष्मीरिति वचनेन। जातककथासु च घटना इमा भृशं विप्रकीर्णाः। कालिदासेनापि 'प्रभावस्तम्भितच्छायम्' इत्यादिभिः (रघु० १२.२१) वचनैरेता न नोल्लिख्यन्ते।

अथापि घटनाभिराभिर्वनस्पतीनां कल्पत्वं न निषेध्यते।[१] वस्तुतो 'नास्ति मूलमनौषधम्'—इत्युक्त्या यत्किञ्चिन्मनोरथपूरकत्वं सर्वेष्वेव वनस्पतिषु संभाव्यत एव।

यदिदं कालिदाससाहित्ये कल्पादिदेववृक्षविवरणमस्माभिरनुशीलितम्, अत्र पुराणसाहित्यस्योपजीव्यत्वं सुखेनैवोपगन्तुं शक्यते। देववृक्षाणां परस्परमैक्यानैक्यविमर्शावसर इदं दृष्टमेव, मेघदूते अलकायाः कुमारसंभवे च सप्तर्षीणां यद् वर्णनं ततोऽपीदमाक्षिप्यते। तथाहि मेघदूते यक्षकन्यका यत्र वर्ण्यन्ते तत्र मन्दाकिन्यास्तटेषु मन्दारवृक्षाणामस्तित्वं स्मर्यते—'मन्दाराणामनुतटरुहां छायया वारितोष्णा'—इति। मत्स्यपुराणेपि हिमवत्खण्डे यत्र कैलासान्मन्दाकिन्या उद्गमो वर्ण्यते तत्रोच्यते—

**कैलासपादसंभूतं रम्यं शीतजलं शुभम् ।**
**मन्दारपुष्परजसा पूरितं देवसन्निभम् ।**
**तस्मात् प्रवहते दिव्या नदी मन्दाकिनी शुभा ।।**

मत्स्यपु० अध्या० १२०.३—४

कुमारसंभवे सप्तर्षीणां वर्णने यद्—

**आप्लुतास्तीरमन्दारकुसुमोत्करवीचिषु ।**
**व्योमगङ्गाप्रवाहेषु दिङ्नागमदगन्धिषु ।।** ६.५।।

अत्र व्योमगङ्गाप्रवाहस्यापि मन्दारकुसुमोत्करवीचित्वमीक्ष्यते तत्रापि नूनं मत्स्यपुराणमन्दाकिनीवर्णनमेव मूलम्। अलकायां वर्ण्यमानानां कल्पवृक्षाणां मूलं मत्स्यपुराणस्य कैलासवर्णनमेव प्रतीयते यत्र 'नानारत्नमयैः शृङ्गैः कल्पद्रुमसमन्वितैः मध्ये हिमवतः पृष्ठे कैलासो नाम पर्वत'—इत्येवं

---

१. वाल्मीकिरामायणस्य किष्किन्धाकाण्डीये ४३ सर्गे ४५—५० श्लोकेषु कल्पद्रुमादीना—मानुल्लेखपूर्वकं वृक्षाणामेकैकाभिलाषपूरकत्वमिदं जैनसाहित्योपवर्णिततथाविधवर्णनस्य मूलमिव प्रतिभाति।

कल्पवृक्षा वर्ण्यन्ते।

कल्पवृक्षस्य साम्प्रतमेकमाध्यात्मिकमपि रूपं तान्त्रिकीषु साधनासु प्रचलितं दृश्यते। देवीभागवते मणिद्वीपस्य यद् रूपं कल्प्यते तत्र कांस्य—ताम्र—सीस—रौप्य—निर्मितानां प्राचीराणां मध्ये कल्पवृक्षादिवाटिका अपि वर्ण्यते। यथा चैतत् तत् पूर्वं भेदाभेदविचारप्रस्तावे प्रस्तुतैरुद्धरणैः स्पष्टमेव। ततः परं सुवर्ण—पुष्पराग—पद्मराग—गोमेद—हीरक—वैदूर्येन्द्रनील—मुक्ता— मरकत—प्रवाल—नवरत्न—माला वर्ण्यन्ते। अन्तिमे च नवरत्नसाले चिन्तामणिगृहं कल्प्यते। तत्र स सहस्रस्तम्भसंयुक्ताः शृङ्गार—मुक्ति—ज्ञानैकान्तनामानश्चत्वारो मण्डपाः कल्प्यन्ते। चिन्तामणिगृह एव पराशक्तिरूपैर्दशभिः सोपानैः ब्रह्मविष्णुरुद्रेश्वररूपैर्मञ्चखुरैः सदाशिवरूपेण च फलकेन विराजमान एकस्मिन् दिव्य—दिव्ये मञ्चरत्ने श्रीभुवनेशेन भगवता महादेवेन सह तदर्द्धाङ्गभूता भगवती भुवनेश्वरी जगदम्बा विराजमाना वर्ण्यते। लिङ्गपुराणस्यानाहतनादरूपाजपाजपदानवद् रत्नमयमहाकल्प—पादपदानमपि रत्नकल्पपादपयोराध्यात्मिकं सामञ्जस्यमुपस्थापयति यत्र—

**अथान्यत् संप्रवक्ष्यामि कल्पपादपमुत्तमम् ।**
**शतनिष्केण कृत्वैवं सर्वशाखासमन्वितम् ।।**

**शाखानां विविधं कृत्वा मुक्तादामाद्यलम्बनम् ।**
**दिव्यैर्मरकतैश्चैव चाङ्कुराग्रं प्रविन्यसेत् ।।**

**प्रवालं कारयेद् विद्वान् प्रवालेन द्रुमस्य तु ।**
**फलानि पद्मरागैश्च परितोऽस्य सुशोभयेत् ।।**

**मूलं च नीलरत्नेन वज्रेण स्कन्धमुत्तमम् ।**
**वैदूर्येण द्रुमाग्रं च पुष्परागेण मस्तकम् ।।**

**गोमेदकेन वै कन्दं सूर्यकान्तेन सुव्रत! ।**
**चन्द्रकान्तेन वा वेदिं द्रुमस्य स्फटिकेन वा ।।**

**निवेद्येमं द्रुमं शम्भोर्योगिनां वाथवा नृप ।**
**भस्माङ्गिभ्योऽथवा राजा सार्वभौमो भविष्यति ।।**

इत्येवं रत्नकल्पितस्य कल्पपादपस्य दानं योगीश्वराय शम्भवे योग्यन्तराय वा योगाभ्यासाभावेपि योगिवेषधारिणे वा व्यवस्थाप्यते। रत्न—कल्पपादप—योरिदमाध्यात्मिकं संयोजनं[१] भावनोपनिषदि रूपकभाषया नितान्तं स्फुटमुपजायते यत्र श्रीचक्रध्यानावसर उच्यते—

**देहो नवरत्नद्वीपः**।। ६।।

**त्वगादिसप्तधातुरोमसंयुक्तः**।। ७।।

**संकल्पाः कल्पतरवः, तेजः कल्पकोद्यानम्**।। ८।।

रसनया भाव्यमाना मधुराम्लतिक्तकटुकषायलवणरसाः षड् कृतवः।। ९।।

यदेव च[२] तन्त्रराजे—

**रत्नद्वीपो भवेद् देहो नवत्वं धातुरोमभिः ।**
**संकल्पाः कल्पतरवः स्वाधारा ऋतवः स्मृताः ।।**

इत्येवं कारिकया संगृह्यते।

कालिदास एवंविधं रूपकं कामधेनु—नन्दिनी—वसिष्ठ—देवदार्वादिघटिते रघुवंशद्वितीयसर्गस्य गोचारणाख्याने निपुणमुपनिबध्नाति[३], किन्तु कल्पवृक्षोल्लेखावसरे स प्रायेणापेतसंरंभ एव लक्ष्यते। यद्यपि 'आसीत् कल्पतरुच्छायामाश्रिता सुरभिः पथि'—इति पूर्वोद्धृते रघुवंशस्य प्रथमसर्गीये

---

१. तान्त्रिक—टेक्स्ट्स ११ भागः।

२. भावनोपनिषदि भास्कररायकृता टीका।

३. एतदर्थमस्माकं 'नन्दिनी विद्ये'—ति नाम्ना रायपुरसंस्कृतमहाविद्यालयशोधपत्रिकाया मेधायाः १९६५—वर्षीयेऽके प्रकाशितो लेखो द्रष्टव्यः।

स्थले 'प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वन' इति तादृश एव शाकुन्तलस्य सप्तमाङ्कीयेस्थले कल्प–पादपविषय एवंविधा भावनोपनिषत्कल्पा कल्पना स्वप्रसराय प्रकाममवसरमधिकरोति।

एवं देववृक्षानधिकृत्य प्रसृता विविधपक्षमयी या भारतीया परम्परा कालिदाससाहित्यं तां सर्वाङ्गीणतयेव स्पृशति, तस्याः प्रायेण सर्वानपि प्रमुखान् मार्गान् प्रशस्तयति।।

◈

## (७) कालिदाससाहित्ये योगविद्या[१]

योगविद्या–पदघटकीभूतेन योगपदेनात्र योगसूत्रोपनिबद्ध–योगदर्शन–प्रतिपाद्यं तत्त्वं विवक्षितम्। तत्त्वमिदं समाधिपदेन व्यपदिश्यते। समाधिश्च यमनियमासनप्राणायामप्रत्याहारधारणाध्यान–रूपसप्तसोपानकः। एकाग्रा निरुद्धा वा चित्तवृत्तिश्च तस्य स्वरूपम्। द्रष्टुर्वृत्तिसारूप्यं स्वरूपावस्थानं वा तत्र मुख्यं फलम्, अमुख्यानि च फलानि सिद्धिप्रभृतीनि। सोऽयं साङ्गो योगः कालिदाससाहित्ये लब्धचतुरस्रप्रतिष्ठः तमत्र लेशेन प्रस्तुवीमहे।

### १. योगशब्दः

योग–शब्दो हि घञो योगेन द्वाभ्यां धातुभ्यां व्युत्पादयितुं शक्यते दैवादिकाद् युज्धातोः, रौधादिकाद् युजिर्–धातोर्वा। तत्र रौधादिकः संयोगार्थः, दैवादिकश्च समाध्यर्थः। अस्ति च चौरादिकोऽपि संपर्चनार्थो युजिः। प्रकृते तु **'योगश्चित्तवृत्तिनिरोधः'**[२] इति योगसूत्रप्रामाण्यात्, **'योगः समाधिः'**[३]–इति भाष्यकृद्व्यासवचनप्रामाण्याच्च दैवादिक एव प्रमाणीक्रियते, यद्यपि नास्त्यसौ रौधादिवदिदंकाले प्रसिद्धः। कालिदाससाहित्ये समाध्यर्थको योगशब्दः प्रकीर्ण इव लभ्यते सर्वत्र। तथा च–

रघुवंशस्य राजानः शरीरं योगेनैव त्यजन्ति (रघु. १.८)। रघुवंश–नायको रघुर्योगसमाधिनैव तमसः परमव्ययं पुरुषमाप्नोति (रघु. ८.२४)। लक्ष्मणः सरयूतीरं गत्वा योगेनैव देहं त्यजति (रघु. १५.९५)।

---

१. द्र. अत्रैव लेखे द्वितीया पादटिप्पणी।

२. योगसूत्रम् १.२।

३. प्रथमयोगसूत्रभाष्ये।

पुष्यनामा नृपतिरपि योगविदे जैमिनिनाम्ने महर्षयेऽर्पितात्मतया योगविद्यामवाप्य अजन्मने कल्पते (रघु. १८.३३)। योगेन विसृष्टदेहा सती हिमाचलगृहिणीं मेनां पुनर्जन्मने प्रपद्यते (कुमार. १.२१)। भगवती पार्वती भविष्यत: पत्युर्भगवत: समाधिस्थस्य शिवस्य प्रतिहारभूमिं यदैव प्राप्नोति तदैव सोऽपि भगवान् योगात् परमात्मसंज्ञं ज्योतिर्दृष्ट्वोपरमति (कुमार. ३.५८)। स्थिरधी रघुरापरमात्मदर्शननाद् योगविधेर्न विरमति (रघु. ८.२२)। भगवतो विष्णो: पावनान्यवलोकनानि योगनिद्रान्तविशदानि दृश्यन्ते (रघु. १०.१४) नाभिप्ररूढाम्बुरुहासनेन प्रथमेन धात्रा संस्तूयमान: पर: पुमान् (विष्णुरेव) युगान्ताय युगान्ते वा समुद्रमधिशिशयिषन् योगनिद्रामाश्रयते (रघु. १३.६) चित्रकूट–प्रयागयोर्मध्यवत्तिषु वनेषु वीरासनैर्ध्यानजुषामृषीणां समध्यासित–वेदिमध्या: शाखिनोऽपि निवातनिष्कम्पतया योगाधिरूढा इव विभान्ति (रघु. १३.५२)। वियोगिवेषसाकेतदेवतामप्रत्यभिजानान: कुशो विस्मयते योगप्रभावं विनापि कथमियं मम सावरणेऽपि गेहेऽन्तरमलभते'–ति (रघु. १६.७)[१]।

---

१. संयोगाद्यर्थकोऽपि योगशब्दो निम्नलिखितेषु सन्दर्भेषु कालिदाससाहित्ये सुलभ:– कुमार० ५.६७, ७.६, ५५, ७८, ८.७६, ७८, रघु. १.४६, ३.२६, ५.६०, ७२, ६.६५, ८५, ७.३, ९.१८, ४४, १०.८६, ११.५६, १३.२९, ७६, १५.३५, १६.८४, १७.७८, १८.२, ४६, शाकु. २.१०–'चित्रे निवेश्य', १५ 'अध्याक्रान्ता वसति०', ७.२२–'स्मृतिभिन्न०', विक्रमो० २.४ 'निषिञ्चन्'। एतेषु रघुवंशस्य ९.१८ 'प्रियतमाभिरसाविति' पद्ये १०.८६ पद्ये, १८.४६ पद्ये, शाकुन्तलस्य २.१५ पद्ये च योग–शब्दो राजनयप्रसिद्धोपाययोजनार्थक:, कुमार. ८.७८ पद्ये चोपयोगार्थ:। अन्यत्र हि योगशब्दयोगादन्ये शब्दा निष्पाद्यन्ते। तथा च प्रीतियोग: 'कुमार. ७.५५', सान्निध्ययोग: 'कुमार० ७.७८, रघु. ७.३', योगतारा 'कुमार० ८.७३', दैवयोग: 'रघु ५.६०' तरुणारुणरागयोग: 'रघु. ५.७२', समगुणयोग: 'रघु. ६.८५, अलिकदम्बकयोग: 'रघु. ९.४४', प्रत्ययप्रकृतियोग: 'रघु. ११.५६', बाष्पयोग: 'रघु. १३.२९', बुधबृहस्पतियोग: 'रघु. १३.७६', साधर्म्ययोग: 'रघु. १७.७८', सुवृष्टियोग: 'रघु. १८.२, सत्त्वयोग: 'शाकु. २.१०', रक्षायोग: 'शाकु. २.१५', भक्तियोग: 'विक्रमो. १.१'। एतेषु रघु. ११.५६–स्थले व्याकरणशास्त्रीय:, रघु. १३.५७, १८.२, कुमार ८.७३–स्थलेषु ज्योतिषशास्त्रीय:, कुमार ७.५५, रघु. ६.८५–स्थलयो:

नियमितप्राणादिभिरन्तरेव विमृग्य ईश्वरैकपदवाच्य: स्थाणु: स्थिरेण भक्तियोगेनैव सुखेन लभ्यते विक्रमो. १.१।

मनीषिभिरनावृत्तिभयत्वेनाम्नायमानपदं शिवं योगिन: क्षेत्राभ्यन्तर-वर्त्तित्वेन क्षेत्र एव विचिन्वन्ति कुमार० ६.७७। योगी कार्त्तवीर्य: अनन्य-साधारणराजशब्दो बभूव रघु. ६.३८। अजो मन्त्रिभिरिव रघुर्योगिभि: समियाय रघु. ८.१७ हृदयाश्रयं ज्योतीरूपं च विष्णुं योगिनो हृदय एव विचिन्वन्ति रघु. १०.२३।

## २. समाधि:

समाधिशब्दोऽपि कालिदाससाहित्येऽक्लेशलभ्य:। तत्र योगार्थक: समाधिशब्दश्चतुर्दशसु स्थलेषु स्पष्टमुपलभ्यते। यथा हि–'मुनीनामपि माननीया मेना प्रकृष्टेन योगेन युक्तेति समाधिमतीत्युच्यते, प्रपद्यते च तामेव योगविसृष्टदेहा सती नाम दक्षसुता पुनर्जन्मने कुमार० १.२१। धीर: शिव: समाधे: प्रत्यर्थिभूतामपि शुश्रूषमाणां पार्वतीं शुश्रूषायै अनुमन्यते कुमार० १.५९। शिवेन प्रत्यादिष्टा पार्वती आत्मन: अबन्ध्यरूपतायै समाधिमास्थाय तपांसि चरति कुमार० ५.२। प्रगल्भवचसे ब्रह्मचारिणे रत्नभूताया: पार्वत्या: समाधि: पत्युर्लभाय निरर्थक इव प्रतीयते कुमार० ५.४५। प्रसंख्यानपरे हरेऽप्सरोगीतय: समाधिभेदप्रभवो न भवन्ति कुमार० ३.४०। दुश्चरतपसस्तृणबिन्दो: परिशङ्कितो देवराजस्तस्मै समाधिभेदिनीं हरिणीति नाम्नीं देवाङ्गनां प्रहिणोति रघु. ८.७९। समाधिभीतो देवराजो दूर्वाङ्कुरमात्रवृत्तिं माण्डकर्णिं शातकर्णिं वा मुनिं पञ्चाप्सरोयौवनकूटेन बध्नाति रघु. १३.३९। अन्यसमाधिभीरुतयैव

---

कामशास्त्रीय:, रघु. ७.३ स्थले च धर्मशास्त्रीयो योगार्थ: स्पष्ट:। अरिहयोग: 'रघु. ९.१८' पुनरर्थशास्त्रस्य तन्त्रयुक्तिप्रकरणे स्पष्ट:। सुवृष्टियोगशब्दे कृषिशास्त्रमपि सहायकृत्, दैवयोगपद्ये लौकिकं जीवनमपि। अवशिष्टेषु सन्दर्भेषु केवल एव योग–शब्दो लभ्यते। तत्रापि कुमार ७.६, रघु. १.४६ शाकु. ७.२२–स्थलेषु ज्यौतिषं शास्त्रं प्रमाणम्। विक्र. २.४ स्थले 'स्नेहदाक्षिण्ययोग'–शब्दोऽपि शक्यनिष्पाद:।

हि मेनकां विश्वामित्राय देवेन्द्रः प्राहिणोत् शाकु. १.२३ पृ० ४४०। शिवः समाधिवश्यं मनः हृदि व्यवस्थाप्य क्षेत्रवित्सु 'अक्षरपुरुष'—तया प्रतीतम् आत्मानमात्मन्येवावलोकयते कुमार० ३.५०। समाधिजितेन्द्रियो दशरथो यमवताम् अवतां च धुरि तिष्ठन्नुत्तरकोसलान् पितुरनन्तरं सम्यगधिगच्छति प्रशास्ति च रघु. ९.१। योगसमाधिरेव रघोः साधनम् अव्ययस्य पुरुषस्य प्राप्तये रघु. ८.२४।

भगवतः शङ्करस्य तपोवने तपःसमाधेः प्रतिकूलवर्ती मधुरात्मान—माधाय जृम्भते कुमार० ३.२४। पार्वती स्वकीयं रूपं तपःसमाधिनैवा—बन्धयितुमिच्छति कुमार० ५.२। सा हि फलोदयान्ताय तपःसमाधये पितरमात्मनोऽरण्यनिवासं याचते। कुमार० ५.६। यदा च पूर्वतपःसमाधिना फललाभं न मनुते तदा महत् तपश्चरितुं प्रक्रमते कुमार० ५.८। मालविकायाश्चित्रं कान्तिविसंवादि। ततस्तदालेखिता नूनमेव शिथिलसमाधिः[१] माल. २.२। दिलीपो वेधसा नियतमेव महाभूतसमाधिना[२] निर्मितः रघु. १.२९।

एभ्यो योगशब्दप्रयोगेभ्यः समाधिशब्दप्रयोगेभ्यश्च स्पष्टं यच्छब्दाविमौ कालिदाससाहित्ये स्थलानामेषां मध्ये केषुचित् चित्तस्य एकाग्रतायै प्रयुज्येते, केषुचिच्च चित्तवृत्तीनां निरुद्धतायै। ततश्च समाधेः सबीजता निर्बीजता, संप्रज्ञातता असंप्रज्ञातता वा क्रमेण स्पष्टे।[३] स्पष्टौ चैतेभ्यो निर्विचारवैशारद्य—रूपोऽध्यात्मप्रसादाख्यः समाधिः।[४] प्रसंख्यानेऽप्यकुसीदतारूपो धर्ममेघाख्यश्च[५]। इदमपि स्पष्टं यद् योगाभ्यासः पुनर्भवायेवापुनर्भवायापि सोपानति। इह जन्मन्यपि दुःसाध्यमपि फलं योगेन साधयितुं शक्यते। कलासु

---

१-२. अत्र पूर्ववर्त्तितचतुर्दशस्थलतुल्ययोगक्षेमतैव समाधिशब्दस्य।

३. योगशास्त्रे या एव चित्तैकाग्रता स एव सबीजः संप्रज्ञातो वा समाधिः यश्च चित्तवृत्ति—निरोधः स एव निर्बीजोऽसंप्रज्ञातो वा सः।

४. योसू. १.४७।

५. योसू. ४.२९।

वैचक्षण्यप्रसिद्धयेऽपि समाधियोगरूपा चित्तैकाग्रताऽनन्यसाधारणं साधनम्, व्यवहारेषु च परार्थसंपत्तये। योगशक्तिर्हि वज्रमपि विफलयति,[१] ततश्च देवेन्द्रोऽपि योगिभ्यो बिभेति। सोऽयं योगो गुरुशिक्षयैव सिद्ध्यति, न तु स्वैरतया। तत्रापि भक्तिः स्थिरत्वं चाभ्यर्हिततमे।[२]

## ३. योगाङ्गानि

योगाङ्गं नाम योगकारणम्, अङ्गशब्दस्य काव्याङ्गादिशब्देषु कारणवाचित्वेन प्रसिद्धेः। योगरूपस्य समाधेः समाधिरूपस्य योगस्य वा कारणत्वेनैकं 'अभ्यासवैराग्य'–युग्मम्[३] द्वितीयम् 'ईश्वरप्रणिधानम्[४] तृतीयं चाभिमतध्यानमु[५]पकल्प्यते। मन्ये त्रितयमप्येतत् तृणारणिमणिन्यायेन योगे कारणम्, अथापि 'अभ्यासवैराग्ययोः' प्रणिधानसामान्येऽनिवार्यत्वादीश्वरविषयकेऽभिमतवस्त्वन्तरविषयके वा प्रणिधानेऽपि सहकारित्वमप्रतिहतम्। अभ्यासो नामावृत्तिकस्य चित्तस्य प्रशान्तवाहितायै यत्नः। स च यमनियमादिसतत्त्वः।[६] वैराग्यं च लौकिकालौकिकप्रपञ्चवैतृष्ण्यम्।[७] एतच्चाभ्यासरूपे यत्ने कारणायते, वैतृष्ण्यस्य विवेकमूलत्वात् तज्जन्येच्छाजन्यत्वाच्च यत्नस्य। सेयं शास्त्रस्थितिः। अथात्र कालिदासः। तत्र हि योगिनो हृदि स्थितं विष्णुज्योतिरभ्यासनिगृहीतेनैव मनसा विचिन्वन्ति।[८] अस्ति च भगवानीश्वर आत्मेश्वरः[९]। तस्य नास्त्येवार्थः सांसारिकेण

---

१. वज्रं तपोवीर्यमहत्सु कुण्ठम्, कुमार० ३.१२।
२. योसू. १.१४।
३. योसू. १.१२।
४. योसू. १.२३।
५. योसू. १.३९।
६. योसू. १.१३ भाष्यं च।
७. योसू. १.१५–१६।
८. रघु. १०.२३।
९. कुमार० १.५९।

लौकिकाऽलौकिकेन प्रपञ्चेन[१]। येऽपि राजानस्तेऽपि सम्यग् विनीतेषु तनयेषु स्वाधिकारान् संक्रमय्य विषयव्यावृत्तात्मानः सन्तः प्रयतपरिग्रहद्वितीया मुनिवनतरुच्छायां श्रयन्ते[२]। सानसूयोऽत्रिः सारुन्धतीको वसिष्ठः, दाक्षायणीसहितः कश्यपश्च योगिनः।[३] दण्डकारण्यमुनयः खलु स्वकीयं देहमपि यज्ञाग्नौ जुह्वति।[४] सेयं सुमहती गाथा कालिदासेऽभ्यासवैराग्ययोः। यानि पुनरभ्यासस्याङ्गानि तेषु बहिरङ्गत्वेन यम–नियमासन–प्राणायाम–प्रत्याहाराः अन्तरङ्गत्वेन च धारणाध्यानसमाधयो योगदर्शने भगवता पतञ्जलिना काममुपदिष्टाः। कालिदास एतानपि भूम्नोल्लिखति। तथा च–

**(क) यमः**

दशरथो यमवतां धुरि तिष्ठति रघु. ९.१ [५]। यमोऽपि पञ्चाङ्गः। अङ्गानि च 'अहिंसा–सत्याऽ–स्तेय–ब्रह्मचर्यापरिग्रहाख्याणि।[६] एतेषु अहिंसायाः प्रतिष्ठायां योगिनः सन्निधौ सर्वाण्यपि भूतानि वैरं त्यजन्तीति भगवतः पतञ्जलेः अनुशासनम्।[७] कालिदासस्य तपःसमाधिनिरताया भगवत्याः पार्वत्यास्तपोवने सेयमहिंसा प्राप्तप्रतिष्ठा। अतस्तत्र विरोधीन्यपि सत्त्वानि सहजमपि मत्सरमुज्झन्ति कुमार० ५.१७। रघुवंशे भगवतोऽत्रेस्तपोवने सत्त्वानीमानि अनिग्रह–त्रासमेव विनीतानि भवन्ति रघु. १३.५०। दयार्द्रभावतया धनुष्मानपि दिलीपः कातरतमानामपि हरिणीनामनुद्वेगकरो वर्ण्यते रघु. २.११। मारीचाश्रमे

---

१. कुमार ६.२६, कान्तासंमिश्रदेहोऽप्यविषयमनसां यः पुरस्ताद् यतीनाम्–माल. १.१।

२. रघु. ३.७०, ७.७१, ८.११, ९४, १८.७, ९, १२, २६, २८, ३१, ३३, १९.१, २, विक्र. ५.१७, शाकु. ७.३५।

३. रघु. १.५६, २.७१, १२.२७, १३.५१, कुमार ६.११, १३, ९१, शाकुन्तलसप्तमोऽङ्कः

४. रघु. १३.४५ प्रभृति।

५. कुमार २.२३, रघु. ९.६, २४, १०.७१, १७.८१–स्थलेषु यमशब्दो लोकपाल–विशेषवचनः।

६. योसू. २.३०।

७. योसू. २.३५।

लङ्घयन्तमपि दौष्यन्तिं सिंहशावकस्तस्य माता वा न लङ्घयति। शाकु. ७.१४–१५। रघुवंशराजपुरुषा हि[1] सत्याय मितं भाषन्ते रघु. १.७। तत्र दशरथः परिहासकथास्वपि वितथवाङ् न भवति रघु. ९.८। अजः सूनृतमप्यवितथमेव वक्ति रघु. ८.९२। राममातरौ कौसल्यासुमित्रे च प्रियमप्यमिथ्यैवोचतुः रघु. १४.६। तस्करतारूपं स्तेयं हि दिलीपस्य शासने कथास्वेवाशिष्यत रघु. १.२७। विहारार्धपथे निद्रां गतानां विलासवनितानामपि वासोऽपि वातोऽपि नास्रंसयद्, आभरणानामाहरणार्थं हस्तमपि प्रसारयितुं कश्चित् प्रगल्भेतेति तु दूरे तिष्ठति कथा रघु. ६.७५। कार्त्तवीर्यो हि अकार्यचिन्तासमकालमेव सचापं पुरस्तादाविर्भूय प्रजानामन्तःशरीरेष्वपि विनयं प्रतिष्ठापयति प्रत्यादिशति चाविनयं ततः रघु. ६.२९। अस्तेयस्य प्रतिष्ठायां सर्वाणि रत्नानि सर्वाभ्य एव दिग्भ्यः स्वयमेवोपतिष्ठन्ते[2]। विश्वजिता वीतहिरण्मयस्य रघोः कोशे सुवर्णं वर्षति रघु. ५.२९। उर्वशीविरहिणं पुरूरवसं सङ्गमनीयो मणिः स्वत एवोपप्रयाति विक्रमो० ४ अङ्कान्ते। ब्रह्मचर्यप्रतिष्ठायां वीर्यं लभ्यते[3]। कालिदासो हि मनोः प्रसूतिं स्व–वीर्य–गुप्ता–मुदाहरति रघु. २.४। दिलीपसूनू रघुः किल गोत्रभिदो महेन्द्रस्य गोत्रेष्वप्यविसह्यं वज्रमात्मनो वक्षसा विफलयति रघु. ३.६३। कालिदासस्यैव ककुत्स्थो वृषभाकृतेरिन्द्रस्य पृष्ठमधिरुरोह संजहार च देवशत्रून् रघु. ६.७२ परस्त्रीविमुखः रघु. १६.८, शाकु. ५.१४.२ कुशो दुष्यन्तश्च गोत्रभिदोऽर्धासनमधितिष्ठतः स्ववीर्यमहिम्नैव रघु. १७.७, शाकु. ७.१। वीर्यलाभो हि शिष्यप्रभृतिषु स्वविद्या–संक्रान्तिप्रभृतिस्वरूपोऽपि प्रभावो

---

१. यथार्थे वाङ्मनसे सत्यम् योसू. भा. २.३० सत्यप्रतिष्ठायां योगिनो वाचमर्थो–ऽनुधावति। रघु. १.७७, मे. १.१, कुमार ४.४१, रघु. ९.७८–७९ शाकु. ४.१ प्रभृतिषु शापसन्दर्भेषु चैतदपि स्पष्टम्।

२. योसू. २.३७।

३. योसू. २.३८।

भगवता व्यासेन वाचस्पतिना चाम्नायते[१]। नन्दिनीवृत्तान्त: कालिदाससाहित्ये तस्य प्ररूढो दृष्टान्त:। नन्दिनीनाम्नीं गां विद्यामिव[२] वसिष्ठाद् दिलीपो दिलीपाच्च रघु: प्रापेति रघुवंशस्य द्वितीयतृतीयाभ्यां सर्गाभ्यां प्रथितचरम्। नात्र संदेग्धव्यं यद् एकविंशता दिनैर्दिलीपो गुरुप्रदिष्टां नन्दिनीविद्यामपि प्रासादयन्नन्दिनीति नाम्नीं सौरभेयीमिव[३]। प्रौढिवादमात्रमन्यथा पितुराश्व–मेधिकस्याश्वस्य प्रत्यक्षमेवाप्रत्यक्षेण हरिणा हरणे विषाद– लुप्तप्रतिपत्तये रघवे नन्दिन्या आत्मदर्शनम्, तदङ्गनिष्यन्दजलप्रमार्जनासादितातीन्द्रियदर्श–नोपपन्नशक्तिकत्वं च दिलीपसूनो:[४]। सेयं काचिद् विद्यैव। अथवा योगविद्यैव सा। अत एवोच्यते–**'स्वार्थसंयमात् पुरुषज्ञानम्,[५] तत:[६] प्रातिभवार्तया सूक्ष्मव्यवहितविप्रकृष्टातीतानागतज्ञानम्'**–इति।

अपरिग्रहो नाम विषयाणामस्वीकरणम्[७]। तस्य च परा कष्ठा मारीचाश्रमे। तत्र हि सत्कल्पवृक्षेऽपि वने प्राणवृत्तेरनिलेनैवारक्षा, चिन्तामणि–रत्नशिलागृहेषु च प्रत्ययैकतानतारूपेण ध्यानेन विषयप्रमोक: शाकु. ७.१२। रघुवंशे श्रुतस्ववृत्तगीति: प्रसन्नश्च रामो रामायणकवये केवलं स्वकीयं देहं त्यक्त्वा सम्पूर्णं राज्यं समादिशति, किन्तु कविरसौ कारुणिक:। स हि सीतासंपरिग्रहणमात्रं वृणुते (रघु. १५.७०, ७१)। रघु: कौत्साय सुमेरो: शृङ्गमिव भासुरं समग्रमपि हेमराशिं दित्सति, कौत्स: पुन: गुरुदक्षिणाऽधिकं द्रव्यं नादित्सति। दातृपरिग्रहीत्रो: सोऽयं कलह:–'जनस्य साकेतनिवासिन'

१. योसू. २.३८ भाष्यं तत्त्ववैशारदी च।

२. रघु. १.८८

३. अस्मन्निबन्ध: 'नन्दिनीविद्या', कालिदासग्रन्थावलीभूमिकाया: ३१ पृ०।

४. रघु. ३.४१।

५. योसू. ३.३५।

६. योसू. ३.३६, ३.३३, ३.५, ३.२६, १.२५, १.४८

७. योसू. २.३० भाष्यान्त:।

इति पद्यरत्नेन संस्कृतवाङ्मये सुभाषितभावमादाय सुमनस्सु ताम्बूल–वीटिकायते रघु. ५.३१। प्रसिद्ध एव भगवान् माण्डकर्णिः दूर्वाङ्कुरमात्रवृत्तितायै रघु. १३.३९। स्वयं–विशीर्णद्रुमपर्णवृत्तितामप्युत्तीर्णा भगवती पार्वती अपर्णात्वेन सश्रद्धमभिवन्द्यत एव पुराविद्भिः कुमार० ५.२८। अपरिग्रहफलत्वेन प्रतीतो जन्मकथन्तासंबोधोऽपि[१] कालिदासस्य सुप्रतीतः। जन्मान्तरे तत्कारणेऽदृष्टवादे च लभ्यन्त एवास्यानेक उद्गाराः। तत्र भगवत्या सीतायाः–

**कल्याणवृत्तेरथवा तवायं न कामचारो मयि कल्पनीयः ।**
**ममैव जन्मान्तरपातकानां विपाकविस्फूर्जथुरप्रसह्यः ॥**

रघु. १४.६२

इयमुक्तिरेव पर्याप्ता। भवपूर्वपत्नी सती स्वयमेव पार्वतीरूपं जन्मान्तरं प्रतिपद्यते कुमार० १.२१। भगवतोऽवतारस्य लीलायाश्च मूलं केवलो लोकानुग्रह एव रघु. १०.३१। सेयं जन्मकथन्तासंबोधकथा।[२]

सोऽयं यमः यतशब्देन प्रयत–शब्देनापि च कालिदासेन भृशं स्मर्यते।[३]

**(ख) नियमाः**

नियमेषु हि शौचम्, संतोषः, तपः, स्वाध्याय ईश्वरप्रणिधानं च योगदर्शनेऽङ्गतया प्रथितानि। एषु शौचे बाह्यं शौचं कायेनावद्यस्पर्शनिरासः, आन्तरं च तच्चित्तमलापनुतिः, येन हि सौमनस्यम्, सौमनस्याद् ऐकाग्र्यम्, ऐकाग्र्यादिन्द्रियजयः, ततश्चात्मदर्शनयोग्यता संपद्यते[४]। एतेषु अवद्यस्पर्श–निरासो नाम नागराणां शिष्टानां च तपस्विनामिवैव स्वाभाविको गुणः।

---

१. योसू. २.३९ भाष्यञ्च।

२. स्थालीपुलाकन्यायेनैषा कथा, न पुनः कार्त्स्न्येन।

३. कुमार० १.५८, ३.१६, ५४, रघु. १.३५, ९०, ९५, ३.४४, ६५, ५.२८, ८.११, ९.२२, १३.७०, १४.८२, विक्र. ३.२–प्रभृतिषु स्थलेषु।

४. योसू. २.४० भाष्यम्, योसू. ४१

तीर्थक्षेत्रेषु तपस्यतां मुनीनां जीवने पुनस्तदभावः स्वप्नेऽपि न संभाव्येत। दूर्वाङ्कुरमात्रवृत्तितयाऽपरिग्रहशीलतया च संतोषो व्याख्यातचरः। तपः पुनः कालिदाससाहित्ये त्रिंशदुत्तरैकशतकृत्वो नामग्राहं स्मर्यते[१]। स्वाध्यायश्च पार्वतीतपोवर्णनेन स्पष्टभूयिष्ठः। अत्रासावधीतिनीत्युच्यते कुमार० ५.१६ कुमारसंभव एव प्राजापत्यास्तपस्विनः वेदाख्यं ब्रह्म सम्यगामनन्ति कुमार० ६.३४ वेद एव च मोक्षशास्त्रम्, अस्ति च मोक्षशास्त्रस्यैवाध्ययनमत्र भगवतो योगदर्शनभाष्यकर्तुर्व्यासस्य विवक्षितम् योसू. २.३२। ईश्वर—

---

१. तप् शाकु. ३.२०, तपस् रघु. १३.४१, शाकु. ७.९, १२, तपस् कुमार १.२६, ५४, ५७, ५७, २.५६, ३.४, १२, २४, ७१, ७४, ४.४२, ५.२, ३, ४, ६, १८, १८, २८, २९, ३३, ४१, ५१, ५२, ५९, ६०, ६१, ६४, ८६, ६.१०, ११, १६, ७.६५, रघु. १.६९, ९४, ५.३, ५, १३, ५५, ६.२१, ८.७९, ८०, १०.२५, ४६, ११.१३, २३, ३३, ४८, ८९, १३.५०, १४.६६, १५.६, १०, १२, ३७, ५१, ५३, १७.६५, १८.९, १९.२, शाकु. १.१७, २५, ३२, २.१४, १५, १७, ३.२, ५.१, १०, १२, १५, १५, ७.१२, १२, ३४, तपस्यत् कुमार ३.१७, रघु. १५.४९, तपस्विन् कुमार ३.३४, ६५, ७४, ५.२९, ३६, ६.१०, ३४, ८.४७, रघु. १.४७, ३.१८, ९.७२, ७६, १०.१९, ११.१२, ८९, १३.४१, १४.९, ६७, ७५, १५.२७, शाकु. १.१०, १६, २४, ३१, ३२, ३३, २.१२, १४, १५, १८, १९, ३.७, ४२, ५.२, १०, १०, १०, १३, १५, २०, २९, ३१, ७.९, माल. ४.५, विक्र. १.१०, तप कुमार ४.४४, ५.२३, शाकु. ३.१४, तपन रघु. ४.१२, विक्र. ३.१६, तपनीय कुमार ८.८१, रघु. १८.४५, माल. ४.३। तपःकृश कुमार ५.६१, तपःक्लम शाकु. १.१७, पिःपरामर्श—विवृद्धमन्यु कुमार ३.७१, तपःप्रतिबन्धमन्यु रघु. ८.८०, तपःप्रभाव शाकु. ७.३४, तपःप्रभावसिद्ध रघु. १५.१२, तपःफल कुमार ५.४१, तपस्विकन्या शाकु. १.१६, २४, २.१२ तपस्विकार्य शाकु. २.१८, १९, तपस्विकार्यव्यग्रता शाकु. २.१९, तपस्विगाढा रघु. ९.७२, तपस्विदर्शनोचित शाकु. ५.१०, तपस्विनी रघु. १४.६४, शाकु. ७.३२, तपस्विवेशक्रिया रघु. १४.९, तपस्विसंसर्गविनीतसत्त्व रघु. १४.७५, तपस्विसामान्य रघु. १४.६७, तपःसमाधि कुमार. ३.२४, ५.६, तपःसाक्षिन् कुमार ५.६०, तपःसाधन कुमार ५.५२, रघु. १३.५०, तपःसिद्धि कुमार ६.११, रघु. १.९४, तपःषड्भाग शाकु. २.१४,

प्रणिधानमपि प्रपञ्चितसर्वस्वमिवात्रैवानुपदीनेन विवरणेन। तथा हि 'ईश्वर'—तत्त्वं क्षेत्राभ्यन्तरवर्त्तीति कृत्वा क्षेत्राभ्यन्तर एव योगिनो विचिन्वन्ति कुमार० ६.७७। शिवः क्षेत्रविद्भिरक्षरत्वेन प्रतिपन्नमात्मरूपं तत्त्वमात्मन्येवा—वालोकयत् कुमार० ३.५०। अष्टमूर्त्तिरीश्वरः स्थिरेण भक्तियोगेन सुलभः सन् तामसीं वृत्तिमपनीय सन्मार्गमालोकयत्विति कालिदासनाटकानां मङ्गलनान्द्यः। योगिराजो नारदो गोकर्णनिकेतमीश्वरमुपवीणयति रघु. ८.३३। ईश्वरप्रणिधानान्तो हि रघोरपि योगसमाधिः रघु. ८.२२, २४।

सामर्थ्यवचन ईश्वरशब्दः परमेश्वरेऽपि समान इति तस्यास्यार्थ—विभागाविशेषेण ६६ प्रयोगान्, ईशशब्दस्य २१ प्रयोगान्, ईशानशब्दस्य च १ प्रयोगं कालिदाससाहित्ये[१] लभामहे। इत्थमन्विष्टौ यमनियमौ कालिदाससाहित्ये स्थालीपुलाकभावेन।

## (ग) आसनम्

आसनं प्रति कालिदासो नितान्तं जागरूकः। आसनेन हि स्थिरेण

---

१. ईश् रघु. १४.३८, १८.१३, ईश कुमार २.९, ३.३४, ५९, ५.८१, ६.८०, ७.९५, रघु. २.६७, ३.६६, ४.८३, ५.१, ६२, ६.४४, ७.३३, ३७, १०.२०, ११.२०, १२.८४, १४.४३, शाकु. १.१, माल. १.१। ईशान कुमार ७.५६। ईश्वरः कुमार० ३.६३, ४.११, ६.१२, ५३, ७५, ७.३१, ७२, ८.५०, ८०, रघु. २.२, ३.३, ५, ३०, ४६, ५२, ६४, ६८, ४.६९, ७०, ८१, ८४, ५.३२, ३९, ६.२, २०, ४०, ८.५, १५, २०, ३३, ४६, ९.६, २१, २४, १०.५५, ७३, ११.१, ३५, ४०, ६१, १२.११, ८९, १३.५७, ६९, ७२, ७७, १५.७, ५८, ९०, ९१, १६.४२, १८.२४, १९.१५, शाकु. ७.४, २६, २७, माल. ४.३, विक्र. १.१, २.१८, ४.६५, ईश्वरी शाकु. ३.३३। ईश्वरेच्छा रघु. ८.४६, ईश्वरनियोगपरिपन्थी विक्र. २.१८, ईश्वरव्याहृतिः कुमार० ३.६३।

योगविवक्षित ईश्वरः क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः योसू. १.२४ वैशिष्ट्यं चेदमव्ययत्वेनेति कालिदासः। यदुच्यते तेन 'तमसः परमापदव्ययं पुरुषं योगसमाधिना रघुरि'—रघु. ८.२४ ति। गीतासु च सुप्रसिद्ध एषोऽव्ययः पुरुषो 'यस्मात् क्षरमतीत' इत्यादिभिः।

सुखेन च भवितव्यमिति भगवतः पतञ्जलेरनुशासनम् योसू. २.४६। तत्र स्थिरत्वमनन्तसमापत्त्या सुखत्वं च प्रयत्नशैथिल्येन[१] व्याख्यातचरे योसू. २.४७। तदिदं द्विविधम् १.स्थण्डिलादिरूपम् २.शारीरं चेति। सूत्राभ्यामाभ्यामाद्येन प्रथममपि संगृह्यते। व्यासभाष्यतत्त्ववैशारदीभ्यामत्रान्यथैव प्रतिपद्यते तथापि 'शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्' ६.११ इति गीतोक्तया दिशा भाष्यान्तरमपि नानुपादेयम्। कालिदासः पुनर्गीतोक्तेनैव क्रमेण प्रवर्त्तते। कुमारसंभवे शिवः खलु देवदारुद्रुमवेदिकां शार्दूलचर्मणाऽऽस्तीर्य पर्यङ्कबन्धेन समाधिमाविशति

---

१. (क) कालिदाससाहित्ये आसनशब्दो निम्नलिखितेषु स्थलेषु सुखमुपलभ्यः कुमार ३.२, ६.५३, ५३, ७.१२, ७०, ८६, रघु. २.६, ६.१, ४, ६, १६, ७३, ७.१८, ८.१८, १०.७, १३.६, ५२, १७.७, २१, २८, १८.४०, शाकु. २.१७, ६.८, ७.२६, माल. १.१३, १३, १६, २०, विक्र. ५.११। अत्र विविधाः प्रयोगाः—

आसनबन्धः 'रघु. २.६', वेत्रासनम् 'कुमार ६.५३', रत्नासनम् 'रघु. ६.४', महार्हासनम् 'रघु. ६.६', व्यवहारासनम् 'रघु. ८.१८', धर्मासनम् 'शाकु. ६.८', गजदन्तासनम् 'रघु. १७.२१', सिंहासनम् 'रघु. ६.१, १८.४०', वीरासनम् 'रघु. १३.५२', पद्मासनम् 'कुमार ७.८६', कमलासनः 'ब्रह्मा' कुमार ७.७०', अम्बुरुहासनः ब्रह्मा रघु. १३.६, अर्धासनम् 'रघु.' ६.७३, शाकु. ७.१', आसनार्धम् 'रघु. ६.१६, १७.७, आसनोपदिष्टः 'माल. १.१३', आसनस्थः 'शाकु. ७.२६, आसनपरिग्रहः 'कुमार ६.५३, माल. १.१६', क्लृप्तासनम् 'कुमार ७.१२', आसनसन्निकर्षः 'कुमार ३.२'। एतेषु योगसम्बन्धित्वं हि आसनबन्धः 'रघु. २.६', वीरासनम् 'रघु. १३.५२' चेत्यनयोरिव पद्मासनं सिंहासनं चेत्यनयोरपि शक्यसम्भवम्। व्यवहारासनधर्मासने पुनर्धर्मशास्त्रीये नीतिशास्त्रीये वा। अन्यानि पुनः सामान्यानि।

(ख) स्थिरसुखमित्यासनविशेष इति भाष्यकारः। तत्र तत्त्ववैशारदी 'स्थिरं निश्चलं यत् सुखं सुखावहं तद् आसनमिति सूत्रार्थः येन संस्थानेनावस्थितस्य स्थैर्यं सुखं च सिध्यति तद् आसनं स्थिरसुखम्। तदेतदत्र भगवतो भाष्यकारस्य संमतम्। तस्य विवरणं यथासुखमिति।'

कुमार० ३.४४–४५। तत्र पर्यङ्कबन्धो घेरण्डसंहितायां योगपट्टेन पृष्ठजानूरुजघनानां मुखाभिमुखतया बन्धः[१]। स चात्र शिवस्याङ्कमध्ये उत्तानपाणिद्वयसन्निवेशस्य वर्णनादप्राप्तप्रसरः कुमार० ३.४५[२]। एतेन भाष्यकारोक्तः पर्यङ्कोऽपि पराहतः, तस्य वाचस्पतिमिश्रेण 'जानुप्रसारितबाहोः शयनं पर्यङ्कः' इति व्याख्यानात्। वीरासनमेव पर्यङ्कबन्ध इति तु कुमारटीकायां मल्लिनाथः। वीरासनं रघु. १३.५२ च पद्मासनकल्पमेवेति रघुवंशे मल्लिनाथ–हेमाद्रि–चारित्र–वर्धनसुमतिविजयाः। तदेतदन्यत्र सावकाशमपि प्रयागोपान्तभूमिषु तपस्यतां मुनीनां समध्यासितवेदिमध्येषु शाखिष्वनवकाशमेव। ततश्च रघुवंशे वीरासनम्–'अङ्गुष्ठाग्रसंस्थित्या सूर्यविलोकनरूपतयैव' नेयं वल्लभोपदर्शितया। यदपि चात्रैव चतुर्वर्गचिन्तामणिमाश्रित्य गारुडं पुराणं चोपजीव्य 'उत्थितस्तु दिवा तिष्ठेदुपविष्टस्तथा निशि, एतद् वीरासनं प्रोक्तं महापातकनाशनम्' इति वल्लभहेमाद्रिभ्यामेव लक्षणान्तरं प्रस्तूयते

१. घेरण्डसंहितार्थं द्र. शब्दकल्पद्रुमः। दतिया–तः प्रकाशितायां घेरण्डसंहितायां वचनमिदं न लभ्यते।

२. उत्तानौ चरणौ कृत्वा ऊरुसंस्थौ प्रयत्नतः
ऊरुमध्ये तथोत्तानौ पाणी कृत्वा तथा दृशौ
नासाग्रे विन्यसेद् राजदन्तमू तु जिह्वया००'।। इति
हठयोगप्रदीपिका १.४५–४६।
तत्रैव दतिया–घेरण्डसंहितायां च वीरासनलक्षणम्–
एकं पादं तथैकस्मिन् विन्यसेदूरुणि स्थितम् ।
इतरस्मिस्तथा चोरुं वीरासनमितीरितम् ।। १.२१ ।।
मलिनाथहेमाद्री इदमेव–
एकं पदमथैकस्मिन् विन्यस्योरुणि संस्थितम् ।
इतरस्मिन् पदं चान्यद वीरासनमुदाहृतामि ।।' ति पठतः।।
वस्तुतस्तु हठयोगप्रदीपिकाया लक्षणेनैवंविधेन भाव्यम्–
एकं०० स्थितम्, पादेऽस्मिंस्तथाऽन्योरु–
इति। एतच्च पद्मासनाद् भिन्नमेव।

तदपि नात्र समञ्जसम्, वृक्षाणां रात्रावुपवेशस्याशक्यत्वात्। ततश्च पर्यङ्कबन्धः पद्मासनरूप एव, वीरासनं च वल्लभोक्ताङ्गुष्ठाग्रस्थिति–द्वारकसूर्यावलोकनरूपम्। यद्यप्यङ्गुष्ठाग्रस्थितिर्वृक्षेषु विसंवदेत्, वृक्षेषु अङ्गुष्ठानामेवाभावात् तथापि मूलानामङ्गुष्ठतया नेतुमशक्यत्वाभावात् संवादोऽपि नासुलभः। ऋषि–तद्वृक्षयोः पारस्परिकस्य साम्यस्य प्रतीत्याऽपि वीरासनपदेनर्षीणामुत्थितत्वमेव वृक्षाणामिव शक्योत्प्रेक्षम्। रघुवंशे दिलीपो निषेदुषीं नन्दिनीमासनबन्धेनानुगच्छति रघु. २.६। अत्रासनशब्दो बन्धशब्द–समभिव्याहाराच्छारीरासनपर एव। एतेन स्पष्टं यद् दिलीप उपवेशकाले यथा तथा स्वैरतया वा प्राकृतवन्नोपविशति। स हि योगासनमाबध्यैवोपवेश–सुखमुपचिनोति। योगविद्याया अप्युपासना धेनुचारणसमकालतया दिलीपेनाचरितेत्यत्रासनबन्धोऽप्यसौ लिङ्गम्। ब्रह्मदेवः 'पद्मासनस्थः' कुमारसंभवे ७.८६। अत्र पुष्पविशेषरूपाधारलक्षणासनपरत्वमिव शारीर–पद्मासनपरत्वमपि शक्योत्प्रेक्षम्। यद्यपि सिंहासननामाप्यासनं हठयोगे प्रसिद्धम्,[1] लभ्यते च सिंहासनपदं कालिदासेऽपि तथापि नास्ति तत्र शारीरासनपरत्वसंभावना, सन्दर्भशुद्धेरभावात्।

**(घ) प्राणायामः**

प्राणायाम–पदे आयामो नाम निरोधः। स च आ समन्तात् यामः यमः, अयामः अप्रच्छर्दनं वा। कुमारसंभवे शिवो निरोधादन्तश्चराणां मरुतां निरोधान्निवातनिष्कम्पः प्रदीप इवाभाति स्मारयति च भगवद्गीताम्–'यथा वातो निवातस्थो नेङ्गते सोपमा मते'–ति। मरुतामन्तश्चरणं नाम कुम्भकः। स च श्वासप्रश्वासाख्ययोः प्राणवायोराचमनवमनयोर्विच्छेद एव योगसूत्रोक्तः योसू. २.४९। विक्रमोर्वशीयनान्दीपद्ये स्थाणुरूपोऽव्ययः पुरुषो मुमुक्षावद्भिः नियमितप्राणैः सद्भिरन्तरेव मृग्यमाणोऽवष्टभ्यते। नियमितप्राणत्वं प्राणायाम–

---

१. हठयोगप्रदीपिका १.५०।

श्चेत्यनर्थान्तरमेव। शाकुन्तले मारीचाश्रमगते वाल्मीकार्धनिमग्नमूर्तिस्तपस्वी स्थाणुरचलश्च दृश्यते स्मारयति च सोऽपि गीतायाः 'नित्यः सर्वगतः स्थाणुरचलोऽयं सनातन' इति। अचलत्वेन सिद्धमस्य निरुद्धप्राणत्वं प्राणायामित्वसतत्त्वम्। अन्यत्रापि च योगाङ्गमिदं न शक्योत्प्रेक्षं यत्र हि महाकविरसौ भगवतः शङ्करस्य, पुरूरवसश्च सन्ध्योपासनं वर्णयति। सन्ध्योपासनस्याव्यभिचरितमङ्गं प्राणायामः। एष हि प्रणिधानेनापि सिद्ध्यतीत्यनुपदमेव वदामः।

**(ङ) प्रत्याहारः**

खलु विषयेभ्यो मनसो व्यावृत्तिः दे॰पू. २.५४। स चात्र 'मनो नवद्वारनिषिद्धवृत्ती'–ति पदेन कुमार ३.५० प्रकामव्याख्यानः। अभ्यास–साध्यत्वं मनोनिग्रहस्य वदता प्रत्याहरोऽपि कविना रघु. १०.२३ पद्ये कटाक्षित एव। प्रत्याहरण–विक्रमो १.१६–प्रत्याहृत–माल. ५.१६–निगृहीत रघु. १४.५२ प्रभृतिभ्यः शब्देभ्योऽपि प्रत्याहारः प्रकामं विवृतार्थः।

**(च) धारणा**

धारणा नाम चित्तस्य देहगते स्थानविशेषे बन्धः। तामिमां कण्ठरवेणैव कालिदासः स्मरति 'परिचेतुमुपांशु धारणां कुशपूतं प्रवयास्तु विष्टरम् आदद' रघु ८.१८ इति। शिवश्च चित्तं हृदि व्यवस्थापयत्येव कुमार ३.५०। स हि अधोमयूखैर्नेत्रैर्घ्राणं लक्षयत्येव कुमार ३.४०।

**(छ) ध्यानम्**

खलु प्रत्ययैकतानता[1]। तत्र मारीचाश्रमिणो रत्नशिलागृहेषु ध्यानं कुर्वन्ति शाकु. ७.१२। कुमारसंभवे कामो भूतपतेः शिवस्य यद् आस्पदं विवेश तद् ध्यानास्पदतया व्यपदिश्यते कुमार ३.४३। नवोढया

---

१. योसू. ३.२।

पर्वतराजपुत्र्या सह यन्मणिशिलागृहमीश्वरो विशति तत्र सर्वा विभूतयो ध्यानेन समभ्रियन्त कुमार ८.८१। दिलीपस्य सन्ततेर्निरोध कारणं दिदृक्षमाणो वसिष्ठः क्षणमात्रं ध्यानस्तिमितलोचनस्तिष्ठति रघु १.७३। प्रयागोपान्त—वनभूमिस्था आश्रमिणो वीरासनैर्ध्यानं जुषन्ते रघु.१३.५२। मारीचः शापवृत्तान्तं ध्यानेनावजगाम शाकु. ७.३२। शापकषायितो दुष्यन्तः शकुन्तलापरिणये ध्यानमन्दो भवति शाकु. ६.७। ब्रह्मैव हि ध्यातृत्वेनाभ्युपगन्तुं शक्यते ब्रह्मैव च ध्येयत्वेन कुमार २.१५। उपजातस्मृतिर्दुष्यन्तोऽकारणप्रत्याख्यातां शकुन्तलां ध्यात्वा शाकु. ६.९ विह्वलायते। हरिशयनपर्ववत्तयोत्कृष्टत्वेन प्रथमे आषाढशुक्लैकादशीरूपे दिवसे समाश्लिष्टसानुं मेघं दृष्ट्वाऽन्यथावृत्तिचित्तो विरही यक्षश्चिरं ध्यायति मेघ. १.३। वसिष्ठो ध्यानस्तिमितलोचनः सन् प्रणिधानेन रघु. १.७३ दिलीपसन्ततेः स्तम्भकारणमपश्यत्। रघुः प्रणिधानयोग्यया रघु. ८.१९ शरीरगतान् पञ्चापि प्राणान् वशयति। तानीमानि योगस्य सोपाङ्गान्यङ्गानि।

### (ज) समाधिश्च

य: स किल कालिदाससाहित्ये समीक्षितचर एव।

## ४. प्रकीर्णम्

### (क) एतेषु

धारणा—ध्यान—समाधि—नामान्यन्त्यानि त्रीण्यङ्गानि 'संयम'—पदेन परिभाष्यन्ते 'त्रयमेकत्र संयम' योसू. ३.४ इति। कुमारसंभवे शिवस्य मनः संयमेन स्तिमितं स्तम्भितं वोच्यते कुमार ६.५९ कण्वः संयमधनः खलु शाकु. ४.१९ मारीचाश्रमिणो विबुधस्त्रीसन्निधौ संयममाचरन्ति शाकु. ७.१२। शिवतपोवने संयमिनां मुनीनां तपःसमाधेः प्रतिकूलो वसन्तोऽवतरति कुमार ३.२४। तत्रैवोपस्थितः कामो देवदारुद्रुमवेदिकायां स्थितं संयमिनं शिवं सक्षादकरोत् कुमार ३.४४। शिव एव हि संयमिनामाद्यः कुमार ६.३४।

दिलीप: संयमिनो गुरोराश्रमं सायन्तने प्रविशति रघु. १.४८। रघु: पारसीकाञ्जेतुं स्थलवर्त्मना तथैव प्रतिष्ठते यथा इन्द्रियाख्यान् रिपून् जेतुं तत्त्वज्ञानवर्त्मना संयमी रघु. ४.६०। गुणवत्सुतरोपितश्रियो दिलीपवंशजा: खलु वय:परिणामे संयमिनां वसतिं प्रतिपेदिरे रघु. ८.११। संयमो हि सत्त्वसंश्रयसुख: शाकु. ७.१८[1] एतेषु स्थलेषु संयम: तितिक्षापरत्वेनापि क्वचिन्नीयेत।

**(ख) ईश्वर:**

प्रणिधानादपि[2] योग: प्रसिद्ध्यति चित्तवृत्तिनिरोधरूप:। तदिदमुक्तपूर्वम्। कालिदाससाहित्ये भगवत: शिवस्य विष्णोर्ब्रह्मदेवस्य च सन्ति स्तुतय:। तारकोपप्लुता देवास्तुराषाहं पुरोधाय स्वायम्भुवं धाम यान्ति कुमार २.१। स्तुवन्ति च भगवन्तं स्वयंभुवं तत्ताभिर्भूतार्थव्याहृतिभि: कुमार २.२–१५ रावणोपप्लवे पुनस्त एव भगवन्तं हरिमभिगच्छन्ति निदाघार्ता अध्वगाश्छाया–वृक्षमिव रघु. १०.५, स्तुवन्ति च तथैव रघु. १०.१५–३२ शास्त्रार्थगभीरैरुद्गारै:। एषोऽत्र विशेषो यत् कविर्भगवतो विष्णोर्मूर्त्तिमपि प्रणिधानाय सूक्ष्मतया वर्णयति शब्दमयेनालेख्येनेव। सप्तर्षय: स्मरणसमकालमेवोपेत्य भगवन्तं शिवं स्तुवन्ति कुमार ६.१५–२३ प्रशंसन्ति च तमेव भगवन्तं भूयोऽप्योष–धिप्रस्थमुपेता नगाधिराजस्य हिमालयस्य प्रमुखे कुमार ६.७५–८३ स्वयं कालिदासोऽप्यवसरेऽस्मिन् भगवत: स्तुतिवचांस्यनुद्गीर्य न संतुष्यति कुमार ६.८८, ८९, ९५। वरयात्रायां भगवन्तमिमं पशुपतिं ब्रह्मदेवो विष्णुश्चेति देवावपि पर्युपासाते कुमार ७.४३ 'जयेति' वाचमुदीरयन्तौ।

अस्ति च कालिदासस्त्रिमूर्त्तिसम्प्रदाये श्रद्धालु:। तन्मते य एव शिव: तावेव ब्रह्मविष्णू, य एव ब्रह्मा तावेव हरिहरौ, य एव च विष्णुस्तावेव

---

१. संयतशब्द: संयमनशब्दश्चापि निग्रहार्थकतया प्रसङ्गान्तरेषु रघु. ३.२०, ४२, माल. १.७, शाकु. १.८ विक्र. ३.६–इत्येवंप्रभृतिषु संदर्भेषु न न लभ्येते। वशीत्यादय: शब्दा अपि तमिमं संयमं लक्षयन्ति।

२. योसू. १.२३।

शिवब्रह्माणौ कुमार २.४, ५, ६.२३, ७.४४, रघु. १०.१६। नास्त्येतेषु भेदः। मेघदूतस्य प्रमत्तोऽपि यक्षो भगवति महाकालेश्वरे विष्णौ च नितान्तं सश्रद्धः[१]। शङ्खणसूनुर्हरिदश्वो विश्वेश्वरमाराध्य विश्वसहं नाम पुत्रमाप, रघु. १८.२४। विश्वेश्वर एष काशीपतिर्विश्वनाथ इति मल्लिनाथः। विश्वसहस्यापि तनयो हिरण्याक्षरिपोर्भगवतो विष्णोरंश आसीत् रघु. १८.२५। भगवदर्पितकर्मणां, भगवदावेशितचित्तानां च भक्तानां स एव भगवानभूयःसन्निवृत्तये गतिः रघु. १०.२७। तदिदमीश्वरप्रणिधानम्। अत्र स्वयमीश्वर एव सर्वातिशायी। स हि आत्मानमात्मन्यवलोकयति कुमार ३.५०। ईश्वरे स्थिरो भक्तियोग आशु कामधुग् विक्रमो. १.७। ईश्वरस्य स्मरणे कालिदासोऽसाधारण्येन निरत इतीश्वरशब्दस्य प्रागुद्धृतैः सन्दर्भैः स्पष्टमेव!

ईश्वरस्य वाचकः प्रणव इति भगवतः पतञ्जलेरनुशासनम् योसू. १.२७। तमिमं प्रणवमपि प्रणवशब्देनैव कालिदास उल्लिखति– 'पितामह! तासां गिरां त्वमेव प्रभवः याः खलु उदात्तादिभिस्त्रिभिर्न्यायैरुदीर्यन्ते, यासां कर्म यज्ञः, फलं स्वर्गः, उद्घातश्च प्रणवः' कुमार २.२१ इति। यैरपरामृष्टत्वेन पुरुषविशेषस्येश्वरत्वं परणमति तेषाम् 'अविद्याऽस्मितारागद्वेषाभिनिवेशानां क्लेशानाम्, तन्मूलानां पुण्यापुण्यकर्माशयानाम्, तद्विपाकानां जात्यायुर्भोगानां' च[२] 'एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु' रघु. २.५७ इत्यादिषु वचनेषु, 'मामाकाशप्रणिहितभुजम्' मेघ. २.४३, ४२ इत्यादिषु वियोगादिसमापत्तिषु, 'एषा मनो मे प्रसभं शरीरात्' विक्रमो. १.२० इत्यादिषु रागप्रसङ्गेषु, 'कुशं द्विषामङ्कुशम्'– रघु. १६.८१ इत्यादिषु शात्रवकथासु 'दशरथ–दुष्यन्तमृगयाभिनिवेशोपाख्यानेषु, 'अखण्डं पुण्यानां फलमिव च तद्रूपमनघम् शाकु. २.११' इत्यादिषु

१. मे. १.३४, ३५, ३६, ४३, ४४, ५०, ५२, ५५, ५६, ५८, ६०, २.१०, विष्णु– १.१, १५, ५७, २.४७।
२. योसू. १.२४, २.३–९, १२, १३।

पुण्योल्लेखेषु 'परावृत्तभागधेयानां दु:खं दु:खानुबन्धि'—इत्येवंप्रभृतिषु विक्रमो. ४.३ 'ममैव जन्मान्तरपातकानां विपाकविस्फूर्जथुरप्रसह्य:' रघु. १४.६२ 'आत्मानमेव स्थिरदु:खाजं पुन: पुनर्दुष्कृतिनं निनिन्द' रघु. १४.५७ 'भूयो यथा मे जननान्तरेऽपि त्वमेव भर्त्ता' न च विप्रयोग: रघु. १४.६६ 'तच्चेतसा स्मरति नूनमबोधपूर्वं भावस्थिराणि जननान्तरसौहृदानि' शाकु. ५.२—इत्यादिषु 'मरणं प्रकृति: शरीरिणाम्' रघु ८.८७ इत्यादिषु च—पातकदु:खजात्यायुर्भोगानामुद्गारेषु न नास्ति कालिदाससाहित्येऽप्ररूढत्वम्।

ईश्वरप्रणिधानेन हि अन्तरायाभावोऽपि जन्यते[१]। तत्र च मूलमीश्वर—स्याणिमादिसिद्ध्युपलक्षिता ऐश्वर्यस्य परा काष्ठा[२]। अस्ति च कालिदासस्य सा सुविदिता। अत एव तस्योद्गारा:—

**अणिमादिगुणोपेतमस्पृष्टपुरुषान्तरम् ।**
**शब्दमीश्वर इत्युच्चै: सार्धचन्द्रं बिभर्त्ति य: ॥**

कुमार ६.७५—इति,

**एकैश्वर्य—स्थितोऽपि प्रणतबहुफलो य: स्वयं कृत्तिवासा:'—**

माल. १.१ इति,

**यस्मिन्नीश्वर इत्यनन्यविषय: शब्दो यथार्थाक्षर:'—**

विक्रमो. १.१ इति,

**प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव'—**

रघु. १०.२८—इति च।

अष्टमूर्त्ति—(रघु. २.३५, कुमार १.५७, ६.२६, ७.८७, शाकु. १.१ माल. १.१—) त्वेन भगवत: संभावनातोऽपि संयमैश्वर्यस्य पराकाष्ठा सुप्ररूढा महाकवौ। ईश्वरो योगानुशासने सर्वज्ञ इति, पूर्वेषामपि गुरुरिति,

---

१. योसू. १.२९।

२. योसू. १.२४ 'यत्र काष्ठाप्राप्तिरैश्वर्यस्य स ईश्वर:'—भाष्यम्।

कालानवच्छिन्न इति चोपश्लोक्यते।[१] कालिदासोऽपि–

**सर्वज्ञस्त्वमविज्ञात'** रघु १०.२० इति,

**त्वं पितॄणामपि पिता** कुमार १.१४ इति,

**ईशो हि जगतः पिता** कुमार ६.८०–इति,

**जगद्योनिरयोनिस्त्वम्** कुमार २.९ इति,

**चतुर्वर्गफलं ज्ञानं कालावस्था चतुर्युगा ।**
**चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात् ॥**

–रघु १०.२२ इति,

**नाभिप्ररूढाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा ।**
**अमुं युगान्तोचितयोगनिद्रः संहृत्य लोकान् पुरुषोऽधिशेते ॥**

रघु. १३.६ इति च

निरर्गलप्रसरो वागारम्भेऽत्र।

ईश्वरो हि भूतानुग्रहार्थं निर्माणकायमधितिष्ठतीति भगवान् भाष्यकारो व्यासः[२]। कालिदासोऽपि तमिममभिप्रायमेवमेवानुवदति–**'लोकानुग्रह एवैको हेतुस्ते जन्मकर्मणोरि–** रघु. १०.३१ ति। **'स्वार्थो न मे काश्चित् प्रवृत्तयः'** कुमार ६.२६ इति च।

**(ग)**

यया चित्तवृत्त्या स एष भगवान् गृह्यते योगे सा प्रमाणाख्या[३]। प्रमाणान्यपि त्रीणि प्रत्यक्षम्, अनुमानम् आगमश्चेति।[४] अत्रापि कालिदासो जागरूकः। अत एवास्य दर्शनम्–

१. योसू. १.२५, २६।

२. योसू. १.२५–भाष्ये।

३. यो. १.६।

४. योसू. १.७।

**प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव ।**
**आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा ।।**

रघु. १०.२८ इति।

**प्रत्यक्षाभिः प्रपन्नाँस्तनुभिरवतु वस्ताभिरष्टाभिरीश'**

शाकु. १.१—इति च।

अयमत्र विशेषो यन्न्यायशास्त्रमनुमानाख्येन येन न्यायरूपेण हेतुना भगवन्तं सिषाधयिषति सोऽपि सत्प्रतिपक्षत्वेनाऽकिञ्चित्करः सन्नात्मलब्धये यां श्रुतिमाश्रयति तामेव कालिदासोऽत्राप्तवाक्त्वेन प्रथमयति भगवदभ्युपगतौ। स एष भगवान् बुद्धेः प्रतिसंवेदीति भाष्यकृतोच्यते[१]। कालिदासो बुद्धेरपि कारणस्याव्यक्तस्यापि कारणत्वं भगवति पश्यति—'अव्यक्तो व्यक्तकारणम्' रघु. १०.१८ इति। भगवदुपलक्षका येऽन्येऽपि विशेषाः पुराणेषु प्रसिद्धास्तानपि महाकविरसौ भागवतीषु स्तुतिषु प्रकाममुपगुम्फति। यथा चैतत् तत् तत एवावगन्तव्यम्।

**(घ)**

यथाभिमतध्यानादपि योगः प्रसिद्ध्यतीति[२] या भगवतः पतञ्जलेराज्ञा साऽपि पार्वतीतपश्चरणात् कालिदासे प्रसाधितभूयिष्ठा। पार्वत्या अभिमतः शिव एव। शिवश्च तस्या ध्यानविषयः। अत एव 'त्रिभागशेषासु सा तमेव भगवन्तं नेत्रनिमीलनास्वपि पश्यति प्रतिलभते च प्रतिबोधम् कुमार ५.५७। केयं त्रिभागशेषा निशा, कीदृश्चासौ प्रतिबोधः? व्यक्तमेव प्रतिभाप्राकाम्य—भूमिर्ब्राह्मो मुहूर्त्त एव प्रथमः, द्वितीयश्च तत्त्वज्ञानम्। प्रतीयमानमिदं न मुख्यतया प्रविभातीति तु कथान्तरम्।

एवं हि प्रपञ्चिता योगदर्शनस्य योगशास्त्रस्य वा समाधिसाधनपादागता

---

१. योसू. १.७ भाष्ये।

२. योसू. १.३९।

विषया: प्रामुख्येण, कटाक्षिताश्च लेशेन विभूतिकैवल्यपादावागता:। अथापि विस्पष्टतायै कैवल्यार्थं कालिदासस्य—

**नमस्त्रिमूर्त्तये तुभ्यं प्राक् सृष्टे: केवलात्मने ।**
**गुणत्रयविभागाय पश्चाद् भेदमुपेयुषे ।।**

—कुमार २.४ इति

**त्वमेव हव्यं होता च भोग्यं भोक्ता च शाश्वत:।**
**वेद्यं च वेदिता चासि ध्याता ध्येयं च यत् परम्।।**

कुमार २.१५—इति,

**सर्वज्ञस्त्वमविज्ञात: सर्वयोनिस्त्वमात्मभू: ।**
**सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक् ।।**

—रघु. १०.२० इति काव्यानि स्थालीपुलाकतयाऽपि प्रकामं पर्याप्तानि।

**(ङ) विभूतये पुनस्तस्यैव महामते:—**

**द्रव: संघातकठिन: स्थूल: सूक्ष्मो लघुर्गुरु: ।**
**व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु ।।**

—कुमार २.११ इति,

**साक्षाद् दृष्टोऽसि न पुनर्विद्मस्त्वां वयमञ्जसा ।**
**प्रसीद कथयात्मानं न धियां पथि वर्त्तसे ।।**

—कुमार ६.२२—इति,

**अजस्य गृह्णतो जन्म निरीहस्य हतद्विष: ।**
**स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ।।**

—रघु. १०.२४ इति,

**न सन्ति याथार्थ्यविद: पिनाकिन:'**—कुमार ५.७७ इति,

**ध्यानसंभूतविभूतिरीश्वर:** कुमार ८.८१ इति

**सत्यामपि तप:सिद्धौ नियमापेक्षया गुरुः ।**
**कल्पवित् कल्पयामास वन्यामेवास्य संविधाम् ।।**

—रघु. १.९४ इति,

**तमृषिः पूजयामास कुमारं क्लान्तवाहनम् ।**
**तप:प्रभावसिद्धाभि–र्विशेषप्रतिपत्तिभिः ।।**

—रघु. १५.१२ इति च

वचनानि स्मणसमकालमेवोपस्थितात्मानि विज्ञेषु, यदि नान्यानि गवेषणैकलभ्यानि। सन्ति च सिद्धाः, किन्नराः, यक्षाः, राक्षसाः, देवाः, पितरः, महर्षयश्च कालिदासेन निपुणमुपनिबद्धप्रभावाः। प्रसाधितभूयिष्ठ–मेतैर्विभूतिसर्वस्वं योगदर्शनस्य।

### (च) सांख्यप्रायम्

सांख्यप्रायं हि योगदर्शनम्। सेश्वरं सांख्यमेव योग इत्यपि केषाञ्चन मतिः। शास्त्रयोरनयोः परिभाषाः परस्परं संवदन्ते। कालिदासः परिभाषास्वप्यासु पटिष्ठस्तत्र तत्र ता उद्धरन्। यथा चैतत् तत् तदुद्धृतैर्वचनैः स्पष्टमेव प्रसंख्यान–प्रणिधान–धारणादि–परिभाषा–घटितैः, अव्यक्तगुणादिभिः–

**त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्त्तिनीम् ।**
**तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः ।।**

—कुमार २.१३ इति,

**पयोधरैः पुण्यजनाङ्गनानां निर्विष्टहेमाम्बुजरेणु यस्याः ।**
**ब्राह्मं सरः कारणमाप्तवाचो बुद्धेरिवाव्यक्तमुदाहरन्ति ।।**

—रघु. १३.६० इति,

**किं येन सृजसि व्यक्तम्** कुमार ६.२३ इति च

**'व्यक्ताव्यक्त–ज्ञ'**–शब्दैरपि भृशमुद्धृतचरैः।

कर्म—भक्ति—ज्ञान—पूर्वका योगा गीतादिषु प्रसिद्धाः। तेष्वपि कालिदासो न नास्त्यभ्यन्तरः **कर्मयोगार्थं** स **'सञ्चिकाय फलनिस्स्पृहस्तपः** रघु. १९.२ इति सुदर्शनस्य फलनिस्पृहं तपः स्मरति। **भक्तियोगः 'स्थाणोः स्थिरभक्तिसुलभत्वेन'** विक्रमोर्वशीयनान्द्यां स्पष्ट एव। **ज्ञानयोगश्च** समलोष्टकाञ्चने रघौ रघु. ९.१०, २१ व्यक्तः।

स्पष्टमेतेन यत् कालिदाससाहित्ये व्यवहृतो योगः सांख्यमिश्रितः पुराणाश्रितश्चापि भवति, न पुनर्योगसूत्र—तद्भाष्यमात्राश्रितः।।[१]

◈

१. निबन्ध एष उज्जयिन्यामायोजिते १९७७—वर्षीयेऽखिलभारतीये कालिदाससमारोहे शोधपत्रगोष्ठ्यां पठितो विचारितश्च'। प्रकाशित एष सागरिकायाः १६.३ अङ्के १९७७ ख्रीष्टाब्दे प्रकाशितचरे।

## (८) उत्तमं सौकुमार्यम्

महाकविः कालिदास उपेक्षितावन्तिनाथामिन्दुमतीं—

**तस्मिन्नभिद्योतितबन्धुपद्मे प्रतापसंशोषित—शत्रु—पङ्के ।**
**बबन्ध सा नोत्तमसौकुमार्या कुमुद्वती भानुमतीव भावम्[१] ।।**

इत्येवम् उत्तमसौकुमार्यां कथयति सौकुमार्यमिदं परवर्तिनि संस्कृतकाव्यशास्त्र एवं व्याक्रियते—

**या स्पर्शासहताङ्गेषु कोमलस्यापि वस्तुनः ।**
**तत् सौकुमार्यं त्रेधा स्यान्मुख्यमध्याधमक्रमात् ।।**
**अङ्गं पुष्पादिसंस्पर्शासहं येन तदुत्तमम्[२]** ।। इति,
**प्रसूनपल्लवस्पर्शासहं येन तदुत्तमम्[३]** ।। इति वा।

अत्र प्रश्नः—

कालिदासो लक्षणमिदमूरीकुरुते न वा।

यद्युच्येत 'ऊरीकुरुत' इति, तर्हि प्रष्टव्यं 'प्रसूनादि'—स्पर्शासहत्वमत्र तेनोपनिबद्धं, न वा, वर्णनीयगततया। यद्युच्यते 'अष्टमे सर्गे तदुपनिबध्यते, यत्र सुरपुष्पस्पर्शस्तस्या जीवितापहर्तृत्वेनोपनिबध्यत'[४]—इति तत उच्यतां ततः पूर्वे षष्ठे सर्गे कथमिवास्या परिभाषाया अर्थस्यावगमः। न च तात्कालिके समाजे तथा प्रसिद्धेर्नेदमसंभाव्यमिति वक्तव्यम्,

---

१. रघुवंशस्य ६.३६

२. रसार्णवसुधाकरस्य १.१८४—५,

३. भावप्रकाशस्य ३.२२०

४. रघुवंशस्य ८.४५—६

तादृशप्रसिद्धौ मानाभावात्। न हि पदमिदं कालिदासपूर्ववर्त्तिभिः भरतादिभिरलङ्कारशास्त्रप्रजापतिभिराद्रियते येनास्य प्रसिद्धत्वमुपगम्येत, न वा कोषादिष्वेवास्य संग्रहो दृश्यते, येनास्य प्रकारान्तरावगतार्थत्वमभिमन्येत। किं च पुष्पस्पर्शासहत्वे मार्दवमेव कविनोत्प्रेक्ष्यते, न सौकुमार्यम्, यथोच्यते तेन–

**अथवा मृदु वस्तु हिंसितुं मृदुनैवारभते प्रजान्तकः ।**
**हिमसेकविपत्तिरत्र मे नलिनी पूर्वनिदर्शनं गता**[१] ।। इति।

अन्यद्धि सौकुमार्यम्, अन्यच्च मार्दवमिति नाविदितम–लंकारशास्त्रविदुषाम्। यथा चैतत् तद् शृङ्गारालम्बन उद्दीपनतयाभिमतानां गुणानां–

**यौवनं रूप–लावण्ये सौन्दर्यमभिरूपता ।**
**मार्दवं सौकुमार्यं चेत्यालम्बनगता गुणा**[२] ।। इति

या गणना तस्यां मार्दव–सौकुमार्ययोः पार्थक्येनोद्देशात्, यानि चामीषां लक्षणानि तत्रापि–

**स्पृष्टं यच्चाङ्गमस्पृष्टमिव स्यान्मार्दवं हि तत्**[३] ।। इति
**सुखस्पर्शत्वमेवाहु–र्मृदुत्वमिति तद्विदः ।**
**अन्ये तु स्पृष्टमपि यदस्पृष्टमिव भाव्यते ।**
**तदेव मार्दवमिति कथयन्ति मनीषिणः**[४] ।। इति

च मार्दवस्योपर्युक्तात् सौकुमार्यस्य लक्षणात् पार्थक्येन स्पष्टभूयिष्ठमेव। अस्ति च महाकविरेष एवंविधे विषये मार्दवप्रतिपादकशब्दप्रयोगस्याभ्यासी।

---

१. रघुवंश ८.४५–६

२. रसार्णवसुधाकरस्य १.१६३

३. रसार्णवसुधाकरस्य १.१८४

४. भावप्रकाशस्य ३.२१९–२१

स हि भगवत्याः पार्वत्या वल्कलबन्ध–जटाधारण[१]–मौञ्जीभरण[२]–रुद्राक्षप्रणय[३]–स्थण्डिलस्वाप[४]–विलासचेष्टा–विलोलदृष्टिपरिहरण[५]–वृक्षसेचन[६]–मृगलालन[७]–दीक्षितव्रतादिषु[८] तपःक्रमेषु फलोपधायकत्वमवीक्ष्य यदा तामेव भगवतीं पञ्चाग्नितपनादिषु नियोजयति तदा तपोगतां कठोरतां तद्वपुर्लतागतं मार्दवं च वीक्ष्य ब्रवीति–

**यदा फलं पूर्वतपःसमाधिना न तावता लभ्यममंस्त काङ्क्षितम् ।**
**तदानपेक्ष्य स्वशरीरमार्दवं तपो महत् सा चरितुं प्रचक्रमे ।।** इति

**क्लमं ययौ कन्दुकलीलयापि या तया मुनीनां चरितं व्यगाह्यत ।**
**ध्रुवं वपुः कांचनपद्मनिर्मितं मृदु प्रकृत्या च ससारमेव च[९] ।।** इति च

अत्र स्पष्टमेवासौ मार्दवमेव कठोरतपोविपरीतं वदति। तपोवर्णनोप–संहारेऽप्यसौ–

**मृणालिका पेलवमेवमादिभिर्व्रतैः स्वमङ्गं ग्लपयन्त्यहर्निशम् ।**
**तपः शरीरैः कठिनैरुपार्जितं तपस्विनां दूरमधश्चकार सा ।।[१०]** इति

मार्दवाभिप्रायकं पेलवशब्दमेव तथा प्रयुङ्क्ते यथा तपोवनगमनोद्योगारम्भ–वर्णनप्रस्तावे मेनाया उक्तौ–

**मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः ।**
**पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्त्रिणः ।।[११]** इति

एषु शिरीष–मृणालिका–काञ्चनपद्मानां साचिव्येन मार्दवं व्याख्यातप्रायमपि।

न च 'यथात्र शिरीषपुष्पं मार्दवाय प्रयुज्यते तथैव सौकुमार्यायापि कालिदासेनैव–

१-८. कुमारसंभवे ५.८–१६
९. कुमारसंभवे ५.१८, १९
१०. कुमारसंभवे ५.२९
११. कुमारसंभवे ५.४

**शिरीषपुष्पाधिक–सौकुमार्यौ बाहू तदीयाविति मे वितर्कः ।**
**पराजितेनापि कृतौ हरस्य यौ कण्ठपाशो मकरध्वजेन ।।**[१] इति

प्रयुज्यमानं पश्यामः। एतेन स्पष्टं यत् कालिदासो मार्दव–सौकुमार्ययोरभिन्नतामेव पश्यति। अत एव च मल्लिनाथोऽपि पूर्वोद्धृते रघुवंशस्थले, तथाविधेष्वेव च कुमारपद्येषु सौकुमार्यपदाय मार्दवादिकं पदमेव पर्यायतया प्रस्तवीति। तेन नास्ति मार्दवादिशब्दप्रयोगेऽपि सौकुमार्यक्षतिरि–ति वाच्यम्, तथा सति भवद्भिरप्यभेद एव प्रतिपाद्येत मार्दव–सौकुमार्ययोः, प्रतिपाद्येत च षड्विधत्वमेवालम्बनगुणानाम्, न सप्तविधत्वम्। ततश्च पूर्वोक्तेन क्रमेण मार्दवं स्वातन्त्र्येण लक्षयित्वा यद्–

**याभ्यां दुकूलान्तरलक्षिताभ्यां विस्रंसते स्नैध्यगुणेन दृष्टिः ।**
**निर्माणकालेऽपि ततस्तदूर्व्वोः संस्पर्शशङ्का न विधेः कराभ्याम् ।।**[२]

इत्थमिदमुदाह्रियते स सर्वोपि प्रयासो निरर्थक एव। यदि च–

**'अत्रामूर्ता अपि दृष्टिर्विस्रंसते, मूर्तौ किमुतेति श्लक्ष्णतातिशयान्मार्दव–मि–'ति**

एतत्पद्यवृत्तिदर्शितेन पथा श्लक्ष्णतां स्वालक्षण्यीकृत्य निनीष्यते भेदं सौकुमार्यान्मार्दवं, तर्हि तत्रापि वक्तव्यं कालिदास एतन्मनुते न वेति। मृदुत्वमुपनिबध्नन्नेष तदाश्रये नायिकाङ्गविशेषे तदुपमानभूते शिरीषादौ वा क्व नु श्लक्ष्णतामिमामुपर्युक्तेषु स्थलेषु निबध्नाति? यत्र च–

**स्थिताः क्षणं पक्ष्मसु ताडिताधराः पयोधरोत्सेधनिपातचूर्णिताः ।**
**वलीषु तस्याः स्खलिताः प्रपेदिरे चिरेण नाभिं प्रथमोदबिन्दवः ।।**[३]

इत्यादिषु श्लक्ष्णतामिमामुपनिबध्नाति तत्र क्व नु खलु मार्दवादिपदमेष

१. कुमारसंभवे १.४१

२. रसार्णवसुधाकरे १.८०–उदा०

३. कुमारसंभवे ५.२४

प्रयुङ्क्ते? ततश्चान्यादृशे एव मार्दव–सौकुमार्ये कालिदासस्य, अन्यादृशे एव च परवर्त्तिनामलंकारशास्त्रशिल्पिनाम्।

तत्र प्रश्नः–

कालिदासाभिमते मार्दवसौकुमार्ये किंलक्षणके इति।

अत्र पश्यामः–

## सौकुमार्यस्य लक्षणम्

यदेव कौमार्यं तदेव सौकुमार्यमिति। किं न्विदं कौमार्य–मिति चेद् अजरठत्वमिति गृहाण। ननु परिचय एष, न लक्षणमिति चेत् कुमारेष्वनु–संदधीष्व। ननु 'अनिर्वर्त्तित–विवाह–मङ्गला जरठा अपि केचित् कुमाराः, तत्र किमुत्तरमि'ति चेत्, कुमारप्रकाशा हि ते, न कुमाराः। अलं चात्रैतेषां स्मरणेन कौतुकागार इव नाडिकाच्छेदेन। कौमार्यमत्र विचारयामहे, न कुमारान्, अप्रसंगसाम्प्रतमेवात्र तत्, ब्राह्मण–त्वविचार इव ब्राह्मणश्रमण–विचारदौरात्म्यम्। यच्च कौमार्यं तद् कस्य न विदितम् आरूढकुसुमा–युधसोपानस्य। को नामात्र तादृशो यः समुपचितायां कामसोपानारुरुक्षायां नो नामानुभवति सौकुमार्यदौर्बल्यमात्मसंविदि। एतदेव हि चाञ्चल्यं येन निगडितचेतसः कुमाराः परस्परप्रीतिबन्धरूपं सौभाग्यमेवाभिकाङ्क्षन्ति, न विप्रलम्भम्, अन्योन्यासंपर्करूपम्। उपलक्षणं चैतत्। असंजातकामेष्वपि सौकुमार्यस्यास्य दृष्टचरत्वात्। स्मरन्तु श्रीमन्तः शाकुन्तलस्य चतुर्थेऽङ्के शाश्वते ब्रह्मणि स्थितं तातकाश्यपं–'यास्यत्यद्य शकुन्तले'–ति निबिडितोत्कण्ठम्। स्मरन्तु च भवन्तो मातरि दिवमुपगतायां मुक्तकण्ठं विलपन्तं कञ्चित् षष्टिवर्षीयमपि पुत्रम्। सेयं रसपिच्छलतासतत्त्वा स्नेहपिच्छलतैव वस्तुतश्चेतनगता सुकुमारता। इन्दुमत्या अपि सत्त्वमीदृशमेव। सा ह्यनूढा कन्या। यवीयसी च वयसा। ततश्च द्वितयमपि तत्र वर्त्तते, ज्ञातिप्रीतिः, मनोभवरतिश्च। युज्यते च तत्। यन्मनःकन्दः पितृकुलकर्दमे

प्रीतिमृणालानि पुष्यन्नपि पतिगृहसूर्याय रतिनालमुत्पुष्यति सा पद्मिन्येव हि भारतीया कुलकन्या। नालमिदमन्तर्निगूढं बुद्धिकमलं तदैवोत्कोशयति यदा पतिमुखप्रभाकरं पश्यति, तमेव च पतिप्रीतिकरं प्रमिणोति येनास्य कोश एष व्याकोशीमश्नुते। इयमेव हि कुमारीणां गतागतता या 'न ययौ न तस्थावि'–ति कालिदासेनैव कटाक्ष्यते। इयमेव च तासां सुकुमारता।

**सौकुमार्यस्य उत्तमत्वम्–**

अस्यामपि सुकुमारतायां यदा जन्मान्तरसंज्ञाभिज्ञत्वनियमितं रतिगतम् एकमात्रनिष्ठत्वं विशेषणीक्रियते तदा तत्र उत्तमत्वमाधीयते। ननु मनोराज्यमेतद् यदुच्यते भवद्भिरिति चेत् किमत्र करवाम, कालिदास एवात्रास्मानभिषिञ्चति। स एव हि–

**कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव ।**
**वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः ॥** इति

**अङ्गमनङ्गक्लिष्टं सुखयेदन्या न मे करस्पर्शात् ।**
**नोच्छ्वसिति तपनकिरणैश्चन्द्रस्यैवांशुभिः कुमुदम् ॥** इति च

एकनिष्ठतामिमामेवमेवोपच्छन्दयति शाकुन्तल–(५.२८) विक्रमोर्वश्योरपि (३.१६) अत्रापि 'यतो हि सा उत्तमसौकुमार्या तत उज्जयिनीनाथः सन्नपि भानुमानिव गुणवान् कुमुद्वत्या इव तस्या भावबन्धपात्रतां नानर्ज इति साकूतमेवेमामेकनिष्ठतां तदाश्रितमुत्तमत्वं च सौकुमार्यगतमुपश्लोकयति। न च घुणाक्षरिकमेतद्, अग्रेपि राजान्तरवैराग्यतन्त्रोन्मीलने–

**अथाङ्गराजादवतार्य चक्षुर्याहीति जन्यामवदत् कुमारी ।**
**नासौ न काम्यो न च वेद सम्यग् द्रष्टुं न सा, भिन्नरुचिर्हि लोकः ॥**

(रघुवंशे ६.३०)

**तस्याः प्रकामं प्रियदर्शनोऽपि न स क्षितीशो रुचये बभूव ।**
**शरत्प्रमृष्टाम्बुधरोपरोधः शशीव पर्याप्तकलो नलिन्याः ॥** (६.४४)

नृपं तमावर्त्तमनोज्ञनाभिः सा व्यत्यगादन्यवधूर्भवित्री ।
महीधरं मार्गवशादुपेतं स्रोतोवहा सागरगामिनीव ॥ (६.५२)

प्रलोभिताप्याकृतिलोभनीया विदर्भराजावरजा तयैवम् ।
तस्मादपावर्त्तत दूरकृष्टा नीत्येव लक्ष्मीः प्रतिकूलदैवात् ॥ (६.५८)

स्वसुर्विदर्भाधिपतेस्तदीयो लेभेऽन्तरं चेतसि नोपदेशः ।
दिवाकरादर्शनबद्धकोशे नक्षत्रनाथांशुरिवारविन्दे ॥ (६.६६)

इत्येवमस्य तथैव प्रवृत्तेः तथैव च प्रवृत्तेः—

रतिस्मरौ नूनमिमावभूतां राज्ञां सहस्रेषु तथा हि बाला ।
गतेयमात्मप्रतिरूपमेव मनो हि जन्मान्तरसंज्ञितज्ञम् ॥ (७.१५)

शशिनमुपगतेयं कौमुदी मेघमुक्तं
जलनिधिमनुरूपं जह्नुकन्यावतीर्णा ॥ (६.८५)

इत्येवं भावबन्धहेतुमुपनिबध्नतः। अत एवोपनिबध्यतेऽन्वयव्यतीरेका-भ्यामप्ययमेवाभिप्राय एवम्—

व्यतिषजति पदार्थानान्तरः कोऽपि हेतु-
र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥[1] इति

भवति हृदयहारी कोऽपि कस्यापि जन्तोर्न
खलु गुणविशेषः प्रीतिबन्धप्रयोगे ।
किसलयति वनान्ते कोकिलालापरम्ये
विकसति न वसन्ते मालती कस्य हेतोः ॥[2] इति च।

---

१. उत्तररामचरिते

२. नलचम्प्वाम्

ततः कुमारीणां यत् स्नेहपिच्छलत्वं तत् सौकुमार्यम्, या च तत्रैकमात्रनिष्ठता तत् तस्योत्तमत्वमिति प्रबन्धोत्तमिममाबध्नता कालिदासेनैव सुमेधसाऽमुष्मिन्नेव प्रकरणे सद्भ्य उपदीकृतम्।

**सौकुमार्यस्य लाक्षणिकाः प्रयोगाः**

यच्चानेन **'शिरीषपुष्पाधिकसौकुमार्यौ बाहू तदीयाविती'**—ति विषयान्तरेऽपि सौकुमार्यपदं प्रयुज्यते तत्रैवं प्रतिपत्तव्यम्—

स्नेहपिच्छलत्वरूपं "सौकुमार्यं हि मुख्यतो मनोधर्मः, स्नेहस्य मनोधर्मत्वात्, तत्सत्त्वे च यज्जीवच्छरीरगतं धातुमार्दवं तदपि सौकुमार्यपदवाच्यमेव, गुणवृत्त्या। न हि मधुमिश्रं क्षीरमक्षीरमित्युच्येत, न वा सर्पिर्मिश्रं दध्यदधीति। यच्च तादृशसौकुमार्यासद्भावे जीवच्छरीरगतं धातुमार्दवं यच्च निर्बीजद्राक्षादिगतमकठोरत्वरूपं मार्दवं तच्च मार्दवमेव शुद्धम्। तस्यापि कृते यत् सौकुमार्यपदं प्रयुज्यते तददूरविप्रकर्षात्। यदुच्यते भोजेन—"अदूरविप्रकर्षात्तु द्वयेन द्वयमुच्यते" इति। अत एव तादृशे विषये मृदु—मार्दवादय एव शब्दा महाकविनानेन प्रयुक्ताः, न सुकुमारादयः। सैषा कालिदासस्य धीः।

अत्र प्रश्नः—

कालिदास—शिङ्गभूपालादिषु कस्य मतं मान्यं कस्य च प्रत्याख्येयमिति।

अत्र विचारयामः—

शिङ्गभूमिपालेन सौकुमार्यतया यद् असहिष्णुत्वमङ्गीक्रियते तत् हृदयाधिकरणकमित्येव वक्तुं शक्यते। तथाहि यदेव मांसपिण्डं म्लेच्छः स्पृहयते, तदेव जैनमुनिः द्रष्टुमपि न क्षमते। सोऽयमसहिष्णुभावः किंनिष्ठः, ऋते चित्तम्। यस्मादेव कन्याविक्रयादार्यो जुगुप्सते तमेव यवनो बहु मनुते। सोऽयं कन्याविक्रयासहभावः क्व तिष्ठति, ऋते मानसम्। किं च जीवतश्चक्षुः

कण्टकस्य स्पर्शमपि न सहते, मृतस्य तु वेधमपि, घातमपि, दाहमपि। सिद्धमेतेन यद् वस्तुतः सहिष्णुत्वासहिष्णुत्वे केवलस्य जीवमात्रस्य धर्मतां भजेते, न तु शरीरादेः कस्यचित् तदतिरिक्तस्य। यदि च शरीरनिष्ठतयैव सौकुमार्यमूरीक्रियते तर्हि तद्गतानामुत्तममध्यमाधमत्वानां विषयविभागो न स्यात्। यस्यामेव पर्वतराजतनयायां शिङ्गभूपालो—

**महार्हशय्यापरिवर्तनच्युतैः स्वकेशपुष्पैरपि या स्म दूयते ।**
**अशेत सा बाहुलतोपधायिनी निषेदुषी स्थण्डिल एव केवले[1] ॥**

इति पद्यमुदाहृत्योक्तमं सौकुमार्यमुत्प्रेक्षते तस्यामेव—

**पाणिस्पर्शाद्यसहनं सौकुमार्यं तु मध्यमम्[2]** इति
**न सहेत करस्पर्शं येनाङ्गं मध्यमं तु तद्[3]** इति च

लक्षणमनुसृत्य—

**कृताभिषेकां हुतजातवेदसं त्वगुत्तरासंगवतीमधीतिनीम् ।**
**दिदृक्षवस्तां मुनयोऽभ्युपागमन् न धर्मवृद्धेषु वयः समीक्ष्यते[4] ॥**

इत्यादिषु वर्णनेषु त्वगुत्तरासंगस्पर्शसहिष्णुत्वेन मध्यमादपि हीनमेव सौकुमार्यमुत्प्रेक्ष्येत, उत्प्रेक्ष्येत च—

**'शीतातपाद्यसहनं सौकुमार्याधमं भवेदि[5]'** ति,
**'येनाङ्गमातपादीनामसहं तदिहाधमम्[6]'** इति च

लक्षणमनुसृत्य—

**शुचौ चतुर्णां ज्वलतां हविर्भुजां शुचिस्मिता मध्यगता सुमध्यमा ।**
**विजित्य नेत्रप्रतिघातिनीं प्रभामनन्यदृष्टिः संवितारमैक्षत ॥**

---

१, ४. कुमारसम्भवस्य ५.१२—२१

२, ५. भावप्रकाशनस्य ३.२१९

३, ६. रसार्णवसुधाकरस्य १.१८६

**तथातितप्तं सवितुर्गभस्तिभिर्मुखं तदीयं कमलश्रियं दधौ ।**
**अपाङ्गयोः केवलमस्य दीर्घयोः शनैः शनैः श्यामिकया कृतं पदम्[१] ॥**

इत्यादिषु अपाङ्गश्यामिकादिभिर्विक्रयाभिश्च अधमत्वमपि।

अयमत्रापरः प्रश्नो यद् मध्यमाधमत्वयोः जनकतया ये दोषा अत्र प्रतिपादितास्तेषामभावस्य तत्प्रतिकूलानां विशेषाणां वा सद्भावस्य वर्णनदर्शने तत्रैव शरीरे किमुत्प्रेक्ष्येत? अधमगतानां दोषाणामभावे मध्यमता, मध्यमगतानां च तेषामभाव उत्तमता वा तत्र वीक्ष्येत, केवलमुत्तमत्वमात्रं वा सर्वत्र।

यद्युच्यते दोषाभावमात्रं तत्, न तु गुण इति, तदपि न विचारसहम्, सौकुमार्ये सत्येव दोषास्तस्यापकर्षेण मध्यमतामधमतां वा तत्र सृजन्ति, ततश्चोत्तमत्वमात्रमेते प्रतिबध्नन्ति। सति चैवमेषामपगम उत्तमत्वमात्रं तत्र प्रतिप्रसूयेत नान्यत्। यद्युच्यते 'स्यादेवम्, का हानिरि—'ति, तत्र पृच्छ्यते 'य इमे दोषास्ते कीदृशा भवन्ति, आहार्या वा शरीरधातुगता वा। धातुगता एवेति चेत् तत्रेमे कथमिवोत्पद्यन्ते, अभ्यासादिति चेत् अभ्यास एष कथमिवापतति, स्वेच्छया बलाद् वा। ननु पार्वत्यादिषु—

**इयेष सा कर्तुमवन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः ।**
**अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः ॥[२]**

इति दर्शितेन पथा तादृशस्यास्याभ्यासस्य स्वेच्छोपनतत्वमेवेति चेद् उच्यताम्, अधमत्वायापि कश्चित् स्पृहयते किम्, स्पृहयते च कश्चित् काञ्चिदर्जिता—धमभावामपि। स्पृहयते च शिवः पार्वतीं तादृशतपःसमाधेरूर्ध्वमेव 'अद्य प्रभृत्यनवताङ्गि तवास्मि दासः क्रीतस्तपोभिरि[३]'—ति। ततश्च स्थितमेतद् यदभ्यास उत्तमत्वायैव क्रियते, दोषाश्च येऽभ्यासादुत्पद्यन्ते तैरुत्तमत्वमात्रं

---

१. कुमारसम्भवस्य ५.१२—२१

२. कुमारसंभवस्य ५.२

३. कुमारसंभवस्य ५.८६

प्रसूयते, न मध्यमत्वं न वाधमत्वम्। यदि वा वक्तव्यं प्रसून—पल्लव—पाणि—शीतातपादीनां स्पर्शस्य सहिष्णुत्वासहिष्णुत्वमुत्तमत्वं न व्याहन्ति। अत एव भवद्भिरप्युच्यते 'महार्हशय्यापरिवर्त्तने'—ति पद्ये पार्वत्याः सौकुमार्य उत्तमतां साधयद्भिः—

**'अत्र यद्यप्युत्तरार्धे स्थण्डिलस्पर्शसहत्वमुक्तं तथापि तेन स्थिराग्रहस्य मनसः एव क्लेशसहिष्णुत्वं प्रतीयते, न शरीरस्येत्यत्रोत्तम—सौकुमार्यमुपपद्यते।'** इति

शरीरस्य क्लेशादिसहिष्णुत्वं यथा नोपपद्यते तदस्माभिः प्रतिपादितमेव। ततश्च मनसः क्लेशसहिष्णुत्वमभ्यासादर्ज्यते, मनस्येव च सौकुमार्ये तिष्ठतीति शिथिलाशिथिलावयवत्वादेः दोषविशेषस्य नास्ति तत्र प्रतिबन्धकत्वम्, तेषां धातुमात्रसीमितत्वात्। धातुगत्वेन मतानां चैषां दोषाणामदोषत्वमेव परिणमति, तादृशस्यैव शरीरस्य कालिदासादिभिः प्रशस्यत्वेन वर्णितत्वात्। यथा चैतत् तद् अभिज्ञानशाकुन्तलस्य **'न च ग्रीष्मस्यैवं सुलभमपराद्धं युवतिषु—'**[१] इति, कुमारसंभवस्य च **'ध्रुवं वपुः काञ्चनपद्मनिर्मितं मृदु प्रकृत्या च ससारमेव च'**[२]—इति पद्येन स्पष्टम्। अस्ति चैतदस्माभिः स्वकीयेन 'पार्वतीतपोरहस्यमि'[३]—ति संदर्भेण विशदीकृतभूयिष्टम्। विशदीकृतमस्माभिस्तत्र यद् भगवती पार्वती हि पाञ्चभौतिकेन शरीरेण मृत्युञ्जयत्वम् अर्जितुमेव तपश्चचार, तदर्थे च 'रविशशिदीक्षितपञ्चभूत'—मूर्तेः भगवतोऽष्टमूर्तेः पञ्चभूतात्मकेन वपुषा स्ववपुषः सात्म्यं प्रतिष्ठापयामास। अर्जितमृत्युञ्जयभावैव हि सा पशुपति—नार्धशरीरभाक् कृता, पशुपतेरपि मृत्युञ्जयत्वात्, सौभाग्यस्याखण्डतायाश्च वैपरीत्येन साधयितुमशक्यत्वात्।

---

१. शाकुन्तले ३.७

२. कुमारसंभवे ५.१९

३. सागरिकायां प्रकाशितम्

एवं च वपुषः ससारत्वं मनसः सौकुमार्यं च भारतीयानामस्माकं नारीशरीरेऽपि स्पृहणीयतयाभिमतमिति नास्त्येव भीतिः स्त्रीशरीरस्य धातुगतात् ससारत्वादपि। न हि ततः सौकुमार्यमपक्षीयते, न वा तद्गतमुत्तमत्वमेव। योगसिद्धस्य परिशुद्धनाडीचक्रकस्य च शरीरस्य ननु लक्षणमेवेदं यदिदं प्रकृत्या मृदु भवदपि ससारमेव भवति। किं च बलिष्ठस्य पुरुषस्य एकस्त्रीनिष्ठतायै स्त्रीशरीरस्यापि बलीयस्त्वमेव सामाजिकाः स्पृहयन्ते, न दुर्बलत्वं, न वा हीनसारत्वम्। न चानयोर्बाध्यबाधकभावोपि कश्चिद् येनैकमपरेण परिहीयेत, कालिदासेनैव तत्र प्रकृत्या मृदुनः अवयवसंश्लेषेण ससारस्य च काञ्चनस्य दृष्टान्ततयोपस्थापितत्वात्। इयमेव सा सृतिर्यतः स्त्रीशरीरे रेखाविभक्तता,[१] सुविभक्तगात्रता,[२] चतुरस्त्रशोभिता,[३] तूलिकोन्मीलितचित्रोपमता,[४] सूर्यांशुविकचीकृतारविन्दसदृशता,[५] वोपदीक्रियते, सत्त्ववतां यूनां बहुमानपात्रता च समुपजायते। 'दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः'[६] इति नारीशरीरस्य सुश्लिष्टसन्धिबन्धतापि वस्तुतस्तामेव दिशमभिसरति। न च संभवति तदभावे स्त्रीणां वीरप्रसूत्वम्। पार्वतीशरीर इममेव विशेषमवेक्ष्य ब्रह्मदेवेनोदीर्यते—

**उभे एव क्षमे वोढुमुभयोर्बीजमाहितम् ।**
**सा वा शम्भोस्तदीया वा मूर्तिर्जलमयी मम ।।**[७] इति

उत्तमत्वायाभिमतानां पुष्पादिस्पर्शसहिष्णुत्वाभावानां सत्त्वे कथं वा काचनापि रतिसंघर्षं विलयावधि सहेत, पर्यवसन्नरतिचक्रा च बीजमादातुं क्षमेत। ततश्च शिथिल एव श्रीमतः शिङ्गभूमिभुजः पक्षः।

---

१-२. कुमारसंभवे ७.१८
३-५. कुमारसंभवे १.३२
६. मालविकाग्निमित्रस्य २.३
७. कुमारसंभवे २.६०

इत्थं च प्रागुक्तं शास्त्रार्थप्रपञ्चमेवं संगृह्णीमहे—

सौकुमार्यं मनोधर्मोऽसहिष्णुत्वप्रसाधकम् ।
अभावे यस्य दाहादियातनां सहते मृतः ॥ १ ॥

मार्दवं देहमात्रस्य धर्मः कोमलताभिधः ।
यद्वशान्मर्दितुं वाञ्छा द्राक्षादीन् प्रति जायते ॥ २ ॥

यस्मिन् देहेऽनयोर् द्वन्द्वं द्वयोर्वै जायते तथा ।
सर्पिर्दध्नोर्यथा क्षीरमधुनोर्वापि, तत्र तु ॥ ३ ॥

सौकुमार्यपदं ताभ्यां द्वाभ्यामेव प्रयुज्यते ।
दधि सर्पिर्युतं नैवादधीति व्यपदिश्यते ॥ ४ ॥

न वा मधुयुतं क्षीरमक्षीरमिति कथ्यते ।
यत्र जीवच्छरीरेऽपि सौकुमार्यं न लभ्यते ॥ ५ ॥

धातुकोमलता तत्र मार्द्दवेत्यादिशब्दभाक् ।
अजीवति शरीरेऽपि पिण्डाह्वे सैव वाग्गतिः ॥ ६ ॥

यत्र क्वचिदजीवेऽपि शरीरे धातुमार्द्दवम् ।
सौकुमार्यपदस्पर्शि, गुणवृत्तिस्तदाश्रयः ॥ ७ ॥

अदूरविप्रकर्षात् तु द्वयेन द्वयमुच्यते ।
अकठोरत्वधर्मस्तु सुकुमार—मृदुत्वयोः ॥ ८ ॥
समान[१] इति कृत्वा ते अन्योन्यपरिवृत्तिनी ।

लक्षणं सौकुमार्यस्य रसपिच्छलताऽऽत्मनः ॥ ९ ॥
स्नेहपिच्छलताशब्दादपि तद् वक्तुमर्ह्यते ।

रतिपिच्छलता यूनां तद्व्याप्या या स्मृता बुधैः ॥ १० ॥

---

१. तदुभयाधिकरणवृत्तित्वेनेति यावत्

सा तेषां सुकुमारत्वं, तद्गता यैकनिष्ठता ।
कालिदासमतेनेदमुत्तमत्वं हि तद्गतम् ॥ ११ ॥

अन्येषां लक्षणं यत् तन्मार्दवस्यैव लक्षणम् ।
तत्रोत्तमत्वमध्यत्वाधमत्वानि रसार्णवे ॥ १२ ॥

भावप्रकाशने वापि लक्ष्यन्ते युक्तमेव हि ।
नास्ति चात्र विसंवादो कालिदासमतेरपि ॥ १३ ॥

◈

## ( ९ ) कालिदाससाहित्ये चित्रकला

एका कला कलान्तरेऽलङ्कारत्वं व्रजतीति प्रतीतचरं विदुषाम्। तत्र काव्यमपि कला। तस्या: शब्दैकसंवेद्यत्वेऽपि ततश्चापरोक्षज्ञानविषयत्वेऽपि प्रत्यक्षज्ञानविषया संगीतं, मूर्त्ति:, चित्रञ्चेति तिस्रोऽपि कला अङ्गभावम–लङ्कारभावापरपर्यायं व्रजन्त्येव।[१] कालिदासो ह्यस्माकं मूर्धन्य: कवि:। तस्य काव्येष्वपि कलान्तराणि निष्प्रयासमेवालङ्कारभावं भजन्ति। तद्यथा चित्रकला।

### १. नामोल्लेख:

कलामिमां कालिदासो नामतोऽप्युल्लिखति, अनेकवारं चोल्लिखति तथाहि–

१. रघुवंशस्य द्वितीये सर्गे दिलीपो गुरोर्वसिष्ठस्य यज्ञधनं नन्दिनीं रिरक्षिषु: धातुमय्यामधित्याकायामिव पाटलायां तस्यां स्थिते लोध्रद्रुम इव केसरिणि प्रजिहीर्षति, तदर्थं च तूणीराद् बाणमुद्दिधीर्षति। केसरी च साधारण: केसरी नास्ति। स हि भगवता शिवेन पार्वतीपुत्रीकृतं वन्यद्विपोन्मथितत्व–चमतस्सेनान्यमिव पार्वतीशोकविषयं देवदारुं रक्षितुं नियुक्त: लम्भित–तत्परिसरागतजीवभक्षणाधिकारश्च। नन्दिनी च तं परिसरं प्रविष्टवती, तत: केसरिणा सा समाक्रान्ता। उचितं च तदिति प्रजिहीर्षोर्दिलीपस्य बाणमोक्षप्रवृत्तिस्तत्र विफलायते। तस्य दक्षिण: पाणि: सायकपुङ्ख एव सक्ताङ्गुलिस्तिष्ठति। तत्र तस्य दिलीपस्य

---

१. यथाऽवोचामात्मन: काव्यालङ्कारकारिकायाम्–

यच्च शब्देषु पद्यत्वं सा सङ्गीतकला प्रिया ।
कला कलान्तरे यस्मादलङ्कारत्वमश्नुते ।। कारिका ९४, १८२, १८३

स्थितिं वर्णयन् कविश्चित्रं स्मरति—

**वामेतरस्तस्य करः प्रहर्तुर्नखप्रभाभूषितकङ्कपत्रे ।**
**सक्ताङ्गुलिः सायकपुङ्ख एव चित्रार्पितारम्भ इवावतस्थे ॥**

रघु. २.३१

चित्रार्पिता व्यक्तिरेकरूपैव तिष्ठति, तत्र रूपान्तरं न संभवति। इयमेव दिलीपस्य स्थितिः।

२. कुमारसंभवे भगवतः शङ्करस्य समाधिभङ्गाय, भगवतीं पार्वतीं प्रति च तस्यौन्मुख्याय प्रवर्त्तितेन कामेन वसन्तवैभवं प्रकटितं शिवाश्रमप्रान्ते। तस्य माधुर्येण शिववनौकसां तपस्विनो विकृतमनस्काः संवृत्ताः, किन्तु प्रयत्नसंस्तम्भितविक्रियास्ते मनसामीशाः कथंचिद् बभूवुरेव। तत्र हरस्तु प्रसंख्यानपर एव स्थितः। गणास्तु कथंचिद् विचलिताः। तस्य वाहनं नन्दी तु कामस्य तद्वसन्तस्य च चापलं न सेहे। स लतागृहद्वारमागत्य मुखार्पितैकाङ्गुलिसंज्ञयैव गणान् 'मा चापलाय' इति व्यनैषीत्। नन्दीश्वरशासनेन किं भवति? सर्वोऽपि वसन्तविभवश्चित्रार्पितारम्भ इव जायते—

**निष्कम्पवृक्षं निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारम् ।**
**तच्छासनात् काननमेव सर्वं चित्रार्पितारम्भमिवावतस्थे ॥**

३.४२

३. तारकेन बाधिता आदित्या भगवन्तं ब्रह्माणं प्रसादयितुं गताः। तत्र तेषां निस्तेजस्कतां वीक्ष्य ब्रह्मदेवो ब्रूते—

**अमी च कथमादित्याः प्रतापक्षतिशीतलाः ।**
**चित्रन्यस्ता इव गताः प्रकामालोकनीयताम्** ॥ २.२४॥ इति

एत आदित्याः प्रकाममालोकितुं शक्याश्चित्रार्पिता इव।

४. चित्रस्य कृत आलेख्यशब्दमपि कालिदास उपादत्ते। तत्र तस्य सर्वेऽपि

विरहिण: स्वकीयानां प्रेयसीनां चित्राणि निर्माय मनो विनोदयितुमिच्छन्ति। पूरूरवा: स्वकीयां प्रेयसीं चित्रार्पितामपि कर्त्तुं न क्षमते। स कथयति—

**हृदयमिषुभि: कामस्यान्त: सशल्यमिदं सदा**
**कथमुपलभे निद्रां स्वप्ने समागमकारिणीम् ।**
**न च सुवदनामालेख्येऽपि प्रियामसमाप्य तां**
**मम नयनयोरुद्बाष्पत्वं सखे न भविष्यति ।।**

विक्रमो. २.१० इति।

५. यक्षस्यापीयमेव स्थिति:। सोऽपि शापित: सन् रामगिरिमधिशिश्रिये। तत्र शिलायां धातुरागैर्यक्षीमालिलेखिषति—

**त्वामालिख्य प्रणयकुपितां धातुरागै: शिलाया—**
**मात्मानं ते चरणपतितं यावदिच्छामि कर्त्तुम् ।**
**अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे**
**क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्त: ।।**

मेघ. १०३

६. मालविकाग्निमित्रस्य नायकोऽग्निमित्र: प्रणयवतीं मालविकां प्रथमां चित्रन्यस्तां पश्यति पश्चाच्च साक्षात्। तत्रासौ ब्रूते—

**चित्रगतायामस्यां कान्तिविसम्वादशङ्कि मे हृदयम् ।**
**संप्रति शिथिलसमाधिं मन्ये येनेयमालिखिता ।।**

मालवि. २.२ इति

७. अजोऽपि स्वर्गतामिन्दुमतीं सादृश्यप्रतिकृतिषु पश्यति—

**तेनाष्टौ परिगमिता: समा: कथञ्चिद्**
**बालत्वादवितथसूनृतेन सूनो: ।**
**सादृश्यप्रतिकृतिदर्शनै: प्रियाया:**
**स्वप्नेषु क्षणिकसमागमोत्सवैश्च ।।** रघु. ८.९२ इति

८. विक्रमोर्वशीये निपुणिका विदूषकम् आलेख्यगतं वानरमिव निभृतं स्थितं पश्यति—

**अहो आलेख्यवानर इव किमपि मन्त्रयन्**
**निभृत आर्यमाणवकस्तिष्ठति ।** इति

विक्रमो. २.१.५

९. कुमारः सुदर्शनो यदा विवाहयोग्यो भवति तदा तस्मै राजकन्यकानां प्रतिकृतय आनीयन्ते। स च तत्र याः सुन्दर्यस्ताः स्वीकुरुते। तत्र कालिदासः मालविकाग्निमित्र इव कान्तिविसंवादं स्मरति—

**प्रतिकृतिरचनाभ्यो दूत/तिसन्दर्शिताभ्यः**
**समधिकतररूपाः शुद्धसन्तानकामैः ।**
**अधिविविदुरमात्यैराहृतास्तस्य यूनः**
**प्रथमपरिगृहीते श्रीभुवौ राजकन्याः ॥** रघु. १८.५३

इत्थं चित्रस्य कृते कालिदासः प्रतिकृतिशब्दमपि प्रायुङ्क्त।

१०. शकुन्तला हि स्त्रीरत्नम्। सा विधात्रा कथंकारं निर्मितेति तत्र जिज्ञासा? तत्र दुष्यन्तस्य संभावना—

**चित्रे निवेश्य परिकल्पितसत्त्वयोगा**
**रूपोच्चयेन मनसा विधिना कृता नु ।**
**स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे**
**धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः ॥**

शाकु. २.१० इति

विष्णुधर्मोत्तरपुराणे नारायणो मुनिरपि—

**सहकाररसं गृह्य उर्व्यां चक्रे वरस्त्रियम् ।**
**चित्रेण सा ततो जाता रूपयुक्ता वराप्सराः ॥** ३.३५.३

११. जन्मनः प्रभृत्येव दीपशिखेव[१] प्रभामहती स्फुरत्प्रभामण्डला[२] च भगवती पार्वती सर्वावयवानवद्या।[३] तस्या अभ्युन्नताङ्गुष्ठनखप्रभाभी[४] रागमिवोद्गिरन्तौ चरणौ पृथिव्याम् अपरिच्छेद्यां स्थलारविन्दश्रियमाहरतः। तस्या एकैकस्मिन्नङ्ग एव विधातुर्लावण्यकोषः परिसमापत्, ततश्चोत्पाद्येनेव लावण्येन शेषाङ्गनिर्माणं पर्यपूरि।[५] तस्या मुखे पद्मं चन्द्रबिम्बं चेत्युभयस्यापि श्रियावपहस्तितकलहे यौगपद्येनैव निवसतः।[६] स्तनबन्धुरे कण्ठे यस्तस्या निस्तलो मुक्ताकलापः सोऽपि भूष्यभावं भजते तेनेव तादृशस्तस्याः कण्ठः।[७] पार्वत्या विशदं, ताम्रौष्ठ–पर्यस्तकिरणग्रामं च स्मितं प्रवालोपहितेन पुष्पेण, विद्रुमस्थेन मुक्ताफलेन वोपमातुं शक्यते।[८] तस्या अस्या भगवत्या आयतलेखयोर्भ्रुवोः कान्तिः शलाकाञ्जनेनेव निर्मिता।[९] सोऽयं लावण्यकान्तिनिर्झरस्तस्यामस्यां जगन्मातरि बाल्यादेव कृतपदो यतः प्रभृतीयं ज्योत्स्नाप्रपूरितानि कलान्तराणि लब्धोदया चान्द्रमसी लेखेव लावण्यमयानि निजाङ्गरत्नानि पुपोष।[१०] तस्या अस्या यौवनेन चतुरस्रं शोभि वपुः कीदृशं दृश्यते? 'तूलिकयोन्मीलितं चित्रमिव'—

१. कुमारसंभवस्य १.२८।
२. कुमारसंभवस्य १.२४।
३. कुमारसंभवस्य ३.५७।
४. कुमारसंभवस्य १.३३।
५. कुमारसंभवस्य १.३५।
६. कुमारसंभवस्य १.४३।
७. कुमारसंभवस्य १.४२।
८. कुमारसंभवस्य १.४४।
९. कुमारसंभवस्य १.४७।
१०. कुमारसंभवस्य १.२५।

**उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविन्दम् ।**
**बभूव तस्याश्चतुरस्रशोभि वपुर्विभक्तं नौवयोवनेने–॥**

कुमार १.३२ ति

१२. रामादिभिस्तदपत्यैश्च परित्यक्तायामयोध्यायां चित्रलिखितान् द्विपान् सत्यान् मन्यमानाः सिंहास्तेषु प्रहरन्ति–

**चित्रद्विपाः पद्मवनातीर्णाः करेणुभिर्दत्तमृणालभङ्गाः ।**
**नखाङ्कुशाघातविभिन्नकुम्भाः संरब्धसिंहप्रहृतं वहन्ति ॥**

रघु. १६.१३

१३. अयोध्यायाः सद्मानि चित्रवन्ति सन्ति–

**तयोर्यथाप्रार्थितमिन्द्रियार्थानासेदुषोः सद्मसु चित्रवत्सु ।**
**प्राप्तानि दुःखान्यपि दण्डकेषु संचिन्त्यमानानि सुखान्यभूवन् ॥**

रघु. १४.२५

१४. अलकाया भवनान्यपि चित्रवन्ति–

**विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः**
**संगीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।**
**अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः**
**प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः** ॥ इति

मेघे. ६३

१५. भवनेष्वेषु विद्यमानानि चित्राणि गवाक्षमार्गप्रविष्टैर्मेघैर्विक्रियन्ते। ततश्च तेषां गवाक्षमार्गान्मेघाः शङ्कास्पृष्टा इव निष्पतन्ति–

**नेत्रा नीता सततगतिना यद्विमानाग्रभूमी–**
**रालेख्यानां नवजलकणैर्दोषमुत्पाद्य सद्यः ।**
**शङ्कापृष्टा इव जलमुचस्त्वादृशा जालमार्गाद्**
**धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति** ॥ इति

मेघे. ६८

## २. चित्रगता विशेषाः

शाकुन्तले चित्रनिर्माणप्रक्रियापि प्रस्तूयते। तत्र षष्ठेऽङ्के शकुन्तलां प्रत्यादिश्याङ्गुलीयकलाभेन संजातस्मृतिर्दुष्यन्तस्तद्वियोगनिमग्न–हृदयस्तस्याश्चित्रं निर्माति। चतुरिका चित्रमिदमादाय प्रविशति तत्र चित्रगतानां विशेषाणामपि उल्लेखः कण्ठरवेणैव कविना क्रियते। चित्रं दृष्ट्वा विदूषकः कथयति–

साधु वयस्य मधुरावस्थानदर्शनीयो भावानुप्रवेशः, स्खलतीव मे दृष्टिर्निम्नोन्नतप्रदेशेषु। शाकु. ६.१६.६ इति।

एतच्च चित्रं स्वयं राज्ञैव निर्मितम्। अतएव सानुमती ब्रूते 'अहो एषा राजर्षेर्निपुणता, जाने सखी अग्रतो मे वर्तते इति' शाकु. ६.१६.७। राजापि यदा तच्चित्रं वीक्षते तदा कथयति–

**यद् यत् साधु न चित्रे स्यात् क्रियते तद् तदन्यथा ।**
**तथादि तस्या लावण्यं रेखया किंचिदन्वितम् ॥**

५.१४ इति

राज्ञा प्रियम्वदाऽनुसूयाभ्यां सह शकुन्तलाऽऽलिखिता। तत्रायं विशेषो यत् तिसृणामपि तासां रूपलावण्यनिर्माणं समानम्। ततः शकुन्तला–मधिकृत्य कृतप्रश्नो विदूषको राज्ञा 'त्वं तावत् कतमां तर्कयसि' इति प्रतिपृष्टो ब्रवीति–

**तर्कयामि यस्याः केशान्तः शिथिलबन्धनोद्वान्तकुसुमः, वदनमुद्भिन्नस्वेदबिन्दु, हस्तलतिके विशेषतोऽपसृते, अवसेक–स्निग्धपल्लवो यः कोपि सहकारपादपस्तस्य पार्श्वे ईषत्परिश्रान्ताऽऽलिखिता सा शकुन्तला'** शाकु. ६.१५.५ इति।

अत्र विदूषकः सानुमतीमतौ मोघदृष्टिः, तथापि स यान् यान् विशेषानुपस्थापयति तानधिकृत्य सिद्धहस्तः कोऽपि कुशलः कारुरालेख्य–

मद्यापि निर्मातुं क्षमते। विदूषकस्य तर्कं साधुरिति ब्रुवता दुष्यन्तेनोच्यते—'भवता आकृतिमात्रं दृष्टं, न तु भावः।' प्रकाशयति च भावलक्षणं स्वयमपि—'निपुणो भवान्, अस्त्यत्र मे भावचिह्नम्—

**स्विन्नाङ्गुलिविनिवेशो रेखाप्रान्तेषु दृश्यते मलिनः ।**
**अश्रु च कपोलपतितं दृश्यमिदं वर्त्तिकोच्छ्वासात् ।।** ६.१५

अत्र अङ्गुलीषु स्विन्नता, तदर्थं प्रान्तेषु मलिनता, वर्त्तिकोच्छ्वासः, तेन च संलक्ष्यः कपोलपतितोऽश्रुबिन्दुः' इत्येते ये विशेषास्ते चित्रकर्मणि कां नु सूक्ष्मतां प्रस्तुवन्तीति कुशलैरुत्प्रेक्ष्येत। तत्रापि राजा कथयति—'चतुरिके अर्धलिखितमेतद् विनोदस्थानम्, गच्छ, वर्त्तिकामानय' शाकु. ६.१६.१ इति। मिथ्यात्वं च चित्रस्य प्रतिपद्यमानो यावत्—

**साक्षात् प्रियामुपगतामवमन्यमानश्चित्रार्पितां पुनरिमां बहु मन्यमानः।**
**स्रोतोवहां पथि निकामजलामतीत्य जातः सखे प्रणयवान् मृगतृष्णिकायाम्।।**
शाकु. ६.१६ इति

इति ब्रवीति तावत् स्थूलदृष्टिर्विदूषकः कल्पयति किन्वत्रावशिष्यते यस्य प्रतिपूर्त्तये वयस्य एष भूयोऽपि वर्त्तिकामानयति' (शाकु. ६.१७.१)—ति तत्र विदूषकेणैव प्रकाशं 'भोः अपरं किमत्र लेखितव्यम्' इति पृष्टः प्रतिब्रूते—

**कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी**
**पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः ।**
**शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः**
**शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् ॥** ६.१७ इति

अन्यच्च—शकुन्तलायाः प्रसाधनमभिप्रेतमत्र विस्मृतमस्माभिः—

**कृतं न कर्णार्पितबन्धनं सखे! शिरीषमागण्डविलम्बिकेसरम् ।**
**न वा शरच्चन्द्रमरीचिकोमलं मृणालसूत्रं रचितं स्तनान्तरे ।।**
शाकु. ३.१८ इति

अत्र हि मालिन्यादि वस्तुचित्रणं विद्धचित्रनाम्ना प्रसिद्धमेव, हंसमिथुनावतारोऽत्र भावचित्रतायाः प्रभवः, कृष्णमृगस्य शृङ्गाग्रे वामनयनं कण्डूयमानां मृगीं विरच्य च रसध्वनिचित्रताऽत्र महामतिनानेन प्रसूता। मृगः कृष्णः अतः अविश्वास्यः, तस्यापि शृङ्गम्, तेनापि वामनयनस्य कण्डूयनम् अतिनिष्करुणत्वमात्मनो ब्रुवाणे दुष्यन्ते जातविस्रम्भायाः शकुन्तलाया एव प्रतीकभूतमि'ति दुष्यन्तोऽत्रात्मानमेवावतारयति प्रतीतिसन्तानसाहस्त्रीं च प्रस्नुवाना दृश्येऽत्र तत्प्रतिभाकामगवी। सेयं पराकाष्ठां गतवती परिणतिश्चित्रकलायाः।

## ३. चित्रस्य प्रभावः

चित्रस्यास्य प्रभावमपि न न चित्रयति महाकविः। तथाहि भ्रमर–बाधाचित्रं दुष्यन्तेनालिखितम्। तत्र रक्तकुवलयपल्लववत् शोभमानमग्रहस्तं, तेन मुखापावरणम्, चकितचकितत्वं च तस्या निरूप्य विदूषकः स्पष्टं ब्रूते 'आस्तत्र भवत्या मुखमभिलङ्घति मधुकर' इति शाकु. ६.१९.१। अत्र 'आः' इति पदेन सूच्यते विदूषकः शकुन्तलायाश्चित्रत्वं विस्मृत्य शकुन्तलात्वमेव पश्यति। सेयमत्र चित्रस्य चित्रणीयतन्मयीभवनक्षमा। सेयमत्र दुष्यन्तमप्यान्दोलयति। स हि 'एष मधुकर' इति कथितमात्रो ब्रूते 'ननु वार्य एष धृष्टः' शाकु. ६.१९.२। इति 'भवानेवाविनीतानां शासितेति भूयोऽपि विदूषकेणोक्तो विस्मृतात्मा दुष्यन्तो मधुकरमामन्त्रयमाणो ब्रूते'–

**अयि भोः कुसुमलताप्रियातिथे! किमत्र परिपतनखेदमनुभवसि–**
**एषा कुसुमनिषण्णा तृषितापि सती भवन्तमनुरक्ता ।**
**प्रतिपालयति मधुकरी न खलु मधु त्वया विना पिबति ।।**

६.१९ इति

विदूषकोऽपि विस्मृतात्मा दुष्यन्तदशामेव गतः कथयति–'प्रतिवारितापि वामैषा जातिः'। इति। दुष्यन्तो भूयोऽपि भ्रमरमेव शासितुमध्यवस्यति

वक्ति च—'एवं भोः, न मे शासने तिष्ठति, श्रूयतां तर्हि संप्रति—

**अक्लिष्टबालतरुपल्लवलोभनीयं**
**पीतं मया सदयमेव रतोत्सवेषु ।**
**बिम्बाधरं दशसि चेद् भ्रमर! प्रियाया—**
**स्त्वां कारयामि कमलोदरबन्धनस्थम्।।** शाकु. ६.२०

इदानीं विदूषकश्चेतयते, दुष्यन्तस्तु तथैव तिष्ठति। तत्र विदूषको ब्रूते 'भोः चित्रं खल्वेतत्' शाकु. ६.२१.१। वचनेनानेन सानुमती दुष्यन्तश्चेति द्वयोरपि धाराधिरूढा भ्रान्तिर्निवर्त्तते। सानुमती कथयति—'अहमपीदानी—मवगतार्था' शाकु. ६.२१.३। दुष्यन्तस्य शकुन्तलासमाधिरनेन विदूषकवचनेन भज्यते। ततश्चासौ भर्त्सयन् व्रबीति—

वयस्य किमिदमनुष्ठितं पौरोभाग्यम्—

**दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन ।**
**स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता ।।** ६.२१

इति बाष्पं च नयनाभ्यां विसृजति। बाष्प एष मेघदूतस्य यक्षाय स्वं चरणपतितं लेखितुमिव दुष्यन्तायापि चित्रगतां शकुन्तलां द्रष्टुं न ददाति—

**प्रजागरात् खिलीभूतस्तस्याः स्वप्ने समागमः ।**
**बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि ।।**
६.२२ इति।

सोऽयमतिभूमिमारूढः प्रभावश्चित्रस्य।

## ४. चित्रकलोपकरणानि

कालिदासे चित्रकलायाः कानिचन उपादानानि कण्ठरवेणै—वोल्लिखितानि लभ्यन्ते। तद्यथा—

१. कान्तिः,

२. सादृश्यातिशयः,

३. वैसादृश्यलेश:। एतेषु च कारणभूत:

४. समाधिर्नाम गुणविशेष:, स च चित्तवृत्तिनिरोध:, एकाग्रतारूप:। ततश्च वेद्यान्तरसंस्पर्शराहित्येन तन्मयीभवनद्वारा कारुकर्मणि प्रवृत्ति:,

५. कारो: हृदयस्याभिषङ्ग:,

६. प्रभाव:,

७. मिथ्यात्वं चेति।

अत्र यन्मुख्यतमुपकरणं तद्धि वर्णद्रव्यम्। कालिदास इदानीं यावत् तत्रानधिकमवहित:। शकुन्तलाया एव सप्तमेऽङ्के तदपि सम्यक् चित्रयति। राज्ञो दुष्यन्तस्य पराक्रमं दिवौकस: कल्पलतांशुकेषु लिखन्ति। तत्र प्रश्न:। कथं वा लिखन्ति! तत्र मसी कीदृशी—ति। अत्र कविरुदीरयति—

**विच्छित्तिशेषै: सुरसुन्दरीणां वर्णैरमी कल्पलतांशुकेषु ।**
**विचिन्त्य गीतिक्षममर्थबन्धं दिवौकसस्त्वच्चरितं लिखन्ति ॥**

शाकु. ७.५ इति

अत्रापि चित्रमेव लिख्यते, किन्तु तत्र काव्याक्षराणामेव विषयत्वं न तु कस्यचित् प्रत्यक्षविषयस्य वस्तुन:।

वर्णद्रव्याणां विनियोगाय कविर्नानाविधानर्थानुपस्थापयति। तत्र मेघदूते—दशपुरजनपदवध्वो मेघं दृष्टिमुत्क्षिप्य पश्यन्ति। सोऽयमासामुपरि दृष्टिक्षेप: कविनाऽनेनैवं चित्र्यते—

**तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां**
**पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम् ।**
**कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं**
**पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलनाम् ॥**

मेघ. ४७ इति

मेघदूत एव वल्मीकाग्रात् इन्द्रधनु: प्रभवति। तत्र येऽनेके वर्णास्तानुद्दिश्य

कविः सहृदयहृदयहारि किञ्चदेवं चित्रयति मनोरमतमं चित्रम्—

**रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत् पुरस्ताद्**
**वल्मीकाग्रात् प्रभवति धनुष्खण्डमाखण्डलस्य ।**
**येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते**
**बर्हेणेव स्फुरितरुचिना गोपवेशस्य विष्णोः ।।**

मेघे. १५ इति

कृष्णवर्णो मेघस्तुषारावृते कैलाशशृङ्गे निषण्णः कीदृशो भाति—

**गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः**
**कैलाशस्य त्रिदशवनितादर्पणस्यातिथिः स्याः ।**
**शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं**
**राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः ।।** मेघ. ५८

**उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे**
**सद्यःकृतद्विरददशनच्छेदगौरस्य तस्य ।**
**शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्री—**
**मंसन्यस्ते सति हलभृतो मेचके वाससीव ।।** मेघ. ५९

कृष्णस्य मेघस्य श्यामा छाया अच्छस्फटिकविशदे भागीरथीजले प्रतिबिम्ब्यते। तत्र वर्णयोरनयोर्व्यतिकरमसौ 'अस्थानोपनतयमुनासङ्गमेन' चित्रयति—

**तस्याः पातुं सुरगज इव व्योम्नि पश्चार्धलम्बी**
**त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः ।**
**संसर्पन्त्या सपदि भवतः स्त्रोतसिच्छाययासौ**
**स्यादस्थानोपनतयमुना—सङ्गमेवाभिरामा** ।। मेघ. ५.१

गङ्गायमुनयोः सितासितत्वं रघुवंशे चित्रितवानेवैषः—

**क्वचित्प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा ।**
**अन्यत्र माला सितपङ्जानामिन्दीवरैरुत्खचितान्तरेव ।।**
**क्वचित् खगानां प्रियमानसानां कादम्बसंसर्गवतीव पङ्क्तिः ।**
**अन्यत्र कालागुरुदत्तपत्रा भक्तिर्भुवश्चन्दनकल्पितेव ।।**
**क्वचित् प्रभा चान्द्रमसी तमोभिश्छायाविलीनैः शबलीकृतेन ।**
**अन्यत्र शुभ्रा शरदभ्रलेखा रन्ध्रेष्विवालक्ष्यनभः प्रदेशा ।।**
**क्वचिच्च कृष्णोरगभूषणेव भस्माङ्गरागा तनुरीश्वरस्य ।**
**पश्यानवद्याङ्गि! विभाति गङ्गा भिन्नप्रवाहा यमुनातरङ्गैः ।।**

रघु. १३.५४–५७

एवंविधान्यन्यान्यपि बहूनि स्थलानि कालिदाससाहित्ये सुखेनैव सुमेधोभिर्गवेषयितुं शक्यन्ते। तत्र सानुमतीदृष्ट्या विमृश्यमाने काँस्कान् न विशेषानुपलभामहै, यावद् विदूषकदृष्ट्यापि प्रतिपादिचरया कतिपयान् विशेषानवश्यमेवोपलभामहा एव। तत्र

**रूपभेदाः प्रमाणानि भावलावण्ययोजना ।**
**सादृश्यं वर्णिकाभङ्ग इति चित्रं षडङ्गकम् ।।**

इति कामशास्त्रस्य जयमङ्गलयोपस्थापितया चित्रकारिकया यानिमान् षड् विशेषान् प्रतिपद्यामहे तेषां प्रत्येकं कालिदाससाहित्यस्य नायकानां नायिकानां च विशेषणेषु गवेषयितुं शक्यत एव।

इत्थं कालिदासस्य काव्यकलायां चित्रकला कियन्नु अलङ्कारत्वमश्नुत इति प्रेक्षावन्तः सुखमुन्नयेरन्।[1]

◈

१. व्याख्यानमिदं काशीहिन्दूविश्वविद्यालयस्य चित्रकलाविभागे प्रायेण १९७५ वर्षे कृतम्। सागरिकायां च प्रकाशितम्।

# कालिदाससाहित्ये गङ्गा[1]

*नामसंक्षेपाः* **अ.** अभिज्ञानशाकुन्तलम्, **कु.** कुमारसम्भवम् (१–८), **मे.** मेघदूतम्, **र.** रघुवंश (१–१९), **वि.** विक्रमोर्वशीयम्[2]

भारते वर्षे प्रायेण सकला एव पुण्यसरितस्तथैव गङ्गेत्युच्यन्ते यथा गुप्ताऽगुप्तवंशीया राजानो विक्रमादित्य इति। मुख्यो विक्रमादित्यः साहसाङ्क इत्युपाधिना सम्मन्यते स्म, ये च विक्रमादित्य इत्युपाधिना सम्मानितास्तेषां मुख्यं नाम चन्द्रगुप्त इति, स्कन्दगुप्त इति, यशोधर्मेति, हेमचन्द्र इति, आहवमल्ल इति च तत्तेषु सन्दर्भेषु विख्यातम्। पुण्यासु सरित्स्वपि गङ्गापदं यस्या मुख्यं नाम सा हि भगवती 'भागीरथी' हिमवतः प्रादुर्भूय पूर्वमब्धिं यावत् प्रवहन्ती विराजते यस्यास्तीरे सन्ति काशीप्रयागादीनि तीर्थानि। कालिदाससाहित्यं भारतीयेषु गङ्गावदेव प्रियम्। तस्मिन् यद्यपि 'काशी'–पदं 'पुरूरवसः कनिष्ठाया[3] धर्मपत्न्या नाम्न्येव लभ्यते, न तु ततः पृथग्, तथापि कालिदासस्य साहित्ये काश्येव कृतभूरिपरिश्रमा। श्वसिति च कालिदाससाहित्यं मूलरूपेण साम्प्रतं काश्या एव जागरूकया सेवासंपादनया। तत्र भगवती गङ्गा ५५ वारान् स्मृता भिन्नभिन्नाभिः संज्ञाभिः। संज्ञा अमूरिमाः 'आकाशगङ्गे'–ति, 'गङ्गे'ति, 'जह्नुकन्ये'–ति, 'जह्नुदुहिते'–ति, 'जाह्नवी'–ति, 'त्रिमार्गगे'ति, 'त्रिमार्गे'ति, 'त्रिस्रोत'रिति,

---

१. लेख एष I.I.A.S. संस्थया काश्यां समायोजितायां शोधगोष्ठ्यां २२.३.०४ तिथौ पठितः।

२. मालविकाग्निमित्रे इव ऋतुसंहारेऽपि गङ्गासन्दर्भो नास्ति।

३. कनिष्ठात्वं पतिप्रेममात्राकृतम्। ततश्च ज्येष्ठात्वं मालविकायाम्।

'भागीरथी'—ति, 'मन्दाकिनी'—ति, 'सुरसरिदि'—ति च। इत्थं कालिदास—साहित्ये 'भोगावती'—ति या पातालगङ्गा तस्या नाम न दृश्यते। प्रयागमपि कालिदासो प्रायेण विसस्मारैव, 'सङ्गम'—पदं तु तस्य कृते प्रायुङ्क्त, यद्यपि 'सितासित'—वर्णने कालिदासस्य प्रतिभा तथा सफला यथा परवर्त्तिनामध्येतृणां प्रतिभा अपि पद्यान्तरयोजनाय प्रोदसाहयत।

गङ्गा कालिदासेन वर्गद्वयेन स्मृता (१) 'आकाशगङ्गा'—वर्गस्तयोरेकः (२) गङ्गेति भागीरथीवर्गो द्वितीयः। अकाशगङ्गायाः कृते कालिदासेन 'खतरङ्गिणी', गगनप्रतिष्ठत्रिस्रोता' इति, 'छायापथ' इति, 'व्योमगङ्गा' इति च शब्दाः प्रयुज्यन्ते। त एते भवन्ति षट् प्रयोगाः, आकाशगङ्गापदस्य वारद्वयं प्रयोगात्। तत्र

## १. आकाशगङ्गा

### १. आकाशगङ्गा

सप्तर्षिमण्डलं स्मरणसमकालमेव भगवन्तः शिवस्य प्रमुखे प्रादुर्बभूव, ततः पूर्वं संपादितमेभिः स्नानं भगवत्या आकाशगङ्गाया दिङ्नागमद—गन्धिनि, तीरमन्दारकुसुमोत्किरवीचिनि च स्रोतसि—

**आप्लुतास्तीरमन्दारकुसुमोत्किरवीचिषु ।**
**आकाशगङ्गास्रोतस्सु दिङ्नागमदगन्धिषु ।।** कु. ६.५

कुशः प्रियाभिः सह सरयूह्रदमवगाहते। तदानीं स तथैव दृश्यते यथाऽप्सरोभिः सह 'आकाशगङ्गायां' जलविहारं कुर्वाणो देवराजः—

**तेनाऽवरोधप्रमदासखेन विगाहमानेन सरिद्वरां ताम् ।**
**आकाशगङ्गारतिरप्सरोभिर्वृतो मरुत्वाननुयातलीलः ।।**

र. १६.७१

### २. खतरङ्गिणी

आकाशगङ्गैव खतरङ्गिणीत्यप्युच्यते कालिदासेन। गन्धमादने भगवती

पार्वती खतरङ्गिणीं वगाहते जायते च मीनपङ्क्त्या पुनरुक्तमेखला—

**हेमतामरसताडितप्रिया तत्कराम्बुविनिमीलितेक्षणा ।**
**खे व्यगाहत तरङ्गिणीमुमा मीनपङ्क्तिपुनरुक्तमेखला ।।**

कु. ८.२६

**३. गगनस्थस्रोत:/व्योमगङ्गा**

गङ्गैव गगनस्थस्रोत:पदेनापि स्मर्यते सुकविना। अग्रे समुद्धृते— 'त्रिस्रोतसं वहति यो गगनप्रतिष्ठा'—मित्यस्मिन् शाकुन्तलपद्ये।

भगवती आकाशगङ्गैव 'व्योमगङ्गे'—त्यपि प्रोल्लिख्यते—

४. रावणेन सह योद्धुमुद्यताय श्रीरामाय देवराज इन्द्र: स्वकीयं जैत्रं रथं प्रेषयामास। रथस्यास्य ध्वजपटो व्योमगङ्गोर्मिवायुभिराधूयमान आसीत्—

**तमाधूतध्वजपटं व्योमगङ्गार्मिवायुभि: ।**
**देवसूतभुजालम्बी जैत्रमध्यास्त राघव: ।।** र. १२.८५

**५. छायापथ:**

लङ्कात: साकेताय पुष्पकेण प्रस्थितो राम: समुद्रे दृश्यमानं स्वकीयं सेतुमभिलक्ष्य सीतां प्रति वक्ति—

**वैदेहि! पश्याऽऽमलयाद् विभक्तं मत्सेतुना फेनिलमम्बुराशिम् ।**
**छायापथेनेव शरत्प्रसन्नमाकाशमाविष्कृतचारुतारम् ।।**

र. १३.१

**६. त्रिस्रोता**

**त्रिस्रोतसं वहति यो गगनप्रतिष्ठां**
**ज्योतींषि वर्त्तयति च प्रविभक्तरश्मि: ।**
**तस्य द्वितीयहरिविक्रमनिस्तमस्कं**
**वायोरिमं परिवहस्य वदन्ति मार्गम् ।।** अ. ७.६

प्रवहपरिवहादयो वायवः प्रसिद्धा एव ज्यौतिषे शास्त्रे। सेयं कालिदास–साहित्ये आकाशगता गङ्गा। कुमारसंभवस्य ५.३७ पद्येऽपि आकाशगङ्गा ग्रहीतुं सुशका। अथेतरे सन्दर्भाः।

## २. गङ्गा

कालिदाससाहित्ये यत्र गङ्गा गङ्गापदेनैव स्मृता ते खल्विमे सन्दर्भाः।

७–९. **१–३.** अभिज्ञानशाकुन्तले धीवरवृत्तान्तः प्रसिद्ध एव। तत्र शक्रावतारतीर्थं गङ्गाया एव। षष्ठेऽङ्के दुष्यन्तस्यैव वचनेन प्रमाणीक्रियते–'शचीतीर्थं वन्दमानायाः सख्यास्ते हस्ताद् गङ्गास्रोतसि परिभ्रष्टम्'–इति कालिदासग्रन्थावल्या द्वितीयस्य संस्करणस्य ६२४ पृष्ठे सुलभेन। एवं च ६११, ६१५ पृष्ठयोरपि यौ शक्रावतार– शचीतीर्थयोरुल्लेखौ तावपि गङ्गयैव सम्बद्धौ सिद्ध्यतः।।

१०. ४. कुमारसम्भवे १.३० पद्ये सुकविरेष स्मरति भगवत्यां पार्वत्यां सर्वा अपि पूर्वजन्माधीता विद्यास्तथैव प्रादुरभवन् यथा शरिदि गङ्गायां हंसमालाः प्रादुर्भवन्ति।

**तां हंसमालाः शरदीव गङ्गां महौषधिं नक्तमिवात्मभासः ।**
**स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः ।।**

कु. १.३०

११. ५. तपश्चरन्तीं पार्वतीं परीक्षितुमुपस्थितो ब्रह्मचारी वटुः कथयति–'पार्वति! त्वदीयं शीलं तपस्विनामप्युपदेशतां गतम्। अतस्तव पिता गाङ्गैः सलिलैरपि तथा न पावितः यथा त्वदीयैरनाविलैश्चरितैरि'–ति–

**चदुच्यते पार्वति! पापवृत्तये न रूपमित्यव्यभिचारि तद् वचः ।**
**तथाहि ते शीलमुदारदर्शने तपस्विनामप्युपदेशतां गतम् ।।**

**विकीर्णसप्तर्षिबलिप्रहासिभिस्तथा न गाङ्गैः सलिलैर्दिवश्च्युतैः ।**
**यथा त्वदीयैश्चरितैरनाविलैर्महीधरः पावित एष सान्वयः ।।**

कु. ५.३७

दिवश्च्युतैरित्याकाशगङ्गैवाऽत्र न ग्राह्या, हिमगिरिप्रभवाया अपि गङ्गायाः प्रपातोत्थितानां सलिलानामत्र संग्रहीतुं सुशकत्वात्।

१२. ६. हिमवतो नगरं गङ्गास्रोतसा परिक्षिप्तमासीत्—

**गङ्गास्रोतःपरिक्षिप्तं वप्रान्तर्ज्वलितौषधि ।**
**बृहन्मणिशिलासालं गुप्तावपि मनोहरम् ।।** कु. ६.३८

१३. ७. हिमाचलः सप्तर्षिमण्डलस्य चरणोदकमात्मनो मूर्ध्नि प्रोक्षति। श्लाघते च ततः सञ्जातमात्मनः पूतत्वम्। अत्र गङ्गामपि स्मरति—

**अवैमि पूतमात्मानं द्वयेनैव द्विजोत्तमाः ।**
**मूर्ध्नि गङ्गाप्रपातेन धौतपादाम्भसा च वः ।।** कु. ६.५७

१४. ८. सप्तर्षयोऽपि हिमवन्तं प्रशंसन्तः कथयन्ति गङ्गा हि द्वाभ्यां प्रभवति—भगवतः परमेष्ठिनश्चरणात्, हिमाचलाच्च।—

**यथैव श्लाघ्यते गङ्गा पादेन परमेष्ठिनः ।**
**प्रभवेण द्वितीयेन तथैवोच्छ्रिरसा त्वया ।।** कु. ६.७०

१५. ९. हिमवतः प्रसूतानां सरितां जलानि निर्मलानि भवन्ति, तेषां प्रवाहश्च नैरन्तरीमाश्रितः सिन्धुपर्यन्तं प्रसरति। त इमे विशेषा यत्र स्फुटास्तेषां प्रथमा भगवती गङ्गैव—

**अच्छिन्नामलसन्तानाः समुद्रोर्म्यनिवारिताः ।**
**पुनन्ति लोकान् पुण्यत्वात् कीर्त्तयः सरितश्च ते ।।**

कु. ६.६९

गङ्गातुल्या अन्या अपि सरितो हिमवतः प्रभवन्ति सरयू—

सिन्धुप्रभृतय:।

१६. १०. भगवान् शिवो वरयात्रायां यदा वरवेषं जग्राह तदा तस्य मूर्ध्नि त्वष्ट्रा निर्मितं नवमातपत्रं भगवता सूर्येण प्रासारि। तत्रासीद्दुकूलमपि लम्बमानम्। तेन च श्वेतेन दुकूलेन शिव: शिरसि पतद्गङ्ग इवालक्ष्यत–

**उपाददे तस्य सहस्ररश्मिस्त्वष्ट्रा नवं निर्मितमातपत्रम् ।**
**स तद्दुकूलादविदूरमौलिर्बभौ पतद्गङ्ग इवोत्तमाङ्गे ।।**

कु. ७.४१

भगवत: शङ्करस्य पार्श्वद्वये चामरान्दोलनार्थं व्याप्रियमाणे आसातां शरीरधारिणी गङ्गा यमुना च। चामराभ्यामाभ्यामिमे हंसद्विज–समेधितलक्ष्मीके इवालोक्येते स्म–

१७. **मूर्त्ते च गङ्गायमुने तदानीं सचामरे देवमसेविषाताम् ।**
**समुद्रगारूपविपर्य्ययेऽपि सहंसपाते इव लक्ष्यमाणे ।।**

कु. ७.४२

१८. ११. मेघदूते 'अलका'–पुरीरूपाया अङ्गनाया: शरीरतो गङ्गारूपं दुकूलमपैति।–

**तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां ।**
**न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यते कामचारिन् ।।** ६२

रघुवंशे द्वादश वारान् सुकविरेष गङ्गापदप्रयोगपूर्वकं गङ्गामिमां स्मरति। तथा

१९. १२. १.३४ पादटिप्पण्यां दिलीपो वसिष्ठाश्रमं जिगमिषु: स्वीयां कोसलां सचिवेषु न्यस्यति तथैव पूर्वं भगीरथो यदासौ गङ्गामवतारयितुं तपश्चरितुं जगाम। प्रयोजनं चानयोरुभयोरप्येक एव 'सन्ततिलाभ:'। सन्तति: कीदृशी पूर्वेषां पावने क्षमा। पितृणामिदमृणं यद्धि सन्तत्या शोध्यते–

**गङ्गां भगीरथेनेव पूर्वेषां पावनक्षमाम् ।**
**ईप्सता सन्ततिं तेन न्यस्ता मन्त्रिषु कोसला ।।**

२०. १३. रघुर्भगीरथ इव भाति। भगीरथः पूर्वां दिशं प्रति प्रतिष्ठते पश्चाच्चास्य प्रवहन्ती विद्यते भगवती गङ्गा। रघुरपि महतीं सेनां पूर्वां दिशं प्रति कर्षति—

**स सेनां महतीं कर्षन् पूर्वसागरगामिनीम् ।**
**बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः ।।** र. ४.३२

२१. १४. पाश्चात्त्यान् पारसीकानिव कम्बोजानपि विजित्यौदीच्यानपि जनपदाञ् जेतुं रघुर्गौरीगुरुविरुदं हिमाद्रिमारुरोह। तत्र तं गङ्गासीकरिणो मरुतः सेवन्ते—

**ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः ।**
**वर्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ।।** र. ४.७१

**भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः ।**
**गङ्गासीकरिणो मार्गे मरुतस्तं सिषेविरे ।।** र. ४.७३

२२. १५. स्वयंवरसभार्थं विदर्भान् गत्वा रघुसूनुरजो वैतालिकैः प्रभाते स्तुतिभिः प्रबोध्यते। प्रबुद्धश्च स शुभ्रप्रच्छदं तल्पं सपद्येवोज्झति। तत्रोपमा तथैव, यथा सुप्रतीको नाम सुरगजो मदपटुनिनदद्भी राजहंसैर्बोधितः सन् गाङ्गं सैकतमुज्झति—

**इति विरचितवाग्भिर्वन्दिपुत्रैः कुमारः**
**सपदि विगतनिद्रस्तल्पमुज्झाञ्चकार ।**
**मदपटुनिनदद्भिर्बोधितो राजहंसैः**
**सुरगज इव गाङ्गं सैकतं सुप्रतीकः ।।** र. ५.७५

२३. १६. प्रबुद्धो विष्णुरुपस्थितानां देवानां स्तुतीर्निशम्योत्तरं दातुं यदैव

वक्तुं मुखं व्यादत्ते दशनानामंशवो धारारूपेण व्युच्चरन्त—
श्चरणान्निर्यातशेषां ऊर्ध्वप्रवाहिनीं गङ्गां पुनरुक्तयन्ति—

**बभौ सदशनज्योत्स्ना सा (भारती) विभोर्वदनोद्गता ।**
**निर्यातशेषा चरणाद् गङ्गेवोर्ध्वप्रवर्त्तिनी ।।**

र. १०.३७

अत्रामूर्त्ताया अपि भारत्या मूर्त्तिमत्त्वं कविप्रतिभाया उत्कर्षा—
तिशयस्य सरसं फलम्।

२४. १७. प्रयागे गङ्गा यमुनया सङ्गता तथा भाति यथा कृष्णोरगभूषणा,
भस्माङ्गरागा गौरगौरा च ईश्वरस्य तनुः—

**क्वचिच्च कृष्णोरगभूषणेव भस्माङ्गरागा तनुरीश्वरस्य ।**
**पश्याऽनवद्याङ्गि विभाति गङ्गा भिन्न प्रवाहा यमुनाप्रवाहैः ।।**

र. १३.५७

२५. १८. रावणं निहत्य प्रत्यागतौ रामलक्ष्मणौ दृष्ट्वा मातरौ प्रमोदा—
श्रुपरिप्लुते जायेते। अश्रु चेदं शिशिरम्, आनन्दजनितत्वात्।—

**आनन्दजः शोकजमश्रु बाष्पस्तयोरशीतं शिशिरो बिभेद ।**
**गङ्गासरय्वोर्जलमुष्णतप्तं हिमाद्रिनिष्यन्द इवावतीर्णः ।।**

र. १४.३

२६. १९. लक्ष्मणः स्वां भ्रातृजायां सीतां रथाद् गङ्गापुलिनेऽवधानेना—
वतारयति,—तरति च निषादाहृतनौविशेषस्ताम्

**रथात् स यन्त्रा निगृहीतवाहात् तां भ्रातृजायां पुलिनेऽवतार्य ।**
**गङ्गां निषादाऽऽहृतनौविशेषस्ततार सन्धामिव सत्यसन्धः ।।**

र. १४.५२

२७. २०. कुशः कुशावतीतोऽयोध्यां प्रति प्रतिनिवर्त्तमानो मध्येमार्गं प्रतीपगां
गङ्गां गजसेतुबन्धेन तरति—

**तीर्थे तदीये गजसेतुबन्धात् प्रतीपगामुत्तरतोऽस्य गङ्गाम् ।**
**अयत्नवालव्यजनीबभूवुर्हंसा नभोलङ्घनलोलपक्षाः ।।**

र. १६.३३

२८. २१. अतिथेर्मूर्ध्नि निपतन्ती ओघमहती सशब्दाऽभिषेकश्रीस्तथैव व्यरोचत यथा शिवशिरसि निपतन्ती गङ्गा विरोचते—

**तस्यौघमहती मूर्ध्नि निपतन्ती व्यरोचत ।**
**सशब्दमभिषेकश्रीर्गङ्गेव त्रिपुरद्विषः ।।** र. १७.१४

२९. २२. केशिन आहृतोर्वशी तथैव शनैः शनैः संज्ञां लभमाना दृश्यते यथा रोधःपतनकलुषा गङ्गा प्रसादम्—

**आविर्भूते शशिनि तमसा मुच्यमानेव रात्रि—**
**नैशस्यार्चिर्हुतभुज इवच्छिन्नभूयिष्ठधूमा ।**
**मोहेनान्तर्वरतनुरियं मुच्यमाना विभाति**
**गङ्गा रोधःपतनकलुषा गृह्णतीव प्रसादम् ।।** वि. १.९

३०. २३. उर्वश्याश्चित्रलेखा—नाम्नी सखी पुरूरवसमुपेता उर्वशीं विहाय। पुरूरवास्तां गङ्गाविरहितां यमुनां मनुते—

**न तथा नन्दयसि मां सख्या विरहिता तया ।**
**सङ्गमे दृष्टपूर्वेव यमुना गङ्गया विना ।।** वि. २.१४

३१. २४. पुरूरवसा मणिहर्म्यपृष्ठमार्गं पृष्टो विदूषकः कथयति—

**इमिणा गंगातरंगसस्सिरीएण फलिअमणिसोवाणेण**
**आरोहतु भवं पदोसावसारमणिज्जं मणिहम्मिअपिट्ठं ।**[१]

वि. ५.२ सं० २ पृ० ४७३

---

१. एतेन गङ्गातरङ्गसश्रीकेण स्फटिकमणिसोपानेनारोहतु भवान् प्रदोषावसररमणीयं मणिहर्म्यपृष्ठम्।

३२. २५. विहितराज्याभिषेकसत्कारे कुमारे आयुषि राजलक्ष्मीर्हिमवति जलधौ च व्यस्ततोया गङ्गेव भाति—

**तव पितरि पुरस्तादुन्नतानां स्थितेऽस्मिन्**
**स्थितिमति च विभक्ता त्वय्यनाकम्पधैर्ये ।**
**अधिकतरमिदानीं राजते राजलक्ष्मी—**
**र्हिमवति जलधौ च व्यस्ततोयेव गङ्गा ॥** वि. ५.२२

इयं हि कालिदाससाहित्ये गङ्गाशब्दप्रयोगस्य स्थितिः।

## ३. जह्नुकन्या

सम्प्रति जह्नुकन्येति जाह्नवीति पदयोः प्रयोगं पश्यामः।

३३. १. सर्वानपीतरान् स्वयम्वरास्थानीमुपेयुषो राज्ञो विहायेन्दुमती रघुपुत्रं कुमारमजं वृतवतीति समगुणयोगप्रीताः पौरा उद्गिरन्ति—

**शशिनमुपगतेयं कौमुदी मेघमुक्तं**
**जलनिधिमनुरूपं जह्नुकन्याऽवतीर्णा ।**
**इति समगुणयोगप्रीतयस्तत्र पौराः**
**श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ॥** र. २.६.८५

३४. २. इन्दुमतीविरहितोऽजो जह्नुकन्यासरय्वोः संगमे शरीरं त्यजति, सुरत्वं प्रतिपन्नश्चाप्सरोभूतया प्रिययेन्दुमत्या सह नन्दनवनाभ्यन्तरेषु लीलागारेषु रमते—

**तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वो—**
**र्देहत्यागादमरगणनालेख्यमासाद्य सद्यः ।**
**पूर्वाकाराऽधिकतररुचा सङ्गतः कान्तयाऽसौ**
**लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु ॥** र. ८.९५

३५. ३. सीतां मुमुक्षँल्लक्ष्मणो जह्नोर्दुहित्रा प्रोत्थितवीचिहस्तैरवार्यतेव—

**गुरोर्नियोगाद् वनितां वनान्ते सीतां सुमित्रातनयो विहास्यन् ।**
**अवार्यतेवोत्थितवीचिहस्तैर्जह्नोर्दुहित्रा स्थितया पुरस्तात् ।।**

र. १४.५१

## ४. जाह्नवी

३६. १. शिवः पार्वत्या अनुरूपो वरः, पार्वती च शिवस्य तादृश्येव प्रिया। आनुरूप्यमिदमनुरागायाकल्पत। उचितं च तत्—सागरं जाह्नवीव जाह्नवीं सागरोऽपि न न बहुमनुते—

**तं यथाऽऽत्मसदृशं वरं वधूरन्वरज्यत वरस्तथैव ताम् ।**
**सागरादनपगा हि जाह्नवी सोऽपि तन्मुखरसैकनिर्वृतिः ।।**

कु. ८.१६

३७. २. भगवान् शङ्करः कौतुकागारे यत् तल्पं सेवते स्म तद्धि शुभ्रतायां जाह्नवी— पुलिनचारुदर्शनमुच्यते—

**तत्र हंसधवलोत्तरच्छदं जाह्नवीपुलिनचारुदर्शनम् ।**
**अध्यशेत शयनं प्रियासखः शारदाभ्रमिव रोहिणीपतिः ।।**

कु. ८.८२

३८. ३. रघुवंशे रामं प्रसूय शातोदरी माता कौसल्या तथैव तेन सह बभौ यथा शरत्कृशा जाह्नवी सैकताम्भोजबलिना भाति—

**शय्यागतेन रामेण माता शातोदरी बभौ ।**
**सैकताम्भोजबलिना जाह्नवीव शरत्कृशा** ।। र. १०.६९

## ५. त्रिमार्गगा

आकाशपृथिवीपातालगैस्त्रिभिर्मार्गैर्गच्छतीति त्रिमार्गगापदेन प्रोच्यते भगवती गङ्गा। रघुवंशस्य १३.२० पद्ये पुष्पकारूढः सीताजानिः सीतां प्रत्युद्गिरति—

३९. **असौ महेन्द्रद्विपदानगन्धी त्रिमार्गगावीचिविमर्द्दशीतः ।**
**आकाशवायुर्दिनयौवनोत्थानाचामति स्वेदलवान् मुखे ते ॥**

र. ३.२०

## ६. त्रिमार्गा

४०. त्रिमार्गगैव त्रिमार्गेत्यप्युच्यते। पार्वत्या जन्मना हिमगिरिस्तथैव पूतश्च विभूषितश्च यथा प्रभामहत्या शिखया दीपः, यथा त्रिमार्गया गङ्गया त्रिदिवपदवाच्यस्य स्वर्गस्य मार्गः यथा वा संस्कृतया वाचा मनीषी।

**प्रभामहत्या शिखयेव दीपस्त्रिमार्गयेव त्रिदिवस्य मार्गः ।**
**संस्कारवत्येव गिरामनीषी तया स पूतश्च विभूषितश्च ॥**

कु. १.२८॥

## ७. त्रिस्रोताः

त्रिमार्गगेव गङ्गा त्रिस्रोतःपदवाच्यापि कालिदाससाहित्ये। तथा अभिज्ञानशाकुन्तले परिवहस्य—

४१. १. वयोर्महिमानमुल्लिखति कविः 'त्रिस्रोतसं वहती'—ति पूर्वोद्धृतेन पद्येन कुमारसंभवे।

४२. २. वधूमण्डनेन मण्डिता पार्वती शुक्लवर्णमगुरुं गोरोचनापत्रविभङ्गं चाङ्गेषु दधाना तादृशी भासते स्म यादृशी चक्रवाकाङ्कितसैकता त्रिस्रोता अपि न—

**विन्यस्तशुक्लागुरु चक्रुरस्या गोरोचनापत्रविभङ्गमङ्गम् ।**
**सा चक्रवाकाङ्कितसैकतायास्त्रिस्रोतसः कान्तिमतीत्य तस्थौ ॥**

कु. ७.१५

४३. ३. रघुवंशेऽत्रिपत्नी अनसूया मन्दाकिनीं प्रवर्त्तयति। सा चासीत् त्रिस्रोताः सरित् अर्थात् गङ्गैव—

**अत्राभिषेकाय तपोधनानां सप्तर्षिहस्तोद्धृतहेमपद्माम् ।**
**प्रवर्त्तयामास किलाऽनसूया त्रिस्रोतसं त्र्यम्बकमौलिमालाम् ।।**

र. १३.५१

कुशः कुशावतीतः प्रतिप्रयाति अयोध्याम्। मध्ये स वन्दते त्रैस्रोतसं जलम्–

४४. **स पूर्वजानां कपिलेन रोषाद् भस्मावशेषीकृतविग्रहाणाम् ।**
**सुरालयप्राप्तिनिमित्तमम्भस्त्रैस्रोतसं नौलुलितं ववन्दे ।।**

र. १६.३४

## ८. भागीरथी

४५. १. कुमारसम्भवे हिमालयस्य किराताः भागीरथीनिर्झरसीकराणां वोढारं वायुं श्रमापनयनाय सेवन्ते–

**भागीरथीनिर्झरसीकराणां वोढा मुहुः कम्पितदेवदारुः ।**
**यद्वायुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिवर्हः ।।**

कु. १.१५

४६. २. अजः पार्थिववाहिनीं गृह्णाति तथैव यथा शोणो भागीरथीम्। अत्र भागीरथीति पदस्य स्थाने ज्योतीरथामिति परिवर्त्तन–मावश्यकम्। स्वीकृतं च तदस्माभिः कालिदासग्रन्थावल्याम्।

४७. ३. रघुवंशे दोहदं पृष्टा गर्भवती सीता भूयस्तरां भागीरथी–तीरतपोवनानि द्रष्टुमिच्छति–

**सा दष्टनीवारफलानि हंसैः संबद्धवैखानसकन्यकानि ।**
**इयेष भूयः कुशवन्ति गन्तुं भागीरथीतीरतपोवनानि ।।**

र. १४.२८

## ९. मन्दाकिनी

४८. १. मन्दाकिनीति नदीद्वयस्य सामान्या संज्ञा। तत्रैका चित्रकूटगता।

अपरा च हिमालयादुद्भूय पूर्वसागरगामिनी। बाल्ये पार्वती मन्दाकिन्याः सैकतवेदिकाभिः क्रीडति–

**मन्दाकिनीसैकतवेदिकाभिः सा कन्दुकैः कृत्रिमपुत्रकैश्च ।**
**रेमे मुहुर्मध्यगता सखीनां क्रीडारसं निर्विशतीव बाल्ये ॥**

कु. १.२९

४९. २. तारकासुरेण सर्वाण्यपि हेमाम्भोरुहाणि वापीषु स्वीयासु रोपितानि, ततश्च मन्दाकिन्यां केवलं दिग्वारणमदाविलं पयोमात्रमवाशेषि।

**मन्दाकिन्याः पयःशेषं दिग्वारणमदाविलम् ।**
**हेमाम्भोरुहसस्यानां तद्वाप्यो धाम केवलम् ॥** कु. २.४४

५०. ३. तपोरताय शिवाय पार्वती भानुमतो मयूखैर्विशोषितां मन्दाकिनीपुष्करबीजमालामुपनयति। सोऽपि च प्रणयिप्रियतया तामेतां प्रतिगृह्णाति–

**अथोपनिन्ये गिरिशाय गौरी तपस्विने ताम्ररुचा करेण ।**
**विशोषितां भानुमतो मयूखैर्मन्दाकिनीपुष्करबीजमालाम् ॥**

कु. ३.६५

५१. ४. रघुवंशे चित्रकूटगता मन्दाकिनी तैरेव विशेषैरुपस्थाप्यते ये साम्प्रतमपि तत्रानुसूयाश्रमपार्श्वे दृश्यानि–

**एषा प्रसन्नस्तिमितप्रवाहा सरिद् विदूरान्तरभावतन्वी ।**
**मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः ॥**

र. १३.४८

५२. ५. मेघदूते 'मन्दाकिन्याः सलिल०' इति प्रक्षेपो लभ्यत एव।

५३. ६. विक्रमोर्वश्यां पुनः (४८७ पृष्ठे) चित्रलेखा उर्वश्यां कोपस्य कारणं पुरुरवसा विद्याधरदारिकायां कृतो दृष्टिपात उदाह्रियते। दारिकैषा मन्दाकिन्याः सिकतासु क्रीडन्ती समासीत्–

चित्रलेखा—तहिं खु मंदाइणीए पुलिणेसु गदा सिअदापव्वदकेलीहिं कीलमाणा विज्जाहरदारिआ देण राएसिणा णिज्झाइदा।' वि. ४.३.८॥[१]

## १०. सुरसरित्

सुरसरिदिति गङ्गायाः प्रसिद्धमभिधानम्। कालिदासस्तेनापि गङ्गां स्मरति।

५४. १. रघुवंशे सुदक्षिणा तथैव गर्भं दधौ तथा सुरसरिद् वह्निनिष्ठ्यूतमैशं तेजो धत्ते—

**अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः**
**सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम् ।**
**नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी**
**गुरुभिरभिनिविष्टं लोकपालाऽनुभावैः** ॥ र. २.७५॥

५५. २. विक्रमोर्वश्याश्चतुर्थाङ्कगतास्वपभ्रंशगाथासु नदीगाथामनु या गाथा तत्र सुरसरित् पदं सुलभमेव। तथा—

**पसीअ पिअअम सुंदरि ए णए,**
**खुहिआकरुणविहंगम ए णए ।**
**सुरसरितीरसमूसुअ ए णए**
**अलिउलझंकारिअ ए णए** ॥[२] वि. ४.२५

त इमे कालिदाससाहित्यगताः गङ्गासन्दर्भाः।

---

१. तत्र खलु मन्दाकिन्याः पुलिनेषु गता सिकतापर्वतकेलीभिः क्रीडन्ती विद्याधरदारिका तेन राजर्षिणा निध्यायेति ।

२. प्रसीद प्रियतमे! सुन्दरि! ए नदि!
क्षुभिताकरुणविहङ्गमे! ए नदि! ।
सुरसरितीरसमुत्सुके! ए नदि!
अलिकुलझङ्कारिते! ए नदि! ॥

## मेघदूते तिथिनिश्चयः

महाकवेः कालिदासस्य मेघदूतं नाम खण्डकाव्यं कथावस्तुनो यत् खण्डमादायोपनिबद्धं तत्र तिथीनां विद्यमानायामपि सन्ध्यङ्गतायामिदन्तया निश्चयो नितान्तमेव दुष्करः। तत्र च तन्त्रं महाकवेरेवाभिव्यक्तेर्मुग्धात्वम्। ततश्च कथाखण्डमिदं ज्ञातुं कविवचनान्येवात्रोपस्थाप्यन्ते—

कश्चित् कान्ताविरहगुरुणा स्वाधिकारात् प्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ।। १।।

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनक—वलयभ्रंशरिक्तप्रकोष्ठः ।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ।। २।।

तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो—
रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ।। ३।।

प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् ।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ।। ४।।

**संतप्तानां त्वमसि शरणं तत् पयोद प्रियायाः**
**संदेशं मे हर धनपतिक्रोधविश्लेषितस्य ।**
**गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां**
**बाह्योद्यानस्थित–हरशिरश्चन्द्रिकाधौतहर्म्या ॥ ७॥**

मेघेन वक्तव्यं वर्णितालकापथस्य यक्षस्य संदेशपदं च कविरेवमुप–निबध्नाति–

**शापान्तो मे भुजगशयनादुत्थिते शाङ्‌र्गपाणौ**
**शेषान् मासान् गमय चतुरो लोचने मीलयित्वा ।**
**पश्चादावां विरहगुणितं तं तमात्माभिलाषं**
**निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ १०७॥**

संदर्भेस्मिन्ननेके प्रश्ना उदयन्ते। यथा वर्षमात्रभोग्यस्य शापस्य प्रारम्भ–परिसमाप्तितिथी के येयमत्र शिष्टस्य शापावधेर्मासचतुष्टयात्मकत्ववार्ता तत्र किं तावत् प्रथमं दिनं यच्चेदं मेघदर्शनम्, यच्च ततः परं संदेशप्रेषणम्, तदुभयदिनं तादृशमासचतुष्टयप्रारम्भदिनं च परस्परमभिन्नं भिन्नं वेति। एतेषां समाधये यतमाना अपि विद्वांसो विसंवादक्लेशं परिहर्त्तुं न क्षमन्ते। लेखेऽत्र तेषां विकल्पानुपस्थाप्य स्वविचारानपि प्रस्तोतुं प्रयतिष्यते। तत्र प्रथमं शापावधिमेव गृह्णीमः।

## शापावधिः

उपर्युक्तेषु पद्येषु चरमतमे पद्ये शापान्तो मे भुजगशयनादुत्थिते शाङ्‌र्गपाणौ इति वचनाद् योऽयं भगवतः प्रबोध उपनिबद्धस्तदर्थं तिस्रस्तिथयः पुराणेषूपलभ्यन्ते कार्तिकशुक्लपक्षस्य एकादशी, द्वादशी पूर्णिमा चेति। राधाकान्तदेवेन शब्दकल्पद्रुमेऽनेकानि पुराणवचनान्येतदर्थमुपस्थापितानि। निर्णयसिन्धुकृता कमलाकरभट्टेनापि च प्रायेण तान्येव प्रमाणितानि तेषु।

**एकादश्यां तु शुक्लायां कार्तिके मासि केशवम्।**
**प्रसुप्तं बोधयेद्।**

इत्यनेन ब्रह्मपुराणवचनेन,

**कार्तिके—मलपक्षे तु साक्षादेकादशी स्मृता ।**
**भक्तिप्रदा हरेः सा तु नाम्ना ख्याता प्रबोधनी ।।**

इत्यनेन वराहवचनेन, एवं प्रभृतिभिश्चानेकैः प्रमाणैः एकादश्या,

**इयं तु द्वादशी देवप्रबोधार्थं विनिर्मिता।**
**प्राप्ता तव द्वादशी कौमुदाख्या जागृष्व जागृष्व च लोकनाथ।**
**द्वादश्यां सन्धिसमये नक्षत्राणामसंभवे।**
**आ—भा—का—सितपक्षेषु शयनावर्तनादिकम्।।**

इति वराहपुराणस्यैव वचनैः सह पुराणान्तरवचनैर्द्वादश्याः,

**क्षीराब्धौ शेषपर्यङ्के आषाढ्यां संविशेद्धरिः।**
**निद्रां त्यजति कार्तिक्याम्—**

इत्यमुना च शब्दकल्पद्रुमे निर्णयसिन्धौ च यम—वचनतया दक्षिणावर्तनाथकृते मेघदूतप्रदीपे च कूर्मवचनतयोद्धृतेन प्रमाणेन पौर्णमास्याः प्रबोधतिथित्वं प्रतिपद्यते। कालिदासस्यात्र किमभिमतमिति वेदितुं न शक्यते तत्पद्ये तिथिनिर्देशं विना प्रबोधमात्रस्यैवोल्लेखात्। टीकितारः पुनरत्र परस्परं विसंवादिनः। तत्र मल्लिनाथः—

> 'पाणौ शाङ्र्गं यस्य तस्मिन् विष्णौ भुजगः शयनं तस्मादुत्थिते सति मे शापान्तः शापावसानं भविष्यतीति शेषः, शेषानव—शिष्टांश्चतुरो मासान् मेघदर्शनप्रभृति हरिबोधन—दिनान्तमित्यर्थः, दशदिवसाधिक्यं त्वत्र न विवक्षितमित्युक्तमेव, लोचने मीलयित्वा निमील्य गमयातिवाहये'—ति

'शापान्तो म' इति पद्यार्थं विवृण्वन् एकादशीमेव प्रबोधतिथिं मनुते, तेन 'आषाढस्य प्रथमदिवस' इत्यत्रागतस्य प्रथमपदस्य आषाढ—शुक्ल—प्रतिपत्तया

स्वीकृतत्वात्। भरतमल्लिकोपि सुबोधायाम्—

'....विष्णौ ....सर्पशय्याया उत्थिते .... प्रबुद्धे सति अर्थाद् उत्थानैकादश्याम्, तदानीमेव वर्षस्य पूर्णत्वात्, मे .... शापस्यान्तः परिसमाप्तिर्भविष्यती'—त्येवम् एकादशीमेव प्रबोधतिथिं मल्लिनाथवदेव स्वीकरोति। मेघदूतपंजिकायां वल्लभः पुनः—

'कार्तिक—शुक्ल—द्वादश्यां भुजग—शयनाच्छेष—तल्पाद् उत्थिते शाङ्र्गपाणौ हरौ मम शापान्तो भविष्यति, तदैव वर्षस्य परिपूर्णत्वाद्'—

इत्येवं प्रागुक्तपद्यार्ध—व्याख्याने द्वादशीमेव प्रबोधतिथिमूरीकरोति। मेघदूतप्रदीपकारो दक्षिणावर्तनाथश्च 'क्षीराब्धौ शेषे'—त्यादिकं पूर्वोद्धृतं प्रमाणं कूर्मवचनतयोद्धृत्य पौर्णमासीमेव प्रबोधतिथित्वेन निश्चिनोति। इत्थमत्र भिन्नाष्टीकाकारा, भिन्नत्वभांजि च तेषां मतानि। कालिदासश्च वाचंयमः। तर्हि किन्वत्र प्रतिपत्तव्यम्।

अयमत्रापरः प्रश्नो यदेतासां तिसृणां तिथीनां यापि काचन शापावसानतिथित्वेन गृह्येत तस्यां शापः कदा मोक्ष्यते। तस्या आरम्भ एव, समाप्तौ वा। अयमर्थो यत् तां मर्यादीकृत्य वा शापो मोक्ष्यते अभिव्याप्य वा। एवं च समापतितः शापारम्भतिथावपि विकल्पः। तथा हि मर्यादापक्षे पूर्वोक्तानां ११, १२, १५ तिथीनामेव शापारम्भतिथित्वमापतति, अभिव्याप्ति—पक्षे च तदव्यवहितोत्तरवर्त्तिनीनां क्रमेण १२, १३, १ तिथोनाम्। अत्रापि मल्लिनाथो वल्लभश्चेति द्वौ मर्यादा—वादिनौ, दक्षिणावर्त्त—नाथोभिव्याप्तिवादी, भरतश्च संदिग्धः। ततश्च मल्लिनाथमते एकादश्याः, भरतमते तदुभयान्यतरस्य, दक्षिणावर्त्तनाथमते च तदुत्तरवर्त्ति—कृष्णपक्षप्रतिपदः शापारम्भ—तिथित्वमायाति। इत्थं हि शापस्यारम्भोऽवसानं चेति द्वितयस्यापि तिथिरनिश्चितैव। सोयमेकः शापावधिविषयकः प्रश्नः। एतत्समाधौ प्रश्नान्तराणि साहाय्यं वितरन्तीति साम्प्रतं विचार्यते। तत्र शिष्टस्य

शापावधेर्मासचतुष्टयात्मकत्वात् प्रथमं दिनं तदेव यद्धि हरिशयनदिनत्वेन पुराणेषु प्रथितम्। का नामात्र तिथिरिति प्रश्नः प्रबोधनीवदेव दुस्समाधिः। एतत्तु तत्र नियतं यद् आषाढशुक्लपक्षस्य ११, १२, १५ एतासु काचनाप्येका तिथिर्हरिशयनतिथित्वेन मन्तुं शक्यते। तत् एव प्रभृति धर्मशास्त्रेषु चातुर्मास्यव्रतस्यारम्भविधेदर्शनात्। यश्चात्र मेघदर्शन—संदेशप्रेषण—हरिशयन—दिनानामभिन्नतायाः प्रश्नस्तत्र मेघदर्शनदिनमेवात्यन्तं क्लेशा—वहमिति तदेव प्रथममुपादीयते।

## मेघदर्शनदिनम्

मेघदर्शनदिननिश्चयाय कालिदासस्य पूर्वोद्धृतम् 'आषाढस्ये'—ति द्वितीयं पद्यमेवैकमालम्बनम्। तत्र चार्थनिश्चये टीकितारो नैकमताः। ते हि 'प्रथमदिवस—'पदमनेकधा योजयन्तो दृश्यन्ते। पूर्वार्धगते च 'कतिचित्'—पदे ते सर्व एवैकमताः। तथाहि दक्षिणावर्त्तनाथः—

'कतिचित् अनिर्दिष्टसंख्याविशेषेप्यस्मिन् पदे संख्याविशेषो द्रष्टव्यः। तद्यथा—'मासानन्यान् गमय चतुरो लोचने मीलयित्वा'—इति वक्ष्यमाणवचनेन चतुर्ण्णां मासानां गमयितव्यत्वं प्रतीयते। ते चाषाढात् प्रभृति चत्वारो मासाः 'आषाढस्य प्रथम—दिवस' इति वक्ष्यमाणत्वात्—इति द्वितीयं पद्यम्,

'मासानन्यान् गमय चतुर इति आषाढमासादिकानाश्व—युजमासान्तानि—त्यर्थः' इति च 'शापान्तो म'—इति पद्यं विवृणोति। वल्लभदेवः 'प्रथमदिवस'—पदस्य स्थाने 'प्रशमदिवस'—पदस्य मूलत्वं कल्पयति, विवृणोति च 'आषाढे'—ति पद्यम्—

> 'ततोसौ यक्षः कतिचित् सप्ताष्टान् मासान् नीत्वा आषाढस्य प्रथमदिवसे समाप्तिदिने ग्रीष्मावसाने.....। केचित्तु शकार—थकारयोर्लिपिसारूप्यमोहात् प्रथम इत्यूचुः, कथं कथमपि चैतमेवार्थ—प्रतिपन्नाः। वर्षाकालस्य प्रस्तुतत्वात् आदिदिनमित्येतत्त्वतीव विरुद्धम्।—'इत्येवम्, 'शापान्त'—पद्यं च—

'कार्तिक—शुक्ल—द्वादश्यां ..... मम शापान्तो भविष्यति, तदैव वर्षस्य परिपूर्णत्वात्, अतश्चाद्यारम्भ मासचतुष्टयं लोचने मीलयित्वा .... गमये'—त्येवम्।

चारित्रवर्धनः शापावधिसङ्गतये वल्लभस्यैव क्रममनुसरति किन्तु पाठमसौ दक्षिणावर्तवदेव 'प्रथमदिवस'—इत्येवादत्ते। तत्र स्वचातुर्यं प्रकटयन्नसौ भणति—

'आषाढस्य प्रथमः प्रवरश्चासौ दिवसश्च, यस्मिन् वासरे मासः पूर्तिमियर्त्ति। सा आषाढ्यमावस्येति भावः। तस्य प्रवरत्वं च कृष्यादिकार्याणां तस्मिन् प्रारभ्यमाणत्वात्'—इति।

पक्षान्तरमप्युपस्थापयन्नसौ वक्ति—

'मासस्यावसानो दिवसः स एव प्रशमदिवसः। प्रथमः प्रख्यातो विष्णुदिवसः प्रथमैकादशीत्यर्थः।' इति।

मल्लिनाथोपि 'प्रथम'—पदघटितमेव पाठं मूलत्वेनाङ्गीकृत्य पद्यमिदम्—

'कतिचित् मासान् अष्टौ मासान् इत्यर्थः 'शेषान् मासान् गमय चतुर'—इति वक्ष्यसाणत्वात्, नीत्वा, आषाढ्यस्मिन् पौर्णमासी—त्याषाढो मासः,

तस्य प्रथमदिवसे आश्लिष्टसानुमाक्रान्तकूटं.....मेघं ददर्श। —एवम्, 'शापान्त'—पद्यं च पूर्वोक्तेन क्रमेण व्याख्याति। भरतमल्लिकोपि सुबोधायां प्रथमं पद्यम्—

'आषाढस्य प्रथमदिवस आद्ये दिने मेघं ददर्श। ... । यद्यपि कतिचिन्मासानिति संख्या नाभिहिता तथापि अष्टौ मासा बोद्धव्याः 'शेषान् मासान् गमय चतुर'—इति वक्ष्यमाणत्वात्। एवम्, 'शापान्त'—पद्यं च पूर्वोक्तेन क्रमेण व्याख्याति।

इत्थं हि प्रथमदिवसपदार्थे विवादोस्ति। कतिचिन्मास—पदार्थे संवादः। तदयमत्र प्रश्नः—'योयं शापो वर्षमात्रभोग्यः प्रबोधतिथौ च कार्तिके मासि समाप्यः, तस्य प्रारम्भो नियतमेव कार्तिकमासस्य तामेव तिथिं मर्यादीकृत्या—

भिव्याप्य वा मान्यः। ततश्च शापारम्भतिथिः प्रबोधनतिथित्वेन गृहीतासु पूर्वोक्तासु ११, १२, १५ एव वा कापि तिथिः। सर्वथा यदि 'अष्टौ मासा व्यतीताः, केवलाश्चत्वार एव चावशिष्टाः 'तर्हि मेघदर्शनदिनत्वेन तानि दिनानि ग्रहीतुं कथं शक्यानि यानि प्रागुक्तमतैः टीकाकृद्भिर्गृहीतानि' इति। को नामात्र दोष इति चेद् गणनाविसंवादः। कथमिति चेद् एवम्। यदि नाम शापः प्रबोधन्यां मोक्ष्यते तर्हि मेघदर्शनतिथिर्नियतमेवैका हरिशयनतिथिरेव भवति प्रबोधनीपर्यवसायिनश्चातुर्मास्यस्य तत एव प्रारम्भसंभवात्। कल्पान्तरे च तस्यान्यथात्वप्रसङ्गात्। तथाहि यदि मासारम्भः शुक्लपक्षान्मन्यते चाषाढस्य प्रथमं दिनं शुक्लपक्षप्रतिपत्तितिथिरूपं तर्हि चातुर्मास्यं कार्तिककृष्णपक्षं यावदेव पूर्यते, ततश्च कार्तिकशुक्लपक्षस्यप्रतिपद आरभ्य प्रबोधनदिनं यावद् यावन्ति दिनानि तानि तत्राधिकानि भवन्ति। ततश्च क्षीयते शापस्य वर्षभोग्यत्वम्। यदि च चारित्रवर्धनक्रमेण प्रथमदिनपदेनाषाढ्यमावास्या गृह्येत तर्हि समापतति पुराणवचनविरोधः, आषाढशुक्लपक्षस्यैव तत्र हरिशयनतिथिघटिततया प्रतिपादितत्वात्, अमावस्यायाश्च कृष्णपक्ष–घटकत्वात्। यदि च मासारम्भः कृष्णपक्षान्मन्येत मन्येत च प्रथमपदस्य प्रतिपत्परत्वम् तदा कार्तिककृष्णपक्षतः प्रबोधनतिथिं यावद् यः कश्चन समयः स शापावधौ वर्धते। खण्ड्यते वा व्यतीतानां मासानामष्टत्वम्। नास्ति च प्रतिपदो हरिशयनतिथित्वम्। प्रशमदिवसपाठो वल्लभनीत्या यदि ग्रीष्मावसानदिनस्य प्रशमदिनत्वं मन्यते तर्हि मासस्य शुक्लादित्वपक्षे ग्रीष्मावसानतिथिराषाढ्यमावास्या। तत्र च दोषो दर्शित एव। कृष्णादित्वपक्षे पूर्णिमा चेत् सा नभोमासप्रत्यासत्ति विरुद्धा। यो हि नभोमासे दयिताजीवितसंशयी स ततः पूर्वमेव चेतयेत प्रवृत्तिहरणाय, न तु आगत एव तस्मिन्। पूर्णिमा च नभोमाससन्धितिथिः। यदि च कार्तिकशुक्लैकादशी प्रबोधतिथिस्तर्हि तत्र चातुर्मास्ये न्यूनत्वमपि प्रसज्यते। तदिदं सर्वमपि दोषजातं परिजिहीर्षन्तष्टीकाकारा अत्र विविधं विकल्पन्ते। तत्र मल्लिनाथः—

'केचिद्' आषाढस्य 'प्रथमदिवस' इत्यत्र 'प्रत्यासन्ने नभसी' ति वक्ष्यमाणनभोमासस्य प्रत्यासत्त्यर्थं 'प्रथमदिवस'—इति पाठं कल्पयन्ति, तदसङ्गतम्, प्रथमातिरेके कारणाभावात्। नभोमासस्य प्रत्यासत्त्यर्थमित्युक्तमिति चेन्न, प्रत्यासत्तिमात्रस्य मासप्रत्यासत्त्यैव प्रथमदिवसस्थाप्युपपत्तेः, अत्यन्तप्रत्यासत्तेरुपयोगाभावेनाविवक्षि- तत्वात्। विवक्षितत्वे वा स्वपक्षेपि प्रथमदिवसातिक्रमेण मेघदर्शनकल्पनायां प्रमाणाभावेन तदसंभवात्। प्रत्युतास्मत्पक्ष एव कुशलसन्देशस्य भाव्यनर्थप्रतीकारार्थस्य पुरत एवानुमानमुक्तं भवतीत्युपयोगसिद्धिः। ननून्मत्तस्य नायं विवेक इति चेन्न, उन्मत्तस्य नानर्थस्य प्रतीकारार्थं प्रवृत्तिरिति सन्देश एव माभूत्। तथा च काव्यारम्भ एवाप्रसिद्धः।...। कथं तर्हि ... शापस्य मासचतुष्टया- शिष्टस्योक्तिः, दशदिवसाधिक्यादिति चेत् स्वपक्षेपि सा कथम्, विंशतिदिवसैर्न्यूनत्वात्। तस्माद् 'ईषद् वैषम्यमविवक्षितम्'। इति

वल्लभदेवस्य 'प्रशमदिवस'—पाठं कल्पनाप्रसूतमिति प्रदर्श्य तत्र विंशतेर्दिवसानां न्यूनत्वरूपं यद् वैषम्यं तत्र गौरवम्, स्वपक्षे च दशदिवसानां वृद्धिरूपं यद् वैषम्यं तत्र लाघवं वीक्षमाणः स्वपक्षवरीयस्त्वमात्रेण तुष्यति। वैषम्यं सर्वथैवोन्मूलयितुं न प्रभवति। एतन्मते विंशतिदिवसानां न्यूनतापि कथमिति विज्ञेयम्, मासस्य शुक्लादित्वे आषाढस्य कृष्णादित्वपक्षे श्रावणत्वेन गणनीयत्वं कृष्णपक्षं यावद् व्याप्तेः। प्रबोधन्याश्च कार्तिकशुक्लपक्ष एव जायमानत्वात् पूर्ण आषाढः, पूर्णः श्रावणः, पूर्णो भाद्रः, पूर्ण आश्विनः, प्रबोधनीं यावत् कतिचिद् दिनानि च कार्तिक इत्येवमत्र दिनानां वृद्धेरेव संभवात्। न च मासस्य कृष्णादित्वपक्षेपि तावतां दिवसानां न्यूनता संभवति, तदा कार्तिके प्रबोधन्याः प्राक् कृष्णपक्षस्य परिगणनामादाय चतुःपञ्चानामेव दिवसानां न्यूनतायाः संभवात्। तेन वल्लभपक्ष एव लाघवं स्पृशति। भरतमल्लिकस्तस्य सुबोधायां वैषम्यमिदं शमयितुं विचित्रं विकल्पयते। स कथयति—

१. मेघो वार्त्तां श्रावणे श्रावयिष्यति, तदपेक्षया चत्वारो मासा:।

२. मेघं दृष्ट्वा कष्टसृष्ट्या आषाढं गमयित्वा श्रावणे वार्ता प्रस्थापिता, अतस्तदपेक्षया चत्वारो मासा:, वक्ष्यते हि 'तस्य स्थित्वा कथमपी'—त्यादि, 'प्रत्यासन्ने नभसी'—त्यादि च।

३. किं वा कामेनानवस्थितचित्तत्वात् संख्यामविभाव्यैव तथोक्तम्। इति।

एतेषु यस्तृतीय: कल्प: स मल्लिनाथेनैव 'ननून्मत्तस्य नायं विवेक' इत्युपस्थाप्य 'उन्मत्तस्य नानर्थप्रतीकारेषु प्रवृत्ति'—रित्यादिना तर्केण निष्प्राणित:। अवशिष्टयोराद्ये मेघस्यालकामार्गलङ्घने त्रिंशत् पञ्चदश वा दिनान्यपेक्ष्येरन्। तच्च यक्षस्यानभिप्रेतम्। स हि विलम्बासहिष्णुर्मेघं संज्ञापयते 'मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्या:' इति। नास्ति च कल्पनामात्रमृते किमपि प्रमाणं यन्मेघो वार्त्तां श्रावण एव श्रावयिष्यतीति। किमत्र विनिगमकं यदसौ आषाढ एव वार्त्तां न श्रावयिष्यति। इदं चात्रापरं प्रतिकूलं यदत्र मासचतुष्टयावशेषवार्ता विराध्यते। अलकाप्राप्तिदिनस्य संदेशप्रेषणदिन एव यक्षेण निश्चेतुमशक्यत्वात्। नास्त्यत्र किमपि प्रमाणं येनासौ प्रागेव निश्चेतुं प्रभवेद् यन्मेघोऽलकां तदानीं प्राप्स्यति। यश्चात्र द्वितीये कल्पे मेघदर्शन—संदेशप्रेषणयोरेकमासस्य व्यवधि: कल्पित: सोऽपि निष्प्रमाण एव। समनन्तर—पद्य—घटकीभूतयोश्चिरध्यान—नभोमास—प्रत्यासत्त्यो—स्तादात्विकत्वस्यापि ग्रहीतुं शक्यत्वात्। नास्ति चात्र महाकवेर्वच:संप्रसाद:। यदि संपूर्णमाषाढमासं यावद् यक्षस्य मेघदर्शनं कवेरभिप्रेतं तर्हि पौन:पुन्यमप्यसौ दर्शयेदेव, कथयेच्चैवमिव किंचित्—

**तस्मिन्नद्रौ ... स... आषढस्य... मेघं...ददर्श ।।**

**दर्शं दर्शं कतिपयदिनान्येष मेघान् प्रियाया:**
**प्रत्यासन्ने नभसि नितरां जीविते संदिहान: ।**
**एकेनैभ्य: स्वकुशलमयीं हारयिष्यन् प्रवृत्तिं**
**संपाद्यार्घ्यं कुटजकुसुमै: स्वागतं व्याजहार ।।**

किं च 'मेघं ..... ददर्श, कौतुकाधानहेतोस्तस्य पुरः कथमपि स्थित्वा राजराजानुचरश्चिरं दध्याविति वचोन्यासे को नु सहृदयो मेघदर्शनानन्तरं प्रतिपाद्यमाने चिरध्याने मासावधिकत्वं प्रतिपद्येत। चिरध्यानस्य तत्र द्वित्रिमुहूर्त्तमात्रावधिकत्वमेव हृदये सजति। या चात्र नभोमासदर्शनस्य वार्त्ता सा वस्तुतश्चिरध्यानस्य परिणामः। चिरध्याने तेन नभोमासप्रत्यासत्तिनिष्ठा कातरकामिनीजन—जीवित—व्यापत्तिजनकतैव स्वदशाहेतुकानुमिता। तत एव च विचलितोयमचेतनादपि मेघात् प्रवृत्तिं प्रेषयितुं तत्वरे। तदेवं नास्ति मल्लिकोपस्थापितेषु समाधानसूत्रेषु क्षेमसौरभम्।

अयमेव च कांश्चन पूर्वपक्षानपि विमतिपूर्वकं प्रस्तवीति। यथा—

१. केचित् तु चान्द्रमासगणनया समादधर्ते।
२. केचित् तु आषाढस्य प्रथमदिवसे प्रधानदिवसे पूर्णिमायामित्यर्थः, यतः आषाढी पूर्णिमा यस्मिन् मासे स आषाढ इति पूर्णिमयै—वाषाढसंज्ञोत्पत्तेः, पूर्णिमाया अत्र प्राधान्यमिति वक्ष्यते। तन्न कृत्यं कष्टकल्पितत्वात्।
३. केचित् तु प्रथमं ख्यातं मेघम् अ—दिवसे विष्णुदिवसे शुक्लैकादश्याम्, किंवा अदिवसे अविद्यमानदिवसे मासावसाने, किंवा अदिवसे रात्राविति व्याचक्षते। एतदपि न कृत्यम्, अनुपादेयत्वेन कुकवित्वापत्तेः।
४. 'प्रशम' इति पठित्वा अन्तादिवस इति केचिद् व्याचक्षते, स पाठः क्वचिदपि न दृश्यते।

अत्र योयं प्रथमो विकल्पस्तत्र टीकाकृता काचनापि विप्रतिपत्तिर्न दर्शिता। धर्मशास्त्रव्यवस्थासु चान्द्रमास एव गृह्यते तत्तत्पर्वसु तथापि तत्र शापावधावागतस्थितिविसंवादो न शाम्यति। चान्द्रे हि मासे तिथीनां वृद्धि—क्षयौ जायेते। किन्तु चतुर्षु मासेषु ३०, १५, १० दिनानि वा वर्धितानि, क्षीणानि वा कल्पितुं न शक्यन्ते। किं चासति स्वस्थे क्वचन समाधानान्तरे समाधिपदवीयमाद्रियेतापि। अस्ति चात्र तादृशं समाधानमिति किमित्येषा

विडम्बना। किमिदमिति चेद्, वक्ष्यते न चिरात्। भरतमल्लिकोपस्थापितानि यानि चान्यानि पूर्वपक्षमतानि तानि हि दर्शितदूषणान्येव।

आधुनिकेषु श्रीमान् रञ्जनसूरिदेवो नवीनमेवैकं पन्थानमुन्मीलयति। स हि प्रथमदिवसपदेन शुक्लपक्षषष्ठीं गृह्णाति। एतदर्थं स मुहूर्त्त–चिन्तामणेष्टीकायाः पीयूषधाराया–

आ पञ्चम्यास्तु तिथयः कृष्णवत् परिकीर्तिताः

इति वचनं प्रमाणीकरोति। प्रबोधतिथिमसौ प्रसिद्ध्यनुसारं पूर्वोक्ता–मेकादशीमेव स्वीकरोति। ततश्च पञ्चानां दिनानां वृद्धिमसौ चान्द्रमास–चतुष्टये तिथिवृद्धिकल्पनया सङ्गमयति। अत्र हि द्वयं विमर्शविषयः १. शुक्ल–पक्षस्य प्रथमानां पञ्चानां तिथीनां कृष्णपक्षतिथितुल्यता २. तिथिवृद्धिप्रमापकं च। किमत्र कृष्णतुल्यत्वेन शुक्लतिथीनां शुक्लत्वमपचीयते, कृष्णत्वमेव च तत्राधीयते। यद्येवं तर्हि पक्षोभयस्य षष्ठ्यां प्रतिपत्त्वं पूर्णिमायां चैकादशीत्वं व्यपदिश्येत। व्यपदिश्येत च पञ्चम्या एव पूर्णिमात्वममावास्यात्वं च। न चासौ व्यपदेशो मौहूर्तिकैरपि क्वचन कृतः, सूर्यचन्द्रग्रहणतिथ्योस्तेषु सर्वत्र अमा–पूर्णिमात्वेनैव व्यपदिश्यमानत्वात्। न हि कश्चनापि ज्योतिर्विद् शुक्ल–कृष्ण–पञ्चमयोर्ग्रहणतिथित्वमुदीरयति, उदीरयति वा ग्रहणतिथेरेकादशीत्वम्। वस्तुतोत्र तमोबहलतासाम्यप्रतिपिपादयिषयैवं व्यपदेशः। शुक्लपक्षस्य प्रारम्भिकाः पञ्च तिथयस्तथैवान्धकारभूयिष्ठा भवन्ति यथा कृष्णपक्षस्यान्तिमाः पञ्च। इयानेव तत्र भेदो यदेकत्र रात्रेरारम्भे चन्द्रमा उदयते, अपरत्र चान्ते। एतेन हि तमोबहलतामात्रेण यदि शुक्लपक्षस्य कृष्णत्वमायाति तर्हि कृष्णपक्षस्यापि शुक्लत्वे तथैव न्यायलभ्यम्। ततश्च प्रबोधनपर्वणोपि कतिपयदिना–भ्यधिकत्वमापतति। तेन च चान्द्रमासगणनया समाहितो दिनवृद्धिप्रसङ्गो वेतालवत् तत्रैवावलम्बते। न हि चतुर्मात्रेषु मासेषु दश दिनानि वर्धितुं शक्नुयुः। अपि चात्र मासा गण्यन्ते। तत्र तिथीनां क्षयो वा भवतु वृद्धिर्वा,

मासपरिमाणं न क्षीयते। ततश्च वृद्धिक्षययोः संभवस्तेष्वेव दिनेषु संभवति यानि हरिशयनीतः श्रावणमासारम्भं यावदापतन्ति यानि च कार्तिकारम्भतः प्रबोधिनीं यावत्। सोऽयं मासमध्यावधिकोवधिः। अत्र अधिकादधिकं त्रिंशद्दिनप्रमाणत्वं कल्पितुं शक्यम्। न च त्रिंशति दिनेषु दश पञ्चदश वा दिनानि क्षयं वृद्धिं वाश्नुवीरन्। एवं हि सूरिवरेणानेन तिथिवृद्धिः स्वमनीषिकयैवागूर्यते। नास्ति तत्र किमपि प्रमापकम्। तदित्थं 'प्रथम—प्रशमयोः' मध्ये कस्यचनापि पाठस्याश्रये नास्ति वैषम्योपशमः।

वयमत्र एवमिव किंचिच्चिन्तयामः यदिदमवधिवैषम्यं तत्र मूलं केवलमेकमेव। तच्च 'आषाढ'—पदानन्तरीयायाः षष्ठ्या अर्थस्य 'प्रथमदिवस'—पदार्थेनान्वयः। सर्वैरपि प्रागुल्लिखितैष्टीकाकारैस्तथैव तस्यान्वयः क्रियते। तत्र च मूलमनययोरव्यवधिना समभिव्याहारः तथा हि शाब्दधीरवरुध्यते। धीरियं ततोपसर्त्तुं न क्षमते। यदि चात्र 'आषाढस्य मेघं प्रथमदिवस आश्लिष्टसानुं ददर्श'—ति पदार्थयोजना क्रियेत तर्हि सर्वोप्ययमुपशममियादुपप्लवप्रसङ्गः। औचित्यसुभगस्य पूर्वादधिकस्यार्थस्य लाभश्चात्र गुणः। कोयमिति चेदयम्—'यक्षः प्रथमदिवस आश्लिष्ट—सानुमाषाढस्य मेघं ददर्श। सान्वाश्लेषस्य येयं मुद्रा सा तेन तस्मिन् वर्षारम्भमासे प्रथमप्रथममेव दृष्टा। इयं हि मन्मथोन्माथमुत्थापयितुं तथा समर्था न यथा ततः पूर्वं तत्रैव मासे दृष्टा मेघस्य काश्चनान्या मुद्राः। अस्यां हि स्त्रीपुंसयोराश्लेषो व्यज्यते। सान्द्रतया विरहिचेतांस्यन्यथयितुं प्रागेवालंभूष्णुराषाढमेघः यदि परिरम्भमुद्रामादाय पुरस्तादाजिहीते ततो युक्त एव जीवितसंशयो विरहितपस्विनाम्। ततश्च युक्ता एव चेतनेष्विवाचेतनेष्वपि प्रणयकृपणता प्रवृत्तिप्रेषणाय तेषाम्, तत्र च कालक्षेपस्तेषामत्यर्थमेवासह्यः। किं पुनस्तदा यदा मेघसान्द्रतायामात्यन्तिकीं निबिडतामुपजनयन् अत एव च नितान्तमेवोद्वेजयन् नभोमासः प्रत्यासीदेत्। ततश्चासौ चिरं ध्यात्वापि कल्पान्तरमवीक्षमाणो मेघेनैव स्वकुशलप्रवृत्तिं प्रेषयितुमियेष।' अस्यां हि

पदार्थयोजनायां प्रबोधतिथितयागृहीतां तिथिं यावन्मासचतुष्टयावधिसंवादा–याषाढशुक्लपक्षस्य काचनापि तादृशी तिथिर्ग्रहीतुं शक्यते। तस्यामेव हि तिथौ यक्षेण प्रथमं वारमाश्लेषमुद्रायामाषाढमेघो दृष्ट इति च मन्तुं शक्यते। बलं चास्मिन् पक्षे पूर्वोक्तचतुर्मासावधिसंवादान्यथानुपपत्तिः। अस्ति चावधिसंवादानुपपत्तेरन्वयेनैतेनोपशमः। ननु पदार्थयोजनेयमस्वाभाविकी, दिवसमासयोरन्वयस्य प्रसिद्धतया मासवाचकाषाढपदानन्तरीयविभक्तिवाच्यस्य समभिव्याहृतदिवसपदवाच्येनैवान्वयस्य प्रथमप्रतीतत्वात्। अन्वयान्तरे चास्थानस्थपदत्वाभिषङ्गप्रसङ्गात्, ततो युक्त एव टीकाकृतामेवान्वयक्रमः। 'इति चेत्' ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्येत्यादौ किमुच्येत। किमुच्ये च–

**इदमनन्यपरायणमन्यथा हृदयसन्निहिते हृदयं मम ।**
**यदि समर्थयसे मदिरेक्षणे मदनबाणहतोपि हतः पुनः ।।**

इत्येवमादिषु अन्वयवक्रताभ्राजिष्णुषु पद्यरत्नेषु। एतेषु हि महाकविवाचोभीष्ट–योजनाप्रातीपिकत्वेपि नास्ति तादृशमस्थानस्थत्वम्। इहापि च न ह्येव स्यादीदृशी धीः यदि निपुणतरमनुध्यायेत। तादृशान्वयानुकूल्यभाजि हि मतौ 'शापान्तो म' इति संदर्भान्तरावहितस्य प्रत्युतान्वयान्तरमेव न प्ररोहेत्। यदि च 'आषाढीयं प्रथमदिवसे मेघमाश्लिष्टसानुम्' एवमभ्यस्येत तर्हि 'आषाढस्य प्रथमे'–त्यादावपि मासचतुष्टयावधिविसंवादिनी पदार्था–न्वयधीर्नोदियादेव। एवं च कृते परिरम्भमुद्रायां मेघदर्शनस्य प्रथमा तिथिः प्रबोधतिथितया गृहीतायाः कुतश्चनापि तिथेर्मासचतुष्टयारम्भतिथिरूपा काचनापि मर्यादाभिव्याप्तिपक्षद्वयान्यतर–रूपा आषाढमासस्य शुक्लपक्षीयासु चरमतमासु पञ्चसु तिथिषु एका ग्रहीतुं शक्यते। तत्रापि च पुराणवचनप्राकाम्यादेकादशी–द्वादशी–पूर्णिमेत्यतदन्यतमत्रैवावधानं दीयेत। आसामप्येकादशी–द्वादश्योः सन्धिरेव वस्तुतः संरम्भास्पदम्। प्रबोधस्यापि

तस्मिन्नेव सन्धौ मान्यत्वात्। अस्ति हि निर्णयसिन्धु—शब्दकल्पद्रुम—व्रतराजादिषु प्रमाणग्रन्थेषु तत्रैव प्रमाणबाहुल्यम्। तेषु हि—

**एकादश्यां तु शुक्लायां कार्तिके मासि केशवम् ।**
**प्रसुप्तं बोधयेद् रात्रौ भक्तिश्रद्धासमन्वितः ।।**

इति ब्रह्मपुराणस्य,

**रेवत्यन्तो यदा रात्रौ द्वादश्या च समन्वितः ।**
**तदा विबुध्यते विष्णुर्दिनान्ते प्राप्य रेवतीम् ।।**

इति स्कन्दपुराणस्य,

**महातूर्यरवै रात्रौ भ्रामयेत् स्यन्दने स्थितम् ।**
**उत्थितं देवदेवेशं नगरे पार्थिवः स्वयम् ।।**

इति भविष्योत्तरपुराणस्य

एवंप्रभृतीन्यन्यानि चानेकानि वचनान्युद्धृत्य तिथ्योरनयोः सन्धिकाल एव प्रबोधाय स्थिरीकृतः। भीष्मपञ्चकव्रतम्, तुलसी—विवाहः, चातुर्मास्यव्रत—पूर्तिश्चेति बहुविधान्यन्यान्यपि पुण्यकर्माणि प्रायेण कार्तिकशुक्लैकादश्या आरम्भतो द्वादशीप्रारम्भं यावन्निर्वर्त्यन्ते। हरिशयनमपि आषाढशुक्ल—पक्षीययोरनयोरेव तिथ्योः सन्धिसमये विधीयते। तथा हि शब्दकल्पद्रुमकारो वामनपुराणस्य—

**एकादश्यां जगत्स्वामिशयनं परिकल्पयेत् ।**
**शेषाहिभोगपर्यङ्कं कृत्वा संपूज्य केशवम् ।।**

इत्यनेन वचनेनैकादश्याः शयनतिथित्वमुदीर्य निम्नलिखितेन भविष्यपुराण—वचनेन द्वादशीप्रारम्भे शयनविधिं व्यवस्थापयते—

**निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम् ।**
**अन्यत्र पादयोगे तु द्वादश्यामेव कारयेत् ।।** इति।

अस्ति च शयन—बोधनयोर्मेघदर्शनस्यापि पुराणेषु संग्रहः। शयनतिथौ हि

मेघदर्शनमेव कारणमुच्यते। एतच्च—

**पश्यन्तु मेघानपि मेघश्यामं ह्युपागतं सिच्यमानं महीमिमाम् ।**
**निद्रां भगवान् गृह्णातु लोकनाथ वर्षाष्विमं पश्यतु मेघवृन्दम् ।।**
**ज्ञात्वैव पश्यैव च लोकनाथ मासांश्चत्वारि वैकुण्ठस्य च पश्य नाथ।**

इत्यनेन वराहपुराणस्य शब्दकल्पद्रुमोद्धृतेन वचनेन स्पष्टम्। जागरणतिथावपि मेघापगमः स्मर्यते। यथा चैतत् तदधोदत्तेन ब्रह्मपुराणवचनेन स्पष्टम्—

**मेघा गता निर्मलपूर्णचन्द्रः शारद्यपुष्पाणि च लोकनाथ ।**
**अहं ददानीति च पुण्यहेतोर्जागृष्व जागृष्व च लोकनाथ ।।**

कुटजादिपुष्पाणामपि शयनतिथौ पुराणेषूल्लेखो लभ्यते। तथा हि शयनात् पूर्वं यैः पुष्पैर्भगवतः पूजनं क्रियते तेषु कुटजपुष्पमेव वराहपुराणे प्रथममुल्लिख्यते—

**कदम्ब—कुटजश्चैव धवकोर्जुनकस्तथा ।**
**एभिरभ्यर्च्चनं कुर्याद् विधिदृष्टेन कर्मणा ।।** इति

तदित्थं कालिदासः पुराणवचनान्यनुसरन्नेव यक्षमुल्लापयते। तेन हि तस्य कार्तिकशुक्लैकादशीद्वादशीसन्धिसमय एव प्रबोधपर्वतयाभिमतः। अतएव च यक्षो रात्रिमेव शापावसानोत्तरकालिकावसरत्वेनोद्धरति—

**शापान्तो मे ..... लोचने मीलयित्वा ।**
**पश्चादावां विरहगुणितं तं तमात्माभिलाषं**
**निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ।।** इति।

इदमन्यत्र वक्तुं शक्यते यत् पुराणवचनेषु परस्परं विरोधात् कालिदासः शयनप्रबोधयोः कृते कामपि तिथिं नोल्लिलेख सामान्येनैव वचनोपन्यासेन शापावधिं निर्दिदेश। एतत्तु सर्वथा निश्चितं यद् यक्षो मेघं हरिशयनदिने ददर्श। तत्रैव च दयितायै स्वकुशलप्रवृत्तिं प्रेषयितुमसौ मेघं याचितवान्।

स एव च दिवस आषाढस्य प्रवरत्वात् प्रथमो दिवसः। यदि चात्र 'जानामि त्वां प्रकृतिपुरुषमि'त्यत्र प्रकृतिपदमिवानिहतार्थं मत्वा प्रथमपदमपि प्रवरत्वपरमादीयेत ततश्चारित्रवर्धनरीत्या तादृशान्वयवक्रताक्लेशोपि परिहीयेत।

इत्थमत्र शापारम्भः कार्तिकशुक्लैकादशी—द्वादशी—सन्धि—कालिको मान्यः। तत्र हि प्रबोधनोत्सवसमये यक्षेण कश्चन प्रमादः कृतः स्याद् येनापराधितो यक्षेश्वरस्तं शापेन यन्त्रितवान्। सोपि च प्रमादः प्रबोधसमयेपि दयितैकरतिरूपः स्यात्। ततश्च शापावसानमपि तथाविधसन्धि—कालिकमेव मान्यम्। चातुर्मास्यावधिनिर्वाहाय च संदेशप्रेषणमपि च मेघदर्शनानन्तरमेव तस्मिन्नेव तिथौ मान्यम्। सोयं पौराणिकस्य कवेः कालिदासस्य यक्षशापा—वधिः। एतेनैतदपि सुवचं यत् पौलस्त्यवधात् पवनतनयदूत्येन गृहीतदूत्या—भिप्रायः सुकविः पुराणेभ्यो भगवत्प्रबोधशयनाभ्यां यक्ष—शापावधि नियमयामास॥

◈

## मेघदूतेऽभिव्यक्तिदोषाः

कालिदाससाहित्ये मेघदूतम् [1]अभिव्यक्तिदृशा प्रारम्भिकमिव प्रतीयते। यथैतत् तद् यथापद्यक्रमं संक्षिप्योपस्थापयामः। तथाहि—

**१. कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः**
**शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः ।**
**यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु**
**स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ।।** मेघ. १

इति प्रथम एव पद्ये गर्भितत्वं नाम वाक्यदोषमनुभवामः। तथाहि पद्येऽस्मिन् वाक्यार्थद्वयं हेतु—हेतुमद्भावेन सुकवेर्निबिभन्त्सितम्, शापवाक्यार्थः, प्रवासवाक्यार्थश्च। तत्र द्वितीयो विधेयः। तत्रापि यक्षमुद्दिश्य वसतिकरणक्रिया विधेयतया प्रस्तूयते। ततश्च योऽयं शापवृत्तान्तः स यक्षविशेषणी—भूतास्तङ्गमितमहिमत्वविशेषणतया स्फुटमेवोद्देश्यतावच्छेदकम्, तत एव चाप्रधानम्। अप्रधानस्यास्यात्राविच्छिद्यवोधितैवोचिता। नास्ति च सा, तन्मध्ये 'स्वाधिकारप्रमत्तता'—त्मनो यक्षविशेषणस्य निक्षिप्तत्वात्। तेन हि किंपदवाच्याद् व्यक्तिविशेषाद् उड्डीना मतिः कान्ताविरहगुरुत्व— कक्षामाक्रम्य शापक्षेत्रे प्राप्तप्रवेशापि 'स्वाधिकारप्रमाद'—रूपेण व्यक्तिविशेषस्यैव विशेषणेन खण्डितप्रसरा सती तमेव व्यक्तिविशेषं पुनरागच्छति। न च शाप—शप्त—योर्विशेषणगतं साम्यमत्र विवक्षितं 'ततो मृगेन्द्रस्य मृगेन्द्रगामी'—त्यत्रेव, 'विद्युत्वन्तं ललितवनिता' इत्यत्रेव वा, येनेदमधिगतक्रम—वक्रभावविच्छित्तिकमुपगम्येत। ततः—

---

१. अभिव्यक्तिरत्र वक्तव्यप्रतिपादनम्, न तु व्यञ्जनावृत्तिः।

**कश्चित् कान्ताविरहगुरुणा वर्षभोग्येण भर्तुः**
**शापेनास्तङ्गमितमहिमा धर्मलोपागतेन** । इति

योजनान्तरमत्र श्रेयस्करमुत्प्रेक्षामहे। न च 'नास्ति तथापि क्षेमः, शापतद्विशेषण–धर्मलोपागतत्वयोर्यक्षविशेषणीभूतास्तङ्गमितमहिमत्ववाचकपदव्यवहितत्वात्' इति वाच्यम्, हेतुवाक्यमुख्यार्थीभूते शापे तदपरिहार्यत्वसाधने भर्तृसम्ब–न्धित्वे, तद्गुरुत्वसाधने कान्ताविरहविषयकत्वे सति वर्षभोग्यत्वे चाखण्डिततया लब्धे तदौचित्यसाधनत्वमात्रौपयिकस्य धर्मलोपागतत्वरूपस्य विशेषणस्य व्यवधाय बुद्धत्वेपि दोषानुभावाभावात्। अस्ति धर्गलोपागतत्वं महिमलोपे साधनम्। ततो महिमलोपोपक्षेपानुव्याहृतिकत्वमेवात्र प्रत्युत श्रेयस्करम्। न च 'धर्मकर्मप्रमादी'–ति यक्षविशेषणतयैव धर्मलोपोपक्षेपे कृते नास्ति व्यवहितिभीति'–रिति वाच्यम्, तथा सति व्यवधानदोषा–भासनेत्रांजनपरिहारे संभवत्यपि विरुद्धमतिकृत्त्वस्य प्रसक्तेः। ननु कीदृशं तदिति चेत् 'तथा सत्यस्तङ्गमितमहिमत्वस्यैव हेतुत्वं धर्मकर्मप्रमादस्यैव च तत्कार्यत्वमत्र प्रतीयेत', 'यतो यक्षः अस्तङ्गगमितमहिमा ततो धर्मकर्मप्रमादी'–ति। सर्वथा विशेषणविन्यासक्रमोऽत्र कवेश्छन्दोयोजनादौर्बल्यं प्रत्याययति। वस्तुतः श्लोकद्वयमत्र सुकविना निर्मातव्यम् एकं शापवृत्तान्ताय, अपरं च ततः परं प्रवासोदन्ताय।

२. **आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुम्**–(मेघ. २)

इत्यत्र प्रथमपदं प्रमुखत्वमात्रपरमिति निर्णीतमेवास्माभिः मेघालोक–शापावसानावधेः प्रसिद्धचातुर्मास्यपरत्वं निर्णीय। प्रमुखत्वाय च पद्येऽत्र प्रमुखमेव पदमत्र दातुं शक्यते। ततश्च तददत्वा तदर्थं प्रथमपदमुपाददता सुकविना दर्शितैवात्मनः अवाचकत्व–निहतार्थत्वान्यतरं प्रति अनवहितता। यदि च प्रतिपदेवात्र प्रथमपदाद् विवक्षिता तर्हि 'आषाढस्य प्रतिपदि तिथा'– वित्येवोच्येत। न च 'आषाढस्य मेघं प्रथमदिवस आश्लिष्टसानुं

ददर्शे'— त्यन्वयोऽत्र क्षेमङ्करः, तथापि 'आषाढीयं प्रथमदिवसे श्लिष्टसानुं स मेघम्'— इति वक्तुं युज्येत, येनात्र गर्भितत्व—संदिग्धत्वा—भवन्मत—योगत्वादिकस्य शङ्कापङ्कः परिक्षाल्येत।

**३. प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी**
**जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम्** ।। मेघ. ४

इत्यत्र दयिताजीवितालम्बनार्थं मेघस्य 'जीवनस्य मूतः पटबन्ध' इति व्युत्पत्तिगर्भं जीमूतेति पदं स्वकीयं योगार्थमेव प्रदर्शयितुं सार्थकतां बिभर्त्ति। तदर्थं च कविनानेन 'जीमूतं तं स्वकुशलमयीं हारयिष्यन् प्रवृत्तिमि'—ति वचनोपन्यास आदरणीयः। एवं सति मेघपदार्थस्य प्रकरणादेव सुलभत्वे तदर्थं जीमूतपदोपग्रहोऽपुनरुक्ततामासादयेत्, आसादयेच्च स्वकीयं योगार्थं प्रति सचेतसां चेतोधातुं प्रवर्त्तयितुं कुर्वद्रूपताम्।

**४. धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः**
**संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।**
**इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे**
**कामार्त्ता हि प्रकृतिकृपणाश्चेताचेतनेषु** ।। मेघ. ५ इति

पद्यस्य चतुर्थे चरणे यत् प्रकृतिपदं तत् संदर्भविरुद्धम्। तथाहि पदमिदमत्र स्वभावार्थकमेव संभवति, तेन यक्षस्य स्वभावे चेतनाचेतनाविवेककार्पण्यदोष आधीयते। एतेन च दोषेण तस्य प्रमत्तता पर्यवसीयते। ततश्च 'जातं वंशे भुवनविदित' इति, 'मार्गं तावच्छृणु कथयत' इति विवेकातिशयसौभाग्यभाञ्जि यानि तस्यैव वचांसि तानि स्वभावविरोधं भजन्ति। अस्ति चात्र [१]'प्रणयकृपणा' इति पाठः।

---

१. एतदर्थं द्रष्टव्योऽस्माकं 'कालिदासभारती'—तिलेखमालायाः पञ्चमो लेखः (सागरिका ५.४ अङ्के)।

किं च समापतत्येवास्मिन् पद्यार्थे प्रबन्धानौचित्यम्। ये कामार्त्तास्ते भवन्त्येव चेतनाचेतनेषु प्रणयकृपणाः कालिदासस्यैव हि तथाविधकार्पण्याय प्रथिताः 'पुरुरवःप्रभृतयो'—त्र प्रमाणम्। एवं कामार्तत्वेनेव प्रणयकृपणतायाः सिद्धौ को नु गुण एतस्य पद्यार्थस्योपनिबन्धने। न च तथोपनिबद्धमेतेन विक्रमोर्वशीये, न वा रघुवंशस्य रामवियोगप्रकरणे। आर्त्तिश्चेयमुपनिबद्धैवः 'कामी' त्यादिभिर्विशेषणपदैः पूर्ववर्त्तिनि संदर्भे। इत्थं पद्यार्थ एष प्रकरणेऽत्र पुष्टात्मतां नासादयति।

**५. जातं वंशे भुवनविदिते पुष्करावर्त्तकानां**
**जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ॥** मेघ. ६

अत्र प्रकृतिपदेनादावर्थद्वयं प्रतीतिपथमुपयाति प्रधानरूपम् अमात्यरूपं चेति। अनयोः प्रथमे नेयार्थता क्लिष्टता वा प्रसज्यते परत्र च निहतार्थता। तथा हि प्रथमे प्रकृतिपदात् प्रथमं सांख्यानां प्रकृतिरुपतिष्ठति, ततः तस्याः पर्यायः प्रधानम्, तदनन्तरं चाभिन्नानुपूर्वीकशब्दवाच्यतयाऽस्मादेव शब्दादन्यदप्येकं प्रमुखत्वपरं प्रधानपदमुन्मिषेत्, ततश्च कदलीगर्भपत्रन्यायेन विकल्पपरानन्तरं प्रकृतार्थानुगुण्यभाजोऽर्थस्यास्य स्यादुपलम्भः। ततश्च जायेतैव रसभोगे विलम्बः द्वितीये प्रकृतिशब्दात् अमात्यरूपोऽर्थो निघण्टबलाद् राजशास्त्रप्रसिद्ध्या वा लब्धोऽपि कथञ्चित् पुरुषपदसाहचर्याज्जायेतैव सांख्यप्रकृतिस्मारकम्, ततश्च जायेतैवानभिमतवाच्यत्वकवलितम्। नास्ति हि अमात्यरूपेऽर्थे प्रकृतिशब्दस्तथा प्रतीतः 'प्रकृतिरेव सतामविषादिता' इत्यादिषु स्वभावरूपे तस्मिन् यथा। एवं च गवेषणमात्रलभ्य एवैषोऽर्थः, न च भवति गवेषणं रसभोगेऽनुगुणम्।

**६. त्वामारूढं पवनपदवीमुद्गृहीतालकान्ताः**
**प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसन्त्यः ॥** मेघ. ८

अत्र यत् पवनपदवीपदं तत् निहतार्थम्, 'क्वचित् पथा सञ्चरते घनानां

क्वचित् खगानां मरुतां क्वचिच्च' (रघुवं० १३.१९) इति, 'वायोरमुं परिवहस्य वदन्ति मार्गम्' (शाकु. ७.६) इति च कालिदास एव वायुमार्ग–त्वेनाकाशस्थलविशेषस्य प्रथमं प्रतीतेः, अलब्धप्रसरतया च पश्चादाकाश–मात्रपरतया तदवगतेः।

**७. कर्त्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां**
**तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः ।**
**आ कैलाशाद् बिसकिसलयच्छेदपाथेयवन्तः**
**सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ।।** मेघ. ११

अत्र मतुप्प्रयोगो व्यर्थः, समासवृत्त्यैव तदर्थलाभात्। न च प्राशस्त्यार्थ स इति वाच्यम्, आश्रयासिद्धेः। कथमिति चेत्, मतुबर्थानां भूमनिन्दा–दीनामेवात्राप्रसक्तेः। अत एव व्यक्तिविवेककारोऽत्र पौनरुक्त्यमेव पश्यति, त्वगुत्तरासङ्गवतीमि' (कुमार ५.२५) त्यत्रेव। अत एव च ब्रह्मणि भूमनिन्दादीनामसङ्गतेः 'अनादिमत् परं ब्रह्मे'ति गीतावचनम् अनादि च मत्परं वासुदेवश्रीकृष्णपरं चेति विच्छिद्य शोधयन्ति विज्ञाः।

**८. रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत् पुरस्ताद्**
**वल्मीकाग्रात् प्रभवति धनुष्खण्डमाखण्डलस्ये**—मेघ. १५

त्यत्र 'चिन्तारत्नमिव च्युतोऽसि करतो धिङ् मन्दभाग्यस्य मे' इत्यत्रेव, 'हंसीव धवलश्चन्द्र' इत्यत्रेव वा भग्नप्रक्रमत्वं कृतपदमेव। कथमिति चेदेवम् 'यदिदमत्र प्रेक्ष्यत्वं तदेवात्र साधारण्येन विवक्षितमिति निर्विवादमेव। एतद्वाचकं च यत् प्रेक्ष्यमिति पदं तन्नपुंसकलिंगपठितत्वाद् शब्दवृत्त्या धनुष्खण्डरूपेण केवलेनोपमेयेनैवान्वेति, नोपमानेनापि रत्नच्छाया–व्यतिकररूपेण, तद्वाचकस्य पुंसि पठितत्वात्। न च एकशेषेण पुं–नपुंसकयोर्मध्यान्नपुंसकत्वमात्रशेषमादाय साधारणधर्मसङ्गतिरिति वक्तुं शक्येत, तथापि व्यतिकरपक्षे कल्पनया शब्दविशेषप्रसवः, ततश्च

तदुपनीतेनार्थेन वाक्यार्थोपपत्तिरिति विलम्बार्गलाबन्धान्नास्ति क्षेमङ्कर एष निर्वाहवृत्तान्त:। नास्ति चैकशेषस्य साहित्यशास्त्रसम्मतत्वम् अनुक्ति–तिरस्कृतत्वात्। अस्ति च तत्रापि गण्डोपरि स्फोट:, पृथक्शब्दाभ्यामुप–स्थितयोर्धर्मयो: साधारण्यस्य पार्थक्यबोधबाधितत्वात्। तत्राप्यभेदसाधनाय कक्षान्तरकल्पनागौरवमङ्गीक्रियेत। ततश्च स्थित एवात्र चमत्कृतिभोगे विलम्ब:।

**९. नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै–**
**राविर्भूत–प्रथममुकुला: कन्दलीश्चानुकच्छम् ।**
**जग्धारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्या:**
**सारङ्गास्ते जललवमुच: सूचयिष्यन्ति मार्गम् ।।** मेघ. २१

इति मल्लिनाथादृते पाठेऽत्र क्रमेलकवदसंस्थुलो वाक्यार्थ: प्रहेलिकार्थं विडम्बयति। अत्र प्रथमं पूर्वार्धवाक्यार्थस्य तृतीयचरणारम्भकप्रथमपद–प्रतीतार्थसापेक्षत्वाद् अर्धान्तरैकवाचकत्वरूपो वाक्यदोष: सुप्रतीत:, अपरं च पूर्वकालक्रियायास्त्रित्वेऽत्र द्वितीयक्रियावाक्यार्थसमुच्चयोऽनपेक्षित:, ततश्च तदर्थं द्वितीयपादे चकारव्याहृति: पुनरुक्तैव। अस्मिंश्चोचिततयाभिमते प्रथमपादगततयापि तादृशस्य कस्यचित् समुच्चायकस्योपादानमभ्यर्हितम्। नास्ति च तदिति जागर्त्त्येवात्र वाच्यावचनत्वम्, न्यूनपदत्वं वा। नास्ति चात्राधिकं पुष्टम् अधिकत्वम् अधिकसुरभि–पदप्रतिपाद्यम्। सुरभिं गन्धमाघ्रायेति वाक्यादपि प्रतिपाद्योपपत्तेरननुपपत्ते:। वस्तुतोऽत्र तृतीयचरणारम्भे यत् पाठान्तरं तदेव साधीय:। तच्च 'जग्ध्वा' इत्यस्य स्थाने 'दग्धे'–तिरूपम्। अस्ति चैदभिमतं टीकाकृताम्। तेन हि पृथिवीगन्धसौरभ्ये यदाधिक्यं तदप्युपद्यते, दग्धस्य मृत्पिण्डस्य तथादर्शनात्, कालिदासेऽपि

**तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ ।**
**करीव सिक्तं पृषतै: पयोमुचां शुचिव्यपाये वनराजिपल्वलम् ।।** इति

इत्येवं रघुवंशे (३.३) तस्य तथैवोपपादितत्वदर्शनात। न च भवति तथा समुच्चायकपौनरुक्त्यार्धान्तरैकवाचकत्वयोश्च व्यासङ्गः। परिह्रियते च तथा तथाकल्पितात्मनो न्यूनपदत्वस्य क्लृप्तिः।

अत्र सारङ्गपदमपि क्लिष्टार्थकम्। तद्धि कालिदाससाहित्ये तत्समकालिकेऽमरकोशे च मृगश्चातकश्चेति द्वयोरेवार्थयोः प्रसिद्धम्। यथा चैतत् तदमरकोशस्य–'चातके हरिणे पुंसि सारङ्गः' इति वचनात्, कालिदासस्यैव च–

हरिणार्थे–

**१. रामस्त्वासन्नदेशत्वाद् भरतागमनं पुनः ।**
**आशंक्योत्सुकसारङ्गां चित्रकूटस्थलीं जहौ ।।**

रघु. १२.२४

**२. तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।**
**एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ।।**

शाकु. १.५

**३. दूरममुना सारङ्गेण वयमाकृष्टाः ।।**

शाकु. १.७

४. इमं तावत् प्रियाप्रवृत्तये सारङ्गमासीनमभ्यर्थये–
**कृष्णशारच्छविर्योऽसौ दृश्यते काननश्रियाः ।**
**नवशष्पावलोकाय कटाक्ष इव पातितः ।।**

विक्रमो. ४.५६

**५. प्रथमं सारङ्गाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तम् ।**
**अनुशयदुःखायेदं हतहृदयं संप्रति विबुद्धम् ।।**

शाकु. ६.७

६. **शरीरं क्षामं स्यादसति दयितालिङ्गनसुखे**
**भवेत् सास्त्रं चक्षुः क्षणमपि न सा दृश्यत इति ।**
**तया सारङ्गाक्ष्या त्वमसि न कदाचिद् विरहितं**
**प्रसक्ते निर्वाणे हृदय परितापं व्रजसि किम्** ।। मा. ३.१

—इत्येवं शब्दस्यास्य षोढा प्रयोगात्, प्रयोगाच्च

**स्तूयमानः क्षणे तस्मिन्नलक्ष्यत स वन्दिभिः ।**
**प्रवृद्ध इव पर्जन्यः सारङ्गैरभिनन्दितः ।।**

रघु. १७.१५

इत्येवमेकबारं चातकार्थे। ततश्चास्मिन् मेघपद्ये कुरङ्ग—मातङ्गयोरपि यत् सारङ्गपदेनादानं तद् दुष्करमेव। यद्यपि पश्चाद्वर्त्तिनि विश्वप्रकाशनाम्नि महेश्वरकृतावनेकार्थकोषे 'सारङ्गश्चातके भृङ्गे कुरङ्गे च मतङ्गजे' इत्येवं कुरङ्गमातङ्गपरत्वमप्यस्य प्रसिद्धम्, तथापि कालिदाससमये तथाप्रसिद्धेर—दर्शनादनुसन्धानमात्रनेयार्थकत्वमेतयोरर्थयोः, ततश्च सिद्ध एवात्र क्लिष्टत्वनामार्थदोषः।

अत्र इदमप्येकमपरमनुसन्धेयं यत् प्रथमपादार्थकर्तृत्वेनोत्प्रेक्षिते भृङ्गरूपिणि सारङ्गपदार्थे नीपदर्शनस्य दग्धारण्येति पाठे च द्वितीयपादार्थ—कर्तृत्वेनोत्प्रेक्षिते मृगे कन्दलीदर्शनस्य कथमुपपत्तिः। तौ हि भृङ्गकुरङ्गौ नीपं कन्दलीं च घ्राणरसनाभ्यां भोक्तुं प्रतीतौ, न तु चक्षुर्भ्यां द्रष्टुम्। एवं सति दृष्ट्वेत्यस्य स्थाने स्पृष्ट्वेति पाठकल्पना समौचितीसुभगा स्यात्। सर्वथा एतेषु सर्वेष्वप्यर्थेषु सारङ्गशब्दस्य पुनरनुसन्धानरूपामावृत्तिं विना सङ्गतत्वाभावादस्त्येवैतत् पद्यं प्रहेलिकासोदरम्, ततश्च विप्रलम्भबन्धुरेऽस्मिन् काव्ये गड्डुभूतमेव।

इदमपरमत्र संभाव्येत यत् यदि दृष्ट्वेत्येव पाठो मन्यते तदा कदाचित् सारङ्गपदं देशभाषापदमिव मनुष्यार्थकमपि भवेत्। वर्षारम्भे प्रायेण मनुष्या एव वृक्षविकारान् पार्थिवं गन्धं च सप्रहर्षमध्यक्षीकुर्वन्ति। अस्ति च

देशभाषापदं संस्कृतेऽपि मान्यप्रयोगम्, मन्यते च स्वयं कालिदासस्यैव 'हाला' पदं मल्लिनाथस्तादृशमेव।

१०. **नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतोः**—मेघ. २५

इति पद्ये यदिदं विश्रामपदं तत् पाणिनीयां व्याकृतिस्मृतिमनुसृत्य असाधुत्वविश्रान्तिपदमेव 'नोदात्तोपदेशस्य मान्तस्यानाचमेः'— इति वृद्धि—प्रतिषेधात्। 'प्रज्ञादिभ्यश्चे'—ति स्वार्थे अणि श्रामशब्दं संसाध्य विशिष्टार्थकेन 'वि'—पदेन 'प्रादिभ्यो गताद्यर्थे प्रथमये'—ति वार्त्तिकेन समासात् साधुत्वमुद्भाव्यते चेदुद्भाव्यताम्, श्रमापहारस्तु ततो द्योतयितुं न शक्येत, अस्ति चात्र स एव विवक्षितः। नास्ति च सोऽपि मार्गः प्रशस्तः 'अनाचमिकमिवमीनामिति वक्तव्यमि'—ति धात्वन्तराय वृद्धिवर्त्म निर्मिमाणस्य श्रमसंग्रहः कियते नु श्रमाय स्याद् वार्तिककर्त्तुः। का चावश्यकता तादृशवार्तिकारम्भस्य, 'प्रज्ञादिभ्यश्चे'—ति सूत्रेणैव काम—वाम—शब्दयोः सिद्धेः। ततश्च 'विश्रामो वे'—ति चान्द्रव्याकरणं शरणीकुर्वाणो मल्लिनाथ एवात्र युक्तदिक् यद्यपि चान्द्रस्यास्य व्याकरणस्य कालिदासपूर्ववृत्तित्वाभावे तत्रापि न प्रसीदति गवेषकाणां चेतः। अतो विश्रामं लभतामिदं च शिथिलाबन्धमस्मद्धनुरि'—ति शाकुन्तलप्रयोगोऽपि प्रयोगस्यास्यज्य सहयुध्वैव।

११. **तां कस्यांचिद् भवनवलभौ सुप्तपारावतायाम्'**—मेघ. ३८

इत्यत्र वलभीपदं दीर्घेकारान्तमेव प्रसिद्धम्, 'गोपानसी तु वलभी'—ति नामलिङ्गानुशासनप्रमाणात्, ततश्च

**तेन दूतिविदितं निषेदुषा पृष्ठतः सुरतवाररात्रिषु ।**
**शुश्रुवे प्रियजनस्य कातरं विप्रलम्भपरिशङ्किनो वचः ।।**

रघु. १९.८ इति,

**क्लृप्तपुष्पशयनाँल्लतागृहानेत्य दूतिकृतमार्गदर्शनः ।**
**अन्वभूत् परिजनाङ्गनारत सोऽवरोधभयवेपथूत्तरम् ।।**

रघु. १९.२३

इति च दीर्घेकारान्तमपि दूतीशब्दं ह्रस्वीकुर्वतः कालिदासस्य वलभीपदेपि ह्रस्वीकरणप्रयासश्छन्दोमात्रनिर्वाहमूलक एव। यद्यपि 'दूत्यां दूतिरपि'– इति शब्दभेदप्रकाशमाश्रित्य दूतिशब्दः, अभिच्प्रत्ययेन च वलभिशब्दोऽपि साधयितुं शक्यते, तथापि मार्गान्तरपरिग्रहः स्यादेवात्र क्लेशकरः। ततश्चात्र शब्दासाधुत्वरूपं च्युतसंस्कृतित्वं परिहरत्येव वाक्यार्थैकी–भावनिष्कलुषताम्।

**१२. ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी**
**पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति ।**
**धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं**
**पश्चादद्रिग्रहण–गुरुभिर्गर्जितैर्नर्त्तयेथाः** ।। मेघ. ४४

अत्र प्रापिपदं दुरूहार्थकम्। मल्लिनाथस्तत्र क्रियाविशेषणत्वं, क्विबन्तत्वात् सप्तम्यन्तकर्णविशेषणत्वं वा पश्यति। तदुभयमपि प्रसादप्रासादच्युतम्। अत एव स्थिरदेव–चारित्रवर्धन–दक्षिणावर्त्तनाथ– पूर्णसरस्वती–परमेश्वरैः 'कुवलयदलक्षेपी'–ति पठ्यते उद्ध्रियते च मल्लिनाथेनापि तेषामेष पाठः। पाठान्तरमिदं बर्हविशेषणतया नीयते ततश्च तेषां मते क्विबन्तत्वात् सप्तम्यन्तत्वसाधनेन जायमाना दुर्गतिर्न प्रसज्यते। वस्तुतः मल्लिनाथपाठः संस्कारद्वयेन निर्मितः। एको वल्लभदेवपाठसंस्कारः, परश्च दक्षिणावर्त्तनाथ–पाठसंस्कारः। वल्लभदेवः 'कुवलयपदप्रापि'–इति पाठं मनुते, ततश्च प्रापीति वल्लभात्, दलपदं च दक्षिणावर्त्तादादाय 'कुवलयदलप्रापी'–ति पाठः प्ररोहति। अनेन च साङ्कर्येण, किं नु चित्रं यदि व्यालुप्येत मूलम्। यद्यपि 'रुदता कुत एव सा पुनर्भवता नानुमृतापि लभ्यत' इत्यादिषु क्विबन्तत्वं

मल्लिनाथादिभिः प्रसाधयितुं यत्येत तथापि वस्तुतः तत्रापि वर्त्ततेऽसावेव दोषः। अत एव च महिमाचार्यस्तत्र न ह्येव श्रद्धत्ते। सति च सरले पथि क्लिष्टेन तेन को नु सचेता प्रसरीसरीतु।

**१३. आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा**
**विद्धद्वन्द्वैर् जलकणभयाद् वीणिभिर्मुक्तमार्गः ।**
**व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्**
**स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्त्तिम् ।।** मेघ.४५

अत्र आलम्भशब्दो मीमांसामात्रप्रसिद्धः ततस्तच्छास्त्रानभिज्ञं प्रति नियतमेव रसप्रतीतिविघ्नविधाता। मल्लिनाथः शब्दमेतं संज्ञपनशब्देन विवृणोति। तदपि च तथैव मीमांसाप्रसिद्धमेव। अमरकोशे शब्द एष वधार्थकतया गणितः—'आलम्भपिञ्जविशरघातोन्माथवधा अपी'—ति मीमांसकाः पुनः शब्दमिममिदानीमन्यथयितुं प्रयतिताः। ते हि गोवधविरोधाय गवालम्भं गवां स्थानविशेषे बन्धनेन चरितार्थयन्ति। यच्च मल्लिनाथस्य संज्ञपनं तदपि यस्माद् धातोः निष्पद्यते तस्यापि प्रथमतमोऽर्थः मारणमेव। यथा चैतत् तत् पाणिनीयाद् धातुपाठादेव प्रतीतम्—'मारण—तोषण—निशामनेषु ज्ञा' इत्यस्मात्। भानुजिदीक्षितः अनयो द्वयोः एतत्सहचरितानामन्येषां चाष्टाविंशतेः अमरसिंहपठितानां 'त्रिंशन्मारणस्य' इति मारणार्थकत्वमेव पश्यति। न च संभवति गवां मारणं विना तेषां रुधिरप्रवाहः, न च संभवति ततो नदीविशेषस्य निर्माणम्। इयमेव च स्थितिः तेषु सर्वेष्वपि स्थलेषु येषु केचित् अप्रसिद्धाः पुराणकथांशाः कविनानेनोपनिबद्धाः।

**१४. हस्ते लीलाकमलमलके बालकुन्दाविद्धम्—**

इति यदनुविद्धमिति पदं सुकविना प्रयोज्यते तत्र स्पष्टमेव श्रुतिकाटवम्। मल्लिनाथो 'नपुंसके भावे क्तः' इति निष्ठाप्रत्ययस्यात्र भावार्थकत्वं मत्वा शब्दमिममनुवेधार्थकं मनुते। तत्र छन्दोयोजनायां स्वयमनुवेधशब्दस्यापि

शक्यक्रियत्वात् पापात् पापीयाननुविद्धशब्दः। 'हस्ते लीलाकमलम् अलके बालकुन्दप्रसूनम्' इति यथाप्रक्रममेव कवयितुमुचिते तद्विपरीतं कवनेन प्रक्रमभङ्गोपि न नात्र स्फुटः। अस्ति च दक्षिणावर्त्तनाथोत्र अनुवेधस्यैव पाठत्वदर्शी। स्थिरदेव–चारित्रवर्धनावपि तथाविधमेवान्यमप्येकमिमं पाठमत्र पश्यन्ति 'बालकुन्दानुबन्ध' इति। ततो मल्लिनाथस्य को न्वत्र व्यामोहः यदसौ परिशीलितदक्षिणावर्त्तनाथपाठोऽपि सदोषमेव पाठं मूलाकरोति।

**१५. यत्र स्त्रीणां प्रियतमभुजालिङ्गितोच्छ्वासिताना–**
**मङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः ।**
**त्वत्संरोधापगमविशदैश्चन्द्रपादैर् निशीथे**
**व्यालुम्पन्ति स्फुट-जल-लव-स्यन्दिनश्चन्द्रकान्ताः ।।** मेघ. ६९

अत्र किं तावत् तन्तुजालमिति निश्चेतुं न शक्यत इति सन्दिग्धार्थत्वं दोषः। अत एवात्र 'यन्त्रजालावलम्बा' इत्यपि पाठं केचिदाद्रियन्ते। मल्लिनाथः पदस्यास्यार्थं 'वितानलम्बिसूत्रपुञ्जाधारा' इति करोति। तदप्यव्यक्तमेव। चारित्रवर्धनः पुनरत्र 'तन्तुमयं जालमानाय– स्तत्रावलम्बते प्रसादानामुपरितनेषु भागेषु चन्द्रमणिबन्धरचना तन्तुजालस्थिता इति भाव' इति टीकते। हिन्दीव्याख्यातारः 'झालर' इतिपदवाच्यं वस्तु तन्तुजालपदाभि–प्रेततया नयन्ति।

**१६. सा संन्यस्ताभरणमबला पेशलं धारयन्ती**
**शय्योत्सङ्गे निहितमसकृद् दुःखदुःखेन गात्रम् ।**
**त्वामप्यस्त्रं नवजलमयं मोचयिष्यत्यवश्यं**
**प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ।।** मेघ. ९१

इति पद्यस्य चतुर्थे पादे योऽर्थान्तरन्यासः स समर्थ्यमर्थं पोषयितुं नास्ति प्रकामं शक्तः। आर्द्रान्तरात्मत्वं ह्यत्र करुणावृत्तित्वे तन्त्रम्, तच्च मेघे जलक्लिन्नतारूपं सत् न कार्यक्षमम्, मेघस्य जडत्वात्, दयालुता–

रूपस्यान्तःकरणार्द्रत्वस्यासंभवात्। अभिन्नानुपूर्वीकशब्दवाच्यत्वेन चेतनाचेतनार्द्रत्वयोरैक्यसंपादनेऽपि न कुशलम्, तस्य प्रातिभासिकत्वसिद्धी

**अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।**
**एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ।।**

इत्यत्रेव समर्थ्यसमर्थकत्वानुपपत्तेः। अत एव च व्यक्तिविवेककृत् प्रत्याचष्ट एवंविधामलङ्कृतियोजनामवाच्यवचनप्रसङ्गे

**सद्वृत्ते महति स्वभावसरले बद्धोऽसि यस्मिन् गुणैर्**
**युक्ते संयमहेतुतामुपगते यत्रापि विश्राम्यसि ।**
**तस्याक्षेपपरम्पराभिरभितो दोलायमानस्थिते–**
**रालानस्य मतङ्गजैष कतमो निर्मूलने दुर्ग्रहः ।।**

पद्यमिदमुदाहृत्य–'यत्राप्रस्तुतार्थस्य श्लेषमुखेन असन्नेवोत्कर्षोऽपकर्षो वा तदितरस्य तथाप्रतिपत्तये अभिधीयते नासौ तात्त्विक इति न तत्र तामाधातुमुत्सहते, तयोर्बिम्बप्रतिबिम्बभावेनोपगमादित्यवाच्य एवासौ, तस्य वचन दोष' इति भूमिकामारचयन्, 'अत्र सद्वृत्तादिभिर्विशेषणैररुन्तुदस्या–लानस्याप्रस्तुतस्य श्लेषबलोपकल्पितेन सदाचारत्वादिधर्मसम्बन्धेनोत्कर्षो–भिहितः, न चासौ वास्तव इति तदुन्मूलनग्रहो गजस्योचित इति न दुष्ट इति उपालभ्मयोग्यत्वं तत्रासिद्धमेवे'–त्युपसंहारं चाबध्नन् (अस्मदनूदिते पृ० ४४५)

**१७. शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्**
**कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात् ।**
**सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृष्ट–**
**स्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाहे'** ।। मेघ.१०१ ति

पद्ये 'उत्कण्ठायाः' स्वशब्दवाच्यत्वं जनयत्येव रसदोषं वमनाख्यम्। चरणत्रयार्थात् सात्र स्वयमेव पर्यवस्यति। प्रोषितस्य वैषम्यातिशयोपस्थितौ

तस्याः स्वाभाविकत्वात्। अस्ति च वैषम्यमत्र सोऽतिक्रान्तः श्रवणविषय–मित्यादिना ससंरम्भमारचितं सुकविना। ततश्च 'तवन्मात्रप्रणिहितमना' इति, अन्यथापि वेत्थमेवात्र पाठः परिवर्त्तनीयः। 'औत्सुक्येन कृतत्वरा' इत्यादिषु पुनः तादृशामौत्सुक्यादीनां स्वशब्दवाच्यत्वम् अन्यथानुपपत्तिबलादभ्यर्हितमेव। एवमेव 'धूमज्योतिःसलिलमरुतां सन्निपात' इत्यत्रापि उत्कण्ठार्थक–स्यौत्सुक्यशब्दस्य प्रयोग आवश्यकः, उपायान्तरे तस्य तत्र बोधनाभावात्। असति च तदुपनिबन्धे निर्हेतुत्वदोषप्रसङ्गात्। न च चतुर्थचरणेनात्र समर्थित एव चरणत्रयोपस्थापितोऽर्थ इति नास्ति निर्हेतुत्वप्रसक्तिरिति वाच्यम्, अर्थान्तरन्यासस्थले समर्थनीयस्य वाक्यार्थस्य पूर्णताया एव प्रतिष्ठितत्वात्, असति च तादृशौत्सुक्यप्रतिपादके पदे जागृयादेव तत्र वाक्यार्थाविरामः। ततश्च स्थितमेतद् यदत्र संचारिभावस्य स्वशब्दावाच्यत्वस्योचितत्वेपि प्रागुद्धृते शब्दाख्येयमिति स्थलेऽनुचितत्वमेव। एवमेव

**१८. संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा**
**सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात् ।**
**इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे**
**गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः** ।। मेघ. १०६

इत्यत्रापि वियोगव्यथायाः स्वशब्दोल्लेखोऽनुचितः। वियोगो हि चित्तवृत्तिविशेष एव 'वियुक्तास्मी'–ति रूपः, अत एव मानपरिग्रह एकशयनस्थितावपि जागर्त्त्येव तदनुभवः। तज्जनिता या व्यथा सापि न नास्ति चेतोधर्मः। स्वशब्दवाच्यतातिरस्कारः तौ द्वावप्यत्र व्यथयते। तदत्र 'शापवेलाभिराभिः' इतीव किञ्चित् कवनीयम्।

**१९. शापान्तो मे भुजगशयनादुत्थिते शाङ्‌र्गपाणौ**–मेघ. १०८ इत्यत्र प्रसज्येतावाच्यवचनम् 'आषाढस्य प्रथमदिवस' इत्यत्र यदि प्रथमपदेन प्रतिपदेवादीयेत। यथा चैतत् तत् प्रतिपादितपूर्वमेवास्माभिः।

२०. एतस्मान्मां कुशलिनमभिज्ञानदानाद् विदित्वा
मा कौलीनादसितनयने मय्यविश्वासिनी भूः ।
स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगा—
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ।। मेघ. ११०

इत्यत्र 'अभोग'—पदस्य स्थाने 'भोगाभावादि'ति पर्युदासस्थाने प्रसज्यप्रतिषेधः करणीयः, तथा सत्येव अभावस्य प्राधान्यात्। यदि च प्रसज्यप्रतिषेधेपि समास इष्यते तर्हि 'अलक्ष्यजन्मता' इत्यत्रापि स इष्यताम्, इष्यतां च 'क्षणमप्यमुक्ता' इत्यत्रापि। न च भावार्थकात् कृदन्तशब्दादेव भोगा दना नञ्सामासे प्रसज्यप्रतिषेध इष्यते नान्यत्रेति वाच्यम् अनुभव—विरोधात्। न हि य एवानुभवः 'भोगाभाव'—पदाद् भवति स एव 'अभोग'—पदात्। एकत्र हि भोगप्रतियोगिकः अभावः, अपरत्र च अीाावप्रतियोगिकः भोगः एकत्र अभावे भोगो विशेषणम्, अपरत्र च भोगे अभावः। विशेषणविशेष्यभाववैलक्षण्येऽपि यदि बोधे वैलक्षण्यं नाभ्युपेयेत तर्हि नाभ्युपेयेत तत् कुत्रापि नीलपीतादौ, न्यायसाम्यात् वैलक्षण्यस्य भेदप्रयोजकत्वानङ्गीरात्।

किं च मल्लिनाथदृशा यदि अभिज्ञानशब्दः मरणशङ्कानिवारणार्थकः तर्हि पद्येऽत्र कुशलपदं व्यथम्। नासित चाभिज्ञानेन मरणाभावेन चात्र सम्बन्धः। अभिज्ञानस्य परस्परसङ्गराहित्यमात्रप्रतिपादनपरत्वेनात्रोपादानात्। कौलीनात् परस्त्रीसङ्गो मयि तथाविधस्वप्नगतपरस्त्रीसङ्कल्प इति तत्र प्रतिपादनात्। एवं जागर्त्त्येव मल्लिनाथदृशात्र वाक्यार्थदोषः।

२१. आश्वास्यैवं प्रथमविरहोदग्रशोकां सखी ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।
साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि
प्रातःकुन्दप्रसवशिथिलं जीवितं धारयेथाः ।। मेघ. १११

इत्यत्र यक्षीप्रतिसंदेशात् स्वजीवितालम्बनप्रार्थनमुपक्रमविरुद्धम्। उपक्रमे हि नभःप्रत्यासन्ने दयिताजीवितालम्बनार्थितयैव मेघं प्रति यक्षकृतस्य स्वकुशलप्रवृत्तिप्रेषणप्रणयस्योपनिबद्धत्वात्। एतस्यावान्तरप्रयोजनतया कथंचिदौचित्यसाधनेऽत्रैव प्रतिवचनेषु साभिज्ञानत्वोक्तिकृतस्यानौचित्यस्य को नु समाधिः। ननु किमत्रानौचित्यमिति चेदभिज्ञानाभावे विश्वासा–भावोपस्थितिरेव तत्। प्रार्थनीयस्य चरित्रे दोषदृष्टिरिष्टसिद्धावत्र प्रत्युत विपरीता स्यात्। यत्र मघोनः प्रकृतिपुरुषता, पुष्करावर्त्तकवंशजातता च दृष्टा तत्रैवाभिज्ञानं विना शङ्कनीयवचनताया दर्शनमत्र प्रकृतिविरुद्धम्, तथा सति विक्रमोर्वशीये वासवसंदेशेन सहाभिज्ञानस्याभावात् तत्प्रापके देवर्षौ नारदेऽपि शङ्कास्पदवचनता प्रसज्येत। किं च यक्षीं प्रति मेघोऽपरिचितः। ततस्तस्यै प्रेषिते संदेशे अभिज्ञानं संदेशसत्यापनायावश्यकम्, यक्षस्तु परिचित एव मेघेन, तस्य स्वस्या अपि अभिज्ञानानयनप्रार्थनं विश्वास्य–तातिरिक्तप्रयोजनकं न सिद्ध्यति। तच्च यथानुचितं तत् प्रतिपादित–मेवानुपदमेव। वस्तुतः पद्यमिदं प्रक्षिप्तं प्रतीयते।

**२२. कच्चित् सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे**
**प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि ।**
**निश्शब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः**
**प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ।।** मेघ. १११

अत्र प्रत्यादेशपदमवाचकत्वदूषितम्। तद्धि अमरकोशे स्वयं कालिदाससाहित्ये च निराकरणमात्रसङ्केतितमुपलभ्यते। नास्ति चात्र तदेतत्परम्। अत्र समर्थकार्थान्तरवाक्यघटकीभूत–प्रत्युक्त–पद–समर्थनीय–प्रतिवचन–मात्रपरतयैव प्रयोगात्। नास्ति च प्रतिवचनरूपिणि अर्थे तस्य व्यवहारादिकं यतस्तस्यात्र शक्तिरुपगम्येत। यद्यपि 'उक्तिराभाषणं वाक्यमादेशो वचनं वच' इति मल्लिनाथोद्धृताच्छब्दार्णववचनाद् आदेशशब्दस्य वचनपरत्वे

सिद्धे प्रत्यादेशशब्दस्य प्रतिवचनपरत्वं शक्यत एव लब्धुम्, तथापि तत्रापि निहतार्थता तं निगिरत्येव। प्रसिद्धस्य निराकरणरूपस्यार्थस्य प्रथमप्रतीततया प्रतिवचनरूपस्य तस्य प्रतिहतगतिकत्वात्।

न च 'अप्रत्यादेशादधीरतां न कल्पयामी'ति अकारप्रश्लेषेण मौनलभ्ययोर् निराकरणाङ्गीकरणयोर्मध्यात् प्रथमस्य परिहारः, उत्तरार्धपादाभ्यां च द्वितीयस्य संसाधनमि'ति नास्ति दोष' इति वाच्यम्, मौनगमकस्य पदस्याभावप्रसक्त्या न्यूनपदत्वप्रसक्तेः। किञ्च प्रणयिषु 'कर्तुमसमर्थोस्मी'–ति स्वीकाराभाव एव सभ्यजनप्रथितः, न तु 'न करिष्यामी'–ति निराकरणम्, असभ्यजनोचितम्। ततश्चात्र स्वीकाराभावकल्पनाया एव निराकरणं स्वरसप्राप्तम्, तदेव चोत्तरार्धगताभ्यां दृष्टान्तार्थान्तरन्यासाभ्यां समर्थ्यते। अतएव प्रत्यादेशादधीरताम् अप्रत्यादेशाद् धीरतामिति पक्षद्वयकल्पनमपि निरर्थकमेव। याचकस्य मानभङ्गेऽपि याच्यमानानादरेऽनधिकारात् अप्रत्यादेशाद् धीरताकल्पनपक्षेऽपि नितान्तमावश्यकस्य मौनवाचकस्यानुपलब्धिप्रसक्तेः। ततो व्यर्थ एवात्र तथाविधप्रश्लेषाश्लेषक्लेशः।

अत्र व्यवसितपदमपि प्रायेण प्रत्यादेशपदसजातीयमेव। तत्र आद्यकर्मणि क्ते कृते कर्तुमारब्धमिति कथंचिदुचितार्थपरिकल्पनात् संजाघटीति दोषपातात् चमत्कृतिरक्षा। व्यवसायशब्दस्य निश्चयपरत्वं तु मल्लिनाथ–मतेर्विपर्यासः एव।

२३. एवमेव अतिवाहयेदित्यस्य स्थाने वाहयेदिति ब्रुवाणः कालिदासः विदधातेःस्थाने दधातिमिव प्रयुङ्क्ते ३८ पद्ये।

२४. 'देवगिरिमि'ति वक्तव्ये 'देवपूर्वं गिरिमि'–ति ब्रुवाणोऽवाच्यं वक्ति ४२ पद्ये।

२५. 'आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणामि'ति पद्ये उपमेयकोटौ मृगस्थानीयं किञ्चिदपि नास्तीति न्यूनपदत्वमुपमादोषः।

२६. 'तं चेद् वायौ सरती'–ति पद्ये सरतिः गतिमात्रमुपस्थापयति, नतु तीव्रां गतिमिति सामर्थ्यच्युतमेवेदम्।

२७. 'ये संरम्भोत्पतने'–ति पद्येऽपि 'स्व'–पदं मेघपरतया विवक्षितं शरभपरतया प्रतीयते।

इत्येवमन्येऽपि दोषा मेघदूतपद्येष्वनेकशो जाग्रति, जाग्रति च कुमारसंभव– पदेष्वपि। तानेतानखिलानपि प्रयोगानादाय पृथगेव निबन्ध एको रचयितव्यः।।

# मेघदूतस्यैकं पद्यम्

मेघदूतस्य १०३ तमं पद्यमिदम्—

**त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया—**
**मात्मानं ते चरणपतितं यावदिच्छामि कर्त्तुम् ।**
**अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे,**
**क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ।।**

एवमिव पठ्यते।

अस्मिन् पद्ये प्रथमे पङ्क्तित्रये त्रयो व्यापारा घटिताः (१) शिलाधिकरणकं धातुराग—करणकं ते—पदवाच्ययक्षीप्रणयकोपमुद्रा—कर्मकं च चित्र—विधान—रूपम् आलेखनम्, (२) ते—पदप्रकृतिभूत—युष्मत्पदवाच्य—यक्षिणी—चरणाधिकरणकम् 'इच्छामी'—ति—क्रियापदघटकविभक्तिपदोन्नीत—प्रस्तुतपद्यार्थवक्तृरूपयक्षकर्तृकं पतनकरणम् (न तु पतनम्), (३) अस्र—कर्तृको दृष्टिलोपश्चेति। तादृशलोपस्य च 'इच्छामी'—ति क्रियापदप्रकृतिवाच्य—प्रथमव्यापारद्वयानन्तरीयेच्छासमकालकत्वमपि यावत्तावत्पदाभ्यामुपनिबध्यते। चतुर्थे च चरणे वाञ्छितस्य सङ्गमस्य व्याघातः व्याघात—प्रतियोगितया सङ्गम एव वा प्रतिपाद्यते। इयती हि पद्यरत्नेऽस्मिन्नभिधाव्यापारप्रतिपाद्या सामग्री। अत्र विचारः—

येयमत्र प्रथमव्यापारद्वयानन्तरीया 'इच्छामि'—पदप्रतिपाद्या इच्छा तस्याः विषयः कः, तादृशं पतन—करणमात्रमेव, तादृशमालेखनमपि स्वित्। एतेनेदमत्र विचार्यं भवति यत् योऽयमत्र अश्रुकर्तृको दृष्टिलोपः प्रतिपाद्यते तस्मिन् तादृशचरणपतनक्रियानिरूपितमेव समकालत्वमस्ति यदि वा तादृशालेखनक्रियानिरूपितमपि। आद्ये तादृशपतनमात्रस्यैव प्रतिबन्धोऽत्र

सिद्ध्यति, न तु यक्षीचित्रस्यापि। द्वितीये तु द्वयोरेव। सोयमेक: प्रश्न:।

इदमत्रापरं विचार्यं यत् सङ्गमप्रतिपाद्य: शरीरसंयोग: किंनिष्ठतया प्रतिपाद्य:, प्रेयसोरालेख्यनिष्ठतया यक्षीमात्रालेख्य—तत्प्रणत— प्रस्तुतपद्यार्थ—वक्तृरूपयक्ष—शरीर—निष्ठतया वा। अयमभिप्रायो यत् प्रेयसीचित्रं यस्मिन् प्रस्तरखण्डे यक्षेण निर्मितं निर्मित्सितं वा तस्मिन् स स्वस्यापि चरणपातचित्रं चित्रयित्वा सङ्गममियेष, यदि वा केवलाया यक्ष्या एव चित्रं तेन निर्मित्सितम्, सङ्गमाय च स चित्रनिर्मातृ स्वशरीरमेव चित्रगताया यक्ष्याश्चरणयो: पातयितुमैच्छत्। द्वयोरपि प्रश्नयोरयं सारो यद् यक्ष: स्वचित्रमपि निर्मातुमियेष न वा, यदि इयेष तर्हि अश्रुप्रतिबन्धो यक्षीचित्रारम्भणक्षण एव समजायत यदि वा यक्षीचित्रनिष्पत्त्यनन्तरं यक्षस्य स्वचित्रारम्भणक्षणे। यदि च यक्ष: स्वचित्रं लेखितुं न इयेष तर्हि अश्रुप्रतिबन्ध: कदा जात: यक्षीचित्रणक्षण एव उताहो पादपतनावसरे। सर्वथा यक्षीचित्रं निष्पन्नं न वेत्येक: प्रश्न:, यक्षचित्रमपि निर्मित्सितमासीन्न वेति द्वितीय:।

अत्र मल्लिनाथ:—

**'त्वां त्वत्प्रतिकृतिं धातुरागै: शिलायां शिलापट्ट आलिख्य निर्माय आत्मानं मां मत्प्रतिकृतिमित्यर्थ: ते तव चित्रगताया इत्यर्थ: चरणपतितं कर्तुं तथा लेखितुं यावदिच्छामि तावद् इच्छासमकालमेव०००अस्रै: अश्रुभि: मे दृष्टि: आलुप्यते आव्रियत इत्यर्थ:। ततो दृष्टिबन्धनाल्लेखनं प्रतिबध्यते इति भाव:। क्रूर: ००० कृतान्तो दैवं तस्मिन्नपि चित्रेऽपि नौ आवयो: सङ्गमं सहवासं न सहते। सङ्गमलेखनमप्यावयोरसहमानं दैवमावयो: सङ्गं न सहत इति किमु वक्तव्यमित्यपिशब्दार्थ:।**

इत्येवं यक्षीचित्रानन्तरं यक्षचित्रमपि लेखनीयतयाभीष्टं यक्षीचित्रनिष्पत्तिं च स्पष्टतो मनुते।

भरतसेनस्तु तद्विपरीतम्—

**'००० त्वामालिख्य सम्यक् चित्रयित्वा यावद् आत्मानं चरणपतितं मानापनोदार्थं पादगतं कर्तुमिच्छामि तावदेव ००० अस्त्रैः अश्रुभिः मे मम दृष्टिरालुप्यते आच्छाद्यते। ०० क्रूरः पापकर्मा दारुणः कृतान्तो दैवं विधाता वा तस्मिन्नपि चित्रेऽपि नौ आवयोः सङ्गमं न सहते न क्षमते। ननु 'आलिख्ये' त्यनुपपन्नम्, यतो लिखनकाल एवास्त्रैर्दृष्टिरालुप्यत इत्यर्थः।[१] अन्ये तु पूर्वार्वे कष्टसृष्ट्या लिखननिर्वाहो ज्ञापितः किन्तु चरणपातनकाले दृष्टिलोप इत्याहुः।'**

इत्येवं केवलं यक्षीचित्रमेव निर्माणविषयं प्रतिपादयति। मतान्तरत्वेन प्रतिपादिते पक्षेऽपि स यक्षचित्रं निर्मित्सितं न दर्शयति। लेखनप्रति-बन्धविषये स एकवारं विमतिं दर्शयति, तट्टीकयेदं स्पष्टं यत् स यक्षीचित्रस्य निर्बाधं संपादनं मनुते, किन्तु ततः परं 'ननु' इति पक्षान्तरमुपस्थाप्य स समाधानान्तरमपि 'इत्यर्थः' इति शब्दात् पूर्वं विद्यमानेन किन्तु सम्पादकेनाध्यातेन च टीकांशेन प्रतिपादयति। अन्येषामपि संमतिं स 'पूर्वार्धे कष्टसृष्ट्या लिखननिर्वाहः सूचित' एवं दर्शयति, किन्तु चित्रसृष्टौ कष्टं दर्शयति।

एवं हि टीकाकृतामत्र विवादोऽस्ति। अस्मादृशैरन्यैरपि यदि केचन कल्पा उपस्थाप्येरन् तेऽपि नूनं विवादास्पदत्वं न त्यजेयुः। न च स्यात् तेषां पूर्वोक्तमतद्वयभिन्नत्वम्। अतो महाकविं कालिदासमेव पृच्छामः। पश्यामश्च तत्र चित्रलेखप्रसङ्गमेवम्– **'न च सुवदनामालेख्येऽपि प्रियामसमाप्य तां मम नयनयोरुद्बाष्पत्वं सखे न भवष्यिति,**[२] इति। विदूषक उर्वशीप्रेमविह्वलं पुरुरवसं विनोदनोपायतया प्रियाचित्रदर्शनं निवेदयति।

---

१. पङ्क्तावत्र 'लिखन' शब्दोऽपमुद्रितश्च्युतसंस्कारो वा भवति। लेखनशब्दस्यैवात्र संस्कृतत्वात्।

२. २.१० पद्यम्।

स च तत्र निर्माणसंभवं प्रत्याचक्षाण उपर्युक्तां पङ्क्तिं ब्रूते। अत्र हि प्रियाचित्रनिर्माणमध्यावधि सफलत्वं तदनन्तरमश्रुप्रतिबन्धो दृश्यते। एवमेव यक्षीचित्रस्यापि मध्यावधि निष्पादनं ततः प्रतिबन्धः स्वीकार्यतामापाततो भजते, परन्तु वयमत्रान्यदेवैवं पश्यामः। अत्र विक्रमोर्वशीयपद्ये निर्माणविषयः केवलाया उर्वश्या एव चित्रम्, न तु पुरूरवसोऽपि। अतः प्रतिबन्धस्य नायिकाचित्रार्धप्रतियोगित्वं मान्यम्। कथमेतदिति चेत् कालिदासस्य तथैव प्रवृत्तेः। स हि शाकुन्तलेऽपि जनान्तरनिर्मितमपि शकुन्तलाचित्रं दुष्यन्तमुखेना— र्धावसितमेव प्रतिपादयति **'अर्धलिखितमेतद् विनोदस्थानम् गच्छ वर्त्तिकां तावद् आनये'**—(शा० ६—१६) ति चतुरिकां प्रति कथितेन वाक्येन। ततश्च यावदियं चतुरिका वर्त्तिकाकरण्डार्थं गत्वा पुनरुपैति तावन्महता सन्दर्भेण तत्र चित्रार्धस्य **कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी**— (६.१७) त्यादि, **'कृतं न कर्णार्पितबन्धनं सखे'**—(६.१८) त्यादिश्च अनेकपत्रव्यापिनी कल्पना तेन क्रियते। वसुमतीप्रतिबन्धेन चार्धस्यास्य पूरणीयतयाभीष्टस्यापि चित्रस्य पूर्तिं न दर्शयति। इदमत्रावधेयं यत् कालिदासस्तदैवेदृशं चित्रविघ्नमुपस्थापयति यदा चित्रं नायकहस्तेनैव निर्मीयमाणमसौ दर्शयति। अन्यनिर्मितत्वेन दर्शितेषु चित्रेषु विघ्नस्यावसर एव नास्ति, शिल्पिनो जनान्तरस्य वियोगाधीरतायास्तत्र प्रतिपादनाभावात्। शाकुन्तले हि चित्रं जनान्तरहस्तनिर्मितमस्ति। नायकस्तत्र न्यूनतामात्रं प्रतिपादयति। विक्रमोर्वशीयपद्ये तु स्वयं नायक एव प्रियाचित्रनिर्माणाय प्रेरितस्तथाविधमक्षमत्वमात्मनः प्रतिपादयति। अतः शाकुन्तले—

**प्रजागरात् खिलीभूतस्तस्याः स्वप्ने समागमः ।**
**बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि** ।। ६.२२

इत्येवं विक्रमोर्वश्याः पूर्वोद्धृतस्य पद्यस्याक्षरशोऽनुवादेऽपि स्थितिभेदादेकत्र प्रियाचित्रनिर्माणसंभवः अपरत्र च तदसंभवः कविनोपस्थाप्यते। तदेवं स्थिते नायक—कर्तृकस्वप्रियाचित्रार्धविघ्नस्य कालिदासाभिमतत्वे विक्रमोर्वशीयपद्य

इव मेघपद्येऽपि तदेव मन्तव्यतामासादयति। मेघपद्ये च यदि केवलाया नायिकाया एव चित्र निर्माणविषयो मन्यते तर्हि चित्रार्धस्य विघ्नप्रतियोगितायां मान्यायां सत्यां यक्ष्याः शिरःपादादिकस्य शरीरार्धस्याशिष्टतमा कल्पना सुन्दरतमेऽत्र प्रस्तावे कर्तुमापद्यते। यदि च नायकस्यापि चित्रलेखनं तत्र स्वीक्रियते तर्हि यक्षीमात्रचित्रलेखनावधि वियोगिनो यक्षस्य धैर्यं स्थितम्, तदनन्तरं तस्य च्युतेः प्रतिबन्धो यक्षमात्रचित्रप्रतियोगिकस्तत्र सिद्ध्यति। किञ्च कवेरस्य भारतीयं दूषणादपि प्रमुच्यते। किं तत्र दूषणमिति चेत् अवाच्यवचनत्वरूपम् अपुष्टत्वरूपं पुनरुक्तत्वरूपं वा। कथमिति चैत्तदेवम्। येयमिह द्वितीये चरणे 'चरणमपतितं कर्तुमिच्छामी'—ति क्त—तुमुनोःप्रकृतिभूता व्यापारद्वयी कविना दत्ता तत्र तुमुन्प्रकृतिभूताया व्यापृतेः क्तप्रकृतिभूतया व्यापृत्यैव गतार्थतया तस्याः शब्दतः प्रतिपादनं पद्यपूरणाय चेद् व्यर्थमेव। ततश्च पूर्वोक्तेषु दूषणेषु किमप्येकमत्र मन्तुं शक्यते। यदा तु यक्षस्य स्वचित्रलेखोऽप्यत्र चिकीर्षितो मन्यते तदा 'पतन—लेखनयोः' परस्परं विषयविषयिभावेन विद्यमानत्वे नास्ति कस्यापि व्यर्थता। चरणपतितं कर्तुं लेखितुमिति मल्लिनाथदृष्ट्या करणरूपस्य व्यापारस्यात्र लेखनाभिन्नतया मन्तुं शक्यत्वात्। एतेन यक्षचित्रस्यापि कालिदासाभिमतत्वमत्र मेघपद्येऽरतीति विमान्यं न संभवति। पूर्वोक्तरीत्या च चित्रार्धमात्रस्य प्रतिबन्धे कालिदासा—भिमतत्वेन मते यक्षमात्रचित्रारम्भस्यैव प्रतियोगितानिरूपकत्वं तिष्ठति। यक्षीचित्रपूरणावध्येव तादृशस्य व्यक्तिद्वयचित्रलेखनव्यापारस्यार्धत्वात्। तेन हि तादृशालेखनद्वयस्यैवात्रेच्छाविषयत्वमागच्छति, अस्त्रप्रतिबन्धस्य च केवलयक्षमात्रचित्रालेखनप्रतियोगिकत्वम्। यक्षीचित्रं हि प्रतिबन्धप्रतियोगित्वं नाश्नुते, न चापि प्रतिबन्धसमकालिकेच्छाविषयत्वम्। तस्याश्चित्र पूर्तिमशानं यक्षमात्रस्य पादपतनमुद्रालेखो व्याहन्यते। तेन हि मल्लिनाथ—व्याख्यानमनुमोदितं भवति। अत्र प्रमाणं कालिदासस्य काव्यान्तरेण

मेघपद्यसंवादः। स हि तत्र सार्वत्रिक एवेति कथमपि प्रत्याख्यातुं न शक्यते केनापि।

अत्र पं० शिवचन्द्रभट्टाचार्याः—

मेघदूते हि—

**'त्वामालिख्ये'**—ति प्रियामुद्दिश्य यक्षस्योक्तिः। विरहकालिका ये तावच्चत्वारो विनोदोपाया वर्णिताः सन्ति, तेषामेकोऽपि यक्षस्य सफलो नाभूदिति क्रमेण तान् वर्णयन् यक्षोऽत्र चित्रकर्मद्वारा विनोदेच्छाया असाफल्यं दर्शयति। तथाच गुणपताकायां विरहकालिका विनोदोपाया वर्णिता यथा—

**वियोगे चायोगे प्रियजनसदृक्षानुभवनं,**
**ततश्चित्रं कर्म, स्वपनसमये दर्शनमपि,**
**तदङ्ग—स्पृष्टानामुपगतवतां स्पर्शनमपि,**
**प्रतीकारोऽनङ्ग—व्यथितमनसां कोऽपि गदितः ॥**

इति अश्रुपाताद्धि यक्षस्य चित्रनिर्माणेच्छाया मतान्तरे चित्रितप्रियाचरण—पतनेच्छाया असाफल्यम्। ततश्चेच्छाया असाफल्येन महान् खेदः। तस्माच्च दैवोपालम्भनमत्र यक्षेण कृतमिति। अत्र तावज्जिज्ञासा भवति, श्लोकस्थेन 'इच्छामी'ति पदेन यक्षेण स्वकीया इच्छा प्रकटीकृता, सा चेच्छा कीदृशी? किमाकारिका वेति? एवं जिज्ञासायामत्र चत्वार उत्तरपक्षाः सम्भवन्ति। तानुत्तरपक्षान् सयुक्तिकानिहास्माभिर्निरूप्य तेषां कतमः श्रेयानिति पश्चान्निर्णेष्यते। तथाहि श्लोकस्थस्य 'आलिख्ये' ति पदस्य यदि 'कर्त्तु'—मिति पदेनान्वयः, तदा प्रियाचित्रनिर्माणानन्तरकालिकं यदालिखितप्रिया—चरणात्मपातकरणं, तद्विषयिणीच्छा गम्यते, एवं च विशेष्यं निरुक्तात्म—पातकरणमिच्छाविषयीभूतं, यत्र विशेषणविशिष्टं विशेष्यमिच्छाविषयीभवति, तत्र क्वचित् क्वचित् विशेषणमपि इच्छाया विषयो भवतीति स्थितिः। एवं चात्र निरुक्तात्मपातकरणांशे परम्परया विशेषणस्यापि प्रियाचित्रनिर्माणस्य

इच्छाविषयत्वमिष्यते ततश्च 'त्वामालिखेयं, ततश्चालिखितत्वच्चरणात्मपातनं च कुर्यामित्याकारिका 'प्रियाचित्रनिर्माण–निर्मित–प्रियाचित्रचरणा–त्मपातनोभयविषयिणीच्छा 'इच्छामी' ति पदेनाभिव्यक्ता भवति। इच्छासमकालमेवाश्रुपात: प्रियास्मरणनिमित्तक: प्रारब्धोऽभवदिति यक्षेण न प्रिया–चित्रं निर्मितं, नापि चित्रचरणयोरात्मपात: कृत:। एवं च मनागपि चित्रदर्शनजन्यो विनोदो यक्षस्य नाभूदिति हेतो: तस्य महान् खेदस्त–ज्जन्यमत्र दैवोपालम्भनं मन्तव्यम्। यदि च प्रियाचित्रनिर्माणानन्तर–मेवात्मपातनेच्छा यक्षस्य अङ्गीक्रियते तदाऽनुपपत्तिरियं द्रष्टव्या। तथाहि विरहविधुरो हि यक्ष: सर्वदा प्रियाध्यानैकतान आसीत्, न च बाह्ये विषये चित्रकर्मादौ मनोयोगं दातुमर्हति। अन्यत्र मनोयोगे प्रियां प्रति यक्षस्यानुरागाभाव: प्रसज्येत। न चैतद् युक्तम्, तस्मादतिशयानुरक्तचेतस: प्रियाध्यानैकनिपुणस्य यक्षस्य बहिर्विषये चित्ररचनादावन्त:करणप्रवृत्तेरभावात् ध्यानकालिकं चित्रनिर्माणादि–विषयकं संकल्पमात्रमासीदिति मन्तव्यम्। अयमुभयविषय–केच्छास्वीकाररूप एक: पक्ष:, स्वीकृतश्च गोस्वामिदामोदरलालप्रभृतिभि:। मन्ये प्राचीनटीकाकारभरतसेनेनापि अयमेव पक्ष: समर्थित:। अत: परं यक्षेच्छाया एकविषयकत्वस्वीकाररूप: अन्योऽपि कल्प उच्यते। तथाहि उक्तश्लोके 'आलिख्ये'ति पदस्य 'इच्छामी' त्यनेन सम्बन्ध:, तेन चित्रितप्रियाचरणात्मपातविषयिणी या प्रियाचित्रलेखनानन्तरकालिकी इच्छा, सैव 'इच्छामी' त्यनेन गम्यमाना भवति, एवं च 'चित्रितत्वच्चरणयोरात्मानं पातयेय' मित्याकारिका चित्रितप्रियाचरणात्मपातमात्रैकविषयिणीच्छा लभ्यते। सा चेच्छा प्रियाचित्रदर्शनजन्याश्रुपातेन प्रतिरुद्धा सती यक्षहृदि खेदमुपाजनयत्। तेन खेदेनात्र यक्षस्य दैवोपालम्भनम्। एतन्मते प्रियाचित्रनिर्माणं यक्षेण समापितमासीत्, किन्तु चित्रचरणयोरात्मपातनं यक्षस्य न जातम्, यद्यपि दृश्यते रुदितपरवशस्यापि चरणयोरवलुण्ठनं तथापीह पाषाणफलके धातुरागेण निर्मितचित्रस्य अश्रुभि: प्लावितत्तया मृष्टत्वेन न तत्र यक्षस्यात्मपातनं

शक्यमासीदित्यवगन्तव्यम्। चित्रनिर्माणास्वीकारपक्षे तु अश्रुपातकारणं खेदकारणं च न सम्यगुपपद्येते, तथाहि पूर्वकल्पे यक्षस्याश्रुपातस्तावत् किन्निबन्धन इत्येव प्रथमं विचारणीयमस्यैव निर्णयेन खेदकारणानुपपत्तिः प्रकटीभविष्यति। यक्षो हि प्रियां प्रति बलवदनुरक्तहृदय आसीत्। सति च बलवत्यनुरागे येन केनापि प्रकारेण स्मृति–पथमारूढा प्रिया जनयत्यश्रूणि इति स्वभावविरुद्ध–कल्पनया उपपादयितुं शक्यते यक्षस्याश्रुपातकारणं पूर्वकल्पे। परमेवं कल्पनेन सहैव इदमपि स्वीकार्यं यत् बलवदनुरक्तहृदयस्य विरहातुरस्य सततप्रियाचिन्तानिमग्नस्य यक्षस्य सर्वदा प्रायंशो वाश्रुपातो दुर्लभो नासीदिति। एवं च स्थितौ स्वामवस्थां पश्यतः अर्थान्निजां चित्रनिर्माणस्य प्रायिकाश्रुपातजनितामयोग्यतां जानतो यक्षस्य कथं हृदि बलवती प्रियाचित्रनिर्माणेच्छा अजायत? नहि कर्मणि स्वकीयामयोग्यतां पश्यतः पुरुषस्य तत्र बलवती साधनेच्छा प्रजायते, कथञ्चित् कार्यसाफल्ये परितो नैराश्यतिमिरेणाव्रियमाणस्य स्वामयोग्यतां जानतः पुरुषस्य कर्मणि जायमानापि क्षीणा दीपशिखेव साधनेच्छा प्रतिहता सती प्रागेव 'सफला न भवष्यिति' इत्येव निश्चयेन दृढीकृतहृदयभूमौ खेदाङ्कुराणि जनयितुम् नालम्भवतीति निश्चितम्। तदेवं स्थितौ यक्षस्य यदि येन केनापि प्रकारेण प्रियास्मरणनिमित्तकोऽश्रुपातः स्वीक्रियते, तदा विरहातुरस्य यक्षस्य प्रायिकमश्रुपातं पश्यतः चित्रनिर्माणेच्छा प्रागेवासाफल्यसम्भावनया परिभूता सती क्षीणेति न तद्विघाते यक्षस्य खेदकारणमुपपद्यते। यदि च यक्षस्य न खेदस्तदा कथं दैवोपालम्भनमिति दुरुत्तरम्। अतो नायं पन्थाः समीचीनः।

किन्तु अनुरक्तस्यापि यक्षस्यासीत् तथाविधं धैर्यम्, येन तस्य येन केनापि प्रकारेण प्रियास्मरणमात्रेण हृदयावेगनिबन्धनोऽश्रुपातो न भवति स्म, सम्भवति च विनोदाशया बलवदनुरक्तहृदयस्यापि यक्षस्य बाह्यविषये चित्रनिर्माणादौ बलवताऽनुरागेणैव प्रेरणेति। स्वीकार्यमेवं च यदा यक्षो

प्रियानुरागेणैव प्रेरितो विरहकालिकविनोदाशया कुपितायाः प्रियायाश्चित्रं निर्मितवान् तदा प्रियायाः प्रत्यक्षसमतुलेन चित्रसन्दर्शनेन हृदयावेग–निबन्धनोऽश्रुपातः समजायत, उपपद्यते च प्रियास्मरणापेक्षया प्रियाप्रत्यक्ष–समतुलस्य तच्चित्रदर्शनस्याधिकतर–हृदयावेगजनकत्वम्। ततश्च हृदयावेग–निमित्तकाश्रुपातेन चित्रचरणप्रणामद्वारा यक्षस्य प्रियामानापनयनेच्छा फलनिकटमागत्याऽपि अल्पस्य कृते प्रतिहताभूत् इति फलनोन्मुखाया इच्छायाः प्रतिहतिर्यक्षस्य हृदि महान्तं खेदमुपाजनयत्। ततश्च खेदनिमित्तकं दैवोपालम्भनं यक्षस्य युज्यते इति द्वितीयः कल्पः.।

अथ तृतीयः प्रकार उभयविषयकेच्छास्वीकाररूपः कल्प उच्यते। अत्रापि कल्पे प्रथमकल्पोक्तयुक्तिभिः 'आलिख्ये'त्यस्य 'कर्त्तु'–मित्यनेन सम्बन्धः। तेन प्रथमकल्पवत् प्रियाचित्रनिर्माणपूर्वकं यत् चित्रचरणात्मपातनं, तद्विषयकेच्छा लभ्यते, विशिष्टस्येच्छाविषयत्वे विशेषणस्यापि प्रियाचित्रनिर्माणस्य इच्छाविषयत्वं सिद्धं भवति। इयांस्तु विशेषः प्रथमकल्पे 'आत्मानं ते चरणपतितं यावदिच्छामि कर्त्तु'–मित्यस्य यथाश्रुत एवार्थः, इह तु 'आत्मान' मित्यस्य आत्मप्रतिकृतौ लक्षणा, तेन 'त्वच्चरणपतितत्वेन आत्मप्रतिकृतिं यावद् निर्मातुमिच्छामि' इति निष्कर्षो लभ्यते। यथाश्रुतार्थेऽरुचिस्तु एभिः कारणैः बोद्धव्या, तथाहि यक्षेण यदि तावत् चित्रितप्रियाचरणयोरात्मपातनमात्रं प्रमाणमात्रमिति यावत् इष्यते तदा प्रणामकर्त्ता यक्षः स्वस्यैव कर्मत्वं व्यपदिश्य स्वभिन्नत्वेनेव निर्देशं किमर्थं कृतवान्? इतिप्रश्नो भवति। स्वभावतस्तु तत्रेदं वक्तव्यं यक्षस्यासीद् यत् **'क्रोधो गच्छेच्छमनमिति वै यावदिच्छामि नन्तुम्'** इति। न च तथा कृतम्, अपि तु कर्त्तुरिव कर्मत्वेन व्यपदेशं कृत्वा 'कर्त्तुरधीनं कर्म प्रायशस्तद्भिन्न'–मिति प्रसिद्ध्या पाठकमनसि भ्रमसृष्टेरवकाशो दत्तः। न चैतद् युक्तं, तस्माद् 'उद्वृत्तो हि ग्रन्थः समधिकफलमाचष्टे' इति नियमानुसारेणात्र

'नन्तुमिच्छामी' ति वक्तव्ये 'आत्मानं ते' इत्यादिनाऽधिकतरकथनं कर्तुश्च स्वभिन्नत्वेनेव कर्मत्वव्यपदेशः कस्यचिदभिप्रायविशेषस्यैव सूचनायेत्य–वश्यमङ्गीकार्यम्। स चाभिप्राय 'आत्मान'मित्यस्यात्मप्रतिकृतौ लक्षणा–स्वीकारपक्षे एव सम्यगुपपद्यते आत्मप्रतिकृतिरूपकर्मणश्च पराधीनत्वं कर्त्तृभिन्नत्वं च भवतः। यथाश्रुतार्थग्रहणपक्षे तु नैतदुपपद्यते। तस्मादा–त्मानमित्यस्यात्मप्रतिकृतौ लक्षणापक्ष एव श्रेयान्।

एतन्मते इच्छाया आकारस्तु 'त्वामालिखेयम्, ततस्त्वच्चरण–पतितत्वेनात्मप्रतिकृतिमालिखेय'–मिति। अन्यत् सर्वं प्रथमकल्पोक्त–दिशाऽवसेयम्। प्रथमकल्पस्यैव आत्मपदस्य लक्षणास्वीकारे अयं तृतीयकल्पः प्रकारभेदो भवति। अथापरश्चचतुर्थः कल्पो मल्लिनाथादिसम्मत उच्यते। अयमपि च कल्पो यक्षेच्छाया एकविषयकत्वस्वीकारपरः, आत्मपदस्य आत्मप्रतिकृतौ लक्षणास्वीकारपरश्च। एतन्मते प्रियाचित्रं यक्षेण निर्मितमासीत्, किन्तु प्रियाचित्रचरणपतितत्वेनात्मचित्रं न निर्मितम्। किन्तु यावदेव यक्षः तथाभूतात्मप्रतिकृतिं निर्मातुमिच्छति, तावदेव प्रियाचित्रदर्शननिमित्तकेनाश्रुपातेन दृष्टिलोपाद् यक्षस्य साफल्यनिकटमागतायाः किं बहुना प्रायेण सफलतां प्राप्तायाः प्रियाचित्रचरणपतितत्वेनात्मप्रतिकृति–रचना–द्वारकविनोदाशायाः प्रतिघातोऽभूदिति हेतोर्यक्षस्य हृदि महान् खेद उत्पन्नः, तथाहि यत्र बहूनां कर्मणां समाप्त्यनन्तरमाशा सफलतां भजते, तत्र यथा यथा एकैकं कर्म समाप्यते तथा तथा आशा विवर्धते। तादृशीं वृद्धिं प्राप्ताया आशायाः प्रतिघातः सुदूरफलाया आशायाः प्रतिघातापेक्षया अधिकतरं खेदं जनयति। इह च यक्षस्य चित्रदर्शनजन्य–मनोविनोदाशा चित्रद्वयनिर्माणानन्तरं सफला भाविनी आसीत्। तत्र च प्रथमचित्रनिर्माणे जाते अर्थात् प्रियाचित्रे निर्मिते 'इदानीं ममाशा स्वचित्रनिर्माणमात्र–व्यवहितफला अचिरेणैव फलिष्यती' ति सम्भावनया परिबृंहिता सती पूर्वोक्तविनोदाशा मुहुरुपचितैरश्रुभिर्दृष्टि–लोपात्

प्रतिहताभूदिति हेतोर्यक्षहृदि महत्तरं दुःखमुत्पन्नमभूत्। ततश्च खेदनिबन्धनो दैवाक्षेपः। प्रथमतृतीयकल्पयोस्तु नैवम्प्रकारेण खेदोत्पादसम्भवः। द्वितीयकल्पे पूर्वोक्तप्रकारेण खेदोत्पत्तिसम्भवेऽपि तत्रात्मपदस्य यथाश्रुतार्थपरतया 'अस्त्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे' इति पङ्क्तेः, 'तस्मिन्नपि न सहते सङ्गमं नो कृतान्तः' इति पङ्क्तेश्च सङ्गतिः न भवति। तथाहि द्वितीयकल्पे स्वीकृतमस्ति यद् यक्षेण प्रियाचित्रनिर्माणानन्तरं यदा चित्रे आत्मपातनं प्रणाममिति यावदिष्टं तदैवाश्रुपाताद् इच्छाप्रतिघात इति। परन्तु अश्रुभिर्दृष्टिलोपेऽपि का बाधा तत्रात्मपातने? इति प्रश्नस्योत्तरं द्वितीयकल्पे नास्ति। यदि च उच्यते अश्रुभिर्दृष्टिलोपात् चित्रगतप्रियाचरणावेव न ज्ञायेते, कुत्रात्मपातनं कुर्याद् यक्ष इति, तदापि इदं वक्तुं शक्यते यत् खेदकारणोपपत्तये द्वितीयकल्पे यक्षेण प्रियानिर्माणं समापितमासीदिति स्वीकृतमस्ति, तत्र प्रियाचित्रनिर्माणकाले एव चित्रगतप्रियया सह सान्निध्यरूपः सङ्गमो यक्षस्य समभवदिति कथमुच्यते यक्षेण अग्रे 'क्रूरस्तस्मिन्न सहते सङ्गमं नौ कृतान्तः' इति। तथाहि आत्मपदस्य यथाश्रुतार्थपरत्वे 'तस्मिन्नपि न सहते सङ्गममि'त्यत्र सङ्गमपदार्थः चित्रबहिःस्थस्य यक्षस्य प्रियाचित्रेण सह सान्निध्यरूपो वाच्यः। स च चित्रनिर्माणकाले एव जात इत्यनुपपन्ना भवति तदुक्तिः। यदि च चित्रे प्रणतिरूपः सङ्गमः उक्तसङ्गम–शब्दस्यार्थः कल्प्यते तदा सङ्गमपदस्य यथाश्रुतार्थपरतानिर्वाहो न भवति, तद् वरमात्मपदस्यात्मप्रतिकृतौ लाक्षणिकत्वं तृतीयकल्पोक्तयुक्तिभिः। वस्तुतस्तु चित्रे सङ्गमस्तावद् चित्रगतयोरेव द्वयोः सान्निध्यमिति स्वीकारः स्वारसिको भवति। एतन्मते 'त्वच्चरणपतितत्वेनात्मप्रतिकृतिं रचयेयमिति इच्छाया आकारः। अयमेव कल्पः सर्वेभ्यो वरीयानिति।।

# कुमारसंभवे कालिदासोद्भटाचार्ययोः संवादः

अलङ्कारशास्त्रस्य प्रसिद्धतमे काव्यालङ्कारसारसंग्रहनाम्नि ग्रन्थे तत्कर्त्रा उद्भटनाम्ना[1] विदुषा कुमारसंभवनाम्नः[2] कस्यचिद् इदानीमलभ्यमानस्य स्वनिर्मितस्य काव्यस्य पञ्चनवतिः[3] श्लोकास्तत्तदलङ्कारोदाहरण–त्वेनोपस्थापिताः। तेषु सतीशरीरत्यागात् प्रभृति वटुवेषधारिणा शिवेन पार्वत्यास्तपः समाधेर्निवारणं यावत् कथा लभ्यते। कथासूत्रमिदं तत्र तथाऽनुस्यूतम् तथा च अव्याहतगति विद्यते यथा सर्वेऽपीमे श्लोकाः प्रारम्भमात्रहीनं कञ्चिदेकं संपूर्णमेव सर्गमुपस्थापयन्ति[4]। एषु श्लोकेषु ये ये

---

१. आचार्योऽयं 'विद्वान् दीनारलक्षेण प्रत्यहं कृतवेतनः, तस्याभूदुद्भटो नाम भूमिभर्तुः सभापतिः—'इति राजतरंगिण्याः ४.४९५—पद्येन जयापीडनाम्नः कश्मीराधिपस्य समकालतयाख्रीष्टसंवत्सरस्य ७७९—तम वर्षतः ८१३—तमं वर्षं यावद्यो–वधिस्तद्राजकालत्वेन निर्धारितस्तस्मिन्नेव कदाचिदभूदिति निश्चीयते।

२. काव्यस्यास्य कुमारसंभवमिति नाम तत्कर्तुः १५०—वर्षपश्चाद्भाविना काव्यालङ्कारसारसंग्रहटीकाकर्त्रा प्रतीहारेन्दुराजेन लघुविवृतिनाम्न्यामस्यां टीकायां कृतेनानेनोल्लेखेन निश्चीयते—'अनेन ग्रन्थकृता स्वोपरचितकुमारसंभवैकदेशोत्र उदाहरणत्वेनोपन्यस्तः' इति (का०सा०सं०—१.१४—कारिकायाष्टीका)। कालिदासकुमारसंभवकथावस्तुसाम्यमात्रेणेदमत्र टीकाकृतोद्भाव्यते, उत केनचिदन्येनापि प्रमाणेनेति यद्यपि सांप्रतमलब्धतत्काव्यैरनुसंधातृभिर्वक्तुं न शक्यते तथापि प्रामाण्यस्य स्वतस्त्ववादिभिरलब्धविरुद्धप्रमाणैरस्माभिरन्यथासंभावयितुं न शक्यत इति काव्यस्यास्य कुमारसंभवत्वमेवोररीक्रियते।

३. काव्यालङ्कारसारसंग्रह आंग्लटीका रचितवान् प्रो० वनहट्टी श्लोकानामेषां ९४—संख्याकत्वमेव।

४. सर्वेपि श्लोका यद्यपि कथावस्तुघटनाक्रममनुपालयन्त एवात्रोपस्थापितास्तथापि ८, ३३, ३५ च श्लोकोत्र व्युत्क्रम एव वर्त्तते। तत्र प्रथमः पञ्चमत्वेन, द्वितीयो द्वात्रिंशत्वेन, तृतीयश्च पञ्चत्रिंशत्वेन पठनीयः।

काव्यार्था उपस्थापितास्तेषु कालिदासकृतेः कुमारसंभवस्य भूयान् प्रभावः, संवादश्छायानुहरणं वा दृश्यते। संदर्भेऽस्मिंस्तानेव कतचन श्लोकानुपस्थाप्य तदुपजीव्यभूतानपि श्लोकानुपतिष्ठापयिषामः। तत्र पूर्वं संवादभेदानेव प्रस्तवीमहि येन तेषु तेषु स्थलेषु ते यथायथमध्यवसीयेरन्।

संवादभेदाविषयममुमाश्रित्य ध्वनिप्रस्थापनपरमाचार्यास्तत्रभवन्तो ध्वनिकृतः कथयन्ति—

**संवादास्तु भवन्त्येव बाहुल्येन सुमेधसाम् ।**
**नैकरूपतया सर्वे ते मन्तव्या विपश्चिता ।।**

**संवादो ह्यन्यसादृश्यं तत् पुनः प्रतिम्बवत् ।**
**आलेख्याकारवत्तुल्यदेहिवच्च शरीरिणाम् ।।**

ध्व. का. ४.११—१२ इति।

अयमर्थो यद् ये हि सुमेधसः शोभनबुद्धयो भवन्ति ते हि बाहुल्येन संवादिनो भवन्त्येव। शोभनत्वस्य तत्त्वदर्शित्वाश्रितत्वात्, तत्त्वस्य च सत्यापरपर्यायस्य नियमेनैकरूपत्वात्। योऽयं संवादः स पुनस्त्रिविधो भवति १. प्रतिबिम्बप्रख्यः, २. आलेख्यप्रख्यः ३. तुल्यदेहिप्रख्यश्चेति। एतेषां स्वरूपाणि तत्रभवता काव्यमीमांसाकृता राजशेखरेणैवमुपस्थाप्यन्ते—

तत्र प्रतिबिम्बकल्पम्,

**अर्थः स एव सर्वो वाक्यान्तरविरचना परं यत्र ।**
**तदपरमार्थविभेदं काव्यं प्रतिबिम्बकल्पं स्यात् ।।** इति,

आलेख्यकल्पम्,

**कियतापि यत्र संस्कारकर्मणा वस्तु भिन्नवद् भाति ।**
**तत् कथितमर्थचतुरैरालेख्य—प्रख्यमिति काव्यम् ।।** इति,

तुल्यदेहिकल्पम्

**विषयस्य यत्र भेदेऽप्यभेदबुद्धिर्नितान्तसादृश्यात् ।**
**तत् तुल्यदेहितुल्यं काव्यं बध्नन्ति सुधियोपि ।।** इति च

काव्यमीमांसाया अध्यायः—१२

एतेषां हेयोपादेयताविषयेपि ध्वनिकार एव कथयति—

**तत्र पूर्वमनन्यात्म तुच्छात्म तदनन्तरम् ।**
**तृतीयं तु प्रसिद्धात्म नान्यसाम्यं त्यजेत् कविः ।।** इति

ध्व. का. ४.१३

कारिकयानया विशदीकृतान् संवादानिमान् वृत्त्याप्यसावेवं विशकलति—

१. तत्र पूर्वं प्रतिबिम्बकल्पं काव्यवस्तु परिहर्त्तव्यं सुमतिना, यतः तद् अनन्यात्म तात्त्विकशरीरशून्यम्।

२. तदनन्तरम् आलेख्यप्रख्यम् अन्यसाम्यं शरीरान्तरयुक्तमपि तुच्छात्मत्वेन त्यक्तव्यम्।

३. तृतीयं तु विभिन्न—कमनीय—शरीर—सद्भावे सति ससंवादमपि काव्यवस्तु न त्यक्तव्यं कविना, न हि शरीरी शरीरिणान्येन सदृशोप्येक एवेति शक्यते वक्तुम्। इति।

वृत्त्यानयोपस्थापितमर्थं कारिकयाप्यनया स्वयं ध्वनिकृदेवैवमुपपादयति—

**आत्मनोऽन्यस्य सद्भावे पूर्वस्थित्यनुयाय्यपि ।**
**वस्तु भातितरां तन्व्याः शशिच्छायमिवाननम् ।।**

ध्व. ४.१४ इति।

संवादा इमे ध्वनिकृता वाक्यार्थ—पदार्थरूपत्वेन द्विधा विभज्यन्ते। तेषु य इमे पूर्वमुक्ता एते वाक्यार्थरूपाः। पदार्थरूपाणां संवादानां भेदाननुपस्थाप्य तदर्थं हेयोपादेयताविषयकं मतमेवासावेवमुपस्थापयति—

**अक्षरादिरचनेव योज्यते यत्र वस्तुरचना पुरातनी ।**
**नूतने स्फुरति काव्यवस्तुनि व्यक्तमेव खलु सा न दुष्यति ।।**

**यदपि तदपि रम्यं यत्र लोकस्य किंचित्**
**स्फुरितमिदमितीयं बुद्धिरभ्युज्जिहीते ।**
**अनुगतमपि पूर्वच्छायया वस्तु तादृक्**
**सुकविरुपनिबध्नन्निन्द्यतां नोपयाति ।।**

प्रतायन्तां वाचो निमितविविधार्थामृतरसा
न सादः कर्त्तव्यः कविभिरनवद्ये स्वविषये ।
परस्वादानेच्छा विरतमनसो वस्तु सुकवेः
सरस्वत्येवैषा घटयति यथेष्टं भगवती ।।

ध्व. ४.१५—१७ इति।

सेयं संवादगाथा। इमामुपस्थाप्य सांप्रतं कुमारसंभवयोः संवादिनः श्लोकानुपस्थापयामः। तेषु कुत्र कीदृशः संवाद इति सुमतिभिः स्वयमेवा— वधेयम्। तत्र भावसंवादो यथा—

१. उद्भटः पार्वत्यास्तपःसमाधिकालिकीं शरीरस्थितिं वर्णयँल्लिखति—

पद्मं च निशि निश्श्रीकं दिवा चन्द्रं च निष्प्रभम् ।
स्फुरच्छायेन सततं मुखेनाधः प्रकुर्वतीम् ।।

उदाहरणसं० ३९ इति।

पद्यस्यास्य पदार्था वाक्यार्थश्चेति द्वितयेपि कालिदासस्य—

चन्द्रं गता पद्मगुणान्न भुङ्क्ते पद्माश्रिता चान्द्रमसीमभिख्याम् ।
उमामुखं तु प्रतिपद्य लोला द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ।।

कुमार० १.४३

इति पद्यस्य द्वितयानपि तान् प्रतिबिम्बवर्त्मनैव दूरमनुहरन्ति।

२. उद्भटः पार्वत्यास्तपसः कठोरतामुपप्रस्तुवन् व्रूते—

शीर्ण—पर्णा—म्बु—वाताश—कष्टे—पि तपसि स्थिताम् ।
समुद्वहन्तीं नापूर्वं गर्वमन्य—तपस्विवत् ।।

उदा० सं० ४० इति।

वक्तव्यमिदं कालिदासस्य—

स्वयं—विशीर्ण—द्रुम—पर्णवृत्तिता परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां वदन्त्यपर्णेति च तां पुराविदः ।।

**मृणालिकापेलवमेवमादिभिर्व्रतैः स्वमङ्गं ग्लपयन्त्यहर्निशम् ।**
**तपः शरीरैः कठिनैरुपार्जितं तपस्विनां दूरमधश्चकार सा ।।**

कुमार० ५.२८—२९ इत्यनयोः

पद्यार्थयोः संक्षेपतो नातिरिच्यते।

३. कालिदासः पार्वतीकौमारवर्णने स्मितद्युतिं चित्रयँल्लिखति—

**पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम् ।**
**ततोऽनुकुर्याद् विशदस्य तस्य ताम्रौष्ठ—पर्यस्त—रुचः स्मितस्य ।।**

कुमार० १.४४ इति।

किन्तु, इमामेव पुष्पप्रवालच्छटां मुक्ताविद्रुमकान्तिं वा स पार्वत्याः करे स्थितायाः स्फटिकाक्षमालाया वर्णनावसरे विस्मरति। तत्र परभागमिममपहायासौ ब्रवीति—

**अथाग्रहस्ते मुकुलीकृताङ्गुलौ समर्पयन्ती स्फटिकाक्षमालिकाम् ।**
**कथञ्चिदद्रेस्तनया मिताक्षरं चिरव्यवस्थापितवागभाषत ।।**

कुमार० ५.६३ इति।

उद्भटः परभागसौभगमिदमाकलयति, चित्रयति च—

**पतेद्यदि शशिद्योतच्छटा पद्मे विकासिनि ।**
**मुक्ताफलाक्षमालायाः करेऽस्याः स्यात्तदोपमा ।।**

उदा० सं०—४६ इति।

अनुहरणमिदं तुल्यदेहितया स्थितमिति, यत्सत्यं, नितान्तमेव श्लाघास्पदम्।

४. पार्वत्याः पञ्चाग्नितपः कालिदास एवं वर्णयति—

**शुचौ चतुर्णां ज्वलतां हविर्भुजां शुचिस्मिता मध्यगता सुमध्यमा ।**
**विजित्य नेत्रप्रतिघातिनीं प्रभामनन्यदृष्टिः सवितारमैक्षत ।।**
**तथातितप्तं सवितुर्गभस्तिभिर्मुखं तदीयं कमलश्रियं दधौ ।**
**अपाङ्गयोः केवलमस्य दीर्घयोः शनैः शनैः श्यामिकया कृतं पदम् ।।**

कुमार० ५.२०—२१ इति।

उद्भट: कालिदासाभिव्यञ्जितं सौभगमिदं किञ्चिद् विकृत्यैवं प्रस्तवीति—

**अस्या: सदार्कबिम्बस्थ—दृष्टि—पीतातपैर्जपै: ।**
**श्यामिकाङ्केन पतितं मुखे चन्द्रभ्रमादिव ।।**

उदा० सं० ४९ इति।

सूर्यप्रभया मुखादिकं श्यामिमानमाभजतीति नास्ति मिथ्या, किन्तु सौन्दर्यप्रस्तावे कमलश्रीकत्वमेव तत्राधिकं हृद्यम् उत, तादृशं श्यामत्वमिति सुधीभि: स्वयमेवावसेयम्।

५. कालिदासस्य पार्वती मृगानरण्यबीजाञ्जलिभिस्तथाऽऽश्वासयति यथा ते तेषां नेत्रै: सहात्मनो नेत्रयोर्मनिऽपि पार्वतीं प्रति न शङ्कन्ते। यदुच्यते—

**अरण्यबीजञ्जलि—दान—लालितास्तथा च तस्या हरिणा विशश्वसु: ।**
**यथा तदीयैर्नयनै: कुतूहलात् पुर: सखीनाममिमीत लोचने ।।**

कुमार० ५.१५ इति।

वरतन्तुतपोवने मृगपोतका मुनिक्रोडेषु नाभिनालं च्यावयन्ति (रघु. ५.७), कण्वाश्रमे च दीर्घापाङ्गो नाम मृगपोतक: शकुन्तलाया: पुत्रकृतको विद्यते—(शाकु. ४.१४)। तामेतां निखिलामपि भावधारामुद्भट एवं संक्षिपति—

**इयं च सुतवाल्लभ्यान्निर्विशेषस्पृहावती ।**
**उल्लापयितुमारब्धा कृत्वेमं क्रोड आत्मन:[१] ।।**

उदा० सं० ५२

६. कालिदास: कोमलेन वपुषा क्रियमाणस्य क्रूरस्य तपसो विषमतां शिरीषपुष्प—पतत्रि—पदाहतिसखीं मन्वान: कवयति—

**मनीषिता: सन्ति गृहेषु देवतास्तप: क्व वत्से क्व च तावकं वपु: ।**
**पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुन: पतत्रिण: ।।**

कुमार० ५.४ इति।

---

१. श्लोकोयम् 'इयं च सुतवाल्लभ्यनिर्विशेषं स्पृहावती'—त्येवमिव किंचिद् भवेत्।

तामिमां विषमतामुद्भटोपि अपह्नुतिचमत्कारेणैवमुपस्थापयति—

**एतद्धि न तपः सत्यमिदं हालाहलं विषम् ।**
**विशेषतः शशिकलाकोमलानां भवादृशाम् ।।**

उदा० सं० ६९ इति।

७. विषमामिमां स्थितिं दृष्ट्वा कालिदासस्य वटुः पार्वतीं किंचित् प्रष्टुमुपपन्नचापलो भवति, ब्रवीति च—

**प्रयुक्तसत्कारविशेषमात्मना न मां परं संप्रतिपत्तुमर्हसि ।**
**यतः सतां सन्नतगात्रि! सङ्गतं मनीषिभिः साप्तपदीनमुच्यते ।।**
**अतोऽत्र किञ्चिद् भवतीं बहुक्षमां द्विजातिभावादुपपन्नचापलः ।**
**अयं जनः प्रष्टुमनास्तपोधने! न चेद्रहस्यं प्रतिवक्तुमर्हसि ।।**

कुमार० ५.३९—४० इति।

उद्भटस्यापि वटुर्विषमतयानया दूनचित्तो भवति, आक्षेपविच्छित्त्या च प्रष्टुमुपक्रमते—

**इत्थं विसंस्थुलं दृष्ट्वा तावकीनं विचेष्टितम् ।**
**नोदेति किमपि प्रष्टुं सत्वरस्यापि मे मनः ।।**

उदा० सं० ७१

८. कालिदासस्य वटुः पार्वतीं तपःकारणं पृच्छन् वक्ति—

**कुले प्रसूतिः प्रथमस्य वेधसस्त्रिलोकसौन्दर्यमिवोदितं वपुः ।**
**अमृग्यमैश्वर्यसुखं नवं वयस्तपःफलं स्यात् किमतः परं वद ।।**

कुमार० ५.४१ इति।

उद्भटो विस्मयोक्तिमिमां विशेषोक्तिरूपेणैवं परिणमयति—

**महर्द्धिनि कुले जन्म रूपं स्मरसुहृद् वयः ।**
**तथापि न सुखप्राप्तिः कस्य चित्रीयते न धीः ।।**

उदा० सं० ७० इति।

९. पार्वत्याः सौकुमार्यं चित्रयता कालिदासेनालेखि—

**क्लमं ययौ कन्दुकलीलयापि या तया मुनीनां चरितं व्यगाह्यत ।**
**ध्रुवं वपुः काञ्चनपद्मनिर्मितं मृदु प्रकृत्या च ससारमेव च ॥**

**महार्ह—शय्या—परिवर्तन—च्युतैः स्वकेशपुष्पैरपि या स्म दूयते ।**
**अशेत सा बाहुलतोपधायिनी निषेदुषी स्थण्डिल एव केवले ॥**

कुमार० ५.१९, १२ इति।

उद्भट इदमेव तथ्यमेवमतितमां सुकुमारेण क्रमेण चित्रयति—

**त्वदङ्गमार्दवं दृष्ट्वा कस्य चित्ते न भासते ।**
**मालती—शशभृल्लेखा—कदलीनां कठोरता ॥**

उदा० सं० ७३ इति।

१०. पार्वत्याः कायकान्तिः मुनिवेषश्चेति द्वयं नितान्तमेव विसदृशमिति कालिदास उद्भटश्चेति द्वावपि समानेनैवाध्वना स्फोरयतः। तत्र कालिदासो यथा—

**किमित्यपास्याभरणानि यौवने धृतं त्वया वार्धकशोभि वल्कलम् ।**
**वद प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्पते ॥**

कुमार० ५.४४ इति।

उद्भटश्च यथा—

**योगपट्टो जटाजालं तारवी त्वङ्मृगाजिनम् ।**
**उचितानि तवाङ्गस्य यद्यमूनि तदुच्यताम् ॥** उदा०सं० ७४

**छायेयं तव शेषाङ्गकान्तेः किंचिदनुज्ज्वला ।**
**विभूषाघटनादेशान् दर्शयन्ती दुनोति माम् ॥**

उदा० सं० ९४ इति।

११. कालिदासोऽर्थान्तरन्यासविच्छित्तिमाश्रित्य चारुतायाः फलं प्रिय—वाल्लभ्यरूपं प्रियसौभाग्यमेवं मनुते—

**तथा समक्षं दहता मनोभवं पिनाकिना, भग्नमनोरथा सती ।**
**निनिन्द रूपं हृदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता ।।**

कुमार० ७.२२ इति च।

उद्भटः कालिदासस्यान्वयं व्यतिरेकयति, विदर्शनामुखेन[१] च ब्रवीति—

**विनोचितेन पत्या च रूपवत्यपि कामिनी ।**
**विधुवन्ध्यविभावर्याः प्रबिभर्त्ति विशोभताम् ।।**

उदा० सं० ७७ इति।

१२. कालिदासवटोर्दृष्टौ वरप्राप्तये तपःसमाधिः पार्वतीसदृक्षाभ्यो रूपवतीभ्योऽङ्गनाललामभूताभ्यः कुमारीभ्यः तथैव विप्रतीपो यथा रत्नद्वारा स्वग्राहकस्यान्वेषः, यदुक्तम्—

**दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः ।**
**अथोपयन्तारमलं समाधिना न रत्नमन्विष्यति मृग्यते तु तत् ।।**

कुमार० ५.४५ इति,

उद्भटब्रह्मचार्यपि क्रममिमं तामेव दिशमनुसरन्नेवं किञ्चिदधिकं कठोरतया समर्थयति—

**इत्थं स्थितिर्वरार्था चेन्मा कृथा व्यर्थमर्थिताम् ।**
**रूपेण ते युवा सर्वः पादलग्नो हि किङ्करः ।।**

उदा० सं० ७९ इति।

अत्र 'पादबद्धो हि नूपुर' इति चेत्स्यात्?

१३. कालिदासः पार्वतीं सखीमुखेन ब्रह्मचारिणे परिचाययति—

**इयं महेन्द्रप्रभृतीनधिश्रियश्चतुर्दिगीशानवमत्य मानिनी ।**
**अरूपहार्यं मदनस्य निग्रहात् पिनाकपाणिं पतिमाप्तुमिच्छति ।।**

कुमार० ५.५३ इति।

---

१. उद्भटो निदर्शनार्थं विदर्शनापदं प्रयुणक्ति। लिपिदोषोऽत्र मूलमिति सहसा कथयितुं न शक्यते, संस्करणान्तरेष्वपि तथैव दर्शनात्।

अभिलाषस्यास्य परिणाममपि चित्रयँल्लिखति–

**तदाप्रभृत्युन्मदना पितुर्गृहे ललाटिकाचन्दनधूसरालका ।**
**न जातु बाला लभते स्म निर्वृतिं तुषारसंघातशिलातलेष्वपि ।।**

कुमार ५.५५ इति।

उद्भटो द्वितयमपीदं पद्येनानेनैवं संकलयति–

**हरेणेव स्मरव्याधस्त्वयानङ्गीकृतोपि सन् ।**
**त्वद्वपुः क्षणमप्येष धार्ष्ट्यादिव न मुञ्चति ।।**

उदा० सं० ८१ इति।

स्थलेष्वेषु भावसंवादः कुमारसंभवद्वये स्फुटः। अन्येष्वपि स्थलेषु काव्ययोरनयोरसौ न न लब्धुं शक्यते। विस्तरभिया तु तत्प्रपञ्चोऽत्र विद्वद्भ्य एव त्यज्यते।

**प्रबन्धसंवादः**

भाव इव प्रबन्धेऽपि काव्ययोरनयोः संवादो विहितपदः। तदर्थमपि कानिचन निदर्शनानि प्रस्तूयन्ते–

१. सप्तर्षिमण्डलमुखेन विहित–पार्वती–याचन–प्रस्तावं भगवन्तं शङ्करं कालिदासः षष्ठसर्गान्ते पार्वतीसमागमोत्सुकं–

**पशुपतिरपि तान्यहानि कृच्छ्रादगमयदद्रिसुतासमागमोत्कः ।**
**कमपरमवशं न विप्रकुर्युर्विभुमपि तं यदमी स्पृशन्ति भावाः ।।**

(कुमार० ६.९५) एवं संक्षेपेण वर्णयति।

उद्भटः पुनर्भगवत उत्कतामिमां समासतो व्यासभूमिमापादयन्ननेकानि पद्यानि प्रस्तौति। तथाहि–

**इति भावयतस्तस्य समस्तान् पार्वतीगुणान् ।**
**संभृतानल्पसंकल्पः कन्दर्पः प्रबलोऽभवत् ।।**

स्विद्यतापि च गात्रेण बभार पुलकोत्करम् ।
कदम्बकलिकाकोषकेसरप्रकरोपमम् ॥

क्षणमौत्सुक्यगर्भिण्या चिन्तानिश्चलया क्षणम् ।
क्षणं प्रमोदालसया दृशास्यास्यमभूष्यत ॥

तथा कामोस्य ववृधे यथा हिमगिरेः सुताम् ।
संग्रहीतुं प्रववृते हठेनापास्य सत्पथम् ॥

उदा० सं० ५३—५६ इति।

उद्भटोऽत्र भगवन्तं शङ्करमपि लोकसामान्यस्थितिकमेव चित्रयति। कालिदासः पुनर्विकारमापन्नमपि भगवन्तं भगवत्त्वभूमिकातः स्खलयितुं विचिकित्सते। अत एवासौ तं पशुपतिरिति, विभुरिति च संज्ञापयते।

२. कालिदासो गिरिराजस्य हिमाचलस्य विभूतिं कुमारसंभवस्य प्रथमे षष्ठे च सर्गे महता सन्नाहेन चित्रयति। उद्भटोपि तां उदात्तालङ्कार—द्वैतनिदर्शनतया नातिप्रबन्धनीयमपि निम्नलिखितेन क्रमेण प्रबध्नाति—

उवाच च यतः क्रोडे वेणुकुञ्जरजन्मभिः ।
मुक्ताफलैरलङ्कारः शबरीणामपीच्छया ॥

पुष्ट्येन्द्रनील—वैदूर्य—पद्मरागमयैर्वियत् ।
शिरोभिरुल्लिखद् यत्र शिखरं गन्धमादनम् ॥

उत्तरोपत्यका यस्य प्रधानस्वर्णभूमयः ।
महान् मरकतोर्वीध्रः पादोपान्तं च संश्रितः ॥

बभूव यस्य पातालपातिन्यां संक्षये क्षितौ ।
पतनं न तया सार्धमायामस्तु प्रकट्यभूत् ॥

तस्यादिक्रोडपीनांसनिघर्षेऽपि पुनः पुनः ।
निष्कम्पस्य स्थितवतो हिमाद्रेर्भवती सुता ॥

उदा० सं० ६१—६५

अत्रापि भावसाम्यं लक्ष्यत एव।

३. कालिदासः प्रबन्धे संवृतिवक्रतामाश्रित्य सामाजिकजनकौतूहलरक्षणं यत्नेन चिकीर्षति। उद्भटः पुनः कुतूहलमवीक्ष्य विवृततयैव कृत्स्नमपि भावि घटनाजातं पूर्वमेवोपस्थापयति। उदाहरणार्थम्, कालिदासः भगवतः शङ्करस्य तपश्चर्या वर्णयन् ब्रूते—

**तत्राग्निमाधाय समित्समिद्धं स्वमेव मूर्त्यन्तरमष्टमूर्त्तिः ।**
**स्वयं विधाता तपसः फलानां केनापि कामेन तपश्चचार ॥**

कुमार० १.५७ इति।

यो हि स्वयमेव तपसः फलानां विधाता, सोऽपि केनापि कामेन तपश्चरतीति कथिते 'को न्वस्य काम' इति बलादेवोन्मिषतितमामन्तःकरणे कुतूहलिता सचेतसाम्। कालिदासः कुतूहलमिदं न न शमयति। किन्त्वसौ तदर्थं व्याजमाश्रयति, अर्थापत्त्या च प्रवर्त्तते। भगवत्तपोभूमिकामारचयन्नसौ तत्कामनाविषयीभूतमर्थमुपक्षिपति कथयति च—

**यदैव पूर्वे जनने शरीरं सा दक्षरोषात् सुदती ससर्ज ।**
**तदाप्रभृत्येव विमुक्तसङ्गः पतिः पशूनामपरिग्रहोऽभूत् ॥**

कुमार० १.५३ इति।

भगवत्यप्येकोऽभावोऽवर्त्तत। स च परिग्रहरूपस्य कलत्रस्य। यस्याभावो भवति तदर्थमेव कामनोदेति। ततश्च स्पष्टमेव यत् को नाम स कामो यदर्थं कामारिरपि तपश्चरति। महाकविश्च यं 'केना'—पीति किंपदेन संवृणोति। उद्भटः पुनर्गोपनीयतामिमां भनक्ति। स ह्यपरिग्रहस्य भगवतः कामनामिमां महता प्रपञ्चेन—

**तां शशिच्छायवदनां नीलोत्पलदलेक्षणाम् ।**
**सरोजकर्णिकागौरीं गौरीं प्रति मनो दधौ ॥**

(उदा० सं० २५) इत्यत आरभ्य,

**हरोऽथ ध्यानमातस्थौ संस्थाप्यात्मानमात्मना ।**
**विसंवदेद्धि प्रत्यक्षं निर्ध्यातं ध्यानतो न तु ॥**

(उदा० सं०) ३६ इति यावदुपग्रथ्नाति।

४. कालिदासः पञ्चमे सर्गे भगवन्तं पार्वतीतपोवनं प्रवेशयति किन्तु वटुवेषेणापरिचिततया। अस्ति तस्य श्लोकः—

**अथाजिनाषाढधरः प्रगल्भवाग् ज्वलन्निव ब्रह्ममयेन तेजसा ।**
**विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा ॥**

कुमार० ५.३० इति।

अत्रापि 'किं'—पदेनैव भाविनमर्थं कालिदासो गोपायति। इतः परम्—

**इतो गमिष्याम्यथवेति वादिनी चचाल बाला स्तनभिन्नवल्कला ।**
**स्वरूपमास्थाय च तां कृतस्मितः समाललम्बे वृषराजकेतनः ॥**

कुमार० ५.८४

इति पद्यं यावत् ५४—पद्यव्यापि कथानकं स तथैव संवृतिलीलयैव संग्रथ्नन् तिष्ठति। यदा च तदन्ते भगवन्तमसौ सहसा प्रकटयति तदा प्रबन्ध—शरीरबन्धे जीवातवः सुप्तोत्थितत्वेनेवाहिता दृश्यन्ते। उद्भटः पुनः प्रबन्धस्य वक्रतामिमां कदाचित् परिचिनोत्येव नहि। स हि प्रथमत एव भगवन्तं पार्वतीतपोवनं प्रविशन्तं प्रतिपादयति, कथयति च—

**स गौरीशिखरं गत्वा ददर्शोमां तपःकृशाम् ।**
**राहुपीतप्रभस्येन्दोर्जयन्तीं दूरतस्तनुम् ॥**

उदा० सं० ३८ इति।

भगवान् शङ्करो वटुवेषमेव कथमङ्गीचकारेति प्रश्नेऽप्युद्भट उत्तरति—

**प्रच्छन्ना शस्यते वृत्तिः स्त्रीणां भावपरीक्षणे ।**
**प्रतस्थे धूर्जटिरतस्तनुं स्वीकृत्य वाटवीम् ॥**

उदा० सं० ३५ इति।

एतदेव चार्थान्तरन्यासेनापि द्रढयन्नसौ लिखति–

**तन्नास्ति यन्न कुरुते लोको ह्यत्यन्तकार्यिकः ।**
**एष शर्वोऽपि भगवान् बटूभूय स्म वर्त्तते ।।**

उदा० सं० ३४ इति।

एतेन हि रहस्योद्घाटनेन प्रबन्धस्य प्राणभूतमौत्सुक्यतत्त्वमपहतं भवति।

५. कालिदासो वसन्तविभूतिं संयमारातितया प्रस्तुवन् कुमारसंभवस्य तृतीयं सर्गं भगवतः शङ्करस्य समाधिभङ्गाय निर्माति। उद्भटोपि तस्य भगवतः समाधिभङ्गायैव प्रक्रमते, किन्तु स वसन्तं विहाय शरदमुपादत्ते। द्वादशभिः पद्यरत्नैश्च तां चित्रयति। छेकादीननुप्रासान्, रूपकं चासौ तत्र विच्छित्तिजनकतया योजयति। तत्र यद्यपि,

**ज्योत्स्नाम्बुनेन्दु-कुम्भेन तारा-कुसुम-शारितम् ।**
**क्रमशो रात्रिकन्याभिर्व्योमोद्यानमसिच्यत ।।**

**उत्पतद्भिः पतद्भिश्च पिच्छाली-वाल-शालिभिः ।**
**राजहंसैरवीज्यन्त शरदैव सरोनृपाः ।।**

**वनान्तदेवतावेण्यः पान्थस्त्री-कालशृङ्खलाः ।**
**मार-प्रवीरासिलता भृङ्गमालाश्चकासिरे ।।**

उदा० सं० ११–१४

इत्येवं कवित्वमवश्यमेव श्लाघास्पदमस्ति तथापि भाद्रपदे जायमानाया हरतालिकातृतीयायाः शरत्पूर्वभावित्वात् तस्या एव च शिवोपगमतिथित्वेन प्रसिद्धत्वात् समयानौचित्यमत्र दुष्परिहरं जायते। कालिदासोपि यद्यपि वसन्तप्रवृत्तिमाकालिकीमेव,

**तपस्विनः स्थाणुवनौकसस्तामाकालिकीं वीक्ष्य मधुप्रवृत्तिम् ।**
**प्रयत्नसंस्तम्भिविक्रियाणां कथंचिदीशा मनसां बभूवुः ।।**

कुमार० ३.३४

इत्येवं प्रतिपादयति, तथापि शिवपार्वतीपरस्परपरिग्रहवृत्तान्तस्य तदव्यवहितोत्तरत्वेनाप्रतिपादनादनौचित्यमिदं तत्र न प्रसज्यते। उद्भटवर्णन एतदपि नितान्तमेव कविसमयविरुद्धं यदसौ शरत्कालीनमपि बलाहकं धारासारिणं चित्रयति—

**आसारधाराविशिखैर्नभोभागप्रभासिभिः ।**
**प्रसाध्यते स्म धवलैराशाराज्यं बलाहकैः ।।**

उदा० सं० १५ इति।

बलाहकानां धवलत्वेन वार्षिकत्वं परिह्रियते, ततश्च संदर्भस्यास्य मुक्तप्रायतापि। तद्यपि शरद्यपि मेघा धवलतामादधाना अपि वर्षन्त्येव यदा कदा, तथापि तदानीं तद्वर्षासु भारतीया कविप्रतिभा सौभगं न पश्यति, कमलप्रभृतीनां हंसादीनां ज्योत्स्नाप्रमुखाणामेव हि तत्पात्रतया तदानीमत्रोपादीयमानत्वात्। उपादीयन्ते चापि उद्भटेनापि। यथा चैतत् तदधोदत्तैः पद्यैरवसातुं शक्यम्—

**तत्र तोयाशयाशेषव्याकोशितकुशेशया ।**
**चकाशे शालिकिंशारुकपिशाशामुखा शरत् ।।**

**सान्द्रारविन्दवृन्दोत्थ—मकरन्दाम्बुबिन्दुभिः ।**
**स्यन्दिभिः सुन्दरस्यन्दं नन्दितेन्दिन्दिरा क्वचित् ।।**

उदा० सं० ३—४

**पद्मिनीं पद्मिनीगाढस्पृहयागत्य मानसात् ।**
**अन्तर्दन्तुरयामासुर्हंसा हंसकुलालयात् ।।**

उदा० सं० १०

ज्योत्स्नावर्णनं पूर्वोद्धृतेन 'ज्योत्स्नाम्बुने'—त्यादिना पद्येन प्राप्तप्रायमेव। पद्यान्तरेणाप्यधोदत्तेन तत्र कविसंरम्भो द्रष्टुं शक्यते—

**क्षणं कामज्वरोत्थित्त्यै भूयः संतापवृद्धये ।**
**वियोगिनामभूच्चान्द्री चन्द्रिका चन्दनं यथा ।।**

उदा० सं० १८

तदित्थं शारदेपि मेघे धारासारवर्णनं यथार्थमपि कविसमयप्रतीपमिति नाधिकं रम्यम्। ततश्च प्रबन्धे यादृशमवधानं कालिदासे दृश्यते तं दूरमनुहरत्यप्युद्भटे तत् तादृशं न दृश्यते।

सर्वथा महान्ताविमौ कविकर्मनिष्णातौ कवी। लेखेनानेनैतदेव केवलं प्रस्तूयते यत् कुमारसंभवस्य कथावस्तु कुमारसंभवनाम्नैव, कुमारसंभव–विच्छित्त्यैव काव्यालङ्कारसारसंग्रहकर्त्रा श्रीमता उद्भटाचार्येणापि महता संरम्भेण स्वकविकर्मपात्रीकृतम्, आदृतश्च ततः श्रीमान् महाकवीन्द्रः कालिदासः।।

# रघुवंशसञ्जीविन्यां पाठभेदाः

दुर्व्याख्याविषमूर्च्छितायाः कालिदासभारत्याः संजीवयित्री संजीविन्यपि मूलपाठनिर्धारण—संजीविनीमपेक्षते इति कतिपयैर्निदर्शनैरुपपाद्यते। रघुवंश—संजीविन्यास्त्रीणि पुस्तकान्यस्माभिरनुशीलितानि। इमानि च तानि—

१. निर्णयसागरतः १९४८ ख्रीष्टाब्दे प्रकाशितम्।

२. मुंबईतः प्रो० नन्दर्गीकरमहोदयसंस्कृतेन रघुवंशेन सह १८९७ ख्रीष्टाब्दे तृतीयं वारं प्रकाशितं, १९७१ ख्रीष्टाब्दे मोतीलाल बनारसीदासेन भूयश्च प्रतिमुद्रितम्।

३. गजाननशम्भुसाधलेमहोदयेन १९२८ ख्रीष्टाब्दे मुम्बईस्थगुजराती—प्रिण्टिङ्गप्रेसतो रघुवंशेन सह प्रकाशितम्।

एषु प्रथमयोर्द्वयोराधारा भिन्नाः। नन्दर्गीकरस्यान्यतम आधारः संजीविन्याः काचन स्वकीयेऽपि संग्रहे रक्षिता मातृका। निर्णयसागर—संस्करणस्याधाराः पुनरन्येऽपि केचन हस्तलेखाः। गुजरातीप्रेसतः प्रकाशिता संजीविनी प्रायेण निर्णयसागरसञ्जीविन्या एव प्रतिच्छाया। एवं हि पुस्तकत्रयेऽस्मिन् संजीविन्याः पाठद्वयमुपलभ्यते। तत्रैको नन्दर्गीकरसंस्करणीयः पाठः, अपरश्च निर्णयसागरसंस्करणीयः। रघुवंशस्याष्टमे सर्गेऽनयोर्भेदः एवं विधः— (अत्र श्लोकानां मूलपाठोऽस्माकं कालिदासग्रन्थावलीत उद्धृतः)

**अथ वीक्ष्य रघुः प्रतिष्ठितं प्रकृतिष्वात्मजमात्मवत्तया ।**
**विषयेषु विनाशधर्मसु त्रिदिवस्थेष्वपि निस्स्पृहोऽभवत् ।।** ८.१०

इति पद्ये नन्दर्गीकरसंस्करणे 'आत्मविदि'ति पाठः। निर्णयसागरीये संस्करणे पुनरत्र 'आत्मवत्तया' इति पाठः। अत्र श्लोके या सञ्जीविनी तस्या

निर्णयसागरीये संस्करणे नन्दर्गीकरसंस्करणात् प्रायेण प्रतिपङ्क्ति भिन्नतैव। तथा हि प्रारम्भिकं पङ्क्तिद्वयं—

| **निर्णयसागरीये संस्करणे** | **नन्दर्गीकरीये संस्करणे** |
| --- | --- |
| अथेति। अथ रघुरात्मजं पुत्रमात्मवत्तया निर्विकारमनस्कतये त्यर्थः, उदयादिष्वविकृतिर्मनसः सत्त्वमुच्यते, आत्मवान् सत्त्ववानुक्त इत्युत्पलमालायाम्। प्रकृतिष्व—मात्यादिषु० | अथेति। रघुरात्मजं पुत्रं प्रकृतिषु प्रजासु प्रतिष्ठितं रूढमूलं ज्ञात्वा.... आत्मवित्तयाऽऽत्मज्ञत्वेन निस्पृहोऽभवत्।। १०।। |

स्पष्टमेवात्र पाठद्वयमपि भिन्नार्थमेवेति।

**२. अथ रोधसि दक्षिणोदधेः श्रितगोकर्णनिकेतमीश्वरम् ।**
**उपवीणयितुं ययौ रवेरुदगावृत्तिपथेन नारदः ।।** ८.३३

अत्र नन्दर्गीकरसंस्करणे 'उदगावृत्तिपथेने'—त्येव संजीविनी, निर्णयसागरीये संस्करणे पुनः 'उदयावृत्तिपथेने'ति। अयमत्र विशेषो यन्नन्दर्गीकरः सूचयति 'उदयावृत्ती'ति—पाठं मल्लिनाथोऽपि वेत्ति टीकते चैवं 'उदयावृत्तिपथेने'—ति पाठे सूर्यस्य संबन्धिनोदयावृत्तिपथेना—काशमार्गेणे'—ति। न चासौ पङ्क्तिस्तस्यैव मूलपाठे मुद्रिता। निर्णयसागरीये च 'उदगावृत्तिपथेने'—ति पाठान्तरत्वेनापि न स्मर्यते। 'उदयावृत्तिपथेने'—ति हि तत्र मूलपाठः। अस्य च व्याख्याऽपि सूर्यस्य सम्बन्धिना उदयावृत्तिपथेनाकाशमार्गेण' इत्येव। अस्मिन्नपि पद्ये द्वावपि पाठौ भिन्नभूयिष्ठ—शब्दार्थकावेव। तथा हि—

| **नि० सा०** | **नन्दर्गीक० संस्करणे** |
| --- | --- |
| १. रोधसि तीरे | रोधसि तटे |
| २. ईश्वरं शिवम् | ईश्वरं महादेवम् |

| | |
|---|---|
| ३. नारदो देवर्षी | नारदो मुनी |
| ४. सूर्यस्य सम्बन्धिना—पथेना—काशमार्गेण ययौ जगाम। सूर्यो—पमानेनातितेजस्त्वमुच्यते।। ३३।। | सूर्यस्य उदीच उत्तरस्या दिश आकाशे आवृत्तिर्निवर्तनम्, तस्याः पन्था गतिप्रकारस्तेन। यथा रवि—रुत्तरस्या दिशो व्यावृत्य दक्षिणा—यनमागच्छति तद्वदित्यर्थः, ययौ जगाम। सूर्योपमानादतितेजस्त्व—मुच्यते।। ३३।। |

**३. कुसुमोत्खचितान् वलीमतश्चलयन् भृङ्गरुचस्तवालकान् ।**
**करभोरु! करोति मारुतस्त्वदुपावर्त्तनशङ्कि मे मनः ।।** ८.५३

अत्र नन्दर्गीकरसंस्करणे 'उत्कचितान्' इति 'वलीमत' इति च पाठः। निर्णयसागरसंस्करणे पुनः 'उत्खचितान्' इति 'वलिभृत' इति च। नन्दर्गीकरः सूचयति—मल्लिनाथ 'उत्खचितानिति, वलीभृत' इति च यौ पाठौ तावपि जानाति, व्याख्याति चैवम्—'उत्खचितानुत्कर्षेण रचितान् वलीभृतो भङ्गीयुक्तान्, कुटिलानित्यर्थः' इति। निर्णयसागरसंस्करण इयमेव व्याख्या, नास्ति चासौ नन्दर्गीकरसंस्कृते मूलपाठे। नास्ति चैवमेव नन्दर्गीकरपाठस्य चर्चा निर्णयसागरसंस्करणे। अस्ति टीकाक्रमोऽपि भिन्नः। तथा हि—

| **नि० सा० संस्करणे** | **नन्दर्गीकर संस्करणे** |
|---|---|
| कुसुमेति। कुसुमैरुत्खचितानु० | कुसुमेति। हे करभोरु करभसदृशोरु 'मणिबन्धादाकनिष्ठं करस्य करभो बहिः' इत्यमरः मारुतः कुसुमोत्क—चितान् पुष्पानुबिद्धान् वलीमतस्त—रङ्गितान् कुटिलानित्यर्थः, |

**४. कलमन्यभृतासु भाषितं कलहंसीषु गतं मदालसम् ।**
**पृषतीषु विलोलमीक्षितं पवनाधूतलतासु विभ्रमः ॥** ८.५९
(निहिता:)

अत्र नन्दर्गीकरसंपादितायां सञ्जीविन्यां विभ्रम इत्येकवचनान्त एव पाठः, निर्णयसागरीये संस्करणे पुन'र्विभ्रमा' इति बहुवचनान्तः सः। नन्दर्गीकरः सूचयति बहुवचनान्तोऽपि पाठो मल्लिनाथस्य विदित इति। उद्धरति तस्य संजीविनीमसावेवं 'विभ्रमा इति पाठे विभ्रमा विलासाः'। नास्ति चासौ पङ्क्तिर्नन्दर्गीकरसंस्करणीयायाः सञ्जीविन्या मूले, अस्ति चेयमीदृग्रूपैव निर्णयसागरीये संस्करणे 'पवनेन वायुना आधूतलतास्वी–षत्कम्पितलतासु विभ्रमा विलासा' इति। नास्त्यत्र एकवचनान्तस्य पाठस्य गन्धोऽपि। अस्ति द्वयोरनयोः संस्करणयोरस्य पद्यस्य सञ्जीविन्यां निम्नलिखितोऽपि भेदः–

| **नि० सा० संस्करणे** | **नन्दर्गी० संस्करणे** |
|---|---|
| १. अन्यभृतासु परभृतासु कोकिलासु | अन्यभृतासु कोकिलासु |
| २. भाषितं भाषणम् | भाषितं वचनम् |
| ३. मदालसं मन्थरं गतं गमनम् | मदेनालसं मन्दं गतं गमनम् |
| ४. विलोलमीक्षितं चञ्चला दृष्टिः | विलोलं चपलमीक्षितं दर्शनम्। |
| ५. पवनेन वायुनाधूतलतास्वीष–त्कम्पितलतासु विभ्रमा विलासः। | पवनेनाधूतलतासु विभ्रमो विलासः |
| ६. इत्यमी पूर्वोक्ताः कलभाषणादयो गुणा एषु कोकिलादिस्थानेष्विति शेषः, त्रिदिवोत्सुकयापि इह जीवत्येव स्वर्गं प्रति प्रस्थित–याऽपि०। | इत्यमी गुणास्त्वया त्रिदिवे स्वर्गं |

| | |
|---|---|
| ७. प्रस्थितयाऽपि त्वया मामवेक्ष्य विरहासहं विचार्य | उत्सुकयापि मामवेक्ष्योद्दिश्य |
| ८. सत्यं निहिताः मत्प्राणधारणो–पायतया स्थापिता इत्यर्थः। | निहिताः स्थापिताः सत्यं ध्रुवम्। |
| ९. (तव विरहे गुरुव्यथमतिदुःखं मे हृदयं मनो) ऽवलम्बितुं स्थापयितुं न क्षमाः न शक्ताः, ते तु तत्सङ्गम एव सुखकारिणः, नान्यथा, प्रत्युत प्राणानपहरन्तीति भावः।। | (तव विरहे गुरुव्यथमधिकदुःखं मे हृदयं मनो) ऽवलम्बितुं तु न क्षमा न समर्थाः।। |

५. **'समदुःखसुखः सखीजनः०'** (८.६५) इत्यादेः पद्यस्य सञ्जीविनी नन्दर्गीकरसंस्करणे ३.५ पङ्क्तिभिरेव पूर्यते निर्णयसागरीये संस्करणे पुनः समानमानाभिः सप्तभिः पङ्क्तिभिः। तत्र निर्णयसागरीया इमेंऽशा नन्दर्गीसंस्करणे न दृश्यन्ते–

१. त्वद्दुःखेन दुःखी त्वत्सुखेन सुखीत्यर्थः।

२. प्रतिपत्–शब्देन वक्ष्यते प्रतिपदि चन्द्रस्यादर्शनात्।

३. शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रस' इत्यमरः।

४. जीवितं सामग्रीसत्त्वेऽपीत्यर्थः।

५. तव

६. अस्मत्परित्यागरूपो व्यापारः।

७. 'प्रतिपत्तिः पदप्राप्तौ प्रकृतौ गौरवेऽपि च, प्रागल्भ्ये च प्रबोधे चे'–ति विश्वः। स्मर्तुं न शक्यः किमुताधिकर्त्तुमित्यर्थः।।

निम्नलिखिता नन्दर्गीकरसंस्करणीया अंशा निर्णयसागर–पाठे न लभ्यन्ते–

१. प्रतिपदि शुक्लपक्षे।

२. समानप्रेमेत्यर्थः।

३. आकस्मिकगमनव्यञ्जितेन।

इदमत्र निध्येयं यन्निर्णयसागरपाठे प्रतिपत्तिशब्दस्य यो 'निश्चय' इत्यर्थः सोऽयमेतस्य प्रमाणे कोषवाक्ये नास्ति, न लभ्यते चासावनेकार्थसंग्रहे मेदिन्यां हलायुधे च।

**६. रघुवंशस्यास्य अष्टमसर्गीयाणां** ७०, ७१, ७३, ८०, ८४ इत्येतेषामपि पद्यानां सञ्जीविन्याःसंस्करणद्वयेऽप्युपर्युक्ते पूर्वोक्तैव स्थितिः। एष्वपि प्रमुखा ये भेदास्तेषामियं तालिका–

| निर्णयसा० संस्करणे | नन्दर्गीकर संस्करणे |
|---|---|
| ८.७० दुर्दिनान् | दूषितान् |
| ८.७१ तदन्त्यमण्डनां | कृतान्त्यमण्डनां |
| ८.७३ अपदिश्य | उपदिश्य |
| ८.८० भुवि | मुनिः |
| ८.८४ श्रुतमाविष्कृतमात्मवत्त्वया मनसस्तदुपस्थिते | श्रुतमाविष्कृतमात्मवत्तया मनसः समुपस्थिते |

प्रतिपङ्क्ति परिशीलने पुनरेष्वपि महदेवान्तरमुपलभ्येत।

एते ये भेदा इमे खलु मूलश्लोकपाठभेदप्रसङ्गापतित एव संजीविनीपरिशीलने गोचरीकृताः। यदि नाम प्रतिपद्यं प्रतिकाव्यं च संजीविनीहस्तलेखाः समीक्ष्येरन्, मन्ये, महाभारत–भूता भवेदेतत्पाठ–भेदोल्लेखपुस्तकतनुः।

उपर्युक्तेषु स्थलेषु स्पष्टमनुभूयते यत् पाठकैः सञ्जीविनी स्वैरं परिवर्त्तिता परिवर्धिता च। अत्र प्रमाणं ८.६५ पद्ये प्रस्तुतं कोषवचनम्। परिवर्त्तनं परिवर्धनं च मन्ये टीकान्तर–जातमाश्रित्य कृतम्। लभ्यते हि

टीकान्तरेषु टीकान्तराणामभेदेन लेखः। अत्र प्रमाणं हेमाद्रे रघुवंशदर्पणः। तस्य पञ्चमे सर्गे बड़ौदास्थिते हस्तलेखे प्रथमतमे सपादे पङ्क्तित्रये सञ्जीविनी तदुत्तरं च चतुर्थ्याः पङ्क्तेस्त्रिपाद्यां दर्पणो लभ्यते। एवमेव कलिकाता–एशियाटिकसोसायटीपुस्तकेषु 'एकस्मिन्नेव पत्रे एकस्य श्लोकस्य टीका संजीविनी, तदनन्तरीयस्य चैकस्य दर्पण इति क्रमेण निर्मिताऽप्येकं पुस्तकमस्माभिरासादितम्।

सोऽयं महानेवोपप्लवो मूलप्रतिलेखे सञ्जीविन्याः। स्वयं नन्दर्गीकरेण सञ्जीविन्या नव हस्तलेखा अवाप्ताः। तेषु सञ्जीविन्याः पाठे भेदोऽपि तेनानुशीलितः। स एव भेदो हेमाद्रे रघुवंशदर्पणस्यापि हस्तलेखेषु मयकाप्यनुभूतः। पूनाभण्डारकरप्राच्यविद्याप्रतिष्ठाने १६१ क्रमाङ्कीयो यो हस्तलेखः स खलु तत्रत्यादेव ४७ क्रमाङ्कीयात् तस्मान्नितरां भिन्नः। कतर एनयोरादरणीयो मूलत्वेनेति सङ्कटे कलिकाताएशियाटिकसोसायटीगतान्, मदरासाऽऽड्यारग्रन्थागारगतांश्च हस्तलेखाननुशीलितवता निरचायि पूना–१६१–हस्तलेख एवाप्रामाणिक इति। स एव चैष नन्दर्गीकरमहाशयेन स्वकीये रघुवंशसंस्करणे भूम्नाऽऽदृतः। ततश्च तदाश्रिता सर्वा अपि सूचना हेमाद्रिनाम्ना दत्ता अपि न हेमाद्रिकृतस्य दर्पणस्य वस्तुभूतेन मूलेन सम्बद्धाः। एवं च प्रतारितानि भूयांसि युगानि स्वैरं परिवर्त्तयद्भिर्लेखकैर्निर्मीयमाणैर्हस्तलेखैर्मूलविषये पुराविदाम्। सैषा सञ्जीविनीमपि स्पृशतितमां यथातथमेव क्लेशकरी कथा। दर्पणस्य मूलपाठः सप्त वर्षाणि व्यापृतेन जनेनानेन ५–१९ सर्गेषु कथंचिद् व्यवस्थापितः, सञ्जीविनी पुनरिदानीमपि तमिमं तितउव्यापारमपेक्षते।।

लेख एष वर्षेभ्यः पूर्वं सागरिकायाः २१.४ अङ्के प्रकाशितः। ततः प्रभृति व्यतीतेष्वपि २१ वर्षेषु टीकायामस्यामीदृश्येव स्थितिः।।

◈

# महाकवेरश्वघोषस्य काव्यकला

काव्यमिति भारतीयानामस्माकं प्राचीनतमो मन्त्रः। 'पश्य देवस्य काव्यमि'—ति भगवती श्रुतिरपि तमेनमुद्गिरति। तदिदं देवकाव्यं भगवन्तो वेदा एवाऽपौरुषेयाः। नैते जीर्यन्ते, नापि च म्रियन्ते। भारतीयत्वं बिभ्राणा समापि प्रतिभा तदिदं रहस्यं विदामेव चकार[१] । अतश्च सर्वापि भारतीया कविता सगन्धा स्वसार एव। ततश्च नानुभूयते कुत्रापि वैमातृकत्वदुरभि–सन्धिः सुमानुषैः। या हि प्रतिभा महाकविपदस्याकुतोमुखीनतां परिहृतवति महति भागवते 'कालिदास इति कालदास' इति च विदिते कविरत्ने प्रविभासमाना राजते तामेव तु तथैव नृत्यन्तीमुपलभामहे वैनाशिकप्रवरे कविप्रमुखेऽश्वघोषेऽपि। अश्वघोषः साकेताभिजनो द्विजः। स हि 'श्व' इति प्रत्ययमवधुनुत इति 'अ–श्व'घोषः। सेयं शाङ्करी वाक्। प्रतिभासरूप–विज्ञानमात्रपरमेयम्। यदितरां नास्ति श्वः, तर्हि 'ह्य' इति व्याहारोऽपि निर्मूलः। वर्त्तमानस्यैवैतौ द्वौ पार्श्वौ श्वश्च ह्यश्चेति। यश्च वर्त्तमानः स सदेकरूपः, ज्ञायमानतया ज्ञातृतया च तस्य चिन्मयत्वमपि। अयमस्याश्चितो महान्, अनितरसाधारणश्च विशेषो यदत्राऽनन्दमयताऽपि प्रत्यक्षा। सोऽयं सच्चिदानन्दात्मा परमः प्रकाशोऽधिष्ठानायते त्रैलोक्यत्रैकाल्यविवर्त्तस्यास्य परितः प्रवर्त्तमानस्य। अद्य वसन्तः, श्वो निदाघः, परश्वश्च वर्षशरद्–धेमन्तशिशिरा इति यत् परिवर्त्तनचक्रम् अत्र कृतपदेन क्षणिकत्वेनोद्विजमाना निगृहीतकरणास्तूष्णीं विभावयन्ति निखिलम्, प्रतिक्षणं बिभ्राणोऽभिनवत्वं रोचतेऽधिकमयं चक्रभ्रम इति चाश्रमधर्ममनुपालयन्तस्तदितरे मोक्षपरायणान् धर्मार्थसहितान् कामानपि यथाविधि कर्त्तव्यधर्मतया सेवन्ते। ते इमे द्वे

---

१. व्यवहित एष प्रयोगः संप्रदायागतः।

वर्त्मनी। कालिदासः किलाऽभ्युदयं सोपानयति स्माऽपवर्गरूपां चरमां परमाञ्च भूमिकामुपसत्तुम्। स एष सुकवी रघुवंशस्याष्टमे सर्गेऽभ्युदयं पुत्रेऽपवर्गं च प्रव्रजिते पितरि सहैव प्रसिध्यन्तमुपदर्शयति—**'प्रसितावुदयाऽपवर्गयोरुभयीं सिद्धिमुभाववापतु'**—रिति (रघुवंशम् ८.२३)

महाकवेरश्वघोषस्याऽयं विशेषो यदसौ सोपानमिदं गर्हयति ताभिस्ताभिरुपपत्तिभिः, प्रवरयति च चरमं स्थानं तथैव। भगवान् बुद्धोऽस्य प्रामाणिको दृष्टान्तः। सहि 'तथा' इति तत्पदेन गर्भीकृतैर्नैकैः सम्माना—वमानजननैरर्थैः 'गत' इति निर्गत इति प्रतिपाद्यते। शिवनेत्राग्नि—भस्मीकृतवल्लभा कालिदासस्य रतिरपि तथागतत्वं स्मरन्तीव विलपति—**'गत एव न वै निवर्त्तते स सखा दीप इवानिलाहत'**[1] इति। सुगतोऽपि भगवान् न ह्येव न्यवर्त्तत। दीप एवासावनिलेनाऽऽहतः। अश्वघोषो घोषमिमं मेदुरयति पद्यरत्नेनानेन निर्वाणव्याख्यानभूतेन परलोकाभावप्रशंसनेन च—

**दीपो यथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरीक्षम् ।**
**दिशं न काञ्चिद् विदिशं न काञ्चित् स्नेहक्षयात् केवलमेति शान्तिम् ।।**

सौन्दरनन्दे १६.२८

कालिदासोऽपि गीतां वेत्ति—**'जातस्य हि ध्रुवो मृत्युरि'**—ति या गीतोपनिषदिमामेव कालिदासोऽपि प्रत्युद्धरति—**'एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु** (रघुवंशम् २.४८) इति। स्पष्टोऽत्र भूतपिण्डरूपस्य शीर्यमाणतया च शरीरपदवाच्यस्य देहस्य नश्वरत्वम्। तथापि नासावत्रैव प्रतिष्ठितं शान्तमजरममरं चात्मतत्त्वमपि प्रतिभायां नाऽधिष्ठापयति, ततो न विचलति। मृत्युरिति 'अनावृतकपाटं मुक्तिवर्त्मे'—ति कालिदासो विश्वसिति—

---

१. तदिदं निर्वाणमेव। कुमारसंभवे ४.३०।

**अवगच्छति मूढचेतनः प्रियनाशं हृदि शल्यमर्पितम् ।**
**स्थिरधीस्तु तदेव मन्यते कुशलद्वारतया समुद्धृतम् ।।**

रघुवंशम् ८.८८

'प्रियनाशः कुशलद्वारमिति हि निश्च्योतो वचनस्याऽस्य। कृष्णो व्रजवधूभिर्बहुशो विहितरासलीलो यदा वृन्दावनं पर्यत्यजत् ततः परं न ह्येवाऽस्मरत् ताः। कोऽर्थः! अयमेव यदनभिष्वङ्गः। इयमेव च तस्यैव भगवतः स्थिरता बुद्धिगता। अश्वघोषस्य नन्दः सुन्दरीं प्रति नितरामासक्तः। तमग्रजः सुगतो मुण्डितमुण्डं वनं निनाय। तत्र सुन्दरीगतं स्नेहपाशं नासौ विजहाति, प्रव्रज्यां प्रविहाय प्रतिसिसत्सति च सुन्दरीमेव। सोऽयं व्यामोहः। गीताचार्यो व्यामोहमिमं 'मिथ्याचार' इति कथयति–

**कर्मे/बाह्येन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।**
**इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ।।**

इति अश्वघोषो मिथ्याचारमिमं सौन्दरनन्दस्य सप्तमे सर्गे सम्यगुपनिबध्नाति–

**पाणौ कपालमवधाय विधाय मौण्ड्यं**
**मानं निधाय विकृतं परिधाय वासः ।**
**यस्योद्भवो न धृतिरस्ति न शान्तिरस्ति**
**चित्रप्रदीप इव सोऽस्ति च नास्ति चैव ।।** ७.४८

चित्रलिखितः प्रदीपो रेखावर्णाभ्यां चित्रशरीरस्य प्रतिभासान्नास्तीति निषेद्धुं न शक्यः, न च शक्योऽस्तीति स्वीकर्त्तुं तमोनिवृत्तिरूपार्थक्रियाया अभावात्, तथैव कपालधारित्वेऽपि, मुण्डितमुण्डितत्वेऽपि कषायवस्त्रपरिवृतत्वेऽपि च चित्ते प्रहर्षस्य धृतेः शान्तेश्चाभावे न शक्यते कश्चनापि भिक्षुर्भिक्षुरिति वक्तुमिति तस्य मिथ्याभूत एवाध्यवसाय इति समर्था वाक्। अमुमेवार्थ–मग्रतनाभ्यामाभ्यामपि पद्याभ्यां प्रपञ्चयति कविरेष एवम्–

**यो निस्सृतश्च न च निस्सृतकामरागः**
**काषायमुद्वहति यो न च निष्कषायः ।**
**पात्रं बिभर्त्ति च गुणैर्न च पात्रभूतो**
**लिङ्गं वहन्नपि स नैव गृही न भिक्षुः ।।** ७.४९

भिक्षुर्गृहान्निस्सरति किन्तु सोऽस्याध्यवसायो यस्याः प्रतिबिम्बनं तां बिम्बतां वहति चित्तगृहाद् रागकामयोर्निस्सरणम्, एवमेव काषायं वासश्चित्तगताया निष्कषायतायाः, पात्रं च गुणजनितायाः पात्रतायाः। असति च बिम्बे यथा प्रतिबिम्बजातं विगतसत्त्वमेव तथैव रक्तस्य भिक्षुत्वाध्यवसायः।

पद्यार्थ एष तथा हृदयस्पृक् यथा शर्मण्यदेशभाषाविदं भारतेतिहास–कारमाचकर्ष विण्टरनित्जम्। पद्यमिदं महताऽऽदरेणोद्धरत्येष स्वकीय इतिहासग्रन्थे विश्वप्रसिद्धे। शाकुन्तले कालिदासोऽपि चित्तगतं द्वैधीभावमिममेवं निरूपयति–

**गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः ।**
**चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ।।**

(शाकुन्तलम् १.३१)

भगवती पार्वती रोषादन्यत्र गन्तुं पादमुत्थापयति पश्यति च पृष्ठतः केनापि विधृतविग्रहेति। उद्धृतमेकं पदं तथैव धारयन्ती जिगमिषुरेव संतिष्ठते बद्धभावाऽपि दार्ढ्येन भगवति परिहासपेशले भवे। तस्या गमागम–बन्धुरामिमां चित्तशरीरयोरभिव्यक्तां दशां कालिदासस्य शारदाम्बा निपुणमुपप्रस्तौति–

**तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिर्निक्षेपणाय पदमुद्धृतमुद्वहन्ती।**
**मार्गाचलव्यतिकराऽऽकुलितेव सिन्धुः शैलाधिराजतनया न ययौ न तस्थौ।।**

इति (कुमारसंभवम् ५.८५)

'कोऽयं सत्त्वो मयि गमनप्रवृत्तौ विघ्नायत इति साचीकृतमुखपद्मा भगवती

यदा पश्यति भगवन्तं भावविह्वलं शिवम् **'अद्यप्रभृत्यनवता/माङ्गि! तवास्मि दासः'** इति 'कालिदास'—त्वं संक्रान्तं, जानाति च स एवात्रावरोधक्रियायां विधृतकर्त्तृत्वचापलः, कां नु निर्वृतिं नाप्नोति।' निर्वृतिमपीमां कालिदासः स्पृशति प्रातिभेन चक्षुषा—**'अह्नाय सा नियमजं क्लममुत्ससर्ज क्लेशः फलेन हि पुनर्नवतां विधत्त'** इति (कुमारसंभवम् ५.८६)। तामिमां हृद्गतां द्वैधीभावकातरतामश्वघोषोऽपि चतुर्थे सौन्दरनन्दसर्गे ताभिस्ताभिरुपमानै—रुपनिबध्नाति—

**तं गौरवं बुद्धगतं चकर्ष भार्यानुरागः पुनराचकर्ष ।**
**सोऽनिश्चयान्नापि ययौ न तस्थौ तरँस्तरङ्गेष्विव राजहंसः ।।**

४.४२

बुद्ध आगच्छतीति शब्देंन श्रोत्रकुटीचरेणाकृष्टहृदयो नन्दो विलासभवना—दधस्तादागच्छति शृणोति च प्रियाया नूपुरनिस्वनम्। तदिदमाकर्षणद्वयम्—गौरवास्पदं गुरुश्च प्रेमास्पदं सुन्दरी चेति। इयमत्र नन्दस्य वराकस्य स्थितिः—

**अदर्शनम्भूयगतश्च तस्या हर्म्यात् ततश्चाऽवततार तूर्णम् ।**
**श्रुत्वा ततो नूपुरनिस्स्वनं स पुनर्ल्लम्बे हृदये गृहीतः ।।**

४.४३

**स कामरागेण निगृह्यमाणो धर्म्मानुरागेण च कृष्यमाणः ।**
**जगाम दुःखेन विवर्त्त्यमानः प्लवः प्रतिस्रोत इवाऽऽपगायाः ।।**

४.४४

भगवति बुद्धे धृतादरः कामरागी विलम्ब्याहं प्राप्तः, निर्यातो गुरुः, वञ्चितोऽस्मि तस्य दर्शनलाभादिति सानुशयो नन्दोऽप्येवं चित्रितोऽश्वघोषेण—

**ततः क्रमैर्दीर्घतमैः प्रचक्रमे कथं नु यातो न गुरुर्भवेदिति ।**
**स्वजेय तां चैव विशेषकप्रियां कथं प्रियामार्द्रविशेषकामिति ।।**

४.४५

अत्र विशेषकप्रियामिति विशेषकैः प्रियामिति शक्यते पठितुम्। विशेषका अवयवाः हस्तवक्षःस्थलादयः। सोऽयमत्र स्थूलगात्रसंस्पर्शात्मा रतिभोगः। अत्रापि सुन्दर्या आर्त्तवस्नानस्यापि सद्योजातत्वं कालक्षयानार्हन्तीं सूचयन्नितान्तमेव निध्येय—'मार्द्रविशेषकामि'—ति। आर्द्राण्यार्त्तवक्लिन्नानि विशेषकाणि यस्या इति। योषितोऽपि दशायामस्यामधिकं कामयन्ते पुरुषाभियोगम्। तस्यास्योपशमोऽपि गेहिनां विकल्परेचितो धर्मः। अत एव कालिदासोऽपि दिलीपे त्वरामुपचित्रयति तादृशीमेव प्रियां तर्पयितुं रघुवंशस्य शापसर्गे—

**इमां देवीमृतुस्नातां स्मृत्वा सपदि सत्वरः ।**
**प्रदक्षिणा—क्रियातीतस्तस्याः कोपमजीजनः ।।**

रघुवंशम् १.७६

कालिदासः प्रिययोरन्योन्याऽङ्गसम्भोगं वर्णयित्वा प्रसादमास्वदते, अश्वघोषः पुनस्तमिमं व्यतिकरं जुगुप्सते। स्पष्टमिदं कुमारसम्भवस्याष्टमसर्गीयात् सम्भोगबन्धात् सौन्दरनन्दस्य च चतुर्थसर्गीयात् तस्मात्। कुमारसंभवे शिवयोरङ्गसङ्गोऽत्यन्तमुज्ज्वलः सहृदयश्लाघ्यश्च। सौन्दरनन्दे पुनर्नन्दसुन्दर्योः सङ्गमे हृदयस्यानभिष्वङ्गोऽपि कविना स्पृश्यते, स च स्मारयति तु तद् वेशवधूरतम्। तथा च नन्दः सुन्दरीं सुन्दरी च नन्दं भुङ्क्ते। भोगातुरौ च वैक्लवीमनुभवतः। चित्रमिदं २—१९ पद्यैश्चतुर्थ एव सौन्दरनन्दसर्गे सूक्ष्मसूक्ष्मम् उपढौकितं कविना। एष्वपि पद्यमिदं सविशेषं निध्येयम्—

**अन्योन्यसंरागविवर्द्धनेन तद् द्वन्द्वमन्योन्यमरीरमच्च ।**
**क्लमान्तरे तर्षबलेन तेन सलीलमन्योन्यममीमदच्च ।।** ४.११

कालिदासोऽपि विस्मृतौचितीकः कुमारसंभवे वनदेवताविशेषेण समुपहृतं पद्मरागमणिचषकेण कल्पवृक्षप्रसूतं मधु शिवः पार्वतीं पाययति—

**लोहितार्कमणिभाजनार्पितं कल्पवृक्षमधु बिभ्रती स्वयम् ।**
**त्वामियं स्थितिमतीमुपस्थिता गन्धमादनवनान्तदेवता ॥** ८.७५

**मान्यभक्तिरथवा सखीजनः सेव्यतामिदमनङ्गदीपनम् ।**
**इत्युदारमभिधाय शङ्करस्तामपाययत पानमम्बिकाम् ॥** ८.७७

अयमत्र विशेषो यच्छिवः स्वयं पानं न करोति। नन्दः पुनरत्र पौनःपुन्येन प्रवर्त्तते। संभोगक्रीडाशतनिमग्नो नन्दः सुन्दर्याश्चरणयोः प्रणतिं तनोति—

**ततश्चलन्नूपुरयन्त्रिताभ्यां नखप्रभोद्भासितराङ्गुलिभ्याम् ।**
**पद्भ्यां प्रियाया नलिनोपमाभ्यां मूर्ध्ना भयान्नाम ननाम नन्दः ॥**
४.१७

ततः परं कविरुपनिबध्नाति—

**स मुक्तपुष्पोन्मिषितेन मूर्ध्ना ततः प्रियायाः प्रियकृद् बभासे ।**
**सुवर्णवेद्यामनिलावभग्नः पुष्पातिभारादिव नागवृक्षः ॥**
४.१८

अत्र क एष नागवृक्षः, का च सा सुवर्णवेदी, कीदृशोऽत्रानिलवेगः, कानि च पुष्पाणि, कीदृशश्चैतत्कृतोऽतिभार इति प्रतीयमानार्थसन्ततिपरिस्पन्द—मुपचिन्वन्तु ज्ञातास्वादाः सहृदयाः। कुमारसंभवेन उपहित औज्ज्वल्यगुणस्तु तु तनिमानमिवावहन्नत्राऽनुभूयते। किन्तु योऽयं प्रियकृत्पदद्योत्योऽर्थः स खलु नान्यः कालिदासस्य 'ज्ञातास्वादो विवृतजघनां को विहातुं समर्थ' इत्यनया स्वगतवाचा विश्वजनीनतां नीताट् टङ्केनेव बुद्धिभित्तौ कीलितादर्थात्। अथेदानीं प्रश्नः ब्रुवन्तु सहृदयाः कतरोऽनयोर्बुद्धनन्दयोर्भवतां लालित्यमसृणां चेतस्तटीं स्पृशति कुत्र हृदयस्यानुलोम्यं कुत्र च प्रवृत्तिः। ये संसरणशीले संसारे झञ्झाप्रवेगे शुष्कपरिपाण्डुपत्रायमाणा वासनावन्तः साधारणा गेहिनश्च देहिनस्तेषां लोकसभायां जायमाने मतदाने नूनमनयोः प्रविरलमतो बहुमतश्च क इति विजिज्ञास्ये न न स्पष्टमुत्तरम् 'नन्द एव बहुमत' इति। सेयं भूमिः

कान्तासम्मितोपदेशरेचितशोभितस्य काव्यस्य। अथ तथा पलायिते भगवति बुद्धे श्रद्दधानानां कवीनां काव्यानि कुतोमुखानि स्युरिति प्रश्ने काव्यं चाऽकुतोमुखीनत्वं चेति परस्परं विप्रतिषिद्धं पश्यामः। तदित्थं

**सा तावत् कठिनी निरर्थकलिपिः सा प्रातिभी सच्छटा**
**विद्युद्द्योतनिरङ्कुशा, गतधवोल्लासा च सा कामिनी ।**
**नृत्यं वाङ्मयदेवताविरचितं मञ्चं समाटीकते**
**प्रेक्षाया भवने च कोऽपि च न हि द्रष्टा समालोक्यते ।।**

अथोच्यते 'नायं स्थाणोरपराधो यदेनमन्धो न पश्यती'—ति, नायं काव्यस्य दोषो यदत्र विरक्तो न रज्यतीति, तत्र पृच्छामः कियन्तो भवन्ति भगवन्तो वीतरागकामा विरक्ता इति। यदि तेषामेव प्रीतये काव्यं तर्हि स्वपितुतरां तैरेव समं शवगर्त्ते। श्रूयते चाश्वघोषकवेः कृतयः कुतश्चिच्छवगर्त्तादेव प्रकाशमाप्ता इति। शवगर्त्तगतं पूतिकश्मलं दहराकाशमाश्रित्य भूयस्तरामुदगारि सुकविना सनातनेन। शाहेजहाँ—नाम्ना यवनशासकेन ताजनाम्न्यास्तत्प्रेयस्याः कृते यच्चैत्यं निरमायि तत्र तस्याः शबचैत्यं संस्पृशदन्यदप्येकं शवचैत्यं व्यरचि 'इदं मृतस्य मम कृत' इति। तत्रैव स निखातश्च। इदानीं सनातनः पृच्छति—अयि जगदीश्वर! नितान्तं सन्निकृष्टं शयानयोर्जातः किं कदाचित् संगम' इति, अन्यदपि विकल्पयति —ताजनाम्नी भूतलोर्वशी तत्र शवगर्त्ते कीदृशी'—ति, ननु न किं तत्तनूजन्मभिरेव भुक्ते'—ति च। ये कीटाः शवगर्त्ते निखाते शवे समुत्पद्यन्ते ते तनूजा एव भवन्ति, भुज्यते च तैरेव तेषामेषाञ्जनयित्री माता। केयं दुर्भगा स्थितिः। इयं खलु श्मशानकथा। सनातनस्यात्रामी भवन्ति शब्दाः—

**म्रियसेऽथ च भुज्यसे प्रपूतिः क्रिमिभिः स्वप्रभवैर्हि पुत्रकल्पैः ।**
**अवलिप्ततमान्तरोऽस्त्यथापि न भवान् नो, किमु धीर्गतेक्षणा ते ।।**

५५ सुगतो ब्रवीति

'अयमहं हिन्दूः, अयञ्च यवन' इति या जातिप्रीतिस्तत्रापि जिज्ञास्यते सनातनेन—

**प्रथममभवत् कश्चित् कुत्रापि नो यवनाभिधो**
**न च खलु तथैवाऽभूद्धिन्दूरपि श्रुतिसंहतौ ।**
**तदपि पशुभिः सीम्ना भौगोलिकेन हहाऽधुना**
**व्यधित पृथिवीमातुश्चैतन्यभाग्भिरुरस्त्रिधा ।।**

स्वातन्त्र्यसंभवम् १४.५५

भारतराष्ट्रस्य त्रिधा यद् विभाजनं तत्र कीदृशीं पीडामत्रोपनिबध्नाति कविः? इदं च ततोऽप्यधिकं पीडाकरं यद् राष्ट्रान्तरत्वेन भूभागस्य परिकल्पनम्। वैवर्त्तिकमेव तत्। अत एव सीमोपद्रवा न ह्येवापचीयन्ते, विवर्धन्तेतरां तूत्तरोत्तरम्। घटितो घटमानश्च विद्यते मनुष्यजातेर्विनाशो सीम्नोरनयो राष्ट्रयोः। अन्यत्रापि च विश्ववसुन्धरावलये समानैव कथा। स्नप्यत एव मनुष्यभूमिरियं मनुष्यशोणितैः। कलहेऽत्र जातितत्त्वमकारणमेव। यदि नेयं स्थितिस्तर्हि यवनैर्यवनजनता कथं वा क्वथिता क्वथ्यते च। कथं च भ्रातॄणां मध्ये महाभारतं युद्धमघटत, नाक्षमत तमिमं रक्तपातं वारयितुं भगवानपि साक्षात्। उक्तमत्र बहु प्रोक्तवता सनातनेन—

**अपि च कुरुभिर्हिन्दूजातेः पुराणनरोत्तमै—**
**र्यदिह चरितं किं तन्म्लेच्छादमून् व्यतिरेचयेत् ।।**

स्वातन्त्र्यसंभवम् १४.६०

वङ्गभूसीम्नि मनुष्यजातेर्यच्चर्वणं पाञ्चापिकैर्यवनैर्विहितं तस्य चित्रमपि प्रत्युपस्थापितं सनातनेन। स्वातन्त्र्यसंभवस्य पञ्चदशे सर्गे षोडश एष श्लोकः—

**कस्तूरिकामकरिका विशदे कपोले स्वेदद्रुतीरनुबभूव तु यावदेव।**
**तावद् विलोलकबरीषु धृताः कृशाङ्ग्यो धिग् रक्षसामसिषु सञ्चरमाश्रयन्त।।**

**ताश्चिर्भटीरिव कपिः, विसिनीर्नु कुम्भी, मुस्तां नु शूकरकुलं सुभगा रिपौघः।**
**क्रूरं चचर्व परितः पिशिताशनो नु गृध्रः शबान्त्रलतिकाः पितृकाननेषु।।**

स्वातन्त्र्यसंभवम् १५.१५–१६

अस्मिन्नेव सर्गे सनातनस्य सूक्तिरत्नमिदं को वा धीधनस्तिरस्कुर्वीत–

**हिन्दूर्हिनस्ति न हि हिन्दुमसौ न, कृत्यव्राते पृथग्धनमुपार्जितुमात्तमार्गः ।**
**स्वार्थं परार्थयति यश्च परार्थजातं स्वार्थत्वमापयति यश्च तयोर्न जाती ।।**

स्वातन्त्र्यसंभवम् १५.८६

अन्ते च विश्वस्मै स्वस्तिवचांस्युदीरयति सनातनः–

**सनातनकवेरिमां कुरुत दीनदीनां श्रवः–**
**पुटाहितकलेवरां गिरमिमे समे बान्धवाः ।**
**स्वमात्रपरमार्थता सृजति मृत्युघण्टारवान्**
**परार्थपरमार्थता स्पृशति किञ्च शान्तिं पराम् ।।**

स्वातन्त्र्यसंभवम् १५.११०

इयं हि महतां कवीनां संवादिनी धीः। अत्रोपजीव्युपजीव्यकथा निरवकाशैव। यत्र पुनरन्तरं सा खलु वाक्यवक्रोक्तिः। अत्रोक्तावश्वघोषः कालिदासमनुहरन्नपि वाल्मीकिरचनां प्रविशति। तथा हि बुद्धचरिते पौनःपुन्येन शब्दावृत्ति–मनुसन्धत्ते। यथा–

**यावत् स्ववंशप्रतिरूप रूपं न ते जराभ्येत्यभिभूय भूयः?**
**तद्भुङ्क्ष्व भिक्षाश्रमकाम कामान् कालेऽसि कर्त्ता प्रियधर्म! धर्मम् ।।**

१०.३३

अग्रिमे एकादशे सर्गे 'अवे'–ति क्रियापदस्य पौनरुक्त्यं कवेर्व्युत्पत्यतिशयं परिचाययते–

**अवेन्द्रवद् दिव्यव शश्वदर्कवद् गुणैरव श्रेय इवाव गामव ।**
**अवायुरार्यैरव सत्सुतानव श्रियश्च राजन्नव धर्ममात्मनः ।।** ११.७०

अत्राद्यस्य अवक्रियापदस्य कृतेऽपेक्षितं कर्म मृग्यम्। गामवेत्यस्य स्थाने गामिवेति कच्चित् पठितुं शक्यम्।

अथाश्वघोषस्य कूटप्रयोगाः।

**हिमारिकेतूद्भवसंभवान्तरे यथा द्विजो याति विमोक्षयँस्तनुम् ।**
**हिमारिशत्रुक्षयशत्रुघातने तथान्तरे याहि विमोक्षयन् मनः ।।**

११.७१

अत्र 'हिमारिः अग्निः, तस्य केतुर्धूमः, अग्नेर्धूमकेतुपदवाच्यत्वात्। स उद्भव उत्पादको यस्य स मेघः, तस्मात् संभवो यस्य तद् वारिवर्षं, तस्मिन् सति यथा द्विजोऽग्निस्तनुं विमुच्य याति निर्वाणमितिशेष इति उपमानदलम्, उपमेयदले पुनर्हिमारिः सूर्यस्तस्य शत्रुस्तमस्तस्य यः क्षयस्तत्र यः शत्रुर्विघ्नस्तस्य घातने घातकृति आन्तरे अन्तरात्मनि याहि। किं कुर्वन्! मनो विमोक्षयन्।'– इति हि विवक्षितेऽर्थे प्रतिपादकानां पदानां क्रीडनीयकत्वमिवालक्ष्यते। महाकवौ कालिदासे पुनर्न ह्येव लभामहे कूटप्रक्रियामिमाम्।

कालिदासो हि दृष्ट उपमानयोजनया उपमेयमर्थमुपपादयन्। सपत्नीनां कलह एव सुविदितः। दशरथस्य तिस्रो भार्याः। परस्परं सपत्न्य एव ताः। किन्तु नास्ति तासु द्वेषस्तन्मूलः कलहश्च। अस्वाभाविक एषोऽर्थः। सहृदयमनसि सजितुमुपपत्तिमेष प्रतीक्षते। दीयते चैषौपम्यविधानेन महाकविना कालिदासेन–

**सा हि प्रणयवत्यासीत् सपत्न्योरुभयोरपि ।**
**भ्रमरी वारणस्येव मदनिष्यन्दलेखयोः ।।** रघु.१०.५७

वारणस्य गण्डस्थलयुग्मे मदनिष्यन्दस्य लेखे अपि द्वे भवतः। तत्र तृतीया भवति भ्रमरी। न च दृश्यते तस्यां तयोर्द्वयोरपि लेखयोःसापत्न्यद्वेषः। सममेवासौ स्वदते उभे अपि ते। तथैव सुमित्रापि कौसल्याकैकेयीभ्यां

दीयमानाभ्यां चरोरर्धार्धभागाभ्यामतुष्यदेव। अश्वघोषोऽपि सादृश्यविधावात्मनो नैपुणीं सर्वत्रैव दर्शयति। अरालमुनेराश्रमं प्रविष्टे भगवति वपुष्मति शौद्धोदनौ निपतितांँस्तत्तान् व्यतिकरानसावौपम्यैरुपपादयन्न क्लाम्यति। भवान् भवनान्निष्क्रान्तः, यथा छिन्नपाशो द्विपः (१२.५), भवता राजश्रीस्त्यक्ता यथा विषफला लता त्यज्यते (१५.६), सुगतायास्मा अरालमुनेर्दर्शनं तादृशमेव यादृशं दिदृक्षवे ज्योतिः, यियासवे मार्गदेशिकः, तितीर्षवे च प्लवः (१५.१३)। सेयं मालोपमा। सर्वत्रैव कवेरस्येदृश्येव प्रवृत्तिरौपम्य–विधाने। वाल्मीकिमसावत्र स्मारयति। अरालमुनेरुपदेशे या दर्शनपरिभाषाः सर्वा अपि ता गीतायां सांख्यशास्त्रे च सुलभाः। बुद्ध इवात्र महर्षिरेकः प्रतिबुद्ध इत्यप्युक्तः। प्रतिबुद्धौ द्वौ भवतः, एकः स शिष्यः अपरश्च स पुत्रः। तयोरप्यनयोः समान एवाधिकारः, किन्तु प्रथमस्य संज्ञा कपिल इति, परस्य च प्रजापतिरिति (१२.२१)। त इमे देशस्यास्य सांप्रतिका विषयाः। इयं हि संस्कृतसाहित्यस्य निश्वसितिर्यदद्यतनार्थपरत्वं नाम। ततश्च जीवितसरस्वतीकमेवेदमिति दृढं प्रतीमः –

**यदद्यतनतात्मतां श्रयति साहितीवर्ष्म तद्**
**भवत्यनवधिस्थिति क्षपितमृत्युनृत्यं स्वतः ।**
**तदेव खलु वेदतामुपनिषद्य मर्त्येऽमृत–**
**प्लुतिं परित उद्वमत्युषसि रोचिरिव भास्वरम् ।।**

आभिरेव मन्त्रणाभिः सनातनस्य घोषः- 'वैदिकास्तु वयं बौद्धा' इति। (काव्यालङ्कारकारिकासु)।।

# भट्टहेमाद्रे रघुवंशदर्पणः

कालिदाससाहित्यस्य गाम्भीर्यमुद्रां विश्लेष्य ततोऽर्थकात्स्न्र्यम–धिजिगमिषुरहं विद्वदुपदेशेनैकं १२५० पृष्ठात्मकं नामाख्यातोपसर्गनिपातानां प्रत्येकं समासव्यासाभ्यां यथामूलं पृथङ्निर्देशेन समस्तसन्दर्भोत्तरं 'कालिदास–शब्दानुक्रमः' इति नाम्ना शब्दानुक्रमकोषं (word index) ई० १९५८ संवत्सरे काश्यामरचयम्। एतत्साह्येनापि व्यापृतो महाकवेरन्तरङ्गं स्प्रष्टुमनीशानः प्रकाशितान् व्याख्याग्रन्थानवाश्रयम्। तत्रापि मेघदूतादन्यत्र कुत्रापि काव्ये सञ्जीवनीप्रभृतीः पञ्चषा एव व्याख्या ऋते काश्चनापि तदितराश्चतुः–पञ्चाशदधिका व्याख्या अप्रकाशतया प्रकाश्यापि वा पारेमुद्रणतया दुर्लभाः सन्ति। आस्वेवान्यतमाऽस्ति टीका हेमाद्रिभट्टस्य दर्पणः। एतत्संपादनाय व्यापृतः २३ पाण्डुग्रन्थानवाप्नवम्। एतेषां विवरणं १९७३–७४ वर्षे प्रकाशितस्य रघुवंशदर्पणस्य भूमिकायां वितत्य प्रकाशितम्। ततः पूर्वमपि रायपुरसंस्कृतमहाविद्यालयस्य पत्रिकाया 'मेधा'–नाम्न्याः १९६१–६२ वर्षीये प्रवेशाङ्के १० पाण्डुग्रन्थानां विवरणं प्रकाशितम्। तत् खलु निम्नलिखितम्–

## पाण्डु–ग्रन्थाः

### १. क–प्रतिः

प्रतिरियं पुण्यपत्तन–(पूना)–स्थभण्डारकरप्राच्यविद्याशोधसंस्थानतः सांप्रतं कीर्तिशेषैः श्रीमद्भिर्गोडेमहोदयैः प्रेषिता। तत्र संस्थानेऽस्याः क्रमाङ्काः '४७.१८७३–४' सन्ति। अस्या लिपिः प्राचीना नागरी। पञ्चमात् सर्गादारभ्य १८५ पत्रेषु १९ सर्गस्य ५२ पद्यांशं यावत् स्थिता। अन्तिमस्य पत्रस्य लोपात् अन्तिमानां ५॥ पद्यानां दर्पणोऽत्र खण्डित एव। मध्ये सर्वाण्यपि

पत्राण्यनुपप्लुतानि सन्ति। अन्तिमस्य पत्रस्याभावात् पुष्पिका, लिपिकृतो देशकालाख्याश्च नाप्यन्ते। पत्राणां परिणतेः प्रतिरियं ४५० वर्षदेशीया प्रतीयते। ५–१९ सर्गे यावत् सर्गपुष्पिका प्रतिसर्गमेकरूपैवैवं स्थिति–**'इति श्रीमदीश्वर– सूरिसूनुभट्टहेमाद्रिकृते रघुवंशदर्पणे (अमुकः) सर्गः'।** लिपिकरोऽस्याः प्रतिपदं प्रमाद्यति। पद्यान्तरेषु पद्यान्तराणामंशान् मेलयति। केषाञ्चन पद्यानां व्याख्यानं त्यजति, केषाञ्चन चांशत एव लिखति। तथासौ प्रमाद्यति यथा ६.७६–स्थं वाणिनीं पाणिनिं करोति। प्रतिरियं यैः पठिता तैरपि पत्रपार्श्वे पङ्क्तिसंख्याप्रतीकेन टिप्पनकैर्योजिता। तानि च पुनरुक्तिभूयिष्ठान्यपि क्वचन ग्रन्थविलोपं परिहरन्ति।

पञ्चमसर्गारम्भे 'नमः श्रीगणेशाय' इति मङ्गलं ' १ ' इति च पत्रसंख्या 'प्रतिरियं पञ्चमादेव सर्गादारब्धेति प्रमाणयतः।

## २. ख–प्रतिः

इयं गुर्जरराजधान्या अमदाबादतो मुनिवर्यैः श्रीपुण्यविजयैः प्रेषिता। इयमपि पञ्चमादेव सर्गादारभ्यते। ततश्चान्तिमं सर्गं यावद् विद्यते। भगवदनुकम्पयाऽन्तिमस्य सर्गस्य टीकादृतपुष्पिकापि सुरक्षितास्ति। मध्ये कतिपयानि पत्राण्यलिखितानि सन्ति। तेषु तु केचनांशास्त्यक्ता एव, षष्ठस्य सर्गस्य तृतीयं पद्यमादाय अष्टमस्य सर्गस्य द्वितीयं पद्यं यावदपि त्यक्तमस्ति। एकस्मिन्नेव पत्रे षष्ठसर्गस्य द्वितीयाद् श्लोकात् परमानन्तर्येणैवाष्टमस्य सर्गस्य तृतीयः श्लोको व्याकृतो लिखितः। नूनमसौ लेखकस्यैव प्रमादः। प्रतिश्चेयं यस्मात् पत्राद् आरब्धा तत २७ तमं पत्रं यावत् पत्रसंख्या न दत्ता। २८ तमे पत्रे २८ अङ्को दृश्यते। ततः प्रथमे पत्रे केनचिदाधुनिकेन ' १४' इति पत्राङ्को दत्तः। न चात्र मङ्गलमपि लभ्यते। नापि चेयमारम्भतोऽन्ततो मध्यतः पार्श्वतो वा लेशायापि त्रुटिता। उद्देहिकादंशस्तु कतिपयेषु पत्रेषु लभ्यते, किंतु पत्राणां संघर्षादिजन्यो

गात्रोपघातो नास्ति। अतः पूर्वतनेषु १३ पत्रेषु चतुर्थस्यापि सर्गस्य दर्पणो लेखकेनावश्यमस्यां लिखितः स्यात्। स तु संग्राहकेण भिन्नेनापि वा केनचित् पुस्तान्तरे संदानितः। प्रतिरियं '१६६८' वि० संवत्सरस्य वैशाखकृष्णद्वितीयायां गुरौ वासरे पूर्णा। लेखकय तु तत्र नाम नास्ति। यस्याः प्रतेरियं प्रतिलिपिस्तस्यास्तु पूर्णं विवरणं लेखकेन लिखितम्। तत्र—

**संवत्सप्ताग्निभूपेऽब्दे द्विपूर्णशरभूमिते ।**
**शाके च कार्तिके मासि सिताष्टम्यां रवेर्दिने ।।**

**गोपीनाथोद्धवौ भैमीसेवकौ रामरुद्रयोः ।**
**हैमाद्रं रघुवंशस्यालिखतां भाष्यमुत्तमम् ।। युग्मम्।।**

इति दृश्यते

तत्र भूपशब्दो ज्यौतिषे १६ संख्याप्रतिपादकत्वेन प्रथितः। अतः विक्रमस्य १६३७ संवत्सरः शकस्य च १५०२ संवत्सरः स्थिरीभवति। तत्र लेखकौ द्वौ (१) गोपीनाथः (२) उद्धवश्च। तयोरेकतरः (प्रायेण गोपीनाथः) द्वादशं सर्गं यावदलिखदिति तत्सर्गान्तपुष्पिकातः प्रतीमः। सा चैवम्—

**'इति श्रीमदीश्वरसूरिसूनुभट्टहेमाद्रिकृते रघुवंशदर्पणे रावणवधो नाम द्वादशः सर्गः'।।**

**श्रीरामनारायणवासुदेव गोविन्द वैकुण्ठ मुकुन्द कृष्ण?**
**श्रीकेशवानन्त नृसिंह विष्णो मां त्राहि संसारभुजङ्गदष्टम् ।।१।।**

**अहं करोमि त्वमपाकरोषि पापानि कर्माणि सदैव विष्णो ।**
**बालो यथा पङ्कयते शरीरं पुनः पुनः क्षालयते च माता ।। २।।**
**त्वमेव माता पिता त्वमेव भ्राता सखा त्वमेव काय्ये च बहुरदकनागा।।**

प्रतिरियं नागराक्षरैरेवाङ्किता १२८ पत्रात्मिका चास्ति। तत्र ४० तममपि पत्रं ३९ अङ्केनाङ्कितं कृत्वा ततः परं ४१ पत्रे '४०' इति ४२ पत्रे '४१' इति

क्रमेण प्रतिपत्रमेकोनः संख्यांको दत्तोऽस्ति। अतः चरमतमे पत्रे १४१ इति स्थाने १४० अङ्को भ्रान्त एव। अस्या आदर्शभूता प्रतिरपि मध्येऽव्यक्ताक्षरा त्रुटिताऽलिखिता वाभूदिति प्रतीयते।

## ३. ग—प्रतिः

प्रतिरियं मद्रपुर्य्या (मद्रासस्य) अड्यारसंस्थातः माइक्रो— फिल्मरूपेण प्राप्ता। अस्यास्तत्रत्यो ग्रन्थक्रमाङ्कः ८९१ अस्ति। इयमपि पञ्चमादेव सर्गादारभ्यते, समाप्यते चाष्टादशे सर्गे। मध्ये ५६, ७३, ९९—१०३, १०५, १०९—११, ११८—१३४, १४५—१४८, १५४—१५७, १९०, १९१ पत्राणि लुप्तानि। आरम्भः क—प्रतेरेव यथा 'ॐ नमः श्रीगणेशाय' इति मङ्गलवाक्याद् भवति। प्रतिसर्गं पुष्पिका सैव स्थिता या कख—प्रत्योः प्राप्ता। अष्टादशसर्गस्य ५१ तमपद्यांशं यावदेव स्थितेः प्रतेरपूर्णत्वात् समयादिकं ज्ञातुमशक्यम्। प्रतेः स्थित्या पत्राणां च वार्धक्येनोन्नीयते यदियं ५५० वर्षाणि प्राचीना स्यात्।

अष्टादशस्य सर्गस्य चरमतमौ श्लोकौ कख—प्रतितो भिद्येते। तथा हि पञ्चाशत्तमस्य श्लोकस्य व्याख्या—

'न केवलमिति। अल्पे काले गच्छति तस्यावयवा एव न केवलं वृद्धिं प्रापुः किन्तु वंश्या गुणा शौर्यादयोऽपि आरम्भसमये सूक्ष्मफले शक्ता अत एव लौकिकैरभिलषितं पृथुत्वम्। खलु वाक्यालङ्कारे। सूक्ष्म आरम्भो येषामिति विशेषणं विशेष्यभावप्रयोक्तुराशयत्वाम्[1] सूक्ष्मस्य परप्रयोग इति केचित्। कम् कान्तौ कान्तिरिच्छेति क्षीरतरङ्गिणी[1]।। ४९।।'

क प्रतौ तु—

'न केवलमिति। काले गच्छति सति सुदर्शनस्य शरीरावयवा। केवलं विशिष्टां विवृद्धिं न ययुः वंशे भवा वंश्या गुणाः खल्वपि

---

१. अंशा इमे यथामूलमेव प्रत्यक्षरमुद्धृताः।

प्रथिमानमापुः। पृथोर्भावः। पृथ्व्यादिभ्य इमनिच्। रऋतोर्हलोघेर्लघोः। लोकस्य कान्ताः प्रियाः। प्रारम्भे सूक्ष्मा अवयवा अपि।। ५०।।'

खप्रतौ च 'लोके' इत्यतः पूर्वम्—'असति' इति पदं दृश्यते, विवृद्धिमित्यस्य स्थाने वृद्धिमिति च। अन्यत् सर्वे क प्रतितोऽभिन्नम्। अङ्कोऽपि '५०' एव।

एकपञ्चाशत्तमस्य व्याख्या चैवम्—

'स इति। स तिस्रो विद्या त्रयीवार्तादण्डनीति (ती) र्गुरूणामक्लेशकर एव जग्राह, उपदेशमात्रेणाबुद्धेत्यर्थः। जन्मान्तरे दृष्टं पारं x x x x।।'

कप्रतौ तु—

'स इति। स सुदर्शनः पूर्वाणि च तानि जन्मान्तराणि तेषु दृष्टं पारं यासां ता आन्वीक्षिकी त्रयी वार्ताः तिस्रो विद्याः स्मरन्निव जग्राह।—००००।'

ख प्रतावप्येषैवमेव स्थिता।

एकोनपञ्चाशत्तमस्य श्लोकस्य व्याख्या तु कख—प्रतितः कार्त्स्न्येन संगच्छते। अतोऽष्टादशस्य सर्गस्य अन्तिमौ द्वौ श्लोकौ दर्पणेतर—व्याख्याकावेवेति निश्चितम्। अत्रैव च प्रतौ महोपाध्यायश्रीकृष्णभट्टविरचिताया रघुवंशदीपिकाया अपि चतुर्थसर्गान्तपत्रं संलग्नमस्ति।

**४. घ—प्रतिः**

प्रतिरियं मद्रपुर्या अड्यारसंस्थाया एव माइक्रोफिल्मरूपेण प्राप्ता। तत्रास्या ग्रन्थक्रमाङ्कः ८९८ अस्ति। स्पष्टनागराक्षरेयं प्रतिः नितरां महत्त्वपूर्णा भ्रामिका चास्ति कलकत्तास्थएशियाटिकसोसाइटीमृते— ऽन्यत्रानुपलभ्यस्य तृतीयसर्गदर्पणस्यात्र तत्संस्थायाः सूचीपत्रानुसारेण अंशतोऽस्तित्वादस्या महत्त्वम्, पञ्चदशतः एकोनविंशं सर्गं यावद् व्याख्याया दर्पणेतरत्वेऽपि तत्साधकाभावाद् भ्रामिकात्वं च। तृतीयसर्गस्य षष्ठस्य पद्यस्यांशमादाय द्वादशं पद्यं यावदक्षता, त्रयोदशस्य पद्यस्यान्तिममंशमादाय २१

पद्यस्यान्तिमादंशात् पूर्वं क्षता, तत: २८ पद्यं यावदक्षता, २९ पद्यस्यान्तिममंशमादाय सर्गान्तं यावच्च क्षतास्ति।

**चतुर्थ: सर्ग:** प्रतावस्यां नास्ति। **पञ्चमस्तु** सर्ग: पञ्चमस्य श्लोकस्य 'कुशाग्रीयमति: प्रोक्त: सूक्ष्मदर्शी च य: पुमानि'ति हलायुध:'—इति क प्रतिस्थाया दर्पणपङ्क्ते 'पुमानिति हलायुध' इत्यंशत: पूर्वं त्रुटित:। तत ऊर्ध्वमपि केवलं ५३ तमस्य पद्यस्य 'अथेति। अथ भावोपनतै: दिव्यमहिमसंपन्नै: कल्पद्रुमै: पुष्पै: सुरतरु:' इत्यंशत: परं नास्ति। मध्येऽपि भूयानंश: प्रायेण त्रुटित एव। **षष्ठ: सर्ग:** 'अवन्तिनाथोऽयमुदग्रवाहु'रित्यत आरभ्य ७८ तमं पद्यं यावदेवास्ति। मध्ये कीटदष्ट:, अस्पष्टाक्षर:, कतिपयपत्र—विकलश्च विद्यते। प्रत्यन्तरेभ्य: संवादोऽस्य दर्पणत्वे प्रमाणम्। **सप्तम:** सर्ग: द्वादशपद्यादारभ्य खण्डितमध्योऽन्तं यावदवस्थित:। तत्र कख—प्रतिस्था सर्गान्तपुष्पिकापि लभ्यते। **अष्टमो**ऽपि सर्ग: ७६ तमात् पद्यादारभ्य पूर्णोऽस्ति। पुष्पिका च दृश्यते। **नवम:** सर्ग: पूर्णो लभ्यते। पुष्पिकापि तत्रास्ति। **दशम:** सर्ग: ४३ तमं पद्यपर्यन्तमेवास्ति। ४४ तमस्य पद्यस्य वैमानिका इति प्रतीकमात्रं दृश्यते। दर्पणत्वं त्वस्यासंदिग्धम्। **एकादश:** सर्ग:—'दीर्घतमानाम् आर्षेष: प्रवरो भवतीति आश्वलायनी तु दीर्घातपसामिति पाठ:। त्रयमपि प्रमाणमार्षत्वात्। प्रवरमञ्जर्यो तु भृगुगणव्याख्याने पुरुषोत्तमश्च एकदेशविकृतमनन्यवदिति न्यायादिति।। ३३।।'—इति ३३ तमस्य पद्यस्येयन्तमंशमादाय आरब्ध: ९१ पद्यांशेन समाप्यते। पुष्पिकाया अभावेऽपि दर्पणत्वमस्य निश्चितम्। साधयामीति पद्यस्य व्याख्या कख—प्रत्योर्व्याख्यायाऽक्षरश: सङ्गच्छते। **द्वादश—त्रयोदश—चतुर्दशा** न सन्ति। **पञ्चदश**स्तु सर्गस्तृतीयस्य श्लोकस्यांशादारभ्य समाप्तिं यावदुपलभ्यते। **षोडशस्तु** सर्गस्तृतीयस्य श्लोकस्यान्तं यावदेवास्ति। **सप्तदशो** नास्ति। **अष्टादश:** ३७ तमस्य पद्यस्यांशादारभ्यान्तं यावदुपलभ्यते। **एकोनविंश:** पूर्ण: एवास्ति।

अस्यां प्रतौ स्थितस्तृतीयः सर्गो दर्पणो नास्ति। दर्पणस्य संक्षेपः, सूत्ररूपं किंचिद्व्याख्यानान्तरं वैतत् संभवति। कलकत्तातः प्राप्तायाः इह ञ–प्रतित्वेन दत्तविवरणायाः पुष्पिकासहितायाः प्रतेः प्रागुपदर्शितांश–मात्रात्मिकाया अस्याः प्रतिपदं विसंवादात्। तथाहि–'निधानगर्भामिव सागराम्बरामित्यादि' पद्यस्य अड्यारप्रतिस्थं व्याख्यानमेवमस्ति–'निधानेति। नृपः प्रियां ससत्त्वां सगर्भामबुद्ध। निधानगर्भां भुवमिति प्रियत्वोक्तिः। मध्ये लीनोऽग्निर्यस्यास्तां शमीमिवेति तेजस्वितोक्तिः। शमी तरुभेदः। गूढजलां सरस्वतीं नदीमिवेति पावनत्वोक्तिः। सरस्वत्या ऊर्ध्वं वालुका अन्तर्जलमिति च वार्ता। साकरां धरामिति पाठे आकरः खनिः। अन्यः सागरा अम्बरं यस्याः विशेषणबलाद् भुवः प्रतिपत्तिः।। ८।।'
कलकत्ताप्रतौ पुनरेवमेतत्–'निधानगर्भेति। निधानं गर्भे यस्यास्तां सागराम्बरां भूमिमिवेति प्रियत्वोक्तिः। भूतधात्री रत्नगर्भा विपुला सागराम्बरेस्यमरशेषे। अत्र पृथिव्या विशेषणमात्रेणैवालम् (त्रमेवालम्) तथा वामनः–'विशेषणप्रयोगो विशेष्यप्रतिपत्तौ जातायां विशेषणमात्रस्यैव प्रयोगः (अव्यक्तम्) अभ्यन्तरे लीनः पावको यस्यास्तां शमीमिवेति गर्भस्य तेजस्वितोक्तिः। अन्तः सलिलं यस्यास्तां सरस्वतीं नदीमिवेति पावनत्वोक्तिः (अव्यक्तम्)।। चा' एवमेव 'समुद्गमो वारणदन्तकोशयोर्बभार कान्ति गवलापिधानयोरिति पाठान्तरं–दिनेषुगच्छत्सु नितान्तेत्यादिपद्यस्योत्तरार्धे कलकत्ता प्रतौ दत्तम्, तथैव निर्णयसागरप्रतावपि। अड्यारप्रतौ तु क्रमेण निस्तीर्येति पद्यस्य व्याख्यायाम्। किं च इयमपि च व्याख्या–'शरीरे'ति प्रतीकादुपात्ता। एवमिह विष्णु–पुराणादीनां–सर्वेषामेव दर्पणोद्धृत–प्रमापकाणामस्तित्वेऽपि संस्थानविषय–प्रतिपादनप्रामाण्यविसंवादाद् दर्पणाद्भिन्नमेवैतदिति निश्चितम्।।

महता खेदेन प्रतिपादयामो यदस्यां प्रतौ स्थिताः '१५, १६, १८, १९' इत्येतेऽपि चत्वारः सर्गा दर्पणतया ख्यापिता अपि दर्पणात् सर्वथैव भिन्नाः। तदत्रापि कानिचित् प्रमाणानि प्रदीयन्ते–

प्रथमं प्रमाणं त्वेतदेव यदेषामन्तो लभ्यते, दर्पणस्य कखग—पुस्तकेषु निर्व्यभिचारं स्थिता पुष्पिका तु न। 'पञ्चदशः सर्गः' 'अष्टादशः सर्गः' 'एकोनविंशः सर्गः' इत्येतावन्मात्रं लभ्यते। एकोनविंशसर्गान्ते या पुष्पिका लभ्यते तां पश्यन्तु—

(का)व्ये श्रीकालिदासकृतौ एकोनविंशतिमः सर्ग्रः(र्गः) समाप्तः। शुभं भवतु। संवत् १६१० वर्षे अश्वन (आश्विन) मासे शुक्लपक्षे दशम्यां तिथौ रविवासरे षटपदज्ञातिमहसूरा सुत लिलाधर तुत विणायगेनेदं पुस्तकमलेखि अलिखत्। आत्मपठनार्थे परोपकारार्थे च। श्रीरस्तु। यादृशं पुस्तके दृष्टं तादृशं लि(खि)तं मया। यदि शुद्धमशुद्धं वा म दोष(षो) न दीयताम्।। श्रीरस्तु। श्री श्रीकालिदासचरणकमलेभ्यो नमः।। छ।। छ।।

द्वितीयं च प्रमाणं प्रत्यन्तरविसंवादः। तथाहि—पञ्चदशस्य सर्गस्यान्तिमोऽशोऽस्यां प्रतावेवं स्थितः—

'निर्वर्त्येति। सुग्रीवादिषु देवाङ्गेषु प्राप्तनिजब्रह्मलोकादनन्तरं स्वां स्वां योनिमनुप्रविष्टेषु रु(ऋ)क्षवान(र)राक्षसेषु रामायणमुपसंजिहीर्षुराह—विष्वक्सेनो भगवान् असौ सकलजगदाधारभूतां स्वतनुं निजतनुमविशत् विवेश। किं कृत्वा? एवममुना प्रकारेण सुराणां कार्यं निर्वर्त्य रावण—वधलक्षणमभयप्रदानं संपाद्य। किं भूतं कार्यम्? दशमुखभयोच्छेदि रावणवधभयोच्छेदकम्। किं भूतां स्वतनुम्? सप्तलोकप्रतिष्ठां सप्तलोकेषु भूर्भुवःस्वर्लक्षणेषु प्रतिष्ठा यस्याः सा ताम्। किंकृत्वा? दक्षिणे उत्तरे च गिरौ यथाक्रमं लङ्कानाथं बिभीषणं पवनतनयं हनुमन्तं च उभयं स्थापयित्वा। उत्प्रेक्षते कीर्तिस्तम्भद्वयमिव कीर्तिस्तम्भभूतौ निवेश्य ताभ्यां तेन तुष्टौ नाम स्वमदायि इति भावः। पञ्चदशः सर्ग्रः(र्गः)।। श्री।। छ।।'

**क—प्रतौ तु दर्पण एवंरूपः—**

'निर्वर्त्ये'ति। रामायणमुपसंजिहीर्षुराह—विष्वक्सेनो विष्णुः रामः

सुराणां दशमुखात् भयं तस्यच्छेद एव कार्यम् एवं निर्वर्त्य कृत्वा सप्तलोकाः प्रविष्टा यस्यां ताम् स्वतनुं स्वमूर्तिमविशत्। दक्षिणे गिरौ वसुवेलाद्रौ उत्तरे गिरौ च गन्धमादनाद्रौ। पूर्वादित्वात्स्मिन्विकल्पः। कीर्तिस्तम्भद्वयमिव उभयं स्थापयित्वा लोक(लङ्का)नाथं बिभीषणं पवनतनयं हनूमन्तं च।। इति श्रीमदीश्वरसूरिसूनुभट्टहेमाद्रिकृते रघुवंशदर्पणे पञ्चदशः सर्गः।।' खप्रतौ– 'रामायणमि'त्यत्र 'रामायणार्थ' मिति पाठः। 'भयं तस्य छेद एव कार्यम् एवम्' इत्यस्य स्थाने 'छेद एव'मिति पाठः, सप्तलोकाः प्रविष्टा यस्यामित्यस्य स्थाने सप्तलोकाः प्रति(ष्ठा) यस्यास्तामिति, लोकनाथमित्यस्य स्थाने लङ्कानाथमिति, पञ्चदशः सर्ग इत्यस्य स्थाने स्वर्गारोहणो नाम पञ्चदशः सर्ग इति च पाठो दृश्यते। आनुपूर्वी तु सैव।

अड्यारस्य ८९१ प्रतावपि अस्य श्लोकस्य व्याख्या एवमेवास्ति। पुष्पिका च तथैव वर्तते। केवलं रामायणार्थ–प्रतिष्ठा यस्यास्तामिति च कप्रतेर्भेदः। खप्रतेस्तु तदभिन्नम्।

षोडशस्य सर्गस्यारम्भिकाः २।। श्लोका एव सन्ति। तत्र दर्पणाद् भिन्नत्वमक्षरशो दृश्यते। तथा हि–

'श्रीरामाय नमः। रामायणादधिकमर्थमागमान्तरप्रसिद्धं सर्गचतुष्टयेन वर्णयितुमाह–अथेति। अथ रामभद्रस्य स्वस्थानप्राप्तेनन्तरं लवतक्षपुष्कराङ्गद–चन्द्रकेतु–शत्रुघाति–सुबाहवो रघुप्रवीराः सप्त रघुश्रेष्ठाः रघुसूनवः कुशं रत्नविशेषभाजं चक्रुः। 'जातौ जातौ यदुत्कृष्टं तद् रत्नमभिधीयते'। रत्नविशेषं भजते सः किं भूतं कुशं पुरोजन्मतया ज्येष्ठं प्रथमजन्मतया वृद्धं गुणैश्च वृद्धम्। न चैतच्चित्रम्। एषां सौभ्रात्रं (सु)भ्रातृत्वं कुलकुलमनुसरत्ये (कुलमनुसरत्ये)वं–शीलम्। ज्येष्ठानुवृत्तित्वमेषां प्रबन्धानुगतम्। सुभ्रातुः कर्म सौभ्रात्रम्। युवादित्वादण्।। १।।

ते सेत्विति। ते भ्रातरः अन्योन्यदेशप्रविभागसीमां परस्परविषय–विच्छेदमर्यादां न व्यतीयुः न व्यतिचक्रमुः। किं भूतास्ते? सेतुवार्तागज–

बन्धमुख्यैः कर्मभिरभ्युच्छ्रिता अपि। सेतुः क्रयो विक्रयश्च, वार्ता पाशुपाल्यं कृषिवाणिज्यम्, गजबन्धनं वारी यत्र इमा बध्यन्ते, तन्मुख्यैः कर्मभिः व्यापारैर्वर्द्धिता अपि निजनिजसीमां नात्याक्रमन्। के(इ)व? समुद्रा इव यथा समुद्रा वर्द्धिता अपि वेलां नातिक्रामन्ति। सीमामिति डाबुभ्या—मन्यतरस्यामिति।। २।।

'चतुर्भुजांशेति। तेषां कुशादीनां चतुर्भुजांशप्रभवो रामादिप्रभवो वंशः अष्टधा भिन्नः अष्टमिः प्रकारैः पृथग्भूतः सन् विप्रससार विस्तारं प्राप्तः। चतुर्भुजांशप्रभव इति कोऽर्थः चतुर्भुजः कृष्णः। तस्यांशा रामादयः प्रभव उत्प (x x x)'

एतेषामेव 'क' प्रतौ दर्पण एवंस्थितः—

'इदानीं रामायणादधिकमर्थमागमान्तरसिद्धमर्थं सर्गचतुष्टयेनाह—अथेति। अथ इतरे लव—तक्षक—पुष्कर—अङ्गद—चन्द्रकेतु—शत्रुघाति—सुबाहवो सप्त रघुप्रवीराः पुरोजन्मतया अग्रजन्मत्वेन ज्येष्ठं कुशं रत्नविशेषभाजं चक्रुः अतिशयेन वृद्धः प्रशस्यो ज्येष्ठः। हि यस्मादेषां सौभ्रात्रं कुलानुसारि। सुभ्रातृणां भावः कर्म वा। युवादित्वादण्।। १।।

अत्र ख प्रतौ सिद्धमर्थमित्यस्य स्थाने प्रसिद्धमर्थमितिपाठः।

ते इति। कुशाद्याः अन्योन्यस्य परस्परस्य देशानां प्रविभागसीमां समुद्रवेलामिव न व्यतीयुः। इण् गतौ। सीमामिति डाबुभाभ्यामिति डाप्। अबन्ध्यैः सफलैः कर्मभिः अभ्युच्छ्रिता अपि। सेतुः तडागादिबन्धः, प्रवहणादि क्रिया (क्रयो) विक्रयश्च, वार्ता कृषिगोरक्षादि, 'वार्ता कृष्याद्युदन्तयोः'। गजानां बन्धो रोधः, ते मुख्या येषां तानि। सेतुः कोषविवृद्धिः स्याद् वार्ता वृत्त्युपजीवनम्। गजबन्धः कूटयुद्धमित्येके। कृषिर्वणिक्पथो दुर्गे सेतुः कुञ्जरबन्धनम्। खन्याकरधनादानं शून्यानां च निवेशनम्। अष्टवर्गमिमं साधुः स्तब्धवृत्तिर्विवर्द्धयेदिति—कामन्दकः।। २।।

खप्रतौ स्तब्धेत्यस्य स्थाने स्वच्छेति पाठः।

चतुर्भुजांशेति। चतुर्भुजस्य विष्णोः अंशात् प्रभवति स, तेषां कुशादीनां वंशं (शः) अष्टधा प्रससार। साम योनिः यस्य स सुरद्विपानां। दिग्गजानां वंश इव। सामयोनित्वं सुरद्विपानां प्राक् (६.२७, १०.२१) उक्तम्। दीयत इति दानं धनम्। दानप्रवृत्तेः सकाशादविरतानाम्। उभयविशेषणम्। 'दानं गजमदे त्यागे' इति वैजयन्ती।। ३।।

खप्रतौ तु सामयोनित्वमित्यस्य स्थाने मामयोनित्वमिति, प्रागुक्तमित्यस्य स्थाने च प्रयुक्तमिति, प्रमादलिखितं दृश्यते। वैजयन्ती स्थले च 'विश्व' इति प्राप्यते।

अष्टादशसर्गस्यान्तिमश्लोकव्याख्या–

प्रतिकृतीति। राज्ञां कन्या नृपपुत्र्यः श्रीभुवावधिविविदुः ससपत्नीके चक्रुः, राजलक्ष्मीवसुधे ससपत्नीके चक्रुरिति वाक्यार्थः। किंभूते श्रीभुवौ? प्रथमपरिगृहीते प्रथममेव स्वीकृते पूर्वे भूपतिः श्रीपतिश्च, पश्चात् कन्यापतिः। अतः सपत्नीराजक (?) नीताः। किंभूता राजकन्याः। प्रतिकृतिरचनाभ्यः प्रतिबिम्बरचनाभ्यः समधिकतररूपाः समधिकतरं रूपमाकारो यासां ताः। तैः पटादौ प्रतिबिम्बं लिखित्वा दर्शिताभ्यः किंभूतैरमात्यैः शुद्धसंतानकामैः शुद्धं सन्तानं कामयन्ते शुद्धसन्तानकामास्तैः। इत्यष्टादशः सर्ग्र(र्गः)।। छ।। श्रीः।।

## 'क–ख'–प्रत्योस्तु–

प्रतिकृति। तस्य यूनः सुदर्शनस्य शुद्धसन्तानकामैः अमात्यैः आहृता राजकन्याः प्रथमपरिगृहीते अङ्गीकृते श्रीभुवौ अधिविविदुः। अधिवेदनं मार्यान्तरपरिग्रहः। सपत्नीवत्यौ चक्रुरित्यर्थः। दूतैः संदर्शिताभ्यः पाठादिषु (पटादिषु) प्रतिकृतीनां प्रतिबिम्बानां रचनाभ्यः समधिकतरं रूपं यासां ताः।। इति श्रीमदीश्वरसूरिसूनुभट्टहेमाद्रिकृते रघुवंशदर्पणे वंशानुक्रमणो नामाष्टादशः सर्गः।।

एवमेव 'अनश्नुवानेने' त्यनुपदमेवोदाहृतं यत् पद्यं क—ख—ग प्रतिषु अक्षरशः सङ्गच्छते तदेवात्र तथैव भिद्यते। तथाहि—

अनश्नुवानेनेति। भूमिः पृथिवी तस्य राज्यलक्ष्मी (रा)ज्ञः सुदर्शनस्य भुजेन युगहस्तेन रक्षावती आसीत् रक्षायुक्ता बभूव। किंभूतेन हस्तेन? युगोपमानमनश्नुवानेन। 'हस्तद्वयस्य यन्मानं तन्मानं युगमुच्यते' युगस्योपमानं सादृश्यमनश्नुवता। पुनः किंभूतेन? अबद्धमौर्वीकिणलाञ्छनेन न बद्धं जातं प्रन्थं (?) वा किणस्य लाञ्छनं लक्ष्म येन स तेन। अपरं किंभूतेन? अस्पृष्टखङ्गत्सरुणाऽपि अगृहीतखङ्गमुष्टिनापि। एवंविधेनापि भुवं ररक्षेति भावः।। ५१ ।।

'न केवलमि'ति च पद्यं यथा कख—प्रतिभ्यां ग—प्रतौ भिन्नं तथैव ताभ्यस्सर्वाभ्य एवात्र भिन्नम्। तथाहि—

'काले गच्छति सति न केवलं तस्य राज्ञः सुदर्शनस्य शरीरावयवा विवृद्धिं ययुः भुजादयो वृद्धिं प्रापुः खलु निश्चयेन तस्य वंश्या गुणा अपि शौर्यादयो गुणाः प्रथिमानमापुः पृथुत्वं जग्मुः। किंभूताः? प्रारम्भसूक्ष्माः प्रारम्भे आरम्भे सूक्ष्मा लघवः। पृथोर्भावः प्रथिमा। पृथिव्या(थ्वा)दिभ्य इमनिज्वा। इमन्प्र(निच्प्र)त्यये सति। वृद्धदृष्टामेव यस्य बहुलम् उकारलोपः। रशब्दप्रकृतौ लघोरशब्दादेशसिद्धं प्रथिमानमिति।। ५१।।' एवमेव 'स पूर्वजन्मान्तरदृष्टपाराः' इत्यस्यापि व्याख्या क ख ग—प्रतिभ्यः सर्वथैव भिन्ना।

एकोनविंशस्य सर्गस्य पुष्पिका तु मूलरूपेणैव प्रागुपादर्शि, व्याख्यानमिदानीमुपदर्श्यते। तत्रान्तिमस्यैव पद्यस्य व्याख्या—

तं भूत्यर्थमिति। राज्ञी पट्टराज्ञी भर्तुः राज्ञः अग्निवर्णस्य अव्याहताज्ञा अस्खलिताज्ञा। या राज्ञी अन्तर्गूढम् अन्तर्गुप्तं बीजमुष्टिं दधाना क्षितिरिव पृथिवीव बभौ शुशुभे। यथा क्षितिः पृथिवी गुप्तं बीजं दधाति किमर्थं प्रजानां भूत्यर्थं प्रजानां भूत्यर्थं लोकानामभ्युदयाय। किं भूतानां प्रजानाम्?

प्रसवसमयाकाङ्क्षिणीनां प्रसवस्य समयं कालं काङ्क्षन्ति वाञ्छन्त्येवंशीलाः तासाम् प्रसवसमयमनुपालयन्तीनाम्।। इति श्रीरघुवंशे महाकाव्ये कालिदासकृतावेकोनविंशतितमः सर्गः समाप्त।।

तदित्थमिदं स्पष्टमेव नूनं यत् पञ्चादशात् सर्गाद् एकोनविंशं सर्गं यावत् अड्यारसंस्थानस्य ८९८ प्रतेर्व्याख्यानमेतद् दर्पणो नास्ति। नास्ति च मल्लिनाथीया संजीविन्यपि। लेखकेन स्वस्मै कुतश्चिदेतदुपात्तं स्यात् 'विणायकेनेदं पुस्तकमलेखि अलिखदिति' लिपौ व्याकृतौ च संदिहानोऽस्या अनन्वर्थसंज्ञो लेखकस्तु निर्मातुं न प्रभवति। स स्वयमेव स्वस्य लिपिकृत्त्वम् 'अलेखी'ति स्वीकरोति।

अस्यां प्रतौ '१६१०' इति ये विक्रमाब्दाङ्का दृष्टाः तात्स्थ्याच्चेत् ते दर्पणलेखस्यापि मान्याः स्युः तर्हि खप्रतेरादर्शभूताया गोपीनाथोद्ध–वलिखिताया अपि प्रतेरस्याः २७ वर्षप्राचीनत्वं सिद्ध्यति तस्या '१६३७' संवत्सरे लिखितत्वस्य पूर्वमुल्लिखितत्वात्।

## ५. ङ–प्रतिः

पूनास्थ भ० प्रा० शो० संस्थानस्य २६–१८७२.७३–इति क्रमाङ्कीया। तत्र अष्टमस्य सर्गस्य ७७ पत्रात् १६४ पत्रं यावत् सामग्री विद्यते। पत्राण्यस्य नितरां जर्जराणि चतुरस्त्रं खण्डितांशानि तथा सन्ति यथा स्पर्शमात्रमपि न सहन्ते। लिपिर्नागिरी सुव्यक्ताक्षरा चास्ति। दर्पणत्वमस्या निश्चितं, पुष्पिकाया लाभात्।

## ६. च–प्रतिः

तत्रत्यैव '७५७–१८८६–९२' इति क्रमाङ्कीया। अत्र विंशति पत्राणि नितरां स्वस्थानि स्पष्टलघुनागराक्षराणि च सन्ति। १५–७ श्लोकांशतः १६–८० श्लोकांशपर्यन्तो भागस्तत्र पूर्णतः स्वस्थो विद्यते। आरम्भः १७२ पत्रतो भवति समाप्तिश्च १९१ पत्रे। नियतमेवास्यां पूर्णो दर्पणो लिखितः स्यात्। १५ सर्गे पुष्पिकालाभात्, १६ सर्गेऽपि क प्रतेरक्षरश ऐक्यादस्या दर्पणत्वं निश्चितमेव।

## ७. छ—प्रतिः

तत्रत्यैव ३३३—१८८४.८६ क्रमाङ्कीया। अत्र द्वावंशौ संकलितौ। उभावपि स्फीतनागराक्षरौ। प्रथमे ४६ पत्राणि सन्ति। तेषां दशसु पत्रेषु एकादशस्य सर्गस्य—२० पद्यस्य प्रथमा नव पङ्क्तीर्विहाय शेषोऽशः दृश्यते। ८४ पद्यास्यान्तिमाः द्वित्राः पङ्क्तीरादाय साधयामीति ९१ पद्यस्य व्याख्यायां—'प्रयोगतोऽनुमन्तव्या अनेका हि धातव इति' इत्यतः पूर्व्यमंशं यावत् पत्रमेकं नास्ति। एतान्यपि पत्राणि नितरां गलितानि स्पर्शासहिष्णूनि खण्डितमध्यानि, अङ्गुलद्वयमात्रावशिष्टमध्यानि च सन्ति। अन्येषु च दशसु द्वादशः सर्गो वर्तते। तत्र 'सौहृदेऽपि चेति विश्वः' दशा वर्तिः दशावर्ताववस्थायामिति विश्वः।। १।।' इति कप्रतिसंवादिनोंऽशात् पूर्वं प्रथमश्लोकव्याख्या नास्ति। अतश्चारभ्य पञ्चमं श्लोकं यावत् खण्डिताल्पा, ततः षष्ठस्य पद्यस्यान्तिममंशमादाय ३२ पद्यस्यान्तिमाया एकस्याः पङ्क्तेः पूर्वं यावत् पूर्णतः खण्डिता। ततश्च १०२ पद्यस्य 'लोकपाल—द्विपानामैरावतादी'—इति कप्रतेरक्षरशः संवादिनमंशं यावदक्षता, स्वस्थपत्रा, व्यक्ताक्षरा च वर्तते। पत्राङ्काः १७७ वर्तन्ते। ततोऽस्याः सर्गान्तरयुक्तत्वं सुखमनुमीयेत। द्वितीये भागे पत्राणि नितरां स्वस्थानि उज्ज्वलानि च सन्ति। तत्र २७ पत्रतः ७२ पत्रं यावत् अव्युच्छिन्ना सामग्री विद्यते। सा च त्रयोदशस्य सर्गस्य षष्ठपद्यांशतः प्रारभ्यते। सर्गान्ते—

इति श्रीरघुवंशे महाकाव्ये श्रीकालिदासकृतौ श्रीमदीश्वरसूरिसूनुभट्ट—
हेमाद्रिकृते रघुवंशदर्पणे अयोध्यागमनो नाम
त्रयोदशः सर्गः समाप्तः।। १३।।

इति नवीना पुष्पिका दृश्यते। चतुर्दशः सर्गः पूर्णोऽस्ति। तत्र 'श्रीरघुवंशे महाकाव्ये श्रीकालिदासकृता'—विति पुष्पिकांशो नास्ति। शेषा च पुष्पिका यथाप्रत्यन्तरमवस्थिता। पञ्चदशस्य च सर्गस्य षष्ठपद्यांशं यावत्—स्थितिः।

### ८. ज—प्रतिः

तत्रत्यैव १६१—१८८२.८३ क्रमाङ्कीया १२५ पत्रात्मिका तत्र ५—१५ सर्गाः। १६—१८ स्यापि कश्चनांशो वर्तते। मध्ये कानिचन पत्राणि त्रुटितानि सन्ति। नागरैरेवाक्षरैरियं लिखिता स्वस्था व्यक्ताक्षरा चास्ति। इयं ५० तमपत्रादारबधा। ५० तमे पत्रे प्रथमपृष्ठे प्रथमा पङ्क्तिः 'रघुवंशदर्पणे द्विग्विजयो नाम चतुर्थः सर्गः।। श्री।। ।। श्री।। ।। श्री।। ।। श्री।। ।। श्री।।'—इतिरूपा स्थिता। स्पष्टमेवैतत् यत् ४९ पत्रेषु प्रथमसर्गात् चतुर्थसर्गं यावद् दर्पणोऽस्यां लिखितः।

### ९. झ—प्रतिः

कलकत्तास्थ—एशियाटिकसोसायटीपुस्तकागारस्य ४९९७।१००१० क्रमाङ्कीया नागराक्षरैर्लिखिता। १—४ सर्गटीका अत्र नास्ति। अतः परं द्वादशसर्गपर्यन्तं खण्डितमध्या प्रवर्तते। शिशुहितैषिण्या अपि कतिचित् पत्राणि सन्ति। तेषु चतुर्थसर्गस्यापि पत्रकमेकमस्ति। यद्यपि तत्र शिशुहितैषिणीति नाम पुष्पिकादिकं च नोपलभ्यते तथापि लिप्या टीकाक्रमेण च तत् स्फुटमेव।

### १०. ञ—प्रतिः

तत्रत्यैव ४९९७। ८१७० क्रमाङ्कीया। अत्र त्रीणि खण्डानि सन्ति। येषु प्रथमद्वितीययोः सर्गयोः टीका नास्ति। तृतीयसर्गस्य संपूर्णो दर्पणः पुष्पिकासहितो वर्त्तते। चतुर्थस्य च सर्गस्य पत्रकमेकमस्ति। यत्र प्रथमश्लोकात् पञ्चमश्लोकांशं यावदेव दर्पणः स्थितः। नागराक्षरेष्वेव लिखितेष्वेषु पत्रेषु कानिचन नितरां प्राचीनानि कानिचन च स्वस्थानि। लिपिसौभाग्यमत्र क्वचित् सर्वातिशायि। क्वचिच्च दुरुन्नेयताकश्मलं वाचयितुर्ललाटलिपिं ह्रेपयति। वाक्यांशाः तथा प्रम्लिष्टा यथा नोत्पुच्छयितुं शक्नुते मतिः। तथापि तृतीयस्य सर्गस्य कात्स्न्येंन लाभो हीरप्रसुवमिवेङ्गालखनिमिमां विद्वत्संभावनास्पदं निर्मिमीत एव। प्रतेरारम्भः 'श्रीगणेशायनमः। अविघ्नमस्तु'—

इति मङ्गलेन भवतीति प्रथमद्वितीययोरत्र संग्रहाभावः सूच्यते। प्रतिसर्गं च मङ्गलं नास्ति। चतुर्थस्य सर्गस्यारम्भोऽत्र मङ्गलरहित एव दृश्यते।

इतः परं पञ्चानां प्रतीनां सूचना प्राप्ता। तासु चतस्रः त्रिवेन्द्रम–स्थकेरलविश्वविद्यालयस्य पुस्तकालये सन्ति एका च अमदाबादस्य लालभाई दलपतभाई भारतीयसंस्कृतिविद्यामन्दिरस्य ग्रन्थागारे। आद्यासु चतसृषु ८३३–संख्याकायां केवलश्चतुर्थः सर्गः, ३३७५ संख्यायां केवलो द्वितीयः सर्गः, ७७९५–संख्यायां केवलो दशमः सर्गः, १२८१ संख्याकायां च विशीर्णानि वल्मीकदष्टानि च कतिचन पत्राणि सन्तीति श्रीमद्भिर्वा–सुदेवशरणाग्रवालैः सूचितम्। पञ्चम्यां प्रतौ ५–१८ पर्यन्तस्य भागस्य सूचना तत्रत्यैरध्यक्षैः श्रीमद्भि दलसुखमालवणियामहात्मभिर्दत्ता। लन्दनस्थ–इण्डियाआफिसग्रन्थागारे, जयपुरस्थ–महाराजप्रासादसंग्रहालयग्रन्थागारे, उज्जयिनीस्थसिंधियाप्राच्यसंस्थानग्रन्थागारे, काशीस्थसरस्वतीभवनग्रन्थागारे, पाटनस्थहेमचन्द्राचार्यसंस्थानग्रन्थागारे, जोधपुरस्थशासकीयसंग्रहालयग्रन्थागारे च दर्पणस्य प्रतयो न सन्तीति ततस्ततो विद्वद्भिः सकृपं सूचितोऽस्मि। तञ्जोर–नागोर–बीकानेर–जैसलमेर–नेपालसंस्था एतदर्थमभ्यर्थिताः सन्ति। साम्प्रतं विदुषः प्रार्थयामि, ते हि प्रथमसर्गाच्चतुर्थसर्गपर्यन्तमासादयेयुश्चेत् प्रतीः लम्भयित्वा ता जनमिममनुगृह्णीयुरिति।

साम्प्रतं दर्पणस्य कतिचन विशेषानुपक्षिपामः।

## प्रमापकाः

विद्याचतुष्टयनिष्यन्दभूतस्य काव्यस्यानुशीलनावहिते चेतसि तासां परापतनाहमहमिकैव भाष्योत्कर्षमुपजनयतीति दर्पणकृतस्तां कैश्चित् प्रमापकैः प्रमिण्वन्तु–

१. अमरः, क्षीरस्वामी, अमरशेषः, अनेकार्थसंग्रहः, उत्पलमाला, एकाक्षर–निघण्टुमाला, कामधेनुः, केशवः, त्रिविक्रमः, धनञ्जयः, निघण्टुः, प्रतापमार्तण्डः, भागुरिः, यादवप्रकाशः, विद्यचासी (?) विश्वप्रकाशः, वैजयन्ती, शब्दभेदप्रकाशः, शब्दार्णवः, सज्जनः, हलायुधः, अन्ये

च द्वित्राः कोषेषु;

२. अष्टाध्यायी, महाभाष्यम्, कैयटः, कैयटविवरणम्, काशिका, न्यासः, पाणिनीयमतदर्पणः, गणदर्पणः, कविकल्पद्रुमः, गणरत्नमहोदधिः, क्षीरतरङ्गिणी, पदमञ्जरी, मुग्धबोधप्रदीपः, सारस्वतम्, सारस्वत–नरेन्द्रटिप्पणी, अन्ये च द्व्येके व्याकरणग्रन्थेषु,

३. ऋग्वेदः (३.१.२), आश्वलायनः, आश्वलायनकारिका, आश्वलायनी–नारायणीया वृत्तिः, शांबन्ध्यगृह (?), शौनकश्चेत्यादय आगमग्रन्थेषु,

४. बृहत्संहिता, ज्योतिषरत्नमाला, श्रीपतिपद्धतिः, नारदीयसंहिता, मुहूर्तदर्पणः, अध्यात्मप्रकरणविज्ञानेश्वरः (६.२२), लघुजातकम्, इति प्रभृतयो ज्यौतिषे,

५. मनुः, याज्ञवल्क्यः, विज्ञानेश्वरः, वृद्धपाराशरः, विष्णुस्मृतिः, विष्णु–रहस्यम्, भृगुव्याख्यानसहिता प्रवरमञ्जरी, शङ्खः, पुरुषोत्तमश्चेति धर्मशास्त्रेषु,

६. पाद्मम्, वामनम्, वाराहम्, मात्स्यम्, वैष्णवम्, मार्कण्डेयम्, श्रीधरीसहितं श्रीमद्भागवतम्, वायव्यं, कौर्म्यं चेति पुराणेषु,

७. कौटल्यः, कामन्दकश्च भूयसा नीतिशास्त्रेषु,

८. गोनर्दः, वात्स्यायनः, रतिरहस्यं, शृङ्गारतिलकञ्चेति कामशास्त्रेषु,

९. योगवासिष्ठं गीता चेति दर्शनेषु,

१०. शालिहोत्रं (५.७४) चाक्षुषं (५.५१), पालकाप्यं (६.७) योगयात्रा (१६.४१) चेति पशुशास्त्रेषु,

११. वसन्तराजीयम् (११.६१, १६.१२), शकुन्तार्णवः, गार्ग्यश्चेति शकुनशास्त्रेषु,

१२. वृक्षोदयः, प्रयोगरत्नावली चेति भूम्ना वृक्षशास्त्रेषु,

१३. सङ्गीतकलिका स्वरशास्त्रेषु,

१४. दण्डी (काव्यादर्शः), वाग्भटः, रुद्रटः, मम्मटः, प्रतापरुद्रः, वामनः, काव्योपदेशः, भोजः, भरतः, दशरूपकम्, रसाकरः, शृङ्गारतिलकः,

औचित्यालङ्कारः (औचित्यविचारचर्चा) भास्करनामा काव्यप्रकाश–टीकाकारः (१७.१) महिमभट्टश्च काव्यनाट्यशास्त्रेषु,

१५. वाग्भटम्—वैद्यशास्त्रेषु,

१६. महाभारतमितिहासेषु,

१७. शम्भुरहस्यं तन्त्रेषु,

१८. कुमारसंभवम्, मेघदूतम्, रघुवंशम्, शाकुन्तलम्, किरातार्जुनीयम्, शिशुपालवधम्, नैषधम्, भट्टिकाव्यम्, अनर्घराघवम्, नलोदयः, नीतिशतकम्, सूर्यशतकम्, रामायणम्, बालरामायणम्, महिम्नस्तुतिः, कर्णामृतमित्यादीनि काव्येषु,

१९. सहस्रनामभाष्यम् (३.५०)—स्तोत्रेषु,

२०. नाथः, सुबोधिनीकारः, वल्लभः च टीकाकारेषु।

## पाठान्तराणि

परम्परावहां चेतःसु यथावदुपसंक्रान्ता अपि संप्रदायाः आदर्श–तलवैचित्र्यात् प्रतिबिम्बवद् भजन्त्येवाश्रयवैचित्र्यात् विचित्रताम्। आन्वी–क्षिकीयुक्तास्तत्र स्वाभाव्यात्, कविप्रतिभासंवादात्, अन्यथापि वा कथञ्चिद् यत्र रिक्थभूतं तं संप्रदायं सुरक्षितं वीक्षन्ते तदेव भूम्नाऽऽद्रियन्ते। पौरुषेये हि वाङ्मये तथ्यमिदं पाठान्तररूपेण प्रत्यक्षमाजिहीते। अनया च दिशा दर्पणे श्रद्दधत एव प्रागेव गवेषकाः। साम्प्रतं निदर्शान्तिरैरपि सत्यमिदं स्पष्टयामः।

दर्पणे पाठान्तराणि त्रिविधान्युपलभ्यन्ते—पदगतानि, पद्यगतानि चेति। तत्र पद्यगतष्वेव प्रक्षेपा अप्यस्माभिः संगृहीताः। तानि चैकैशोऽशेनात्र प्रतिपादयामः—

१. **तृतीयसर्गस्य**—'उवाच धात्र्या—' इत्यादि पद्यं दर्पणे 'यदाह धात्र्या'—इति पठितं दृश्यते। तत्र चतुर्थचरणगतस्य तेनेति तत्पदस्य यत्पदाकाङ्क्षा शम्यति। एवमेव—

**उदये मदवाच्यमुज्झता श्रुतमाविष्कृतमात्मवत्त्वया ।**
**मनसस्तदुपस्थिते ज्वरे पुनरक्लीबतया प्रकाश्यताम् ।।**

इति ८.८४ पद्ये मल्लिनाथपाठः। तत्र—'मदेन यद्वाच्यं निन्दादुःखं तदुज्झता परिहरता सत्यपि मदहेतावमाद्यता त्वया यदात्मवत् अध्यात्मप्रचुरं श्रुतं शास्त्रमाविष्कृतमि'ति तद्व्याख्या। हेमाद्रेरत्र मदवाच्य—स्थाने यदवाच्यमिति पाठः, आत्मवत् त्वयेति स्थाने च 'आत्मनस्त्वया' इति पाठः। कियती ह्यत्र स्वारसिकता वाक्यार्थस्य। यत्तदोरभिसंबन्धाद् 'उदयास्तमनयोः सूर्यस्येवैकरूपता धीरस्याभिमतेति योऽभिमानो भवता पूर्वमुदयेऽनुत्सिक्तेन प्राकाशि साम्प्रतं विपद्यपि स प्रकाशनीय'—इति कविहृदयमुदेतितराम्। एतद्विपर्यय एवानेन कविना अत्रैव काव्ये—'अभितप्तमयोऽपि मार्दवं भजते' इति समर्थितः—'अयोघनेनाय इवाभितप्तं वैदेहिबन्धोर्हृदयं विदद्र' इति च चतुर्दशे सर्गे। मदश्च मद्यादिजन्यो विकार उच्यते। न च प्रियनाशः मदवाच्यो भवितुमर्हति। उदये स्मयवाच्येति पठितं स्यात्।

२. **ज्योतीरथा** = सप्तमस्य सर्गस्य षट्त्रिंशस्य पद्यस्य मल्लिनाथादृते—

**'प्रत्यग्रहीत् पार्थिववाहिनीं तां भागीरथीं शोण इवोत्तरङ्गः।'**

इत्युत्तरार्धपाठे आपततो वस्तुनः स्वीकरणरूपः प्रतिग्रहः 'प्रत्यग्रहीत्'—पदलभ्यः। ततः—पार्थिववाहिनीकर्तृक एव प्रथमोद्योगोऽत्र स्थिरः। स्पष्टं चेदं ३५ पद्यात्—'तमुद्वहन्तं पथि भोजकन्यां रुरोध राजन्यगणः स दृप्तः।'—इत्येवं रूपात्। ततश्च वाहिनीमभियुयुक्षमाणां वीक्ष्याजोऽपि तामभियुयोजेति वाच्ये लब्धे शोणभागीरथ्योरुपमा वैषम्यमुपजनयति। शोणो हि भागीरथीगामी, न तु भागीरथी शोणगामिनी। ततोऽत्र शोणकर्तृक उद्योगो भागीरथीकर्तृकश्च प्रतिग्रह उन्मिषति। हेमाद्रिरत्र—'ज्योतीरथां शोण०००' इति पाठमुपादत्ते। तत्र ज्योतीरथा शोणगामिनी नदी। तत्कर्तृकोऽभियोगः शोणकर्तृकश्च प्रतिग्रहोऽत्र पाठे स्पष्टमुन्मिषति।

तेनाभियोगप्रतिग्रहसाम्यात् शोणज्योतीरथौपम्यमजवाहिन्योरौचित्यसौभगं भजते। सोऽयमर्थः—नागरीप्रचारिणीपत्रिकायाश्चन्द्रबलीपाण्डेयाङ्के प्रकाशिते 'ज्योतीरथा' नाम्नि लेखे डॉ० वासुदेवशरणैः स्पष्टीकृतः। अत्रैकमिदमपि वैचित्र्यं यद् उभावपीमौ टीकाकारावन्योन्यपाठान्तरं न वित्तः। ततो नेदं पाठान्तरमपितु लिबिकृतो मतिविपर्यय एव।

**३. विवृताननत्वम्**—१३.१० पद्ये मल्लिनाथपाठ एवंरूपः—

**ससत्त्वमादाय नदीमुखाम्भः संमीलयन्तो विवृताननत्वात् ।**
**अमी शिरोभिस्तिमयः सरन्ध्रैरुर्ध्वं वितन्वन्ति जलप्रवाहान् ॥**

अत्र आदानविसर्गयोः कर्मतया अम्भो—जलप्रवाहावुपात्तौ, 'संमीलन्ति' न तावद्बन्धनकोशास्तयावचितपुष्पाः'—इति कालिदासप्रयोगे— णौवाकर्मकत्वेऽपि णिजन्तत्वात् सकर्मकतया स्थितायाः संमीलनक्रियायास्तु कर्म न दृश्यते। तदर्थमेतत्पाठमभ्युपगच्छद्भिराक्षेपमात्रं शरणम्। अतएव मल्लिनाथोऽपि तेनैव पथा—'चञ्चुपुटं संघट्टयन्तः' इति कर्मण आक्षेपं कुरुते। चञ्चुपुटसंमीलनयोः स्वारसिकान्वयासंभवे च संमीलनं संघट्टनतया विपरिणमयते। किंच 'विवृतनत्वा' दिति हेत्वर्थकस्यापादानस्य ससत्त्वनदीमुखाम्भसाऽन्वयमभिप्रैति। तेन हीनपदत्वमस्थानस्थपदत्वं नेयार्थत्वं च दोषत्रयमत्रापतति। 'विवृताननत्वादि'त्याननपदेन तिमिसान्निध्यादर्थान्तरस्य प्रत्ययासंभवे चञ्चुपुटस्यैव ग्रहणे पौनरुक्त्यावहश्चायमाक्षेपः। एवमेव तिमीनां शतयोजनायतत्वप्रसिद्धेरेव ससत्त्वनदीमुखाम्भोग्रहणसंभवे तदर्थे विवृताननत्वोपादानमपुष्टम्। दर्पणकृतस्तु तत्र 'विवृताननत्वम्' इति पाठः। तस्य च मीलनकर्मतयोपादानात् सर्वोऽप्यसौ दोषप्रपञ्च एकपद एव विलीयते। न च संमीलयन्तोऽविवृताननत्वादित्यकारप्रश्लेषो युक्तः, तथा सत्यपि कर्मण आक्षेपोऽपरिहार्यः।

४. **शेषा** = १७.७९ पद्ये मल्लिनाथपाठ एवंरूपः—

**दूरापवर्जितच्छत्रैस्तस्याज्ञां शासनार्पिताम् ।**
**दधुः शिरोभिर्भूपाला देवाः पौरन्दरीमिव ।।**

अत्र प्राचामालङ्कारिकाणां मते क्रियागतस्य भूतत्वस्योपमाने—ऽनन्वयापत्तिः, देवाः पौरन्दरीमाज्ञां दधति, न तु दधुः। नव्यमते तदभावेऽपि राज्ञां देवोपमयाऽतिथेश्च पुरन्दरोपमया नास्ति कश्चनातिशयलाभः। एतावताऽतिथौ राजान्तरव्यतिरेको दुर्लभः। देवानामिन्द्राज्ञाकारित्वमागम—प्रमितम्, तेन—'सेवकाः स्वामिनो यथे'ति चतुर्थचरणपरिवर्त्ते सादृश्यस्यानु—भविकत्वसिद्धावुत्कर्षातिशयलाभः, प्रमाणान्तरापेक्षया प्रत्यक्षस्यैव ज्येष्ठत्वोपगमात्। आज्ञाया अमूर्तत्वात् तद्धारणस्य च मूर्तत्वात् तयोरन्वयौचित्याय—

**एषा मनो मे प्रसभं शरीरात् पितुः पदं मध्यममुत्पतन्ती ।**
**सुराङ्गना कर्षति खण्डिताग्रात् सूत्रं मृणालादिव राजहंसी ।।**

इति विक्रमोर्वशीयकाव्य इवात्रापि केनचित् मूर्तेनैवापमानेन भाव्यम्। किं च सार्वभौमसामन्तयोरौपम्याय देवपदमत्र कुबेरादिदेवविशेषपरतया नेयम्। अन्यथा तु देवानां राजत्वाभावे सामन्तोपमानत्वं न संगच्छेत। देवा हि स्वर्पतेः प्रजा, न तु तदधिकृता विषयाध्यक्षाः। एवं प्रजया राज्ञामौपम्यं कवौ प्रतिभानदारिद्र्यमापातयेत्। न चैतत् कालिदासे संघटते, तस्यौपम्ययशसो विद्वदुपश्लोकितत्वात्, सर्वातिशयित्वाच्च। तं हि महान्तोऽप्यभियुक्ता (अभिनवगुप्तपादाचार्या) भगवदनुग्रहपवित्रवाचं मन्वते। दर्पणकारस्तु तत्र 'शेषां पौरन्दरीमि'वेति पठति। अस्मिंस्तु पाठे सर्व एव विप्रतिपादाः प्रावृषि रजःकणा इव विलयमुपेत्य सचेतसां चित्ताकाशं निर्मलयन्ति। शेषाज्ञयोरौपम्यं कविषु प्रसिद्धमेव। खजुराहोतः प्राप्ते धङ्गदेवस्याभिलेखे 'शिरसाऽवहन्नृपतयः शेषामिवाज्ञामि'ति लभ्यत एव, स्वयं कालिदासोऽपि कुमारसंभवे—'तथेति

शेषामिव भर्तुराज्ञामादाय मूर्ध्ना मदनः प्रतस्थे' (३.२२) इत्यनयोः सादृश्यमुपादत्त। श्रीकण्ठचरितकवेर्मङ्खस्यापि—

**शेषां वचोमयीं मूर्ध्नि गृह्यमाणां सुपर्वभिः ।**
**पुनरप्यथ जग्रन्थ नाथो मन्मथमाथकृत् ।।**

श्रीकण्ठचरिते १९.४०

एतत्कवयतोऽभिप्रायोऽयमात्मीयः। शेषाशब्दार्थे दर्पणकारो विश्वप्रकाश-मेवमुद्धरति—'प्रसादान्निजनिर्माल्यदाने शेषेति कीर्तिते'ति। मल्लिनाथोऽपि कुमारसंभवस्योद्धृतं पद्यं व्यावृण्वन् शेषाशब्दाय प्रमाणमेतदुद्धृत्य— 'माल्याक्षतादिदाने स्त्री शेषे'ति केशववैजयन्त्योः प्रमाणवाक्यमप्युद्धरति। श्रीकण्ठचरितटीकायां जोनराजोऽपि 'शेषां वचोमयी' मित्यस्य 'वचनमयीं मालामि'ति व्याख्यानं कुरुते। तदित्थं महापुरुषोपभुक्तशेषदानं शेषापदवाच्यं भवति। तेन च 'गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनमि'ति भारवेरपि नायमभिप्रायोऽनध्यक्षः। प्रमाणैरेषोऽर्थो द्रढीयते। तथा च शाकुन्तलस्य ७.२ पद्ये—विहितासुरप्रणाशाय दुष्यन्ताय देवराजो महेन्द्र आत्मपिनद्धां मन्दारमालां प्रयच्छति। स तां तत्कन्धरे पिधापयति। पद्यं च तदित्थम्—

**अन्तर्गतप्रार्थनमन्तिकस्थं जयन्तमुद्वीक्ष्य कृतस्मितेन ।**
**आमृष्टवक्षोहरिचन्दनाङ्का मन्दारमाला हरिणा पिनद्धा ।।**

पउमचरिउकाव्यस्य ११.१४.१० पद्ये

**णन्द वह जअसद्द पडतिहिँ**
**सेसा अग्घपत्तजलजुत्तिहिँ।**

इति सोऽयं शेषाशब्दो दृश्यते।

**तस्यै स्त्रियस्ता प्रददुः शेषां युयुजुराशिषः ।**
**ताभ्यो देव्यै नमश्चक्रे शेषां च जगृहे वधूः ।।** (१०.५३.४८)
**शेषामाधाय शिरसि स्वधाम्न्युद्वास्य सत्कृतम्** (११.३.५४)

**इति शेषां मया दत्तां शिरस्याधाय सादरम्** (११.२७.४७)

इति श्रीमद्भागवतेऽपि चतुर्वारमसौ शब्दोऽस्मिन्नेवार्थे प्रयुक्तः। पौरन्दरी च शेषा तदानींतनो नोबुलपुरस्कारः। 'सर्वेऽपि राजानस्तदर्थं लालायन्ते स्म। प्राप्तायां च तस्यां यथा ते नितरां तुष्यन्ति स्म, आत्मनश्च कृतिनो मन्यन्ते स्म तथैवातिथेराज्ञायां प्राप्ताया'मित्यतो (पाठात्) अर्थलाभो महीयान्। अतोऽतिथेराज्ञायाः प्रतीक्ष्यत्वं, निरतिशयस्पृहणीयत्वञ्च प्रतीयते। तेन चातिथेः सकलचक्रवर्तिप्रमुखत्वमपि। न हि चक्रवर्त्यन्तरसाधारण्येनातिथेराज्ञां साध्वसाक्रान्ताः सन्तो राजानोऽबिभरुः, प्रत्युतात्मोत्कर्षशंसया धन्यात्मभावेन प्रीणिताः गुणानुरक्ता बद्धश्रद्धाश्च। प्रकृतद्वये परस्परमौपम्यं प्राचां कवीनामतिमात्रं प्रियमिति विदितचरमेव।

**५. नकारस्य स्थाने चकारः—**

'स दक्षिणं तूणमुखेन वामं व्यापारयन् हस्तमलक्ष्यताजा'विति सप्तमस्य सर्गस्य युद्धवर्णने नायककौशलवर्णनाय मल्लिनाथपाठानुसारि पद्यम्। अत्र मल्लिनाथस्तृतीयां सप्तम्यर्थपरतयाऽभ्युपैति वामं च क्रियाविशेषणतया। दर्पणकारोऽत्र 'तूणमुखे च' वाममिति पठति। दक्षिणं वामं चेत्युभयं चकारेण व्यापारे समुच्चाययति। ततश्च नायकस्य सव्यसाचित्वमुन्मिषति। चकारनकारौ लिपौ प्रायेण सरूपावेव भवतः। ततोऽत्र मल्लिनाथ एव द्रुतोऽनुमीयते।

**६. चकारस्य नकारः—**

**आलोकमार्गं सहसा व्रजन्त्या कयाचिदुद्वेष्टनवान्तमाल्यः ।**
**वद्धुं न संभावित एव तावत् करेण रुद्धोऽपि च केशपाशः ।।**

इति मल्लिनाथस्वीकृतेन पाठेन पद्यमिदं रघुवंशे (७.६) कुमारसंभवे च (७.५७) लभ्यते। हेमाद्रिस्तु तत्र—'यत्र रोधमात्रमपि नास्ति तत्र बन्धस्तावद् दूरापास्त' इति भावं दर्शयति। दर्पणप्रतिषु तु 'रुद्धोऽपि चे'त्येव लेखो

दृश्यते। नूनमस्य चकारस्थाने नकार एवाभिप्रेतः। लिपिकेनेव तदन्यथाकारि। कुमारसंभवेऽत्र श्लोके निर्णयसागरप्रतौ 'रुद्धोऽपि न केशहस्तः' इति पाठान्तरं प्रदर्शितमस्ति। अनयोर्नकारघटित एव पाठं सचेतसोऽभ्यरोचन्त। व्यक्तिविवेककारोऽत्र प्रमाणम्। स हि विधेयाविमर्शप्रकरणे विधेयभूतस्य विशेषणस्य समासकृतमप्राधान्यं प्रत्याचक्षाणः पद्यमिदं प्रत्युदाजहार। तत्रापि काशिक—चौखम्भाप्रतौ 'रुद्धोऽपि च केशहस्त' इत्येव मुद्रितं दृश्यते। वृत्तौ तु 'अवलोकनव्यवधानदायिनीं तावतीमपि कालकलां विघ्नायमानां मन्यमानयानया सततं स्वाधीनेनैकेन करकमलेन रोधोऽप्यस्य न कृतः' (पृ० २००) इति नकारघटनौपयिकमेवाभिप्रायमसौ दिदेश। हेमाद्रि—मल्लिनाथयोः 'केशपाश' पाठस्थाने कुमारसंभवस्य निर्णयसागरप्रतौ प्रदर्शितः 'केशहस्त' इति पाठः चकारस्थाने नकारमपि व्यक्तिविवेककृदभिमतं साधयति। तेन हि 'करेण रुद्धोऽपि न केशहस्त' इत्येव प्राक्तनः पाठः प्रतीयते। तदित्थं पद्यार्थे प्राणा इवागताः। तेन सहसापदार्थः उद्वेष्टनवान्त—माल्यार्थश्च परिपुष्यतः। केशपाशस्य करेण रोधः सहसा पलायनं चेत्युभयं नातिसमञ्जसम्। सर्वं विस्मृत्यैव पलायनं वधूवरावलोकनौत्सुक्यसान्द्रतां प्रसाधयति। न च कररुद्धस्य केशपाशस्य वेष्टनभङ्गे माल्यवमनं चापि संभवतः। किञ्च

**प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद् द्रवरागमेव ।**
**उत्सृष्टलीलागतिरागवाक्षमालक्तकाङ्कां पदवीं ततान ।**

**विलोचनं दक्षिणमञ्जनेन संभाव्य तद्वञ्चितवामनेत्रा ।**
**तथैव वातायनसंनिकर्षं ययौ शलाकामपरा वहन्ती ।।**

इत्यादिना संदर्भेण

**ततस्तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु ।**
**बभूवुरित्थं पुरसुन्दरीणां त्यक्तान्यकार्याणि विचेष्टितानि ।।**

इति सामान्यतः प्रतिज्ञातस्य कार्यान्तरपरित्यागेनैव निर्वाहः कविना कृतः।

'प्रस्थानभिन्नां न बबन्ध नीवीम्। ०० हस्तेन तस्थावलम्ब्य वासः।।'

इति नीवीमात्रस्य करावरोधस्तत्र सुकविरौचित्यमनुरुन्धन्नुपनिबबन्ध। एवमुदाहरणान्तराण्यपि लभ्यन्ते।

## ( २ ) पादपाठान्तरम्

हेमाद्रिमल्लिनाथयोः पादपाठान्तरमत्यधिकं नास्ति। यावदप्यस्ति तावत् कियन्नु महत्त्वपूर्णमस्तीति निदर्शनेनैकेनावगच्छन्तु—

**अप्यग्रणीर्मन्यकृतामृषीणां कुशाग्रबुद्धे! कुशली गुरुस्ते ।**
**यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः ।।** ५.४

इति मल्लिनाथपठिते पद्ये हेमाद्रेर्वक्ष्यमाणानि पाठान्तराण्यनुशील्य विप्रतिपत्तीरनुभवामः। तथा हि— कौत्सगुरोरुष्णरश्मिपदवाच्येन सूर्येण तदुपार्जिताशेषज्ञानस्य चैतन्यपदार्थेन प्रबोधेनात्रौपम्यं पर्यवस्यति। तत्र

**शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः ।** इति
**अशनेरमृतस्य चोभये वशिनश्चाम्बुधराश्च योनयः ।**

इति च कालिदासकाव्येषु तपोधनानामुग्रता भयप्रकरणेषु गुरुशिष्ययोः शमप्रकरणेऽत्र तस्या अनौपयिकत्वात् सूर्यवाचकान् भास्वद्विवस्वदादीन् प्रकाशव्यञ्जकान् पर्यायशब्दान् विहायोष्णरश्मिशब्दस्योपादानं नात्यर्थं पुष्यति। किं च 'चैतन्यमत्र प्रबोध' इति मल्लिनाथव्याख्या। तत्र प्रबोध—शब्दः 'प्राबोधयन्नुषसि वाग्भिरुदारवाचः' इत्यादिषु दृष्टार्थोऽत्रापि जागरणपरोऽवसीयते। तच्च जागरणं सूर्यपक्षे निद्रात्यागरूपेणैवान्वितमपि ज्ञानपक्षे चक्षुरुन्मीलनरूपेणैवाज्ञानतिमिरापगमात्मनान्वीयेत। तथा च सति जघन्यव्यापाराश्रयणोत्तरोऽत्रौचित्यविगमः स्फुटः। वृत्तसमावर्तने शिष्ये स्थितं ज्ञानं चक्षुरुन्मीलनमात्रं न भवति, उन्मीलितचक्षुषा तेन निहितस्य

ज्ञानराशेरवाप्तेः। किं च जागरणं लोकस्य स्वो धर्मः। न हि तत् सूर्येऽपि कृतावस्थानं विभाव्यते। न च ज्ञानं तथा भवति। तच्च गुरोरात्मरूपतयैवागमेषु प्रतीतम्। शक्तिपातरूपेण शिष्ये गुरोरात्मावेशो हि ज्ञानमिति तान्त्रिकाणां समयः। तदित्थं स्पष्ट एवात्रोपमावैषम्यकलङ्कः। न च तटस्थयोरौपम्यं कालिदासः क्लेशोत्तरं योजयेदिति संभाव्यते। असौ चात्र चमरीपुच्छदाहो यद् इयमेवोपमास्मिन्नेव सर्गे पञ्चत्रिंशत्तमे पद्ये पुनरुच्यते। यथा—

**इत्थं प्रयुज्याशिषमग्रजन्मा राज्ञे प्रतीयाय गुरोः सकाशम् ।**
**राजापि लेभे सुतमाशु तस्मादालोकमर्कादिव जीवलोकः ॥**

अत्रैव चास्या औचित्यवत्त्वम्। अन्यथा—'रघुः कौत्सात् सुतं लेभ' इत्यतो वाक्यादुन्मिषन्ती नियोगबुद्धिः कथमपि न शाम्येत। अनया च महानुभावस्य कौत्सर्षेरजोत्पत्तौ निमित्तत्वमात्रं स्फुरति। पिता हि पूर्वं पुत्रभावसामर्थ्यमात्मनि संचिनुते, तदुत्तरं कृतगर्भाधानो जायासंक्रमेण पुत्ररूपं प्राप्नुते। अतश्च पुत्रः पितुरात्मजन्माभिधीयते। दिलीपाख्याने चैतत् स्पष्टम्। तत्र दिलीपो नन्दिन्याः पयसा पूर्वमात्मनि सुतत्वयोग्यतामाधत्ते, ततो सुदक्षिणामहिम्ना रघुरूपम्। अत्र रघुरपि कौत्साशिषा पूर्वमात्मनि सुतत्वयोग्यतामाधत्ते सैव च योग्यतात्र—'सुतमाशु लेभे' इति वाक्यस्यार्थः। आलोकसाम्येन चायं परिपुष्यति। यथा हि जीवलोक आलोकमवाप्य कर्मवितानेन ताँस्तानभीष्टान् फलविशेषानश्नुते तथैव रघुरपि कौत्साशंसया सुतत्वसामर्थ्यमवाप्य जायाप्रतिच्छन्देन सुतशरीरमाप। अत एव—'ब्राह्मे मुहूर्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमार'मित्यनन्तरपद्ये पौनरुक्त्यं परिहीयते। तावदर्थलाभाय—'ब्राह्मे मुहूर्त्ते जनिमाप यस्मात् कुमारकल्पः स शुभः कुमार' इत्यस्यैव पूर्वार्धरूपस्य पर्याप्तत्वात्। एवञ्चालोकसाम्येन 'यं पुत्रमसावात्मन्याधत्त तमेव देवी सुषुव' इत्यर्थयोजनया 'देवी सुषुवे' इत्यनन्तरपद्यार्थः 'सुतमाशु लेभे' इति पूर्वपद्यार्थेन गतार्थो न भवति।

एवमौपम्यमिदमत्रैवौचित्यं लभते, न तु गुरुशिष्यप्रकरणे।

दर्पणे त्वत्र चत्वारः पाठाः। तथा हि—(१) चैतन्यमर्कादिव जीवलोकः (२) लोकेन चैतन्यमिवोष्णरश्मेः (३) चैतन्यमुग्रादिव दीक्षितेन (४) ज्ञानं यतस्त्वां प्रविवेश पुण्यं चैतन्यमुग्रादिव यायजूकमिति च। दर्पणकारोऽत्र प्रथममेव पाठं प्रथमतया पठति। तत्रोक्तक्रमेण पद्यान्तरपौनरुक्त्याद् अरुचिस्तदवस्थैव। यद्यपि उष्णरश्मेरपेक्षयार्कशब्दोऽत्र स्वारस्याधिक्यं बिभर्ति, तस्य पूजार्थस्य भौवादिकस्य अर्चतेः 'अर्च्यत' इति कर्मणि, स्तवनार्थस्य चौरादिकस्य 'अर्कधातोर्वा,' (एरचि) तत्रैव घञा निष्पत्तेः पूज्यत्वस्तो–तव्यत्वाद्यर्थलाभाद् गुरौ गौरवबुद्धिः प्रतिबिम्ब्यते। पाठेऽस्मिन्नुपमानभूतस्य जीवलोकस्य प्रथमान्तत्वादुपमेयेऽपि तल्लाभाय 'त्वया ज्ञानम्' इति पद्यद्वये विसर्गलोपमाम्नाय 'तु + अयाः + ज्ञानम्' इति चिकित्सा क्रियते। सा च वैदर्भमार्गे सविशेषं न्तुतस्य कालिदासस्य प्रसादविशदेषु काव्येषु शल्यायते परम्। तच्छोधनायैव नूनं 'लोकेनेत्यादेर्द्वितीयस्यारुचिपदस्य पाठस्यावतारः। तदित्थं तृतीयश्चतुर्थश्चेति पाठद्वयमवशिष्यतें तत्रापि चतुर्थस्तूत्तरार्धपाठान्तरम्। अर्थस्तूभयोरेकरूपमेव। दर्पणकारः पाठमिममेवं व्याचष्टे—'यथा उग्राद् दीक्षितेन यजमानेन चेतना प्राप्यते, दीक्षितो हि प्रथमं चेतनां जुहोति। पुनः उग्राद् दुष्प्रवेशात् तां भजत' इत्यागमः। इति। आगमपदेन दर्पणकारो द्वितयमेव परामृशति ब्राह्मणं पुराणञ्चेति। तत्र पुराणार्थे स्कन्देन साक्षादिव देवसेनामिति ७.१ पद्यस्य 'देवसेनाम्। तया स्वपतित्वेन स्कन्दोऽभिषिक्त इत्यागमः' इति व्याख्यायाम्, षोडशसर्गस्यावतरणिकायाम् 'इदानीं रामायणादधिक–मर्थमागमान्तर' प्रसिद्धं सर्गचतुष्टयेनाहे'ति, ६.७३ पद्येऽपि ककुत्स्थ–शब्दव्याख्याने 'इक्ष्वाकुवंश्यः पुरञ्जयो राजा इन्द्रसहायार्थे वृषरूपमिन्द्रमारुह्य वृषपर्वतनामानमसुरं हतवान्। तत्प्रभृति ककुत्स्थ इत्यागम' इति च तत्प्रयोगः स्पष्ट एव। ब्राह्मणार्थे पुनरर्थलाभात् तद्योजना। 'यजमानोऽग्निः' (६.३.३.२१, ६.५.१.८, ७.४.१.२१, ९.२.३.३३) 'यजमान आग्नेयो

भवति' (३.९.१.९) इति शतपथब्राह्मणे दीक्षितस्याग्निरूपत्वमुरीकृतम्। अग्निरूपेषु चाष्टमूर्त्तीनां नामानि तत्रैव षष्ठे काण्डे कुमारोत्पत्तिप्रकरणे दर्शितानि तथा हि—'भूतानां पतिः संवत्सर उषसि रेतोऽसिञ्चत्, स संवत्सरे कुमारोऽजायत। सोऽरोदीत्। तं प्रजापतिरब्रवीत् कुमार? किं रोदिषि, सोऽब्रतीत् नाम मे धेहि।' तमब्रवीत्— रुद्रोऽसीति। अग्निर्वै रुद्रः यदरोदीत्तस्माद् रुद्रः। सोऽब्रवीत्—'धेह्येव मे नामेति'। तमब्रवीत् सर्वोऽसीति। आपो वै सर्वः। अद्भ्यो हीदं सर्वम्। सोऽब्रवीत् धेह्येव मे नामेति। तमब्रवीत् पशुपतिरसीति। ओषधयो वै पशुपतिः। तस्माद् यदा पशव ओषधीर्लभन्तेऽथ पतीयन्ति। सोऽब्रवीत्—'धेह्येव मे नामे'ति। तमब्रवीद् उग्रोऽसीति। वायुर्वा उग्रः। तस्माद् यदा बलवद् वाति, उग्रो वातीत्याहुः। सोऽब्रवीत् धेह्येव मे नामेति। तमब्रवीद् 'अशनिरसी'ति। विद्युद् वा अशनिः। यं विद्युद् हन्त्यशनिर—वधीत्याहुः। सोऽब्रवीत् 'धेह्येव मे नामे'ति। तमब्रवीत्—भवोऽसीति। पर्जन्यो वै भवः। पर्जन्याद्धीदं सर्वे भवति। सोऽब्रवीत् धेह्येव मे नामेति। तमब्रवीत् 'महान् देवोऽसी'ति। प्रजापतिर्वै चन्द्रमाः, प्रजापतिर्वै महान् देवः। सोऽब्रवीत् धेह्येव मे नामेति। तमब्रवीद् ईशानोऽसीति। आदित्यो वा ईशानः। आदित्यो ह्यस्य सर्वस्येष्टे। सोऽब्रवीत् एतावान् वा अस्मि, मा मा इतः परं नाम धा इति। तान्येतान्यष्टावग्निरूपाणि। कुमारो नवमः। सैवाग्नेस्त्रिवृत्ता। (शतपथ ब्रा० ६.१.३.८–१८ संक्षेपः) वाक्यान्तरेषु च यजमानस्याष्टमूर्तित्वमपि ब्राह्मणाभिमतम्। 'प्राणा दीक्षा' (शत.१३.१.७.२, तै. ३.८.१०.२) 'वाग्दीक्षा तया प्राणो दीक्षया दीक्षितः' (तै. ३.७.७.६) 'पृथिवी दीक्षा, तयाग्नि—र्दीक्षितः' (तै. ३.७.७.६)—इत्येवमादिषु तत् स्पष्टमेव। एवमेव अथ य एतमेतद् दीक्षयन्ति तद् द्वितीयं म्रियते, यज्ञादु ह वा एष पुनर्जायते यो दीक्षितः (ऐ. ७.२२), अग्नीषोमौ वा एतमन्तर्जम्भ आदधाते यो दीक्षते (श. ३.३.४.२१, ३.६.३.१९)—इत्येवमादिभिर्वाक्यैर्दीक्षितस्य चेतनाया यज्ञे होमः, तत एव च पश्चात्तल्लाभो विदितः। अष्टमूर्तिषु केवलाया

उग्रमूर्तेरेव दीक्षितस्य चैतन्यलाभः पुराणेषु भूम्ना प्रथितः। तथा हि लिङ्गपुराणस्योत्तरार्धे द्वादशेऽध्याये सनत्कुमारनन्दिकेश्वरसंवादे—

भूरापोऽग्निर्मरुद् व्योम भास्करो दीक्षितः शशी ।
भवस्य मूर्तयः प्रोक्ताः शिवस्य परमेष्ठिनः ।।

खात्मेन्दुवह्निसूर्याम्भोघराः पवन इत्यपि ।
तस्याष्टमूर्तयः प्रोक्ता देवदेवस्य धीमतः ।।

पञ्चभूतानि चन्द्रार्कावात्मेति मुनिपुङ्गवाः ।
मूर्तयोऽष्टौ शिवस्याहुर्देवदेवस्य धीमतः ।।

आत्मा तस्याष्टमी मूर्तिर्यजमानाह्वया परा ।
दीक्षितं ब्राह्मणं प्राहुरात्मानं च मुनीश्वराः ।।

—इत्येवं शिवस्याष्टौ मूर्तीरुद्दिश्य त्रयोदशेऽध्याये तासां संज्ञान्तराणि स्थानानि चैवं निरुक्तानि—

चराचराणां भूतानां घाता विश्वम्भरात्मकः ।
शर्व इत्युच्यते देवः ० ० ० ० ० ० ० ।
वह्न्यात्मा भगवान् देवः स्मृतः पशुपतिर्बुधैः ।
पवनात्मा बुधैर्देव ईशान इति कीर्त्यते ।
व्योमात्मा भगवान् देवो भीम इत्युच्यते बुधैः ।
सूर्यात्मा भगवान् देवो रुद्र इत्युच्यते तथा ।
सोमात्मको बुधैर्देवो महादेव इति स्मृतः ।

यजमानात्मको देवो महादेवो बुधैः प्रभुः—
उग्र इत्युच्यते सद्भिरीशानश्चेति चापरैः ।।

आत्मा यो यजमानाख्यः सर्वभूतशरीरगः ।
मूर्तिरुग्रस्य सा ज्ञेया परमात्मबुभुत्सुभिः ।।

एवमेव—विकेशी, उमा, स्वाहा, शिवा, दिशः, सुवर्चला, रोहिणी, दीक्षा चेति क्रमेण पत्न्यः, अङ्गारकः, शुक्रः, षण्मुखः, मनोजवः, सर्गः, शनैश्चरः, बुधः, संतानश्चेति यथाक्रमं पुत्रास्तत्रैवैषां निरूपिताः।
शिवपुराणेऽपि शतरुद्रीसंहिताया द्वितीयेऽध्याये—

**तस्य शम्भोः परेशस्य मूर्त्यष्टकमयं जगत् ।**
**शर्वो भवस्तथा रुद्र उग्रो भीमः पशोः पतिः ।**
**ईशानश्च महादेवो मूर्त्तयश्चाष्ट विश्रुताः ।।**

**भूम्यम्भोऽग्निमरुद्व्योमक्षेत्रज्ञार्कनिशाकराः ।**
**अधिष्ठिताश्च शर्वाद्यैरष्टरूपैः शिवस्य हि ।।**

इत्येवं नामास्पदानि निरूप्य भगवत उग्रस्य महिमाऽप्येवं निरूपितः—

**बहिरन्तर्जगद् विश्वं बिभर्त्ति स्पन्दते स्वयम् ।**
**उग्र इत्युच्यते सद्भी रूपमुग्रस्य सत्प्रभो ?**
**आत्मा तस्याष्टमं रूपं शिवस्य परमात्मनः ।।**

ब्रह्माण्डे पुराणे पुनरस्य भूयान् विस्तरः। तत्रानुषङ्गपादस्य दशमेऽध्याये शतपथोक्तक्रमेणैवाख्यानमिदं दृश्यते। विशेषस्त्वयं यत् शतपथेऽग्नेः प्राधान्यमस्ति, अत्र पुनः शिवस्यैव। सोऽयं मन्ये महाभारतीयस्य कुमारोत्पत्तिवर्णनस्य प्रभावः, तत्र कुमारस्य शिवरूपत्वप्रतिपादने संरभदर्शनात्। ब्रह्माण्डेऽपि समुत्पन्नः कुमारः ब्रह्मणा रोदनकारणं पृष्टः स्वनाम जिज्ञासते, अतुष्यंश्च नामान्तराणि लभते, स्थानानि च निश्चाययते। ब्रह्मापि तस्मै—'रुद्रभवशर्वेशानपशुपतिभीमोग्रमहादेवे'—त्यष्टौ नामानि क्रमेण प्रयच्छति। ततश्च

**लब्ध्वा नामानि चैतानि ब्रह्माणं नीललोहितः—**
**प्रोवाच, नाम्नामेतेषां स्थानानि प्रदिशेति ह ।। १८ ।।**

इति स्थानानि पृष्टो ब्रह्मा नामानुरूपा अमूरष्टौ तनूः निर्ममौ—

**ततो विसृष्टास्तनव एषां नाम्नां स्वयंभुवा।**
**सूर्यो जलं मही वायुर्वह्निराकाशमेव च ।**
**दीक्षिता ब्राह्मणाश्चन्द्र इत्येवं तेऽष्टधा तनुरिति ।।**

ततश्च यथापूर्वं तेषां नाम्नां स्थानानि सार्थवादं भूम्ना निर्दिश्य सप्तमीमुग्रतनुमेवमुपावर्णयत्—

**सप्तमं यन्मया प्रोक्तं नामोग्रेति तव प्रभो ।**
**तस्य नाम्नस्तनुस्तुभ्यं द्विजो भवति दीक्षितः ।।**

दीक्षिते चैतन्यसंक्रममप्यस्यानन्तरमेवैवमुल्लिलेख—

**एवमुक्ते तु यत्तस्य चैतन्यं वै शरीरगम् ।**
**विवेश दीक्षितं तद्वै ब्राह्मणं सोमयाजिनम् ।**
**तावत्कालं स्मृतो विप्र उग्रो देवस्तु दीक्षितः ।।**

एवमेव— **तनुरुग्रात्मिका सा तु तेनोग्रो दीक्षितः स्मृतः ।**
**उग्रा तनुः सप्तमी या दीक्षितो ब्राह्मणः स्मृतः ।।**

इत्युपक्रम्य सर्वेषामेतेषां पत्नीपुत्राँश्च यथापूर्वमुपादिदेश।

कालिदासोऽपि पौराणिकममुं ज्ञानराशिं प्रतिपदमुपयुङ्क्ते।

**ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव। त्रिशङ्कुरिवान्तरा तिष्ठ ।** शाकु.

**गुरोर्यियक्षोः कपिलेन मेध्ये रसातलं संक्रमिते तुरङ्गे ।**
**तदर्थमुर्वीमवदारयद्भिः पूर्व्यैः किलायं परिवर्धितो नः ।।** १३.३

**ततोऽयमश्वः कपिलानुकारिणा गुरुस्त्वदीयस्य मयापहारितः ।**
**अलं प्रयत्नेन तवात्र मा निधाः पदं पदव्यां सागरस्य सन्ततेः ।।** ३

**अथोपयन्त्रा सदृशेन युक्तां स्कन्देन साक्षादिव देवसेनाम् ।** ७ ।—

इत्येवमादिषु निदर्शनशतेषु कालिदासविदां नैतदप्रत्यक्षम्। दीक्षितस्य शिवरूपत्वमप्यसौ बहुशः प्रकरणान्तरेषु जुगुम्फ। तृतीये सर्गे रघुः सुरेन्द्रं ब्रूते–

**यथा च वृत्तान्तममुं सदोगतस्त्रिलोचनैकांशतया दुरासदः।**
**तवैव संदेशहराद् विशांपतिः शृणोति लोकेश! तथा विधीयताम्।।** इति, नवमे सर्गे च–

**अजिनदण्डभृतं कुशमेखलां यतगिरं मृगशृङ्गपरिग्रहाम् ।**
**अधिवसँस्तनुमध्वरदीक्षितामसमभासमभासयदीश्वरः ॥ ९.२१ ॥**

इत्येवमसौ दशरथं वर्णयते। अत्र दीक्षितवेशस्य शतपथब्राह्मणाऽऽ–दिदृष्टप्रकारतयैव शब्दशो निर्वाहो दृश्यते। अष्टमूर्तिवर्णनं च कालिदासस्य सर्वस्वभूतो विषयः। नाटकत्रये रघुवंशे च स भगवन्तं शिवमेव स्तौति। तत्रापि च–

**'अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः'** इति मालविकाग्निमित्रे,

**'या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री'** त्यादिक्रमेण च शाकुन्तले शिवस्याष्टमूर्तिरूपमेव स्तौति। अन्यत्रापि–

**तत्राग्निमाधाय समित्समिद्धं स्वमेव मूर्त्यन्तरमष्टमूर्तिः** (कुमार. १.५७) **अवेहि मां किङ्करमष्टमूर्त्तेः**–(रघु. २.३५) इत्यादिषु कालिदासः शिवस्याष्ट–मूर्तित्वमुल्लिखति। ब्रह्मा देवान् तारकध्वंसोपायमुपदिशन् शिवस्याष्टमूर्ति–रूपमेव मनसिकृत्वैवं ब्रूते–

**उभे एव क्षमे वोढुमुभयोर्बीजमाहितम् ।**
**सा वा शम्भोस्तदीया वा मूर्तिर्जलमयी मम ।।** कुमार. २

तदेवं कालिदास आगमिकमिदमष्टमूर्तिरहस्यमुपजीव्यैव शतशो व्यापृतः। सोऽयमत्र गुरुशिष्यप्रकरणे किमिवेदं विस्मरेत्! ततोऽस्य–'चैतन्यमुग्रादिव

दीक्षितेने'ति पाठ एवाभिमतः। एतेन च गुरुशिष्ययोर्विनयसमुदाचारोऽपि नितरां स्पष्टीभवति। न हि तत्र ताटस्थ्येन वार्तासंवादालापादिमात्रेण शास्त्रार्थविचारः प्रावर्तत, प्रत्युत साधनचतुष्टयसंपत्त्या समुदग्रतरेषु तेषु शक्तिपातरूपश्चैतन्यसमावेश एवामहीयत। तादृशे च विनयक्रमे दीक्षितोग्रौपम्यमेव सामञ्जस्यमावहति, न तु ताटस्थ्यकश्मलं सूर्यज्योति-र्जीवलोकौपम्यम्। एताँश्चागमिकान् भावान् हृदयेकृत्वा दर्पणकारो-ऽभिप्रायमिममधिकं स्पष्टयति—'अष्टमूर्तेः स्वमूर्तिभेदेन नामविभागः। तद्यथा—सूर्ये रुद्रः, जले भवः, भूमौ शर्वः, वायावीशानः, अग्नौ पशुपतिः, आकाशे भीमः, दीक्षित उग्रः, चन्द्रमसि महादेव' इति। दीक्षितस्योग्र इति संज्ञा महिम्नःश्रु(स्तु)तौ च— 'भवः शर्वो रुद्रः पशुपतिरित्यादिना। ज्ञानं यतस्त्वां प्रविवेश पुण्यं चैतन्यमुग्रादिव यायजूक्रमि'ति पाठे यजजपदशां यङ्—(अ. ३.२.१६६) इत्यूकः।।, पूर्वमुद्धृते ९.२१ पद्येऽपि दर्पणकृत्—'दीक्षितमीश्वरोऽनुप्रविशतीत्यागम'—इति तमेव संप्रदायं स्मरति। ईश्वरशब्दोऽत्र **'महेश्वरस्त्र्यम्बक एव** (र. ३.४९), **यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षर'** (विक्रमो. १.१) इति कालिदासोक्त्यैव शिवार्थकः।

प्रकरणेऽत्र 'सर्व' इति शतपथपाठस्य पुराणेषु 'शर्व' इति परिणतिः शोच्या। एवमेव शतपथे वायोरुग्रत्वाभिधानात् पुराणेषु तस्येशानत्वा-भिधानम्, आत्मनश्चोग्रत्वाभिधानमपि सङ्गमनीयम्।

दर्पणकृता चात्र संप्रदायमवगच्छतापि योऽयं 'चैतन्यमर्कादिव जीवलोक' इति पाठः प्राथम्येनाभिमतस्तत्र रघुवंशस्य गुरुशिष्यसंप्रदायमेव कारणं मन्महे।

तृतीयसर्गस्य 'दिनेषु गच्छत्स्वि'त्यादेः पद्यस्योत्तरार्धपाठान्तरमेवमत्र दर्शितं—

**'समुद्गमो वारणदन्तकोषयोर्बभार कान्तिं गवलापिधानयोः।'**

इति। निर्णयसागरप्रतावप्येद् दत्तमस्ति। न तु दर्पणनाम्ना।

## ( ३ ) श्लोकपाठान्तराणि

एतानि हि पाठान्तराणि वर्णनप्रसङ्गेष्वेव बाहुल्यभाञ्जि। तत्र मल्लिनाथपाठदृशा त्रिविधा स्थितिः। (१) मल्लिनाथादृतान्येव प्राधान्येन व्याख्यायान्ते तद्रूपान्तराणि, (२) स्वाभिमतानां व्याख्यानेषु मल्लिनाथादृतानां रूपान्तरतया प्रदर्शितानि, (३) मल्लिनाथाविदितानां च क्षेपकाक्षेपकत्वाभ्यां व्याख्यातानि। एतानि चात्र कात्स्न्र्येन यथालाभमुपलम्भयामहे—

पञ्चमसर्गस्य—संहारविक्षेपलघुक्रियेणेति ४५—तमस्य पद्यस्यान्ते पद्यमिदं पाठन्तरतया प्रदर्शयति भट्टहेमाद्रिः। **'तथाहि पाठान्तरम्—**

**स भोगिभोगाधिकपीवरेण हस्तेन तीराभिमुखः सशब्दम् ।**
**संवेष्टितार्धप्रयुतेन दीर्घांश्चिक्षेप वारीपरिघानिवोर्मीन् ॥**

भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः। परिघोऽर्गला' इति। अतः परं ४६—पद्यमेवंरूपमुपादत्ते—

**कारण्डवश्लिष्टमृदुप्रताना पुलिन्दयोषाम्बुविहारकाञ्चीः ।**
**कर्षन् स शैवाललता नदीष्णः प्रौहावलग्नास्तटमुत्ससर्प ॥**

तत्रैव च—शैलोपमः शैवलमञ्जरीणां जालानि कर्षन्नुरसा स पश्चादिति मल्लिनाथपठितं पद्यं पाठान्तरतया दर्शयति। पृथक्श्लोकतया च व्याख्याति।

षष्ठे सर्गे—असौ महाकालेति ३४—तमं पद्यं व्याख्याय मल्लिनाथा—दृष्टं पद्यं पाठान्तरतया दर्शयति—

**'अत्र पाठान्तरमस्ति—**

**असौ महाकालनिकेतनस्य चन्द्रार्धमौलेर्निवसन्नदूरे ।**
**दिवापि जालान्तरचन्द्रिकायां नारीमुखस्पर्शसुखानि भुङ्क्ते ॥**

**अनेन बहुस्त्रीकता सूचिता।'**

ज्याघातरेखे सुभुजो भुजाभ्यामिति ५५ तमे पद्ये मल्लिनाथादृष्टं पाठान्तरमेवं दर्शयति—

**रणेऽभ्यमित्रीणतया प्रकाशः शरासनज्यानिकषो(षौ) भुजाभ्याम् ।**
**विष्पष्टलेखौ रिपुविक्रमस्य निर्वाणमार्गाविव यो बिभर्त्ति ॥**

इति। व्याख्याति चांशतः। निर्णयसागरीये संस्करणेऽपि चैतन्नास्ति निर्दिष्टम्। 'अथोरगाख्यस्य पुरस्येति ५९—पद्यस्य क्षेपकरूपेण पद्यान्तरमिदं दर्शयति—

**अथाधिगम्योरगराजकल्पमाचारपूतोभयवंशदीपम् ।**
**पतिं पुरस्योरगपूर्वनाम्नः शुद्धान्तरक्ष्या जगदे कुमारी ॥**

व्याख्याति च। न चैतन्निर्णयसागरीये संस्करणे दर्शितम्। एतावन्त्येव पाठान्तराणि षष्ठे सर्गे दर्पणकृददर्शयत्।

सप्तमे सर्गे पाठान्तराणि दर्पणे न लभ्यन्ते निर्णयसागरसंस्करणे ११ पद्यानन्तरं 'स्तनन्धयन्त'—मिति पद्यमेकं पाठान्तरत्वेन दर्शितम्। तदत्र नास्ति। अष्टमे सर्गे 'अजिताधिगमाय पार्थिव' इत्यादि १७ पद्यान्ते पाठान्तरतया—

**समदृश्यत भूपतिर्युवा सचिवैः प्रत्यहमर्थसिद्धये ।**
**अपुनर्जननोपपत्तये प्रवयाः संयुयुजे च योगिभिः ॥**

पद्यमिदं पठति व्याख्याति च। न चैतन्मल्लिनाथे दृश्यते। नापि नि०सा० संस्करणे। नि०सा० संस्करणे १९ पद्यानन्तरं 'नयचक्षुरजो दिदृक्षये' त्यादिः श्लोकः पाठान्तरतया प्रदर्शितः। सोऽयमत्र दर्पणे नास्ति। अस्मिन्नेव सर्गे—'मनसापि न विप्रियं मया'—इत्यादि पद्यानन्तरं मल्लिनाथः

**तदपोहितुमर्हसि प्रिये! प्रतिबोधेन विषदमाशु मे ।**
**ज्वलितेन गुहागतं तमस्तुहिनाद्रेरिव नक्तमोषधिः ॥**

पद्यमिदं व्याख्यत्। तदिदं दर्पणे नास्ति।

नवमे सर्गे वसन्तवर्णनमस्ति। तत्र पाठान्तरप्राचुर्यमस्ति। तदिदमत्र कात्स्र्न्येन प्रतिपादयामः—

**जघननिर्विषयीकृतमेखलाननुचिताश्रुविलुप्तविशेषकान् ।**
**स रिपुदारगणानकरोद् बलादनलकानलकाधिपविक्रमः ।।**

पद्यमिदं दशमपद्यतया दर्पणे लभ्यते। नि.सा. संस्करणानुसारेण सुमतिविजयेनाप्येतद् व्याख्यातमस्ति। मल्लिनाथे तु न दृश्यते। वस्तुतः पुनरुक्तयमकमेतत्

**निववृते स महार्णवरोधसः सचिवकारितबालसुताञ्जलीन् ।**
**समनुकम्प्य सपत्नपरिग्रहाननलकानलकाधिपविक्रमः ।।**

इत्यनेन १५ पद्यतया पठितेन, पुनरुक्तार्थकञ्च २९ पद्यतया पठितेनानेन पद्येन–

**व्रणगुरुप्रमदाधरदुःसहं जघननिर्विषयीकृतमेखलम् ।**
**न खलु तावदशेषमपोहितुं रविरलं विरलं कृतवान् हिमम् ।।**

पद्येनैतेन। मल्लिनाथो हेमाद्रिश्चेत्युभावपि पद्यमिदं व्याख्यातवन्तौ। न च कालिदास एकमेव यमकं द्विरुपयुज्यात्मनोऽशक्तिं प्रदर्शयेदिति कस्यचिदाधुनिकस्य पाण्डित्यकण्डूरियम्।

**हिमविवर्णितचन्दनपल्लवं विरहयन् मलयाद्रिमुदङ्मुखः ।**
**विहगयोः कृपयेव शनैर्ययौ रविरहर्विरहध्रुवभेदयोः ।।**

मल्लिनाथः पद्यमिदं नादत्त। दिनकरमिश्रैरेतद् व्याख्यातमिति नि०सा० संस्करणतो ज्ञायते। वस्तुतस्तु–

**जिगमिषुर्धनदाध्युषितां दिशं रथयुजा परिवर्तितवाहनः ।**
**दिनमुखानि रविर्हिमनिग्रहैर्विमलयन् मलयन्नगमत्यजत् ।।**

इति २६–पद्येन गतार्थत्वात् कालिदासस्य तादृग्विधोत्प्रेक्षापराङ्मुखत्वाच्च प्रक्षिप्तमेवैतत्।

**परभृता मदनक्षतचेतसां प्रियसखी लघुवागिव योषिताम् ।**
**प्रियतमानकरोत् कलहान्तरे मृदुरवा दुरवापसमागमम् ॥**

मल्लिनाथः पद्यमिदं नादत्त। एतच्च–

**अरुणरागनिषेधिभिरंशुकैः श्रवणलब्धपदैश्च यवाङ्कुरैः ।**
**परभृताविरुतैश्च विलासिनः स्मरबलैरबलैकरसाः कृताः ॥ ४३॥**

इति पद्यात्–

**त्यजत मालमलं बत विग्रहैर्न पुनरेति गतं चतुरं वयः ।**
**परभृताभिरितीव निवेदिते स्मरमते रमते स्म वधूजनः ॥**

इति पद्याच्च गतार्थत्वात् पुनरुक्तमेव।

**दशनचन्द्रिकया व्यवभासितं हसितमासवगन्धि मधोरिव ।**
**बकुलपुष्पमसेवत षट्पदैः शुचिरसञ्चिरसञ्चितमीप्सुभिः ॥**

मल्लिनाथः पद्यमिदं नादत्त। एतच्च–

**सुवदना–वदना–सवसंभृतस्तदनुवादिगुणः कुसुमोत्करः ।**
**मधुकरैरकरोन्मधुलोलुपैर्बकुलमाकुलमायतपङ्क्तिभिः ॥**

इति पद्यरत्नेन पुनरुक्तार्थतया प्रक्षिप्तमेव।

**सुरभिसङ्गमजं वनमालया नवपलाशमधार्यत भङ्गुरम् ।**
**रमणदत्तमिवार्द्रनखक्षतं प्रमदया मदयापितलज्जया ॥ ३७॥**

**उपहितं शिशिरापगमश्रिया मुकुलजालमशोभत किंशुके ।**
**प्रणयिनीव नखक्षतमण्डनं प्रमदया मदयापितलज्जया ॥ ३८॥**

अनयोरेकतरं प्रक्षिप्तमेवेति यमकपौनरुक्त्या नियतम्। तत्र मल्लिनाथः 'सुरभिसङ्गमजमि'ति विहाय 'उपहितमित्यादि व्याकरोति, दर्पणकारस्तु 'सुरभिसङ्गमे' त्यादि व्याख्याय 'उपहिते' त्याद्यपि तत्संदर्भेऽशतो व्याकरोति। 'शेषं पूर्ववदि'ति च तत्र पूर्वपद्यानुवृत्तिं दर्शयति। वस्तुतस्त्वत्र द्वितीयस्यैव पद्यस्य प्रक्षिप्तत्वं मान्यम्। तत्र च प्रमाणं व्यक्तिविवेके प्रथमस्यैवोद्धरणम्। दर्पणकृतोऽपि च तद् विदितम्। स ह्येतत्पद्यव्याख्याने व्यक्तिविवेकमुल्लिखति। तत्र व्यक्तिविवेके (चौखंभासंस्करणस्य ३०९ पृष्ठे) (तत्) पौनरुक्त्यमत्रैवं दर्शितं (दर्पणे यदुल्लिखितमस्ति) 'सुरभि००० इत्यार्द्रनखक्षतविशेषणं,

प्रमदार्थः, तद्विशेषणं चेति त्रितयमपि पुनरुक्तम्। सुरभिशब्दात् पुंस्त्वविशिष्टात् रमणार्थोऽवगम्यते वनमालाशब्दाच्च स्त्रीत्वविशिष्टात् कामिन्यर्थः, तद्विशेषणोपादानं तु व्यर्थमेव, व्यावर्त्याभावात्। तेन यथा कामुकसङ्गम–समुत्थमङ्गनया लोहितं वक्रं च नखक्षतं धार्यते तद्वद् वनमालया वसन्तसमागमजं नवं भङ्गुरं च पलाशमधार्यतेति समुदायादयमर्थः सचेतसामुन्मिषत्येव। यतोऽलङ्कारान्तरोपकृताल्लिङ्गविशेषनिर्देशादेवार्थानां स्त्रीत्वपुंस्त्वानुमितिरनुमतैव महाकवीनाम्। यथा–'ऐन्द्रं धनुः'०० इत्यत्र शरदो नायिकात्वस्येन्दो रवेश्च नायकप्रतिनायकत्वयोरभिव्यक्तिः।'–इति। व्यक्तिविवेकव्याख्यानमपि तथ्यमिदं प्रमाणयति। तथाहि–'आर्द्रनखक्षतमिवेति भिन्नकम इव शब्दः। यापितो गमितो निर्वाहित इत्यर्थः। उपमानादेवाकार–सादृश्येन पलाशं प्रति दीयमानार्द्रनखक्षतमित्यस्मात्०० ।।'

अनयोस्तात्पर्यमीमांसया पुनः प्रथमे पुरुषकर्तृकस्य प्रमदाप्रतीका–श्रितस्य नखक्षतस्य, द्वितीये च प्रमदाकर्तृकस्य पुरुषप्रतीकाश्रितस्य तस्य वाक्यार्थविषयता समुदेति। तत्र द्वितीये शिशिरापगमपदेन वसन्तारम्भमात्रं सूच्यते, 'तपात्यये वारिभिरुक्षिता नवैर्भुवा सहोष्माणममुञ्चदूर्ध्वगम्', 'करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलम्', 'कामो वसन्तात्ययमन्दवीर्यः केशेषु लेभे बलमङ्गनाना'–मित्याद्युदाहरणेष्व–त्ययादिशब्दप्रतिपादितानामृतूनां प्रारब्धमात्रत्वस्यैवानुभविकत्वात्। एवञ्चात्र शिशिरापगमश्रीपदेन प्रतिपाद्यमानाया वसन्तश्रियाः शैशवमात्रं प्रतीयेत, न तु प्रगल्भं वयः। तथा च सति तस्यास्तादृशप्रमदौपम्यमनुचितमेव। किं च शिशिरापगमश्रीवाच्याया मधुश्रिया वसन्तपत्नीत्वमेवागमप्रमितम्। तथा हि–मणिद्वीपवर्णनप्रस्तावे कांस्यताम्रसालयोर्मध्यवर्तिन्यां कल्पवाटिकायां वसन्तस्थितिं प्रतिपादयता श्रीमद्देवीभागवतकृता मधुश्रीर्माधवश्रीश्चेत्यस्य द्वे पत्न्यौ प्रतिपादिते। यथा–

**कांस्यतालादुत्तरे तु ताम्रसालः प्रकीर्तितः ।। ३४।।**
**द्वयोस्तु सालयोर्मध्ये संप्रोक्ता कल्पवाटिका ।। ३५।।**

**तद्वनं रक्षितं राजन् वसन्तेनर्तुनाऽनिशम् ।। ३६।।**
**मधुश्रीर्माघवश्रीश्च द्वे भार्ये तस्य सम्मते ।। ३८।।**

१२ स्कं. १० अध्या.

एवमिह किंशुकेन मधुश्रिया: समागमवर्णनस्यागमविरोधितया, परस्त्रिया: पुरुषान्तरे प्रकटसंभोगस्यानुपपन्नतया च सचेतसां प्रवृत्तिरसंभवैव। किं च महाकविरसौ रसध्वनिमिमेवोपनिबन्द्धुं सर्वत्र कृतसंरम्भो दृष्ट:। कुमारसंभवे तिर्यक्संभोगचित्रणेऽप्यसौ विभावानौचित्यं परिहरन् तथाऽनुभूत:। अभिसारिका–वर्णनेष्वपि नास्य तथा प्रवृत्ति:। ततोऽनुचितविभावकममुं रसाभासमसौ किमिव निबध्नीयात्। अस्तु वा तथा, तथापि मदयापितलज्जात्वेऽपि प्रमदानां पुरुषेषु नखक्षतप्रवृत्ति: कुत्सितैव। किं च सर्व एव लताद्रुमा वनस्थली–मधुश्रियोर्भूषणतयैव कालिदासाभिमता:, न कामुकतया। स हि–

**सुरभिगन्धिषु शुश्रुविरे गिर: कुसुमितासु मिता वनराजिषु।** रघु. ९.३४
**न खलु शोभयति स्म वनस्थलीं न तिलकस्तिलक: प्रमदामिव।** रघु.४१

**लग्नद्विरेफाञ्जनभक्तिचित्रं मुखे मधुश्रीस्तिलकं प्रकाश्य ।**
**रागेण बालारुणकोमलेन चूतप्रवालोष्ठमलञ्चकार ।।** कुमार ३

**रक्ताशोक–रुचा विशेषितगुणो बिम्बाधरालक्तक:**
**प्रत्याख्यातविशेषकं कुरबकं श्यामावदातारुणम् ।**
**आक्रान्ता तिलकक्रिया च तिलकैर्लग्नद्विरेफाञ्जनै:**
**सावज्ञेव मुखप्रसाधनविधौ श्रीर्माधवी योषिताम् ।** माल. ३.५

इत्येवमादिषु काव्येषु संवादिनीमेव प्रतिपत्तिमाश्रित्य तथा दृष्टचर:। तत् कथमिवासावत्र किंशुकस्य प्रकृतिविरुद्धं मधुश्रीकामुकत्वमुपवर्णयेत्?

एवमिह 'उपहितमि'–त्यादेरेव पद्यस्य प्रक्षिप्तत्वमातिष्ठामहे आतिष्ठामहे च 'सुरभिसङ्गमजमि'त्यादेश्च पद्यस्य प्रागुक्तसमस्तानुपपत्ति–शामकतया प्रथमपाठत्वम्। कुमारसंभवे चास्य संवादिचित्रमेवमुपलभ्यते–

**बालेन्दुवक्राण्यविकासभावाद् बभुः पलाशान्यतिलोहितानि।**
**सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम्॥ ३॥**

अन्यानि च पाठान्तराण्येवं लभ्यन्ते—

**लघयति स्म न पत्यपराधजां न सहकारतरुस्तरुणीभृताम् ।**
**कुसुमिता नमिताऽलिभिरुन्मदैः स्मरसमाधिसमाधिकरोषिताम् ॥**

पद्यमिदं मल्लिनाथो नादत्ते। नि०सा० संस्करणे तु पाठान्तरत्वेनाशुद्धतया निर्दिष्टम्। तदिदम्—

**अभिनयान् परिचेतुमिवोद्यता मलयमारुतकम्पितपल्लवा ।**
**अमदयत् सहकारलता मनः सकलिकाकलिकामजितामपि ॥**

इत्यनेन दर्पण एकत्रिंशेन मल्लिनाथे च त्रयस्त्रिंशेन पद्येनाधरी— कृतार्थत्वात् पुनरुक्तप्रायमेव। न च वसन्तसर्वस्वमभिमन्यमानोऽपि सहकारं कालिदासो बकुलादिपुच्छलग्नं चिकीर्षेत्। ततः कस्यचिदाधुनिकस्यैवैतत् पाण्डित्यमिति भाति।

अतः परं क्षेपकतया स्वीकृत्य व्याख्याताः षड् श्लोका दर्पणे लभ्यन्ते। तथा हि—

**रसयति स्म रसातिशयात् सुधाभ्रमकरन्मकरन्दमलिव्रजः ।**
**सह निजाङ्गनयाभिसमुच्छ्वसन् कुसुमकोमलकोषनिषण्णया ॥**

**विहरति स्म रतिस्मरसुन्दरं तरुतलेष्वधिपुष्पसुगन्धिषु ।**
**मिथुनमाशुगचञ्चलमञ्जरीव्यजनवीजनवीतरतिश्रमम् ॥**

**विशदचन्द्रकरं सुखमारुतं कुसुमितद्रुममुन्मदकोकिलम् ।**
**तदुपभोगरसं हिमवर्षिणोऽत्ययमृतोरमृतोपमतां ययौ ॥**

**तिलकमस्तकहर्म्यकृतास्पदैः कुसुममध्वनुषङ्गसुगन्धिभिः ।**
**कलमगीयत भृङ्गविलासिनां स्मरयुतैरयुतैरबलासखैः ॥**

**गमयितुं प्रभुरेष सुखेन मां न महतीं बत पान्थवधूजनः ।**
**इति दयात इवाभवदायता न रजनी रजनीशवती मधौ ॥**

**अनलसान्यभृताऽनलसान्मनः कमलधूलिभृता मरुतेरिता ।**
**कुसुमभारनताध्वगयोषितामसमशोकमशोकलता मनः ॥**

अत्र ३, ५, ६ चेति श्लोका निर्णयसागरसंस्करणे पाठान्तरत्वेन दर्शिताः। मल्लिनाथस्त्वेषामनभिज्ञः। शेषा दर्पणोपात्तप्रतीकाननुसृत्यास्माभिर्योजिताः। तत्र प्रथमे पद्ये टीकाप्रतीकानुरोधाद् द्वितीयार्धस्य प्रथमार्धतया कल्पनाया असंभवाद्, योजनायाश्चान्यथाऽसंभवात् प्रकरणमनपेक्ष्यापि यमकं पूर्वार्द्ध एव योजितम्। पद्यमिदं कुमारसंभवस्य 'द्वन्द्वानि भावं क्रियया विवव्रु' रिति संदर्भच्छाययात्रापादितम्। न ह्यस्य तथाविधं किञ्चिदत्र प्रयोजनमस्ति। कुमारसंभवे वसन्तवर्णनाद् रतिप्रवणतोदय एवाभिप्रेतः। तदर्थमेव तत्र तिरश्चामपि ते ते भावाः ससंरम्भं प्रतिपादिताः। अत्र केवलं मृगयावसरौ–पयिकत्वमात्रं ततोऽभिप्रेतम्, अतो नात्र तादृशां भावानां प्रतिपादनं नितरामावश्यकम्। तृतीये पद्ये 'अत्यय' शब्दे नपुंसकलिङ्गता कोषविरुद्धा। सर्वत्रैवास्य पुंपठिततयैवोपलम्भात्।

५०–पद्ये पाठान्तरतया निम्नलिखितं पद्यं दर्शितमस्ति–

**उपययौ तनुतां मधुखण्डिता हिमकरोदयपाण्डुमुखच्छविः ।**
**गमयितुं प्रियसंजनितां व्यथामसहया सह यामवती स्त्रिया ॥** इति

मल्लिनाथस्यैतदेव प्राधान्येनाभिमतम्। तत्रोत्तरार्धपाठस्त्वीदृशः–

**सदृशमिष्टसमागमनिर्वृतिं वनितयाऽनितया रजनीवधूः ।** इति

तदत्र क्षेपकत्वं पाठान्तरवत्त्वं चेति विप्रतिषिद्धम्, ततोऽत्रोभयोरेव प्रक्षिप्तत्वमन्यतरस्य मूलत्वं वा नियतम्। तत्त्वेऽप्युत्तरार्धद्वयमध्ये कस्यचिदेकस्यैव मूलत्वे कतरस्य प्रक्षिप्तत्वं मान्यमिति निश्चेयम्। तदित्थं प्रश्नत्रये 'उपहिते' त्यादेर्हेमाद्रिमल्लिनाथोभयविदिततया मल्लिनाथे च

प्रधानभावेन पठितया तदितरस्यैव प्रक्षिप्तत्वं सुलभम्। मीमांस्यमाने चानयोरन्तरङ्गे प्रथमे भावप्रसादाधिक्येऽपि द्वितीयवच्चर्वणासौभगस्याभावान् मूलतां विश्वसितुं न क्षमामहे। द्वितीये तु—

**निद्रावशेन भवताप्यनवेक्ष्यमाणा पर्युत्सुकत्वमबला निशि खण्डितेव।**
**लक्ष्मीर्विनोदयति येन दिगन्तलम्बी सोऽपि त्वदाननरुचिं विजहाति चन्द्रः॥**

इत्यादिषु दृष्टचरस्य भावसौकुमार्यस्य स्फुटमुपलब्धेस्तां प्रत्येतुमुद्युक्ता अपि रजन्या मधुखण्डितात्वे हेतुं न विद्मः। न हि दिवा प्रवृत्तो मधुर्नक्तमात्मानमुपसंहरति, येनास्य विरहे यामवत्या विमनायितात्वं प्रियसमागमनिर्वृतिनैराश्येन सर्वथैव भग्नेच्छात्वं वा मन्यते। किं च खण्डिता दिनकरस्योदये तादृशं वैवर्ण्यमश्नुते, न तु हिमकरस्य। हिमकरोदये सति प्रियसमागमाभावे विरहोत्कण्ठितात्वमस्या उचितम्, न तु खण्डितात्वम्। तदानीमस्या आशाबन्धस्यात्यन्तमुच्छेदाभावात्। पूर्वोक्तपद्येऽपि प्रियसादृश्यवता चन्द्रेण विनोदवर्णनात् पूर्वमुत्कण्ठितात्वस्य तस्याप्यस्तमनात् प्रियनैराश्येनैव खण्डितात्वस्य चानुभूतत्वात्। न च खण्डितायां तानवं वर्ण्यते। रूपनिन्दाया आत्मग्लानिप्रतिबिम्बरूपायाः, प्रियविषयामर्षस्यैव च तत्र वर्णनं कविभिराद्रियते। यत्र च खण्डितात्वं वर्ण्यते तत्र नायिकान्तर—व्यतिकरो नायकस्यावश्यमुपादीयते। नास्ति चात्र तथाविधं किञ्चित्। तदित्थमत्र खण्डितात्वमेव रजन्या असिद्धं तदा तदनुरूपस्य 'सदृशे'त्यादेरुत्त—रार्धवाक्यार्थस्याप्यकुतोमुखीनत्वमापतितम्। किं चास्यैव मूलपाठत्वाभ्युपगमे 'अनितये'—त्यत्र क्तान्ताद् एतेर्नञा निर्मितम् अनितेति पदं रसवासनामत्यूह्य यमकैकपरतां कवेर्द्योतयते, द्योतयते च यमकस्य पृथग्यत्ननिर्वर्त्यताम्। ततश्चास्य रसभङ्गदोषो दुष्परिहर एव। वस्तुतोऽत्र सुरतद्वारा विगलितदर्पतैव खण्डितात्वम्। न त्वन्यासक्तेन प्रियेण भग्नाशता। सुरतमृदिताया एव नायिकायास्तनिम्नः कविषु प्रसिद्धेः। अस्मिंश्च पक्षे पूर्वोक्तापत्तिविगमात्

लब्धप्रतिष्ठे 'गमयितु'मित्यादेरेवोत्तरार्धस्य योजना कर्तुं युज्यते, तत एव प्रियेत्यादेरसहत्वस्य च स्त्रीविशेषणस्य संगतिः, सुरतमृदितात्वस्य रजन्यामारोपे मुखशब्दाल्लब्धयोरारम्भाननार्थयोरप्यभेदाध्यवसाये 'हिमकरोदयेन पाण्डुरारम्भच्छविरेवाननच्छविर्यस्या' इत्यर्थलाभे 'हिमेत्यादे'—र्नायिका— साधारणस्य रजनीविशेषणस्याप्युपपत्तिः, अपुष्टस्य च वधूशब्दार्थस्य विरतिः। सहोक्त्या च तादृशरसभङ्गदोषोऽप्युपशाम्यति। अतो भावमहिमानमनु— रुन्धानाः पाठान्तरत्वेन दर्शितमेव पद्यं मूलतयोरीकुर्मः। मल्लिनाथादृतस्य च उत्तरार्धस्य पूर्वार्धमन्यदेव किञ्चित् १२—शतकीयासु प्रतिषु विमृग्यम्।

नवमसर्गान्ते च श्लोकद्वयं पाठान्तरत्वेन दर्शितमस्ति। तथा हि—

**तदर्थमर्थज्ञ! गते गतत्रपः किमेष ते वध्यजनोऽनुतिष्ठतु ।**
**स वह्निसंस्कारमयाचतात्मनः सदारसूनोर्विदधे च तं नृपः ।**
**समेयिवान् रघुवृषभोऽथ सैनिकैः स्वमन्दिरं शिथिलधृतिर्निवर्तितः ।**
**मनोगतं गुरुमृषिशापमुद्वहन् क्षयानलं जलधिरिवान्तकं पदम् ।।**

इति। व्याख्या त्वनयोर्नास्ति। इत्थमत्र सर्वाधिकपाठान्तरवतोऽस्य नवमस्य सर्गस्य सर्वाण्यपि पाठान्तराणि सम्यगनुशीलितानि। साम्प्रतं सर्गान्तरेष्वपि यत्र क्वचन प्राप्यानि तानि समासेन प्रस्तावयामः। तत्र दशमे सर्गे—

**एकः कारणतस्तां तामवस्थां प्रतिपद्यसे ।**
**नानात्वं रागसंयोगात् स्फटिकस्येव ते स्मृतम् ।।**

इति पद्यं क्षेपकतया दर्शितमस्ति। मल्लिनाथे तु नास्ति। निर्णयसागरप्रतौ तु पादटिप्पन्यां दर्शितं दृश्यते। दर्पणोऽत्र स्मृतमितिस्थाने 'स्थितमि'ति पाठान्तरमपि दर्शयति एतच्च—

**रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते ।**
**देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः ।।**

इति पद्याद् गतार्थतया प्रक्षिप्तमेव। किं च रागस्फटिकयोर्विश्वब्रह्मणोश्च सादृश्यं तथा न संघटते यथा माधुर्यादिरसपयसोस्तयोश्च। ब्रह्मण्यु–पाधिभूतमप्येतद् विश्वं तत्र तथा प्रम्लिष्टं यथाऽभिन्नतयैव प्रतिभासमानं कथञ्चिदेवाबाह्यैः शमदमादिप्रतिपत्तिसनाथैस्तर्कणाशतैः पृथक्तयाऽसत्यतया च स्थिरीक्रियते। नैषास्य लाक्षारङ्गयोरिव गाढतरा प्रम्लिष्टता रागस्फटिकाभ्यां प्रतिनिधातुं शक्यते। तदर्थं रसपयसोरेव सादृश्यं क्षमतां बिभर्ति। अतः पूर्वपद्यस्य प्रक्षिप्तत्वं युक्तियुक्तमेव।

एकादशे सर्गे–

**कौशिकेन स किल क्षितीश्वरो राममध्वरविघातशान्तये ।**
**काकपक्षधरमेत्य याचितस्तेजसां हि न वयः समीक्ष्यते ॥**

इति प्रथमस्यैव पद्यस्य टीकान्ते पाठान्तरतया पद्यमिदं दर्शितमस्ति–

**सोऽधिगम्य किल गाधिसूनुना राममध्वरविघातशान्तये ।**
**काकपक्षधरमेत्य याचितस्तेजसां हि न वयः समीक्ष्यते ॥**

इदं च कविकण्ठाभरणदर्शितक्रमेण पद्यनिर्माणाभ्यासे व्यापृतस्य कस्यचिद् रूपान्तरकरणचापलं दृश्यते।

सप्तमस्य पद्यस्य व्याख्या कख–प्रतिभ्यां ज–प्रतौ भिन्ना दृश्यते। तत्र कख–प्रत्योः पाठान्तरत्वेन दर्शितं पद्यं ज–प्रतौ मूलत्वेन व्याख्यातम्, मूलत्वेन व्याख्यातं च पद्यं पाठान्तरत्वेन। तत्र मूलनिर्णयाय द्वितयमप्यनूद्यते–

कख–प्रतिस्था व्याख्या– 'रेजतुरिति। महौजसः कौशिकस्य पदवीमनुद्रुतौ रामलक्ष्मणौ सुतरामतिशयेन रेजतुः। किंत्तिङित्याम्। उत्तरां दिशि (शं) प्रस्थितस्य विवस्वतो रवेः पदवीमनुद्रुतौ मधुमाधवौ चैत्रवैशाखाविवेतितेजस्वितोक्तिः। वसन्ते हि सूर्यगतिवशात् स्वचिह्नान्वितौ तौ प्रवर्तेते। पाठान्तरम्–

**मातृवर्गचरणस्पृशौ मुनेस्तौ प्रपद्य पदवीं महौजसः ।**
**रेजतुर्गतिवशप्रवर्तिनौ भास्करस्य मधुमाधवाविव ॥ ७॥**

ज—प्रतौ पुनः—

श्लो० मातृवर्गेति।। ७।। टी० तौ रामलक्ष्मणौ महौजसो मुनेः कौशिकस्य पदवीं मार्गं प्रपद्य रेजतुः। किंविधौ तौ? मातृवर्गस्य चरणौ स्पृशतः तौ। कौ इव! मधुमाधवाविव चैत्रवैशाखाविव। यथा मधुमाधवौ चैत्रवैशाखौ भास्करस्य सूर्यस्य पदवीं प्रपद्य रे(रा)जेते। किं भूतस्य भास्करस्य? महत् ओजो यस्य तस्य। रेजतुरिति पाठान्तरम्। महौजसः०००००अनुद्रुतौ अनुगतौ ०००० वर्तेते।' (०००इति विन्दवः कख—प्रतिपाठाभिन्नपाठाय दत्ता ज्ञेयाः)

अनयो'र्मातृवर्गे'त्यादि पद्यमेव मल्लिनाथो व्याख्याति। तत्र वशप्रवर्त्तिनाविति 'वशात् प्रवर्त्तिनौ'—इति व्यस्ततयाऽभिमतमिति भेदः। एतदेव च समुचितं प्रतिभाति, रेजतुरिति प्रतीकमादाय दत्ताद् व्याख्यानाद् अविकलस्य पद्यस्य निर्मातुमसंभवात्। न हि 'महौजसः कौशिकस्य पदवीमनुद्रुतौ रामलक्ष्मणौ सुतरां रेजतुः, उत्तरां प्रस्थितस्य विवस्वतो मधुमाधवाविवे'ति ततो निष्क्रान्तेनान्वयवाक्येन रथोद्धता योजयितुं शक्यते। विवस्वतः स्थाने रवेः द्वयोश्च ह्रस्वनिपातयोः संघटनयैव सा कथञ्चिदित्थं योजयितुं शक्यते—

**रेजतुश्च सुतरामनुद्रुतौ कौशिकस्य पदवीं महौजसः ।**
**प्रस्थितस्य मधुमाधवौ रवेरुत्तरामिव हि रामलक्ष्मणौ ।।**

सा चेयं क्रमेलकविसंष्ठुला महाकविप्रतिभां नार्हति स्प्रष्टुम्। कख—प्रत्योः पाठस्य विपर्ययकारणं तादृशादर्शप्रतिरेव स्यात्।

त्रयोदशस्य सर्गस्य सितासितचित्रणान्ते—

**तमिस्रया शुक्लनिशेव भिन्ना कुन्दस्रगिन्दीवरमालयेव ।**
**कृत्तिर्हरेः कृष्णमृगत्वचेव भूतिः स्मरारेरिव कण्ठभासा ।।**

पद्यकमिदं पाठान्तरनाम्ना प्रदत्तमस्ति। मल्लिनाथे त्वेतन्नास्ति।

चतुर्दशसर्गस्य—

**भर्त्तुः प्रणाशादथ शोचनीयं दशान्तरं तत्र समं प्रपन्ने ।**
**अपश्यतां दाशरथी जनन्यौ छेदादिवोपघ्नतरोर्व्रतत्यौ ।।**

इत्यस्य प्रथमस्यैव पद्यस्यान्ते पद्यमिदं पाठान्तरत्वेन दत्तं दृश्यते—

**प्रोष्यागतौ तत्र ततः प्रयासादपश्यतां दाशरथी जनन्यौ ।**
**कुमुद्वती—शीतमरीचिलेखे दिवेव रूपान्तरदुर्विभाव्ये ।।**

तदत्र दशरथस्य शरीरनाशाद् दिवातनस्येन्दुबिम्बस्य चात्यन्ताविलोपात् तयोरौपम्यमनौचित्यहेतु। नचात्रेन्दुबिम्बं केनापि शब्देनोपात्तमस्ति, यदभावे तदनुरक्तयोस्तदेकाश्रययोर्वा कुमुद्वतीचन्द्रलेखयो रूपान्तरत्वरूपो दशाविपर्ययोऽत्रोपनिबध्येत। किं च दम्पत्योः सम्बन्धस्तरुव्रतत्योरेव सम्बन्धेनोपमीयते। स्वयं कालिदास एवाष्टमे सर्गे—

**अथवा मम भाग्यविप्लवादशनिः कल्पित एष वेधसा ।**
**यदनेन तरुर्न पातितः क्षपिता तद्विटपाश्रिता लता ।।**

इति तरुलतयोर्व्यतिकरेणैव दाम्पत्यमुपमाति। शाकुन्तले च प्रथमेऽङ्के वृक्षसेकप्रस्तावे सोऽयमर्थो नितरां स्फुटः। यथा—

**शकुन्तला** एष वातेरितपल्लवाङ्गुलीभिस्त्वरयतीव मां केसरवृक्षकः यावदेनं संभावयामि (इति परिक्रामति)

**पियंवदा** हला शकुन्तले! अत्रैव मुहूर्तं तिष्ठ। यावत्त्वयोपगतया लतासनाथ इव केसरवृक्षकः प्रतिभाति।

**शकुन्तला** अतः खलु त्वं प्रियंवदासि।

**प्रियंवदा** हला शकुन्तले इयं स्वयम्वरवधूः बालसहकारस्य त्वया कृत—नामधेया वनज्योत्स्नेति नवमालिका।

**शकुन्तला** हला रमणीये खलु काले एतस्य लतापादपमिथुनस्य व्यतिकरः संवृत्तः। नवकुसुमयौवना वनज्योत्स्ना बद्धपल्लवतयोपभोगक्षमः सहकारः। (इति पश्यन्ती तिष्ठति)

**प्रियंवदा** (सस्मितम्) अनसूये। जानासि किंनिमित्तं शकुन्तला वनज्योत्स्नामतिमात्रं प्रेक्षत इति।

**अनसूया** न खलु विभावयामि, कथय।

**प्रियंवदा** यथा वनज्योत्स्नाऽनुरूपेण पादपेन संगता, अपि नामैवमहमप्यात्मनोऽनुरूपं वरं लभेयेति।

पुनश्च चतुर्थेऽङ्के भगवतः कण्वस्योक्तौ—

**संकल्पितं प्रथममेव मया त्वदर्थे भर्तारमात्मसदृशं सुकृतैर्गतासि ।**
**चूतेन संश्रितवती नवमालिकेयमस्यामहं त्वयि च संप्रति वीतचिन्तः ॥**

अस्यामभिप्राय एष स्फुटः एव। मालविकाग्निमित्रेऽपि—

**विसृज सुन्दरि! सङ्गमसाध्वसं ननु चिरात् प्रभृति प्रणयोन्मुखे ।**
**परिगृहाण गते सहकारतां त्वमतिमुक्तलताचरितं मयि ॥**

इत्यनयोर्दाम्पत्यप्रतीकतया कालिदासेनोरीकृतिः स्फुटतरैव। ततः प्रकृतेऽप्यसावुपमामिमां नार्हति नोपादातुम्।

वस्तुतः करुणाप्रकरणे कालिदासो दाम्पत्यप्रतीकतयेमामेवोपमां सर्वत्रोपनिबध्नातीति कुमारसंभवादपि प्रतीयते। तत्रापि विलपन्ती रतिर्माधवं बोधयति—

**विधिना कृतमर्धवैशसं ननु मां कामवधे विमुञ्चता ।**
**अनघापि हि संश्रिता द्रुमे गजभग्ने पतनाय वल्लरी ॥** इति

शशिना पुनर्योगाय शर्वर्याः सहगमनाय च कौमुद्या उपमा कालिदासप्रिया। तथा हि—

**शशिनं पुनरेति शर्वरी दयिता द्वन्द्वचरं पतत्त्रिणम् ।**
**इति तौ विरहान्तरक्षमौ कथमत्यन्तगता न मां दहेः ॥**

इति रघावजविलापे शशिशर्वर्योर्भूयोमेलनमुपनिबध्नाति,

**शशिना सह याति कौमुदी सह मेघेन तडित्प्रलीयते ।**
**प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि ॥**

इति कुमारे रतिविलापे,

**तं स्वसा नागराजस्य कुमुदस्य कुमुद्वती ।**
**अन्वगात् कुमुदानन्दं शशाङ्कमिव कौमुदी ॥**

इति च रघौ सप्तदशे सर्गेऽतिथिवृत्तान्ते शशिकौमुद्योः सहगमनम्।

यद्यपि शशाङ्कलेखाया अपि दिवाधूसराया उपमा यत्र तत्र कालिदास उपनिबबन्ध यथा—

**शशाङ्कलेखामिव पश्यतो दिवा सचेतसः कस्य मनो न दूयतो ॥**

इति ५.४८ कुमारे

**कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ॥**

५.७१ कुमारे

**इति मदनवधूरुपप्लवान्तं व्यसनकृशा परिपालयाम्बभूव ।**
**शशिन इव दिवातनस्य लेखा किरणपरिक्षयधूसरा प्रदोषम् ॥**

४.४६ कुमारे

**किमत्र चित्रं यदि विशाखे शशाङ्कलेखामनुवर्तेते** (शाकु. ३.१२.६)

तथापि नात्र कुत्रापि दम्पत्योरात्यन्तिको विरहस्तया प्रसाध्यते। एवमेव कुमुद्वतीचन्द्रयोरपि पुनर्योगायैवोपनिवेशस्तत्र तत्र संदर्भे दृश्यते। न तु करुणमूर्त्तयेऽत्यन्तविरहाय। किं च शशाङ्कलेखाकुमुद्वत्योरुद्धृतैः प्रमाणैर्युवतीजनेनैवौपम्यं कवेर्विवक्षितम्, राममातरौ तु वृद्धे। तयोस्ताभ्यामिदं हार्दिकं न भवति। अतो मल्लिनाथादृतमेव पाठं मूलतया मन्महे। दर्पणे च तस्यैव तथा प्रतिष्ठा। पाठान्तरभूतं तु पद्यं कस्यचित् कालिदासहृदयमविदुषो वराकस्य बालिशभावः।

पञ्चदशस्य सर्गस्य त्रयस्त्रिंशत्तमम्—

**रामस्य मधुरं वृत्तं गायन्तौ मातुरग्रतः ।**
**तद्वियोगव्यथां किञ्चिच्छिथिलीचक्रतुः सुतौ ॥**

इति पद्यं दर्पणे नास्ति।

साम्प्रतं सञ्जीविनी–दर्पणयोः संवादविसंवादौ लेशेनोपस्थापयामः। संवादः–

| **सञ्जीविनी** | **दर्पणः** |
| --- | --- |
| १. वधलज्जितः कथमस्त्रग्रहणपरः स्यामिति चेत् तत्राह–(५.५९ अवतरणिका) | 'वधलज्जितः कथं ग्रहणपरः स्यामिति चेत् तत्राह' (५.५९ अ.) |
| २. 'उभयपक्षविनीतनिद्रा' अत्र समासविषय उभशब्दस्थाने उभयशब्दप्रयोग एव 'साधुरि–त्यनुसंधेयम्'–इति नित्यग्रहण–स्येदं प्रयोजनं वृत्तिविषय उभशब्दस्य प्रयोगो मा भूत्। उभयशब्दस्यैव यथा स्यात्, उभयपुत्र इत्यादिर्भवति इति।' (५.७३) | 'उभयपक्षेति सर्वादीनि सर्वनामानी–त्यत्र कैयटः–उभादुदात्तो नित्यमिति नित्यग्रहणस्येदं प्रयोजनं वृत्तिविषये उभशब्दस्य प्रयोगो मा भूत्। उभय–शब्दस्यैव यथा स्यात्। तेनोभयपुत्र इत्यादिर्भवतीति। कैयटविवरणे उभादुदात्तो नित्यमित्यत्रास्वरित–त्वाद्वेत्येतन्नानुवर्तते–इति (५.७३)। |
| ३. करस्थलीलारविन्दवत् त्वयाहं भ्रमयितव्य इति नृपाभिप्रायः। हस्तघूर्णकोऽयमपलक्षणक इतीन्दुमत्यभिप्रायः (६.१३) | 'करस्थो लीलारविन्दवत् त्वयाहं भ्रमयितव्य इति नृपाभिप्रायः। हस्तघूर्णकोऽयमलक्षण इतीन्दु–मत्यभिप्रायः (६.१३)' |
| ४. प्रावारोत्क्षेपच्छलेन 'अहं त्वां परिरप्स्य' इति नृपाभिप्रायः। गोपनीयं किञ्चिदङ्गेऽस्ति, ततोऽयं | 'प्रावारोत्क्षेपणच्छलेन–'अहं त्वामेवं परिरप्स्य' इति नृपाभिप्रायः। गोपनीयं किञ्चिदङ्गेऽस्ति ततोऽयं प्रावृणुत' |

| सञ्जीविनी | दर्पणः |
| --- | --- |
| प्रावृणुत इतीन्दुमत्यभिप्रायः, (६.१४)। | इतीन्दुमत्यभिप्रायः (६.१४)'। |
| ५. पादाङ्गुलीनामाकुञ्चनेन त्वं मत्समीपमागच्छेति नृपाभिप्रायः, भूमिविलेखकोऽयमपलक्षणक इतीन्दुमत्याशयः। भूमिविलेखनं तु लक्ष्मीविनाशहेतुः। (६.१५) | 'आकुञ्चनेन त्वं मत्समीपमागच्छेति नृपाशयः भूमिलेखकवद् हेमपीठ–लेखकोऽयमपलक्षण इतीन्दु–मत्याशयः। भूमिलेखनं हि लक्ष्मी–विनाश हेतुः। तथा लेखानिर्माण–मुर्व्याम् (००० ६.१५)' |
| ६. त्वया वामाङ्के निवेशितया सह एवं वार्त्तां करिष्य इति नृपाभिप्रायः। परं दृष्ट्वा पराङ्–मुखोऽयं न कार्यकर्ता–इतीन्दुत्यभिप्रायः। (६.१६) | 'त्वया वामाङ्गनिवेशितयाहमेवं वार्त्तां करिष्य इति नृपाकूतम्। परं दृष्ट्वा पराङ्मुखोऽयं न कार्यकर्ता इतीन्दुमत्यभिप्रायः (६.१६)' |
| ७. 'अहं तव नितम्बे एवं नखव्र–णादीन् दास्यामीति नृपाशयः, तृणच्छेदकवत् पत्रपाटकोऽय–मपलक्षणक' इतीन्दुमत्याशयः। (६.१७) | 'अहं तव नितम्ब एवं नखव्रणादीन् दास्य' इति नृपाभिप्रायः। तृणच्छे–दकवत् पत्रपाटकोऽयमपलक्षण इतीन्दुमत्याशयः (६.१७)' |
| ८. अहं त्वया सहैवं रंस्य इति नृपाभिप्रायः। अक्षचातुर्ये कापुरुषोऽयमितीन्दुमत्यभिप्रायः, 'अक्षैर्मा दीव्य' इति श्रुति–निषेधात् (६.१८)। | 'अहं त्वया सहैवं रंस्ये–इति नृपाभिप्रायः। अक्षचातुर्यात् कापुरुष इतीन्दुमत्यभिप्रायः। अक्षैर्मा दीव्य इति श्रुतिनिषेधात् (६.१८)। |

| सञ्जीविनी | दर्पणः |
|---|---|
| ९. किरीटवन्मम शिरसि स्थितामपि त्वां भारं न मन्य इति नृपाभिप्रायः। शिरसि न्यस्तहस्तोऽयमपलक्षण इतीन्दुमत्यभिप्रायः (६.१९) | 'किरीटवन्मम शिरसि स्थितामपि त्वां भारं न मंस्य इति नृपाभिप्रायः। शिरसि न्यस्तहस्तोऽयमलक्षण इतीन्दुमत्यभिप्रायः (६.१९) |
| १०. मथुरायां गङ्गाऽभावं सूचयत्यपिशब्दः। मथुरालवणासुरवधकाले शत्रुघ्नेन निर्मास्यत इति वक्ष्यति (१५.२८) तत्कथमधुना मथुरासंभव इति चिन्त्यम्। मथुरा मधुरापुरीति शब्दभेदः। यद्वा सान्या (६.४९)। | 'मथुरायां गङ्गाऽभावं सूचयत्यपिशब्दः। कालिन्दीतीरे मथुरा लवणासुरवधकाले शत्रुघ्नेन निर्मास्यत इति वक्ष्यति (१५.२९) तत्कथमधुना मथुरासंभव इति चिन्त्यम्। मथुरा मधुरापुरीति शब्दभेदप्रकाशः। यद्वा साऽन्या (६.४८)। |
| ११. उरगाख्यस्य पुरस्य पाड्यदेशे कान्यकुब्जतीरवर्त्तिनागपुरस्य नाथमेत्य (६.५९)। | 'उरगाख्यस्य पुरस्य नागपुरस्य नाथमेत्य (६.५९) |

हेमाद्रिमल्लिनाथावन्योन्यापरिचितौ। तथाप्यनयोरिमां भूमिमापन्नोऽक्षरसंवादो नूनं विस्मयास्पदम्। एतद्ध्यस्माकं संप्रदायकल्पनां द्रढयति। साहित्यविद्यायामभिनवगुप्तपादेभ्यः प्राप्तदीक्षस्थ क्षेमेन्द्रस्य—'पठेत् समस्तान् किल कालिदासकृतप्रबन्धान्'—इति कवित्वोपयोगी प्रणयो हि शास्त्रार्थदुर्दिनेष्वपि कालिदासस्य काव्यानां सांप्रदायिकं रहस्यं रक्षितुं प्राभवदिति मन्महे। नो चेत् महामेधसोऽप्येते कल्पनान्तरं किमिति नाचिकीर्षन्। ते हि गुरुशिष्यसंप्रदायागता एव वाक्यावलीः कण्ठस्थीकृत्योदाहरन्। न हीमे

परिणतप्रज्ञा: पदावलीदरिद्रा यतोऽन्यतमस्य ताश्चोरयेयु:। वासवदत्ता–कादम्बर्यो:, रघुवंशमृच्छकटिकयोरन्येष्वपि चैवम्विधेषु प्राचीनेषु काव्येषु स्थितिरियं तद्विदामपरोक्षैव। वस्तुतो विद्वत्समाजे प्रचलितानाभाणकप्रख्यान् भावान् परस्वममन्यमाना एवैते जगृहु:। टीकाकृतोरपि चैषैव पदवी विद्वद्भि: स्वीकार्या। साम्प्रतं हेमाद्रिमल्लिनाथयोर्विसंवादानपि प्रस्तुम:—

उद्धृतै: प्रमाणै सिद्धमेवैतद् यद् दर्पणकृतो व्याख्यापद्धतिरन्वयमुखी नास्ति। स हि विशेष्यमात्रेण वाक्यार्थयोजनां कृत्वा विशेषणानि किंशब्दसाह्येन पश्चाद् विवृणोति। मल्लिनाथश्चान्वयमुखेनैव सर्वं व्याख्याति। द्वयोरप्यनयो: पद्धत्योरन्वयमुख्यं व्याख्यानसौकर्यमवश्यमनुभूयते, तच्च लघुत्रयीं, बृहत्त्रयीं शास्त्रान्तराणि च व्याचिकीर्षोर्मल्लिनाथसूरेर्नूनं समुचितमेव। बालास्तु तत्र नाधिकं प्रगल्भन्ते। दर्पणपद्धत्यां तु नैषा स्थिति:। सा हि सुगमा, शोभना, प्रायेण निखिलैरेव टीकान्तरकृद्भिरुपगता चास्ति। मल्लिनाथो विस्तरभीरुतया नामूलं लिख्यते किञ्चिदिति यत् प्रतिजज्ञे, तत्र तस्यात्ममतिरेव प्रमाणभूता। सा च दर्पणेऽनुशीलिते नूनमनेकत्र न्याय्यादपि विषयात् पराङ्मुखी दृश्यते। एतच्चात्र निदर्शनै: स्पष्टीक्रियते।

तृतीयस्य सर्गस्य 'लिपेर्यथावद् ग्रहणे'ति पद्ये मल्लिनाथो लिपिपदं—'लिपे:' पञ्चाशद्वर्णात्मिकाया मातृकाया' इयतैव व्याचख्यौ। के नु ते वर्णा:, कुतस्ते प्रारभ्यन्ते, कुत्र च पर्यवस्यन्तीति जिज्ञासायां शिक्षाग्रन्था एव व्युत्पित्सुशरणम्। दर्पणकृत् तु—'लिपे: अकारादिक्ष–कारान्तानामक्षराणामि'ति तद् विशदयति। येन व्याख्यातृकालिको मातृकेतिहासोऽप्याध्यक्ष्यमुपयाति। किं च मल्लिनाथोऽस्मिनेव पद्ये चूडाकर्मण: कृते वय:प्रभृतिमात्रं निर्दिशति। अस्मिँश्च व्याख्याने कौटल्यवचनमप्येव–मुद्धृतमस्ति— 'वृत्तचूलकर्मा लिपिसंख्यानं चोपयुञ्जीते'ति। मल्लिनाथो–ऽप्यन्यत्र कौटल्यमुद्धरति। अत्रानुद्धरन्नसौ चूडाकर्मलिपिविज्ञानयो: पारम्परिकं क्रमं निर्देष्टुं न प्रभवतीति नूनमुपालम्भपात्रम्।

'उमावृषाङ्कौ शरजन्मना यथे' त्यादि तृतीयसर्गीये पद्ये मल्लिनाथः पद्यान्तरस्मृतमपि व्यक्तिविवेकमत्र विस्मरति। दर्पणे न केवलो व्यक्तिविवेकः, यावत् साहित्यमीमांसापि स्मर्यते। व्यक्तिविवेके हि दोषज्ञग्रामणीस्तत्कविः श्रीमान् राजानको महिमाचार्यो द्वितीयं विमर्शमनेनैव पद्येन परिच्छिनत्ति। स हि तत्र—'ता एता दोषजातयो महाकवीनामपि दुर्लक्षाः। यथा—'उमावृषाङ्कौ' (पूर्णं पद्यम्) इत्यत्र यथातथाशब्दाभ्यामेव मागधीनृपयोः उमावृषाङ्कसाम्यं शचीपुरन्दरसाम्यं च, सुतस्य च शरजन्मजयन्तसादृश्यमवगमितमिति यत् तयोस्तस्य च पुनस्तत्सादृश्यवचनं तत् पुनरुक्तमेव। तथा—उपमानयोर्यो निर्देशक्रमः प्रक्रान्तः स उपमेययोः क्रमे भेदं नीत इति निर्देशप्रक्रमभेदो दोषः। तत एव च तत्समावित्यत्र अवाच्यवचनदोषोऽपि तावत् स्फुट एव, उपमानयोग्यत्वानुपपत्तेः। किं च तथाशब्दस्य यद् वचनं सोऽवाच्यवचनं दोषः। तद्व्यतिरेकेणाप्यर्धयोर्विपर्यासमात्रेण तदर्थावगतिसिद्धेः। तस्मादेवमत्र पाठः श्रेयान्—

**सुजन्मना तेन सुतेन तावुभौ ननन्दतुः सा च, विशांपतिश्च स** इति। एवं महता संरम्भेण पद्यमिदं मीमांसते। दर्पणकृदत्र मीमांसामिमामेवं स्मरति—'अत्रोपमाबलादेव गौरीशचीसाम्ये लब्धे 'तत्सदृशेन तत्समावि'—त्यर्थः पुनरुक्तप्राय एवेति व्यक्तिविवेककृत्।' इति।

**तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ ।**
**करीव सिक्तं पृषतैः पयोमुचां घनव्यपाये वनराजिपल्वलम् ॥**

इति पद्ये मल्लिनाथो 'मृत्सुरभि' पदं 'मृदा सुगन्धि' इति व्याख्याय, अन्ते गर्भिणीनां मृद्भक्षणं लोकप्रसिद्धमेवेति भावमदर्शयत्। हेमाद्रिस्तु 'मृदा सुरभि' इति व्याख्याय यद्वा—'सार्वभौमप्रसूताया मुखं मृत्सुरभि स्मृतमि'ति प्रमाणपुरस्सरं कल्पान्तरमपि ददाति। एवमेव—'दिवं मरुत्वानिवे'ति ततोऽनन्तरीये पद्ये 'तथाविधेऽभिलाषे' इति पदद्वये पूर्वं मल्लिनाथो 'मृद्रूपे'

इति 'भूविकारे' इति च व्याख्याति, द्वितीयं च 'अभिलष्यते इत्यभिलाषो भोग्यवस्तु' इति। हेमाद्रिरपि 'मृद्भक्षणरूपे, भूमिजपदार्थाभ्यवहारे'—इति पूर्वं व्याख्याति। तदत्र राजमहिष्या मृत्तिकाभक्षणप्रवृत्तिर्न संभवतीति मल्लिनाथोऽपि 'तथाविधमितिपदं भूविकारतया व्याकृत्य मनुते। न च तत्र स सार्वभौमस्य गर्भावस्थायां गार्भिण्या मुखस्य निसर्गनिर्वृत्तां मृद्गन्धितां केनचित् प्रमाणेन साधयति। किं च महाकविप्रदत्तं सादृश्यमप्यत्रामुमेवार्थं साधयति। प्रथमया वर्षया यो गन्धो भूमावुदेति नासौ बाह्येन केनचित् व्यतिकरेण जन्यते। सोऽस्याः प्राकृतो गुणः। एवं हि भूमौ यथाऽन्तःस्थितः सुरभिर्वर्षारम्भे नवाम्बुसेकादुद्भूय बहिः प्रसरति, गजादिभिश्चानुभूयते, तथैव प्रथमगर्भे राजमहिष्या अस्याः सुदक्षिणाया अपि शारीर एव सुरभिर्निरपत्यतानिदाघमतीत्य प्राप्ते प्रथमसन्तानावसरवर्षारम्भे प्रजार्थ—व्रतकर्षिताङ्गेन सम्राजाऽनुभूयते। तदित्थं मृद्भक्षणापेक्षया पार्थिवपदार्थ—भक्षणमेवात्र राजमहिष्यामुपपद्यते।

पञ्चमसर्गस्य 'नीवारपाकादि कडङ्गरीयैः' इति पद्यव्याख्यायां पाकशब्दं मल्लिनाथः 'पच्यते इति पाकः फलम्, धान्यमिति यावदि'ति व्याख्याति। हेमाद्रिस्तु तत्र संरम्भमाश्रयते। तथाहि—'नीवारस्य पाकः पचनं फलं वा ०००। तस्य पाकमूले पील्वादिकर्णादिभ्यः (कुणब्जाहचौ—५.२.२४)—इत्यत्र पीलोः पाकः पीलुकुणः फलमिति दर्शनात्। पाकः शिशौ जरानिष्ठापचने क्लेदनेषु चेति विश्वः। यद्वा नीवारेषु तृणधान्येषु पाकः अल्पा अणुत्वात् ते आदिर्यस्य तत्। अथवा—'प्रशस्ता नीवारा नीवारपाकः, ते आदिर्यस्य तत्। पाकाः प्रशस्ताः पवित्रत्वात्। प्रशंसावचनैश्चे (२.१.६६) ति समासः। पक्वा नीवारा नीवारपाकाः। पाकशब्दोऽल्पार्थः प्रशंसार्थश्च। तथा—'त्रयः पाकयज्ञा' इत्यत्र आश्वलायन—गृह्यनारायणीय—वृत्तौ—'पाकयज्ञा अल्पयज्ञाः प्रशस्तयज्ञाश्च। आल्प्यप्रशंसयोरुभयोः पाकशब्दः। योऽस्माकं पाकतर इत्यत्राल्पत्वे पाकशब्दः। तं पाकेन

मनसाऽपश्यमिति, यो मां पाकेन मनसेत्यत्र प्रशंसायामिति—विवेचयति।

मल्लिनाथः 'पुत्रं लभस्वात्मगुणानुरूपमि'ति ५.३४ पद्यस्य 'आत्मगुणानुरूपमि'ति पदेऽनुरूपशब्दसमासमुपैक्षिष्ट। सहि—'त्वया तुल्यगुण'मिति पर्यायेणैवातुष्यत्। दर्पणकृत्त्वत्र शाब्दीं व्युत्पत्ति-मप्येवमुल्लिखति—'अनुरूपमि'ति 'अव्ययं विभक्ति (२.१.६)—इत्यादिना अव्ययीभावे क्लीबता स्यात्। अथ—'कुगति प्रादयः (२.२.१८) इत्यनुगतो रूपमनुरूप इति तत्पुरुषे कृतेऽपि परवल्लिङ्गता द्वन्द्वतत्पुरुषयोरि-(२.४.२६) ति स एव दोष इति चेत्, न, द्विगुप्राप्तापन्नालं गतिपूर्वसमासेषु निषेधो वक्तव्य (प्रतिषेधो वाच्यः = वा० १५४५) इति परवल्लिङ्गता-निषेधात् निष्कौशाम्बिरिव पुँल्लिङ्गता भवति।' प्रयोगान्तरैश्चामुं पुष्णाति—'तथाच कुमारसंभवे—आत्मानुरूपां विधिनोपयेमे (१.१८) इति, मेघदूते च मार्गं तावच्छ्रृणु कथयतस्त्वत्प्रयाणानुरूपमिति। रूपं स्वभावे सौन्दर्य इति विश्वः।' इति।

**ब्राह्मे मुहूर्त्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमारम्**

—इति ५.३६ पद्ये मल्लिनाथो—'ब्राह्मे तस्येदम् (पा० ४.३.१२०) इत्यण्। ब्रह्मदेवताकेऽभिजिन्नामके मुहूर्ते' इत्येव केवलं व्याचक्रे। हेमाद्रिस्त्वत्र प्रमाणान्यप्युपन्यस्यति। तथाहि—'ब्रह्मा देवता यस्य तद् ब्राह्मम्। तस्मिन् ब्राह्मे मुहूर्ते। अष्टमो मुहूर्तो ब्राह्मः। ननु ब्राह्मे मुहूर्ते चोत्थाय चिन्तयेदात्मनो हितमिति रात्रेः पश्चिमयामे रूढिः। 'पूर्वरात्रौ महारात्रस्ततश्चापररात्रकः ब्राह्मयोऽथेतिक्रमाद्यामा' इति यादवप्रकाशः। तत्र हि ब्राह्मणो देवस्य अध्ययनप्रवृत्तिं निमित्तीकृत्य ब्रह्मशब्दः प्रयुक्तः। नाडिकाद्वयं हि मुहूर्त्तः, तस्य यामवाचकत्वं दोषः। स च मुहूर्त्तो ब्रह्माधिदेवतश्च न भवतीति तन्न। ते च मुहूर्ता ज्योतिषरत्नमालायाम्—

रुद्रा हि मित्रपितरौ वसुवारिविश्वे वंद्या (देवा) विधिः शतमखः पुरुहूतवह्नी।
नक्तञ्चरश्च वरुणार्यमयोनयश्च प्रोक्ता दिने दश च पञ्च तथा मुहूर्ताः॥

निशा मुहूर्ता गिरिजाजपादाऽहिर्बुध्न्यपूषाश्वियमाग्नयश्च ।
विधातृचन्द्रादितिजीवविष्णुतिग्मद्युतित्वष्टृसमीरणाश्चेति ।।
ब्राह्म्यो मुहूर्तोऽभिजिदष्टमो यस्तस्मिन्नपाचीं ककुभं विहाय ।
प्रशस्यते यानमशेषदिक्षु सर्वाणि कार्याणि च यान्ति सिद्धिमिति ।। ति।

यद्यपि च दिवा च निशि च ब्राह्ममुहूर्तसद्भावस्तथाप्यत्र दिवैव प्रासोष्टेति मन्तव्यम्। 'नक्तं बुधो भौमशशाङ्कमन्दा गुर्वर्कशुक्रा दिनशक्तयः स्युरिति श्रीपतिपद्धत्युक्तेः प्रकाशकग्रहसूर्यस्य शुभग्रहगुरुशुक्रयोश्च दिवा बलीयस्त्वात्। बलिषु श्रेष्ठग्रहेषु महाभाग्यता स्यात्। नारदीयसंहितायां च

मध्यन्दिनगते भानौ मुहूर्तोऽभिजिदाह्वयः ।
नाशयत्यखिलान् दोषान् पिनाकी त्रिपुरं यथा ।।

एतेन सावित्रीवेलायामेवोषसि कुमारजन्म कथं न मान्यमिति शममुपयाति जिज्ञासा। किं च व्युत्पित्सोः शास्त्रान्तरप्रमाणान्यपि विज्ञातानि भवन्ति। न चैतान्यनौपयिकानीति वाच्यम्, कवेस्तादृशमुहूर्तोल्लेखसंरम्भस्योपेक्षापत्तेः। अत्रैव च पद्ये 'कुमारकल्पमि'ति पदं मल्लिनाथः—'ईषदसमाप्तं कुमारं कुमारकल्पं स्कन्दसदृशम्' इति केवलं व्याख्याति। हेमाद्रिस्तु तत्र योजनान्तर-मप्येवमुपन्यस्यति—'कौ भुवि मारकल्प' इति वेति।

मल्लिनाथः—५.४१ पद्यस्य 'वन्येतराः' इति पदे 'वन्या वने भवा इतरे येषां ते वन्येतरा अवन्या इत्यर्थः। न बहुव्रीहौ (१.१.२९) इति सर्वनामसंज्ञा— निषेधः, तत्पुरुषे सर्वनामसंज्ञा दुर्वारैव—इति विश्लेषयति। तन्मते श्लोकपाठ एवम्—

**तस्योपकार्यारचितोपचारा वन्येतरा जानपदोपदाभिः ।**
**मार्गे निवासा मनुजेन्द्रसूनोर्बभूवुरुद्यानविहारकल्पाः ।।**

इति। तथाचासौ निवासपदार्थं विशेष्यतयाऽभ्युपेयाय। हेमाद्रिस्तु उपकार्यापदार्थं विशेष्यतयाऽभ्युपेत्य 'मार्गेनिवासा' इति चैकं पदमाम्नायैवमपीदं पठति—

**तस्योपकार्या रचितोपचारा वन्येतरा जानपदोपदाभिः ।**
**मार्गे–निवासा मनुजेन्द्रसूनोर्बभूवुरुद्यानविहारकल्पाः ॥**

'वन्येतरा'–इति पदं चैवं व्याख्याति–'वन्येभ्य इतरा' त्रिलिङ्गम्। निवासपदार्थस्य विशेष्यता, पक्षे च 'अस्मिन् पक्षे निवासशब्दस्य पुल्लिङ्गत्वात् वन्येतरे इति भाव्यम्। वन्यान् निवासान् इतरयन्ति। ण्यन्तात् पचाद्यच्। इतरयन्तीति सुब्धातुः। यद्वा–वन्या इतरे येषां निवासानामिति बहुव्रीहिः, न बहुव्रीहाविति सर्वनामत्वाभावात्। वन्येतरा इति स्यात्।' वन्ध्येतरा इति च तत्र पाठान्तरमपि दर्शयति।

मल्लिनाथः–विस्रस्तमंसादपरो विलासी'ति ६.१४ पद्ये विलासिपदं विलसनशीलो विलासी– वौ कषलसकत्थस्रंभः (३.२.११३) इति घिनुण् प्रत्ययः'–इति विवृणुते। हेमाद्रिस्तु–'विलसनशीलो विलासी, लस् श्लेषणक्रीडनयोः, वौ कषलसेति घिनुण्।' इति मल्लिनाथोपात्तमर्थं प्रदर्श्यार्थान्तरमप्येवमुपच्छन्दयति–'यद्वा–
'धीरसंचारिणी दृष्टिर्गतिर्गोवृषभाञ्चिता। स्मितपूर्वमथालापो विलास इति कीर्तित' इति भरतः (ना.शा. २२.३२)। 'विलासी कामुकः कामी स्त्रीपरो लम्पट' इति शब्दार्णव' इति। यद्यपि कुमारसंभवस्य ४.५ पद्यव्याख्याने मल्लिनाथोऽपि धीरेत्यादि प्रमाणं विलासिपदार्थायोपन्यस्यति।

मल्लिनाथः ६.६ पद्ये–'कल्पद्रुमाणामिव पारिजात' इत्यस्यांश–विशेषस्य कल्पद्रुमाणां मध्ये पारिजात इव, सुरद्रुमविशेष इव। 'पञ्चैते देवतरवो मन्दारः पारिजातकः। संतानः कल्पवृक्षश्च पुंसि वा हरिचन्दनमित्यमरः।' अत्र कल्पद्रुमशब्दः पञ्चान्यतमविशेषवचनोऽपि कल्पयन्ति मनोरथानिति व्युत्पत्त्या सुरद्रुममात्रोपलक्षकतया प्रयुक्त इत्यनुसन्धेयम्। कल्पा इति द्रुमाः कल्पद्रुमा इति विग्रहः।' एतावतीमेव व्याख्यां बहुमनुते हेमाद्रिस्त्वत्र–'कृपू सामर्थ्ये, कल्पयति मनोरथं कल्पः, स चासौ द्रुमश्च,

तेषां मध्ये पारमस्यास्तीति पारी, 'पारिण्यब्धौ जातः पारिजातः। पञ्चानां मध्ये एकस्य कल्पद्रुमाणामिति बहुवचनम्। तथा माघकाव्ये 'कल्पद्रुमैः सह विचित्रफलैर्विरेजुः (५.१६) तेषु पारिजात उत्कृष्ट इति पारिजातग्रहणात् सिद्धम्।' इति विशदं विवेचयति। किं चासौ १०.११ पद्येपि 'पारिण्यब्धौ जातिमिति व्युत्पत्यैव पारिजातशब्दं साधयति।

८.६८ पद्ये—'मदिराक्षि? मदाननार्पितमि'—ति वाक्यांशे संबोधनभूतं मदिराक्षीतिपदं मल्लिनाथो माद्यत्यनयेति मदिरा लोकप्रसिद्धा, तथापि 'नार्यो मदिरलोचना' इत्यादिप्रयोगदर्शनात् माद्यत्याभ्यामिति मदिरे अक्षिणी यस्यास्तत्संबुद्धिः,—इति व्याचष्टे। हेमाद्रिस्तु—प्रागुक्तविलासिपदमिवेदमपि पदं पारिभाषिकतयैवं व्याचष्टे 'मदिराभिधम् अक्षि दर्पि यस्याः सा, तत्संबोधनम्। तथा संगीतकलिकायाम्

स्नग्धार्द्रमुकुलीकृता लम्भिता मदिरा तथा ।
पञ्चैवात्र समाख्याताः शौर्यादित्येन दृष्टयः ।।
सौष्ठवेन परित्यक्ता स्मेरापाङ्गमनोहरा ।
वेपमानान्तरा दृष्टिर्मदिरा परिकीर्तिते'ति ।।

माद्यन्त्याभ्यामिति मदिरे अक्षिणी यस्याः सा। 'इषिमदि' (१.५१) इत्यौणादिक किरच् प्रत्ययः। बहुब्रीहौ सक्थ्यक्ष्णोरिति ङीप्।' इति। शाकुन्तलेऽपि ४.१६ पद्ये (निर्णयसा० संस्करणे) 'मदिरेक्षणे' इति पदस्य व्याख्याने राघवभट्टः परिभाषामिमामुद्दध्रे तथाहि—'मदिरा दृष्टिः, तस्या ईक्षणमिवेक्षणमवलोकनं यस्यास्तत्सम्बुद्धिः। सप्तम्युपमानपूर्वपदस्य' इति समासः। मदिरादृष्टि— लक्षणमादिभरते।

**आघूर्णमानमध्या या क्षामा चाञ्चिततारका ।**
**दृष्टिर्विकसितापाङ्गा मदिरा तरुणे मदे ।।**

(नाट्यशा. ८.८४) इति।'

१९.१५ पद्ये मल्लिनाथः—'अमरालकेश्वरौ'—इति पदम् अमराणाम्-

अलकायाश्चेश्वरौ इन्द्रकुबेराविति व्याचष्टे। हेमाद्रिस्तु—'अमराणामलकाया—श्चेश्वराविन्द्रकुबेराविति व्याख्याय व्याख्यानान्तरमप्येवं ददाति—'संज्ञायामेकदेशव्यवहारात् भीमसेनो भीमः, सत्यभामा भामेतिवत् अमराशब्देन अमरावती कैश्चिदुच्यते। यद्वा अमरा यत्र सन्तीत्यमरा, अर्शआदिभ्योऽच्। तथाऽमरशेषे 'अमरा स्त्र्यमरावत्याम्'। विश्वश्च 'दूर्वाऽमरावती स्थूणा गुडूचीष्वमरा मतेति। अमराया अलकायाश्च स्त्रीलिङ्गनिर्देशात् स्त्रीत्वं व्यज्यते। तेनेन्द्रकुबेरयोरेकस्त्रीत्वमस्य त्वनेकस्त्रीत्वमतस्तयोर्दुर्लभमिति भावः।'

१९.१ पद्ये—'नैमिषं वशी'त्यत्र नैमिषशब्दव्याख्याने हेमाद्रिर्मल्लिनाथं दूरमतिशेते। तथाहि—'नैमिषं नैमिषारण्यम्। नैमिशमिति शान्तं पाठान्तरम्। श्रीभागवतप्रथमस्कन्धे श्रीधरीटीकायां ब्रह्मणा विसृष्टस्य चक्रस्य नेमिः शीर्यते कुण्ठीभवति तन्नेमिशम्, नेमिशमेव नैमिशम्। तथा वायवीये—

एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते ।
यत्रास्य शीर्यते नेमिः स देशस्तपसः श्रुतः ।।
इत्युक्त्वा सूर्यसंकाशं चक्रं दृष्ट्वा मनोमयम् ।
प्रणिपत्य महादेवं विससर्ज पितामहः ।।
तेऽपि हृष्टतरा विप्राः प्रणम्य जगतां प्रभुम् ।
प्रययुस्तत्र चक्रस्य यत्र नेमिर्व्यशीर्यत ।।
तद् वनं तेन विख्यातं नैमिशं मुनिपूजितम् ।। इति।

नैमिषमिति षान्तपाठे—वाराहपुराणोक्तं द्रष्टव्यम्। तथाहि—'गौरमुखं प्रति भगवद्वचनम्—

एवं कृत्वा ततो देवो मुनिं गौरमुखं तथा ।
उवाच निमिषेणेदं निहतं दानवं बलम् ।।
अरण्ये मेऽस्त्रमस्त्वेतन्नैमिषारण्यसंज्ञितम् ।
भविष्यति यथार्थं वै ब्राह्मणानां विशेषणम् ।। इति।

यद्वा—निमिषो विष्णुः, अर? लुप्तदृष्टत्वात् तस्य क्षेत्रम्। तथैव

शौनकादिवचनम्—'क्षेत्रेऽस्मिन् वैष्णवेऽयमिति।।'

क्वचिच्च मल्लिनाथेन हेमाद्रेर्विवादोऽपि दृश्यते। ८.६ पद्ये 'पैतृक' मितिपदे—'पितुरागतं पैतृकम्। 'पितुर्यच्चे' '(४.३, ७९) ति ठञ्, उगन्तत्वाच्च ठस्य कः' इति हेमाद्रिर्व्युत्पादयति। मल्लिनाथस्तु तत्र 'ऋतष्ठञ्' (४.३.७८) इति ठञ्प्रत्यय' इति। परत्वात् पितुर्यच्चेत्यनेनैवात्र ठञा भाव्यम्, अथापि तस्य यत्प्रत्ययमात्रविधानाय प्रवृत्तत्वात् ठञर्थे पूर्वसूत्रापेक्षित्वाच्च तेनैव ठञुपपत्तिर्ज्यायसी। चकारग्रहणमत्र पूर्वसूत्रेण विहितस्तु प्रत्ययो भवत्येव, यदपि भवतीत्यर्थान्तरसमुच्चयायैव जातं, न तु पूर्वविरोधाय। दर्पणकारस्य व्याकरणव्यवस्थाः क्वचन शेच्या अपि। तथाहि—

**रथी निषङ्गी कवची धनुष्मान् दृप्तः स राजन्यकमेकवीरः** (७.५६)

अत्र 'एकवीर'—शब्दस्य समासे विविधा व्युत्पत्तयो दृश्यन्ते। तत्र हेमाद्रिः—'एकश्चासौ वीरश्चेति—'पूर्वापर—प्रथम—जघन्य (समान—मध्य—मध्यमवीराश्च (२.१.५८) इति कर्मधारयः। राजदन्तादित्वात् परनिपातः—'पूर्वकालैके' (२.१.४९) ति समास इति केचित्, तन्न, विप्रतिषिद्धत्वात्।' इति व्युत्पादयति। विशेषणं विशेष्येण बहुलमित्यनेनैव कर्मधारये विहिते—'पूर्वापरेत्यादिना' पुनस्तद्विधानं पूर्वादिशब्दानां पूर्वनिपातार्थम्—इति तु सिद्धान्तकौमुदीकारः। ननु पूर्वेत्यादौ सूत्रे एकशब्दस्यानुपादानात् कथमत्र पूर्वनिपातप्राप्तिः, प्रत्युत 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन' (२.१.४९) इति सूत्रे 'एक' शब्दोपादानात् तस्य 'वीरैक' इति परनिपातापत्तिरेवेति चेत्—राजदन्तादिषु परमि (२.२.३१) ति वीरशब्दस्य परनिपातात् तथा इत्युक्तक्रमेण दर्पणकारः, विशेषणं विशेष्येण बहुलमिति सूत्रे बहुलग्रहणसामर्थ्यात् तथेति च भट्टोजिदीक्षितः (सिद्धान्तकौमुद्याम्)। तत्र राजदन्तादिगणे 'एकवीर' प्रयोगस्याभावाद् दर्पणकृतो व्यवस्थानुपादेयैव।

क्वचिच्च मल्लिनाथं दूरमतिशेते। तथाहि—

**मोक्ष्यध्वे सुरबन्दीनां वेणीबन्धानदूषितान् ।**
**शापयन्त्रितपौलस्त्यबलात्कारकचग्रहैः ॥**

इति १०.४८ पद्ये शापयन्त्रितेति पदस्य व्याख्यायां मल्लिनाथः—'शापेन नलकूबरशापेन यन्त्रिताः प्रतिबद्धाः पौलस्त्यस्य रावणस्य बलात्कारेण ये कचग्रहाः केशाकर्षाः तैः अदूषितान् अनुपहतान् स्वर्बन्दीनां हृतस्वर्गाङ्गनानां वेणीबन्धान् मोक्ष्यध्वे।' इति ब्रूते। हेमाद्रिश्च—'शापेन यन्त्रितस्य नियमितस्य पौलस्त्यस्य रावणस्य बलात्कारेण कचग्रहैः केशाकर्षणैः, अदूषितानि'—ति। स्पष्टमेव मल्लिनाथो यन्त्रितत्वं कचग्रहविशेषणतया नयति, हेमाद्रिश्च रावणविशेषणतया। मल्लिनाथमते शापेन कचग्रहाणामेव यन्त्रितत्वे बन्दीषु रावणकृतसंभोगान्तरसंभावना समुदेति। तथा च सति प्रतीकान्तरेषु दुष्टेषु वेणीनामदुष्टत्वं स्वर्बन्दीनामङ्गीकारेऽकिञ्चित्करमेव। किं च नलकूबर-शापोऽननुरक्तपरस्त्रीगमनमात्रविषयः, न तु तत्कचग्रहैकविषयः। एवं च रावणोऽननुरक्तस्वर्बालाशरीरपरामर्शे व्युपेक्षितशापोऽपि कचग्रहे कथं न तथेति प्रश्नः किमुत्तरः स्यात्। किं च शापः कर्त्रे दीयते, न तु कर्मणे। ततश्च कचग्रहेण शापयन्त्रणाया योजनं सहृदयानभिमतम्। कचग्रहश्चात्र पुरुषगतः सुरतानुभावः। हेमाद्रिमते—'रावणस्य यन्त्रितत्वे—'रावणः सुराङ्गना बलादहार्षीत् अतस्तासां तदङ्गसंस्पर्शः सीतावदेव दोषाय न भवति। यच्च दोषाय भवति तत् स्वेच्छासुरतं तादृशशापभिया सोऽयमसुरेश्वरो नाकार्षीदि'ति स्वर्बन्दीनामदूषितत्वसिद्धौ तासां वेणीमोक्षो याज्ञसेनीवेणीमोक्षतुल्य एव प्रवृत्तिविषयः सिध्यति। तथा च हेमाद्रिमते भावौचित्यमपि सुरक्षितं तिष्ठति।

न चैवं मल्लिनाथो हेमाद्रिणा गतार्थो भवति। तत्रापि महतीनामाकूतीनामुन्मीलनदर्शनात्। तथा हि—

**तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः ।**
**प्रवालशोभा इव पादपानां शृङ्गारचेष्टा विविधा बभूवुः ॥**

इत्यत्र पद्ये—शृङ्गारचेष्टापदं हेमाद्रिः—

**चेष्टा भवति पुंनार्योर्या रत्युत्थातिरक्तयोः ।**
**संभोगो विप्रलम्भश्च शृङ्गारो द्विविधो मतः ॥**

इति प्रमाणमेकमुपन्यस्य 'नयनवदनेत्यादि भरतवाक्य (नाट्यशास्त्रे ६.४९) मेकमुद्धरति। मल्लिनाथस्तत्र—'अत्र शृङ्गारलक्षणं सुधाकरे—

**विभावैरनुभावैश्च स्वोचितैर्व्यभिचारिभिः ।**
**नीता सदस्यरस्यत्वं रतिः शृङ्गार उच्यते ॥**

रतिरिच्छाविशेषः। तच्चोक्तं तत्रैव—'यूनोरन्योन्यविषयस्थायिनीच्छा रतिः स्मृते'ति। चेष्टाशब्देन तदनुभावविशेषा उच्यन्ते। तेऽपि तत्रैवोक्ताः—

**भावं मनोगतं साक्षात् स्वहेतुं व्यञ्जयन्ति ये ।**
**तेऽनुभावा इति ख्याता भ्रूविक्षेपस्मितादयः ।**
**ते चतुर्धा चित्तगात्रवाग्बुद्ध्यारम्भसंभवाः ॥**

इति तत्र गात्रारम्भसंभवाँश्चेष्टाशब्दोक्ताननुभावान् 'कश्चिद्' (६.१३–१९) इत्यादिभिः श्लोकैर्वक्ष्यति। शृङ्गाराभासश्चायम्, एकत्रैव प्रतिपादनात्। तदुक्तम्—

**एकत्रैवानुरागश्चेत्तिर्यक्शब्दगतोऽपि वा ।**
**योषितां बहुसक्तिश्चेद् रसाभासस्त्रिधा मतः ॥**

इति शृङ्गारस्य साङ्गं सप्रमाणमुपन्यस्यति। एवमेव—

**चूर्णबभ्रु लुलितस्रगाकुलं छिन्नमेखलमलक्तकाङ्कितम् ।**
**उत्थितस्य शयनं विलासिनस्तस्य बिभ्रमरतान्यपावृणोत् ॥**

१९.२५

इत्यत्र हेमाद्रिः केवलम्—'अग्निवर्णस्य शयनं००विपरीतरतादीनि अपावृणोत्०००कुङ्कुमादिचूर्णैः'— इति व्याख्याति। मल्लिनाथस्तत्र

संरम्भमीयिवान् कियद्व्याख्यातीति मुद्रितेष्वेव पुस्तकेष्ववधार्य निश्चिन्वन्तु। दूरमेतत् तिष्ठतु—

**तस्य निर्दयरतिश्रमालसाः कण्ठसूत्रमपदिश्य योषितः ।**
**अध्यशेरत बृहद्भुजान्तरं पीवरस्तनविलुप्तचन्दनम् ।।**

इति १९.२३ पद्ये कण्ठसूत्रमिति पारिभाषिकमपि पदं हेमाद्रिरुपैक्षत। स तत्र 'अपदिश्ये'त्यत्र 'अपविध्ये'ति पाठमाम्नाय कण्ठसूत्रम् अपविध्य त्यक्त्वा आश्लिष्य वा, अन्यत्र गमिष्यतीति शङ्कया (अध्यशेरत)' इति टीकते। मल्लिनाथस्तु तत्र मर्मोद्भेदयति। स हि तत्र कण्ठसूत्रलक्षणमेवं प्रयच्छति— 'कण्ठसूत्रमालिङ्गनविशेषः 'कण्ठसूत्रलक्षणं तु—'

**यत्कुर्वते वक्षसि वल्लभस्य स्तनाभिघातं निबिडोपगूढम् ।**
**परिश्रमार्थं शनकैर्विदग्धास्तत्कण्ठसूत्रं प्रवदन्ति सन्तः ।।**

इदमेव रतिरहस्ये स्तनालिङ्गनमित्युक्तम्। तथा हि—

**उरसि कमितुरुच्चैरादिशन्ती वराङ्गी ।**
**स्तनयुगमुपधत्ते यत् स्तनालिङ्गनं तत् ।।** इति।

तदित्थं महाविदुषोरनयोष्टीके परस्परमुपकुर्वाणे महाकवेर्हार्दमुपन्यस्यतः।।[१]

◈

---

१. हेमाद्रेः स्थितिकालः P.K. गोडे महोदयैः १५शती स्थिरीकृतः, वेलण्करमहोदयैश्च १३ शती। सर्वमप्येतदानुमानिकमेवास्ति। प्रथमस्य सर्गस्य दर्पणे मङ्गलोत्तरे प्राप्ते प्रश्नमिमं पश्चान्निर्णेष्यामः।

हन्त नाप्यद्य यावदपि प्रथमस्य सर्गस्य कश्चनापि हस्तलेखः।

अमदाबादीयस्य ला०द०भा०सं० विद्यामन्दिरस्यैव प्रतिः मुनिश्रीपुण्यविजयैः प्रेषितास्तीति तत्रत्यैरध्यक्षैः श्रीमद्भिः दलसुखभाईमालवणियामहोदयैः सकृपं सूचितोऽस्मि।

केरलविश्वविद्यालयस्य ग्रन्थागारे प्रथमसर्गस्यापि दर्पणोऽस्तीति मध्ये तदध्यक्षैः राघवन्पिल्लईमहोदयैः सानुक्रोशं सूचितमासीत्, किन्तु स भागो मक्किभट्टटीकायाः, न तु दर्पणस्य।

८. होशियारपुरनगरस्यापि पाण्डुग्रन्थसंग्रहे रघुवंशदर्पणस्य काचन हस्तलिखिता प्रतिः सुरक्षितास्ति यस्याः क्रमाङ्काः ५१०/१२८६ इति सूच्यन्ते।

९-१३. एता याः पञ्च प्रतयं एतासु दक्षिणलिपिलिखिताः कतिपया अस्माभिः साक्षाद् दृष्टाः त्रिवेन्द्रम्नगरग्रन्थागारे। चीनैराक्रान्ता वयमिति क्लेशकरं वृत्तं त्रिवेन्द्रमनगरस्यानन्तशयन–ग्रन्थागारस्थितैरेव श्रुतमासीदस्माभिः। पलायितास्ततो झटित्येव रायपुरनगराय। पत्रव्यवहारस्तु तैः सुदुष्कर इति तत्रैवावालम्ब्यत रघुवंशदर्पणवेतालेन।

एवमेव पूनानगरस्य भण्डारकरग्रन्थागारेऽपि दृष्टा अस्माभिः कतिचन पाण्डुग्रन्थपटबन्धाः। तेष्वपि दृष्टा एव कश्चित् केचन ग्रन्थाः।

तदित्थं महाविदुषोरनयोष्टीके परस्परमुपकुर्वाणे महाकवेर्हार्दमुपन्यस्यतः।।[१]

---

१. हेमाद्रेः स्थितिकालः P.K. गोडे महोदयैः १५शती स्थिरीकृतः, वेलण्करमहोदयैश्च १३ शती। सर्वमप्येतदानुमानिकमेवास्ति। प्रथमस्य सर्गस्य दर्पणे मङ्गलोत्तरे प्राप्ते प्रश्नमिमं पश्चान्निर्णेष्यामः।

हन्त नाप्यद्य यावदपि प्रथमस्य सर्गस्य कश्चनापि हस्तलेखः।

अमदाबादीयस्य ला०द०भा०सं० विद्यामन्दिरस्यैव प्रतिः मुनिश्रीपुण्यविजयैः प्रेषितास्तीति तत्रत्यैरध्यक्षैः श्रीमद्भिः दलसुखभाईमालवणियामहोदयैः सकृपं सूचितोऽस्मि।

केरलविश्वविद्यालयस्य ग्रन्थागारे प्रथमसर्गस्यापि दर्पणोऽस्तीति मध्ये तदध्यक्षैः राघवन्पिल्लईमहोदयैः सानुक्रोशं सूचितमासीत्, किन्तु स भागो मल्लिभट्टटीकायाः, न तु दर्पणस्य।

## संपादनसप्तति

कालिदासस्य साहित्ये सहस्रद्वयवत्सरान् ।
कोटिकोटिजनैर्भुक्ते किं न स्यात् परिवर्त्तनम् ।। १।।

विक्रमादित्यं तत्संवत्सरं चाविद्वान् विद्वाँश्च शुङ्गान् कालिदास इतो माकिं २०७५ वर्षेभ्यः पूर्वमजायतेति नः प्रतिपत्तिः। द्र कालिदास : अपनी बात इति।

लिपीनां बाहुविध्यं यद् बाहुविध्यं च यद् ध्वनौ ।
ताभ्यामाभ्यां भ्रमावस्यां लभ्या वै प्रामुखी स्वतः ।। २।।

लिपयो ब्राह्मीप्रभृतयो ध्वनयश्च वर्णा। प्राकृतेषु णं इत्येकस्यैवानेकधा ग्रहः। कालिदासो ब्राह्मीमाशिश्रिये। तामनुचक्रुस्तत्तत्प्रदेशलिपयः। अर्थानवबोधेन लिपीनामयथाग्रहणेन च लिपिकरैरन्यथालेखीति पाठान्तरणे मूलम्। पाठान्तरबाहुल्ये तु मूलं समयावधेर्दीर्घत्वम् अध्येतृजनबाहुल्यञ्च।

कालिदासस्तदा जातो यदा भारतभूतले ।
ब्राह्मी लिपिरभूद्दिव्या भारतीव जनप्रिया ।। ३।।

दिव्या भारती संस्कृतम्।

अशोकं चण्डमारभ्य यावच्चन्द्रमहीपतिम् ।
लेखे लिपिरिहैवैका ब्राह्मी ब्राह्मी न्वपूज्यत ।। ४।।

चण्डाशोकः प्रियदर्शी अशोकः। प्रसिद्धा एव तस्य ब्राह्मीलिपिलेखिता धर्मलिपयः। चन्द्रो दिल्लीपार्श्वे मेहरौलीक्षेत्रीये लौहस्तम्भ उत्कीर्णानां श्लोकानां चन्द्रः। गुप्तवंशीयश्चन्द्रगुप्तो विक्रमादित्य एव स इति पुराविदः। ब्राह्मी सरस्वतीति नाट्यशास्त्रे प्रतीतम्।

अकाराऽऽकारमात्राणामेकारौकारयोर्यथा ।
ब्राह्मीलेखे विविक्तत्वं भट्टिप्रौल्वादिगे क्व नु ।। ५।।

धूमज्योतिरिति पद्ये त्वमित्यस्य स्थाने त्वामिति पाठस्य परिकल्पनेऽपि।

अकारोकारयोस्तद्वच्छीघ्रलेखे भ्रमः सुखात् ।
ञशयोश् चवयोस्तद्वदैक्यधीः सुलभा क्व नु ।। ६।।

तस्य स्थित्वेति मेघदूतपद्ये कौतुका इत्यस्य स्थाने केतका इति जैनपाठ उकारस्य अकारत्वेन ग्रहादेव। ञशयोर्भ्रमो रघुवंशस्य १७.४७ पद्ये। तत्र शौर्यञ्चापदेति मूलस्य शौर्यं श्वापदेति ग्रहणे मूलम् ञकारशकारयोरिव चकारवकारयोर्ब्राह्मीलेख एव समानाकारप्रायः।

**अनुस्वारा विसर्गाश्च प्रातिभासिकविग्रहाः ।**
**कारकाणां विपर्यासान् ससृजुर्बहुशः क्व नो ।। ७।।**

अनुस्वारस्य विपर्यासो यथा शाकुन्तलनान्दीपद्यस्य चतुर्थे चरणे प्रपन्नांस्त इत्यस्य स्थाने प्रपन्नस्त इति। अत्र विपर्यासो विस्मरणरूपः। न च वाच्यं कल्पनामात्रत्वमस्य, कुत्रापि मूललेखे पाठस्यास्यालाभात् इति, प्रपत्तियोगेऽशरणागतस्यावने प्रभोः प्रवृत्तिरेव न घटत इति, नाटकान्तरनान्द्यन्तरे च कालिदासेनाऽपि नियमस्यास्य पालितचरत्वाच्च। विसर्गविपर्यास एव हेतुः ऋतुसंहारारम्भे **'शशाङ्कः क्षत'** इति पाठस्य स्थाने 'शशाङ्कक्षत' इति पाठे। रघुवंशेऽपि 'आस्वादे'ति २.४ पद्येऽपि **'अव्याहतः स्वैरे'**ति मूलस्य **'अव्याहतस्वैरे'**ति विपर्यासः।

**सकारश्च भकारश्च मकारश्चैकतां श्रिताः ।**
**भङ्गं सङ्गे तथा सङ्गं भङ्गे भासयितुं क्षमाः ।। ८।।**

रघुवंशस्यैव २.४२ पद्ये 'सङ्ग' इत्यस्य 'भङ्ग' इति ग्रहे इदमेव तन्त्रम्, एवमेव अभङ्गम–द्रिष्वपीत्यस्य स्थाने असङ्गमद्रिष्वपीति लेखे। एवमेव शाकुन्तलेऽपि अनसूयाया **'से'** इति प्राकृतपदस्य स्थाने **'मे'** इति पदस्य ग्रहणे उपप्लव एव सञ्जातः संवादवाक्यार्थस्य शाकुन्तलचतुर्थाङ्कारम्भे अनसूयाया उक्तौ।

**संयुक्ताक्षरविन्यासोऽप्यभूदत्र प्रजापतिः ।**
**यत्रासीदर्थविज्ञानमात्रमेकं विवेककृत् ।। ९।।**

**या वै संस्कृतवागेषा प्रकृतिप्रत्ययौ मिथः ।**
**योजयित्वा ध्वनिं तावन्निश्चितार्थं तनोति नः ।। १०।।**

ध्वनिः श्रूयमाणः शब्दः। स्थिरयते स प्रकृतिप्रत्याभ्यामेव स्वमर्थम्।

**प्राकृतेषु तु शैथिल्यं सर्वत्रैव विभाव्यते ।**
**ततस्तेषु समे लेखा विसंवादैः कषायिताः ।। ११।।**

सर्वत्रैव प्रतिवक्तृ प्रतिजनपदमञ्च। अत्र प्रमाणं भरतमारभ्य राजशेखरं यावदाचार्यपारम्परी। अत एव कालिदाससाहित्ये प्राकृत ऐकरूप्यं जनयितुं विहितभूरिश्रमा अपि पराजयन्त एव भारतीया इवाभारतीया अपि अभियुक्ताः।

लिपिकाराः प्रमादेन तामिमां लिपिकालिकाम् ।
यथाकथञ्चिदाराध्य प्रोत्तितीर्षन्ति भीषिताः ।। १२।।

यथाकथञ्चिदित्यवनवधानेनेत्यनैकान्तिकत्वप्रसक्तिः।

प्रक्षिप्तमधिकं यत् तु कालिदासस्य वाङ्मये ।
तत्रात्मैव कवेरस्य प्राड्विवेकायते परम् ।। १३।।

कुमारसम्भवाभिख्ये महाकव्येऽष्टमात् परम् ।
योजिता नव सर्गा ये सा हि काव्यार्थधिक्क्रिया ।। १४।।

यत्र शब्दाश्च नो शिष्टा अर्थाश्चापि समश्नुताम् ।
तत्र किं वा कविः कश्चित् कालिदासत्वमद्भुतम् ।। १५।।

रङ्गभङ्गादयः शब्दप्रयोगाः क्व नु संस्कृताः ।
क्षुब्धशब्दः क्व वा हन्त क्षुभितार्थप्रकाशकः ।। १६।।

मजाकिरकिराना इत्यस्मिन्नर्थे रङ्गभङ्गशब्दप्रयोगाय द्र. कुमारसम्भवस्य ९.१४, १०.१२। क्षुब्धशब्दस्य कृते च १५.९ प्रभृतीनि पद्यानि।

कदाचिच्छङ्करः कश्चिद् भागमेतं विनिर्ममे ।
यथा द्वादशसर्गस्य चतुष्पञ्चाशतीक्ष्यते ।। १७।।

सम्भवस्त्वानुकूल्यस्य दम्पत्योर्वपुषी क्रिया ।
गर्भधारणमूला सा त्वष्टमेनैव पूर्य्यते ।। १८।।

तारकस्य वधः कश्चिन्नेष्टो काव्येऽत्र लोकवत् ।
इष्टस्त्वत्र रसः कश्चित् सौन्दर्यानन्दसंप्लवः ।। १९।।

स च निष्पन्नसंपूर्णगात्रः किं नाष्टमावधि ।
यदर्थं कविताधेनुर्भूयः संक्लिश्यतान्तमाम् ।। २०।।

ऋतुसंहारनाम्नोऽपि काव्यस्यास्माभिरीक्ष्यते ।
ईदृश्येव गतिस्तस्मात् तत्कविर्भिन्न एव हि ॥ २१॥

या त्वस्मिन्नरविन्दादिमहर्षीणां रुचिस्ततः ।
तत्कवेः कालिदासेति संज्ञामात्रं हि कारणम् ॥ २२॥

महर्षिणाऽरविन्देन कालिदासस्यान्येषां काव्यानामिव ऋतुसंहारस्याप्यनुवादः कृतः।

कविना श्रीरवीन्द्रेण शाकुन्तलमवीक्षि यत् ।
वङ्गपाठाश्रितं तद्धि गेटे तद्धि प्रशंसति ॥ २३॥

अत्र कैमुतिकन्यायप्रवृत्तिरभिवीक्ष्यताम् ।
सा प्रशंसैव सौन्दर्यसिद्धेः कापि कवीशितुः ॥ २४॥

नाटकेषु द्वयोरेव कालिदासमहाकवेः ।
प्रक्षेपयोगदुष्टत्वं पाण्डुग्रन्थेषु वीक्ष्यते ॥ २५॥

अपभ्रंशस्य या गाथा उर्वशीविप्रयोजने ।
रस्यन्ते ताः स्वयं नाट्यशास्त्रकर्त्रा प्रदर्शिताः ॥ २६॥

नाट्यशास्त्रस्य द्वात्रिंशे ध्रुवाध्याये।

चित्रप्रयोगे नाट्यस्य नृत्यसंगीतमिश्रणा ।
रसायाद्रियते विज्ञैः समर्थैश्च विदां वरैः ॥ २७॥

उर्वश्यास्तु वियोगो यो दीर्घस्यास्य रसान्वयः ।
चित्रनाट्यं विना न स्यादतोऽसौ योजना विदाम् ॥ २८॥

शाकुन्तले तृतीयाङ्कगता सम्भोगवर्णना ।
वङ्गपाठेऽतिदीर्घाङ्गी कालिदासप्रिया न सा ॥ २९॥

कालिदासस्तु मुग्धायाः प्रथमं सङ्गमक्षणम् ।
संक्षिप्तमेव वैदग्ध्यान्निबन्धुं निश्चितादरः ॥ ३०॥

शाकुन्तलतृतीयाङ्के नायिकायां न मुग्धता ।
वङ्गादृते वचोयोगे प्रगल्भात्वं तु लक्ष्यते ।। ३१।।

मुग्धता नागरे पाठे दृश्यते तेन लेखकैः ।
स एव भूयसाऽऽदर्त्ति–विषयीक्रियतेतराम् ।। ३२।।

पद्यात्मकेषु सर्गेषु पद्यानामीक्ष्यतेतराम् ।
क्रमभेदो विशेषेण वर्णनासु, परन्त्वसौ ।। ३३।।

बन्धान्नान्यथयत्यन्तः–संनिविष्टान्, ततस्त्वसौ ।
कालिदासकृतत्वेन पूज्यते लेखकोत्तमैः ।। ३४।।

व्यवस्थाऽन्विष्यते तत्र हस्तलेख/पाण्डुग्रन्थसमीक्षया ।
लभ्यते चापि, ताटस्थ्यं यदि किञ्चन चर्यते ।। ३५।।

समीक्षा हस्तलेखानामात्मबुद्ध्यैव पण्डितैः ।
शक्यते कर्त्तुमादृत्य शुद्धिं सङ्गतिभासुराम् ।। ३६।।

सङ्गतिश्च शुभा सैव यस्यामल्पीयसी भवेत् ।
कल्पना सावकाशाऽथ महीयानर्थसञ्चयः ।। ३७।।

सम्वाद इतिहासादेर्यत्र पौर्वापरीशुभः ।
कोऽपि विद्यान्तरैः सार्धमान्तरैक्यस्य संभवः ।। ३८।।

सम्वादश्चित्रमूर्त्यादिराद्रियेत विदाम्वरैः ।
किन्तु तत्रोपजीव्यत्वं वाङ्मयस्यैव तार्किकम् ।। ३९।।

चित्रं निर्मीयते मेघदूतमाश्रित्य चेन्मया ।
प्रतिबिम्बायितुं तत्र ममैवावसरः कवौ ।। ४०।।

कविस्तु मयि सङ्क्रान्तो यदि चित्रायते तदा ।
क्रमः स्पष्टः सुमेधोभ्यो दुर्मेधोभ्यस्तु मे नतिः ।। ४१।।

दृश्यते वैपरीत्यं चेत् तत्र संविदियं स्वगा ।
काव्यचित्रादिसामानाधिकृतावधिकुर्महे ॥ ४२॥

हठो न तत्र युक्तः स्यादेकपक्षैकसंश्रयः ।
संशये निश्चयो नेयः प्रमाणैरेव निश्चितैः ॥ ४३॥

सतृणाभ्यवहारस्तु तेषां हि क्षपयेद् यशः ।
बाह्येभ्योऽपि जुगुप्सन्ते विकारेभ्यो न यच्चितः ॥ ४४॥

मेघदूतेऽन्तिमाः केचित् पद्यबन्धाश्चकासति ।
श्रद्दधीतैषु कः प्राज्ञः कविकाव्यविशारदः ॥ ४५॥

यदिवान्येपि भूयांसः श्लोकास्तत्र चकासति ।
तेषामपि प्रमाणत्वमभ्युपेयेत धीधनैः ॥ ४६॥

टीकितारोऽपि भूयांसः कवेरर्थप्रकाशने ।
पाठानां प्रस्तुवन्तो वै दृश्यन्ते ऽत्र परम्पराम् ॥ ४७॥

दृश्यन्ते विस्मरन्तश्च पद्यान्यपि बहूनि ते ।
टीकान्तरकृतां मान्यान्यपि वर्णनवर्णने ॥ ४८॥

सुरभिसङ्गमेति रघोः महिमहेमाद्रिभट्टपठितं पद्यं मल्लिनाथे नास्ति।

नाट्यप्रयोगे कर्तॄणां कालिदासवचः–क्रमे ।
प्रमादो लक्ष्यते भूम्ना तं तु संशमयेत कः ॥ ४९॥

काकूनां निश्चयः केन क्रियेताद्य विवक्षिते ।
वक्तव्येऽर्थे स्थिरे यासां जायते खलु निश्चयः ॥ ५०॥

स्वराणां व्यञ्जनानाञ्च पदानां चापि दृश्यते ।
वाक्यप्रस्तावयोर्यद्वद् भेदो भूयान् कृतौ कृतौ ॥ ५१॥

प्रस्तावः प्रकरणम् ।

कैश्चिन्नवाः प्रबन्धाश्च निर्मिताः ख्यापितास्तथा ।
नाम्नैव कालिदासस्यच्छन्दोज्यौतिषतन्त्रगाः ।। ५२।।

वक्तारो यत्र भूयांसो वक्तव्यार्थाश्च तादृशाः ।
तेषां नियोजने किन्तु भ्रान्ताः सर्वेऽपि लेखकाः ।। ५३।।

वाक्यमेकं परन्त्वस्य वक्ता नैकः प्रतौ प्रतौ ।
लेखकस्यैव सा भ्रान्तिस्तत्र संपादना ऽनृजुः ।। ५४।।

प्रकरीपात्रसंवादाः कालिदासक्रियासु ताम् ।
इमामेवाव्यवस्थां वै लभ्यन्ते लम्भिताङ्ककाः ।। ५५।।

एषामौचित्यमात्रस्य साहाय्येनैव जायताम् ।
व्यवस्था यदि नाट्यानामाचार्याः स्युर्विवेकिनः ।। ५६।।

डाकुमेण्टेशनं त्वत्र नितान्तमभिनन्द्यते ।
विकल्पा येन सर्वे स्युः सावकाशा निरत्ययाः ।। ५७।।

परस्परं विरुद्धार्थाः पाठाः ये लिखितास्ततः ।
स एवैकः समादेयो यस्य स्यात् संगतिः शुभा ।। ५८।।

ऋतुसंहारकाव्ये येऽनुच्छेदास्तत्र नो कथा ।
तथाप्येतेषु सर्गत्वमादृतं प्रायशः समैः ।। ५९।।

पाण्डुग्रन्थेष्वनेकेषु त एते वर्णना इति ।
लभ्यन्ते लिखिता ग्रीष्मवर्णनेत्यादिरूपतः ।। ६०।।

यदि लेखकरस्य चित्तकोषोऽ—नवधानेन खिलीकृतस्तदानीम् ।
उदयोऽन्यथितस्य केवलस्य ध्वनिसार्थस्य कृतौ लिपौ मतौ स्यात् ।। ६१।।

प्रथमं लिखितं भवेद् यदि श्रितदोषं परमं च शुद्धिमत् ।
परमं हि समाद्रियेत, नो प्रथमं, निर्विचिकित्सितेक्षया ।। ६२।।

प्रथमत्वमिवास्ति न प्रमाविषयत्वं चरमत्ववत् स्वतः ।
प्रमितिः खलु शुद्धिमीक्षते चरमत्वप्रथमत्वयोः पृथक् ।। ६३।।

प्राचीनग्रन्थलेखा ये तेषामुद्धरणामपि ।
पश्यामो मूललाभाय शुद्धां सोपानपद्धतिम् ।। ६४।।

राघवप्रभृतीनां या वैमुख्यकलुषाऽत्र धीः ।
सा मुधा द्वारपक्षाणां पिधानाय विनिश्चितिः ।। ६५।।

अनावृतकपाटेन द्वारेणान्येऽपि धीजुषः ।
प्रविश्य मार्गितुं शक्ताः शुद्धं मूलं यदृच्छया ।। ६६।।

हस्तलेखान्तराभावे त्वेकग्रन्थाश्रितेषु नो ।
सुलभोऽस्त्यन्यमार्गश्चेदुल्लेखोऽत्याज्य एव हि ।। ६७।।

अशुद्धा अपि न त्याज्याः पाठा मन्त्रेषु वर्णशः ।
अपूर्वं जायते तस्मादेव पाठादिति स्थितौ ।। ६८।।

राघवादिमहाचार्यचित्क्षोभजनिता न धीः ।
अपूर्वलाभधुग् धन्या खनन्त्येव सरित्तटीम् ।। ६९।।

स्वैरत्वविषदिग्धा ये पाण्डुग्रन्थगवेषकाः ।
तेभ्य एव तु भीताब्धिगर्भं याताऽम्बिका श्रुतिः ।। ७०।।

इति पर्यपूरि सनातनकवेः श्रीरेवाप्रसादस्य द्विवेदिनः **संपादनसप्ततिर्नाम सुश्लोककालिदासा**परसंज्ञा कृतिः।।

चैत्रशुक्लदशम्यां भौमे २०६२ गते वैक्रमाब्दे काश्याम्।।

महामहोपाध्याय

## प्रो. रेवाप्रसाद द्विवेदी

आचार्य, एम.ए., पीएच्.डी., डी.लिट्.

| | | |
|---|---|---|
| जन्म | : | १९३५ |
| जन्मस्थान | : | ग्राम-नादनेर, सीहौर (म.प्र.)<br>कवि, नाटककार, आलोचक, संस्कृत काव्यशास्त्र तथा नाट्यशास्त्र के क्षेत्र में नवीन सिद्धान्तों के प्रवर्तक आचार्य।<br>कालिदाससाहित्य के पाठनिर्धारक। |
| सेवाएँ | : | प्राध्यापक (१९५९-७०), म.प्र. शासन,<br>रीडर तथा प्रोफेसर (१९७०-९५)<br>अध्यक्ष, साहित्यविभाग (१९७०-९०)<br>संकायप्रमुख, संस्कृतविद्याधर्मविज्ञानसंकाय, काशीहिन्दूविश्वविद्यालय, सम्प्रति वहीं १९९३ से इमेरिटस प्रोफेसर। |
| सम्मान तथा पुरस्कार | : | संस्कृत क्षेत्र में उत्कृष्ट सेवा के लिए राष्ट्रपतिपुरस्कार, (The Certificate of Hounour) १९७८ से,<br>साहित्यअकादमी पुरस्कार, १९९१,<br>कल्पवल्ली पुरस्कार, १९९३,<br>वाचस्पति पुरस्कार, १९९७,<br>श्रीवाणी - अलङ्करण, १९९९,<br>पी.वी.काणे स्वर्णपदक १९८३,<br>विशिष्ट पुरस्कार, उ.प्र. संस्कृत संस्थान २००२<br>वाल्मीकि पुरस्कार, उ.प्र. संस्कृत संस्थान २००३<br>आनरेरी फैलो एशियाटिक सोसायटी, मुम्बई-१९९५<br>इमरीटस फैलो, यू.जी.सी., १९९१-९३<br>महामहोपाध्याय, तिरुपति सं.वि.वि., १९९९<br>म.प्र. शासन से २-मित्र, १-भोज तथा १-व्यास पुरस्कार, उ.प्र. शासन से पाँच विभिन्न पुरस्कार। |
| संस्थापक | : | कालिदाससंस्थान, वाराणसी-५ |
| सम्पर्क | : | २८ महामनापुरी, वाराणसी-५ |
| दूरभाष | : | ०५४२-२५७०६८२ |

महामहोपाध्याय

# प्रो. रेवाप्रसाद द्विवेदी

आचार्य, एम.ए., पीएच्.डी., डी.लिट्.

| | | |
|---|---|---|
| जन्म | : | १९३५ |
| जन्मस्थान | : | ग्राम-नादनेर, सीहौर (म.प्र.)<br>कवि, नाटककार, आलोचक, संस्कृत काव्यशास्त्र तथा नाट्यशास्त्र के क्षेत्र में नवीन सिद्धान्तों के प्रवर्तक आचार्य।<br>कालिदाससाहित्य के पाठनिर्धारक। |
| सेवाएँ | : | प्राध्यापक (१९५९-७०), म.प्र. शासन,<br>रीडर तथा प्रोफेसर (१९७०-९५)<br>अध्यक्ष, साहित्यविभाग (१९७०-९०)<br>संकायप्रमुख, संस्कृतविद्याधर्मविज्ञानसंकाय, काशीहिन्दूविश्वविद्यालय, सम्प्रति वहीं १९९३ से इमेरिटस प्रोफेसर। |
| सम्मान तथा पुरस्कार | : | संस्कृत क्षेत्र में उत्कृष्ट सेवा के लिए राष्ट्रपतिपुरस्कार, (The Certificate of Hounour) १९७८ से,<br>साहित्यअकादमी पुरस्कार, १९९१,<br>कल्पवल्ली पुरस्कार, १९९३,<br>वाचस्पति पुरस्कार, १९९७,<br>श्रीवाणी - अलङ्करण, १९९९,<br>पी.वी.काणे स्वर्णपदक. १९८३,<br>विशिष्ट पुरस्कार, उ.प्र. संस्कृत संस्थान २००२<br>वाल्मीकि पुरस्कार, उ.प्र. संस्कृत संस्थान २००३<br>आनरेरी फैलो एशियाटिक सोसायटी, मुम्बई-१९९५<br>इमरीटस फैलो, यू.जी.सी., १९९१-९३<br>महामहोपाध्याय, तिरुपति सं.वि.वि., १९९९<br>म.प्र. शासन से २-मित्र, १-भोज तथा १-व्यास पुरस्कार, उ.प्र. शासन से पाँच विभिन्न पुरस्कार। |
| संस्थापक | : | कालिदाससंस्थान, वाराणसी-५ |
| सम्पर्क | : | २८ महामनापुरी, वाराणसी-५ |
| दूरभाष | : | ०५४२-२५७०६८२ |